CC-0. Digitized by eGangotri and MIDF- Delhi

हरिदास संस्कृत सीरीज ६

श्रीधर्मराजाध्वरीन्द्रकृता

वेदान्तपरिभाषा

श्रीधनपतिसूरिसुतशिवदत्तविरचित-
'अर्थदीपिका' संस्कृत-हिन्दी-टीका-विभूषिता

सटिप्पणसम्पादकः
पं. श्रीत्र्यम्बकराम शास्त्री

भाषानुवादक
स्वामी प्रज्ञानभिक्षु

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ श्रीः ॥

हरिदास संस्कृत सीरीज

६

****

श्रीधर्मराजाध्वरीन्द्रकृता

वेदान्तपरिभाषा

श्रीधनपतिसूरिसुतशिवदत्तविरचित-
'अर्थदीपिका' संस्कृत-हिन्दी-टीका-विभूषिता

सटिप्पणसम्पादकः
पं० श्री त्र्यम्बकराम शास्त्री

हिन्दी भाषानुवादकः
स्वामी प्रज्ञानभिक्षुः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : चौखम्बा प्रेस, वाराणसी
संस्करण : नवम, वि०सं० २०७६, सन् २०१९
मूल्य : रू० ८५.०० (P. B.)
रू० १७५.०० (H. B.)

ISBN : 978-81-7080-147-8

© चौखम्बा संस्कृत सीरीज आफिस

के० ३७/९९, गोपालमन्दिर लेन
(गोपाल मन्दिर के उत्तरी फाटक पर)
गोलघर (मैदागिन) के पास
पो० बा० नं० १००८, वाराणसी—२२१००१ (भारत)
फोन : २३३३४५८ (आफिस), २३३४०३२ एवं २३३५०२० (आवास)
Fax : 0542 - 2333458
e-mail : cssoffice01@gmail.com
web-site : www.chowkhambasanskritseries.com

अपरं च प्राप्तिस्थानम्

चौखम्बा कृष्णदास अकादमी
के० ३७/११८, गोपालमन्दिर लेन
(गोपाल मन्दिर के उत्तरी फाटक पर)
पो० बा० नं० ११११८, वाराणसी–२२१००१ (भारत)
फोन : २३३५०२०

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

भूमिका

इह खलु सत्यानृतरागद्वेषादिद्वन्द्वदूषिते विरञ्चिप्रपञ्चे भवति समेषां जनानां दुःखप्रहाणपूर्वकं परमसुखाप्तये सततमुद्योगः। दुःखप्रहाणं परमसुखावाप्तिश्च मोक्ष एव। तस्य च परमात्मस्वरूपत्वाद् विवेकिनामविवेकिनां वा सर्वथैवास्त्यात्मजिज्ञासेति नात्र विसंवादः। यथोक्तम्—

इह जगति हि सर्व एव जन्तुर्निरतिशयं सुखमुत्तमं ममास्तु।
व्युपरमतु तथोपघातरूपं विषयजदुःखमिति स्पृहां करोति॥
निरतिशयंसुखं च दुःखजातव्युपरमणं च वदन्ति मोक्षतत्त्वम्।
उभयमपि जनोऽभिवाञ्छतीति स्फुटतरमस्य सदाऽस्ति मोक्षवाञ्छा।
उभयमपि परात्मनः स्वरूपं विमलचिदेकरसं स्वयं प्रकाशम्।
इति भवति विना प्रमाणमस्मिन्नुदितनयादभिवाञ्छनोपपत्तिः॥ इति।

'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' 'तरति शोकमात्मवित्' इति च। आत्मज्ञानाय च दर्शनानि द्वादशास्तिकनास्तिकभेदेन वर्तन्ते। परञ्च तेषामृते वेदान्तदर्शनात्सर्वाण्यनात्मन्यात्मबुद्धिं कुर्वन्ति आत्मज्ञानपरिपन्थीन्येवेति विचार्यं भगवता व्यासेन चतुर्लक्षणी मीमांसोद्धापिता। परञ्च तामपि द्वैतादिग्रहग्रहिलैरन्यथाऽन्यथा व्याख्याय प्रपीड्य परमार्थं स्वस्वाभिमतमन्तव्यपरतयैव योजितामुपलभ्य सर्वतन्त्रापरतन्त्रैर्भगवद्भिः शङ्करादिभिरद्वैतपरं वादरायणस्याशयमुद्घाटयाङ्कुरिता पल्लविता पुष्पिता फलिता चेति। सा चेयमतिदुरूहाऽतिविस्तृता वादिविलोडिता मन्दप्रज्ञैर्दुरवगाहाऽस्तीत्येवं सञ्चिन्त्य सकलशास्त्रपारावारीणो धर्मराजाध्वरीन्द्रो वेदान्तपरिभाषाऽऽख्यमिमं ग्रन्थं जग्रन्थ।

अयं च ग्रन्थकारोऽप्पय्यदीक्षितसमकाल इति त्रिशतवर्षात्परांचीन इति वेदान्तपरिभाषाभूमिकायामनन्तकृष्णशास्त्रिभिर्निश्चितमिति तत एवावसेयम्।

अस्य ग्रन्थस्य जगति पठनपाठनबाहुल्यमेव वैशिष्ट्यं वर्णयतीति नात्र किञ्चिद्वक्तव्यमवशिष्यते। वेदान्तशास्त्राब्धितितीर्षूणां दृढः प्लव एवायम्। ग्रन्थे ह्यस्मिन्सिद्धान्तलवा युक्तियुक्ता मन्दप्रज्ञालम्भाश्च सन्ति। एनमनेके सुरयो व्याख्यातवन्तः। यथा मूलकृत्सुनू रामकृष्णाध्वरिः वेदान्तशिखामण्याख्यटीकया विभूषितवान्। तां टीकां चामरदासः स्वामी मणिप्रभयाऽलञ्चकार। पण्डितः शिवदत्तोऽर्व-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दीपिकया, पण्डितकुलपतिर्जीवानन्द आशुबोधिन्या, शान्त्यानन्दसरस्वती भूतपूर्व-शारदापीठाधीशः पदार्थमञ्जूषया चायूयुजत् । अधुनैव पण्डितप्रवरैर्महामहोपाध्याय-रनन्तकृष्णशास्त्रिभिश्चापि स्वनिर्मितटीकया मुद्रापितम् । तथैवास्य ग्रन्थस्य मुद्रणमप्यनेकवारं शिलाक्षरैरायसाक्षरैश्च जातमित्येतत्सर्वं ग्रन्थवैशिष्ट्यसूचना-यालमेव ।

सन्ति बहवो ग्रन्था वेदान्तदर्शने परञ्चास्य ग्रन्थस्य प्रमाप्रमाणप्रमेयप्रतिपा-दनप्रकारः सर्वानतिशेते । तत्र चानेकविषया उक्ताः सर्वेऽप्यावश्यका एव, तथाऽपि विशिष्टविषयास्त्वेते—

मनस इन्द्रियत्वखण्डनम्—वह्निमान् पर्वत इत्यत्र पर्वतांशे प्रत्यक्षत्वव्यवस्था—ज्ञानगतविषयगतप्रत्यक्षत्वप्रयोजकभेदः—शब्दादपि प्रत्यक्षज्ञानोत्पत्तिप्रकारः—जाति-शक्तिवादः—अर्थापत्त्यनुपलब्ध्योः पृथक्प्रमाणत्वम्—स्वतः प्रामाण्यवादश्चेति ।

अस्य ग्रन्थस्य काशीस्थराजकीयपाठशालाशास्त्रिपरीक्षापरीक्ष्यग्रन्थेषु प्रथमवर्षे नियोजनो वेदान्तमध्यमादिपरीक्षाया अभावाच्च व्याकरणादिमध्यमोत्तीर्णानामिमं पिपठीषूणां दुर्बोधत्वं स्फुटमेवानधिगतदर्शनशास्त्राणां छात्राणामिति चिन्तयन् छात्राणां पाठनकाले यस्मिन्यस्मिन्स्थले ते क्लिष्टतामन्वभवंस्तत्र तत्र स्वल्पां टिप्पणीं कृतवानासम् ।

अन्यच्च मोहमयी (बम्बई) मुद्रितपुस्तकेऽनेकस्थले मूले टीकायां च पाठः खण्डितो वर्तते, यत्र विरामानपेक्षा तत्र विरामः, यत्र विरामापेक्षा तत्र तदभावः । पूर्वटीकाग्रन्थस्य परत्र योजनादिकं बहुलमुपलभ्यते, तैस्तैर्दोषैः पाठनावसरे विद्या-र्थिभिरस्य शुद्धमुद्रणार्थं सम्प्रार्थितश्चौखम्बासंस्कृतग्रन्थमालाऽध्यक्षैः परामृश्य संशुद्धतमं मुद्रणमकारयम् ।

मया ह्ययं स्वकृतटिप्पण्या पुस्तकान्तरस्थपाठभेदैर्मूलटीकयोरागतश्रुत्याद्यङ्क-दानेन च परिष्कृत्य संशोधितः । तथैव तत्र तत्रायुक्तपाठस्य शोधनं च कृतम् । यथा प्रथमपरिच्छेदान्ते टीकायां 'प्रदेशे प्रदेशसम्बन्धार्थम्' अत्र पुस्तकत्रयेष्वपि पाठ-स्यायुक्तत्वं दृष्ट्वाऽस्मद्गुरुवर्यैर्महामहोपाध्यायपदवीविभूषकैर्द्राविडश्रीलक्ष्मणशास्त्रि-भिस्तथा शेडे इत्युपाह्वैः पण्डितप्रवरश्रीसीतारामशास्त्रिभिश्चेतच्छोधितमिति तेषामु-पकारं सधन्यवादं प्रकटीकरोमि । अन्येऽप्यस्मिन्संशोधनकार्ये बहूपकारकाः सन्ति तेषान्नामानि कृतज्ञतया सधन्यवादं प्रकटीकरवाणि ।

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

काशीस्थराजकीयपाठशालाप्रधानाध्यक्षैः कविराजश्रीगोपीनाथशर्मभिरथंदीपिकाटीकाया हस्तलिखितमेकं पुस्तकं पण्डितश्रीनारायणशास्त्रिणः सरस्वतीभवनहस्तलिखितपुस्तकालयाध्यक्षेभ्यः सकाशात् प्रदापितमिति ताभ्यां बहूपकृतोऽस्मि ।

महामहोपाध्यायपदभ्यलङ्कारभूतेभ्यो गुरुवर्येभ्यः श्रीनित्यानन्दपन्तपर्वतीयेभ्योऽपि बहुवारं परिश्रमो दत्तः । टीकास्थान्तिमश्लोकव्याख्यानन्तु गुरुवर्यगोस्वामिश्रीदामोदरलालपण्डितैः कृतमस्ति । राजकीयपाठशालाध्यापकानां गुरुवर्यश्रीपण्डितबालबोधमिश्राणां तथा गुरुवर्यपण्डितश्रीगणपतिशास्त्रिणामपि तत्तत्काले सविशेषसूचनातो बहूपकृतोऽस्मि । सर्वापेक्षया च पठनार्थं वटपुरं (वलसाड) गतस्यापि क्रीडारतस्याज्ञस्य मम दर्शनशास्त्रास्वाददातॄणां पथिप्रापकानां पुत्र इव जनकानां प्रेमैकमूर्तीनां गुरुवर्याणां मोतीरामशास्त्रिणामधिकतरमुपकारमाजीवनं न विस्मरिष्ये । जन्मप्रदात्रोर्जनकजनन्योरीश्वरस्य वोपकृतयः केन शक्यन्ते वाचयितुमपि । प्राथमिकेऽस्मिञ्शं घनकार्ये पण्डितश्रीढुण्ढिराजशास्त्रिभिरन्यैश्च मित्रवर्यैर्बहूपकृतोऽस्मि ।

आवश्यकीयम् ।

निपुणं निरीक्ष्यमाणेऽप्यस्मिन्ग्रन्थे सीसकाक्षरयोजकदोषादक्षरदोषाद्वा अक्षराणामतिसूक्ष्मत्वाच्च याः पुरुषमतिसुलभाः काश्चनाशुद्धयो जातास्ताः क्षन्तव्याः ।

पाठभेदार्थं पुस्तकानां स्वल्पतमाः 'क ख ग घ च छ' इत्यादयः संज्ञाः कृतास्तस्याः सूचकं पत्रमन्यत्र निवेशितं तदप्यवश्यं द्रष्टव्यम् ।

अन्ते च श्रीकाशीपुराधीश्वरयोः पार्वतीत्र्यम्बकयोर्ययोः प्रसादादिदं पूर्तिमगात्तयोरुपकारान्संस्मरम् सर्वेभ्यः परिश्रमसाफल्याय प्रार्थयते—

सं० १९८४
काशी

विदुषामनुचरः—
त्र्यम्बकरामशास्त्री

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूमिका

प्राचीन काल से ही भारतवर्ष का यह वैशिष्ट्य रहा है कि वह सम्पूर्ण जगत् को आध्यात्मिक प्रकाश से प्रकाशित करता आया। जब पाश्चात्य सभ्यता, निरन्तर जड़ वस्तुओं के चिन्तन से जड़ता को प्राप्त कर रही है, तब उसे चेतन शक्ति प्रदान करने के लिए भारत के मनीषिगण धर्म और ब्रह्म की उपासना की ओर प्रेरित करते रहे हैं। कारण प्रत्येक प्राणी हो चाहे वह किसी भी श्रेष्ठ या कनिष्ठ स्तर योनि का क्यों न हो, वह चाहता है कि दुःख की आत्यन्तिक निवृत्ति एवं निरतिशय सुख की प्राप्ति हो। एतदर्थ ही कोई अर्थादि जड़ पदार्थ के पीछे पड़ा है तो कोई यज्ञ-दानादि के द्वारा स्वर्गादि प्राप्ति की इच्छा से भटक रहा है। बहुत कम ही व्यक्ति सटीक पथ पर धर्म और ब्रह्म की प्राप्ति के लिए प्रयत्नशील रहते हैं।

धर्म और ब्रह्म के विचार के लिए भारतीय मनीषियों ने पूर्वमीमांसा एवं उत्तर-मीमांसा के रूप से दर्शनद्वय का प्रणयन किया हैं। आचार्य जैमिनी ने कर्मकाण्डगत वेदवाक्यों का सुविचार करके धर्म का प्रतिपादन किया है। उनके मत में धर्म-जिज्ञासा के अनन्तर ही ब्रह्मविचार की आवश्यकता है। अर्थात् कर्मकाण्डों के द्वारा निष्काम भाव से धर्मानुष्ठान के माध्यम से अन्तःकरण शुद्ध होने के उपरान्त ही वेदान्त-विचार में अधिकार उत्पन्न होता है। इसी दृष्टि से कुछ व्याख्याकारों ने ब्रह्मसूत्र के (अथातो ब्रह्मजिज्ञासा) इस सूत्रान्तर्गत अथ शब्द का अर्थ 'आनन्तर्य' (यह अर्थ भगवान् शङ्कराचार्य का भी है) करते हुए ब्रह्मजिज्ञासा में धर्म-जिज्ञासा का आनन्तर्यत्व प्रतिपादन किया है। परन्तु ब्रह्मसूत्र के मुख्य व्याख्याता भगवान् श्रीशङ्कराचार्यजी महाराज ने अथ शब्द का आनन्तर्यार्थ करते हुए साधन-चतुष्टय के अनन्तर ब्रह्मविचार की व्यवस्था दी है। क्योंकि धर्मजिज्ञासा के पूर्व भी किसी को गुरुसुश्रुषा एवं वेदान्तादि अध्ययन द्वारा ब्रह्मजिज्ञासा उत्पन्न हो सकती है। श्रुति में भी कर्मत्याग के लिए कोई कालकृत सीमा का निर्धारण नहीं किया गया। कारण स्वयं श्रुति ही कह रही है 'अथ पुनरव्रती वा स्नातको वास्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत' (नारदपरिव्राजकोपनिषत्—३—७७)। इस मन्त्र में प्रथम क्रमसंन्यास का विधान करते हुए पुनः वैराग्य को

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राधान्य दिया गया है। सुतरां ब्रह्मचर्य, गृहस्थ एवं वानप्रस्थ आश्रम में क्रमशः प्रवेश करते हुए तीव्र वैराग्य के अभाव में भी संन्यासाश्रम स्वीकार करने का विधान उपर्युक्त मन्त्रांश से पूर्व प्रतिपादित किया है। उक्त मन्त्रांश में वैराग्य को प्राधान्य देते हुए बताया गया है कि चाहे साधक कैसी भी स्थिति में हो यदि उसे वैराग्य प्राप्त है, मुक्ति की तीव्र इच्छा है तो सर्वकर्म-संन्यास पूर्वक वेदान्त (ब्रह्म) विचार में प्रवृत्त हो जाना चाहिए। क्योंकि वेदान्त-विचार से ही प्राप्त होगा निरतिशय सुखस्वरूप तत्त्वज्ञान। जिसको शास्त्रों में परमपुरुषार्थात्मक मोक्ष कहा गया है।

मुख्य रूप से वेद को कर्मकाण्ड और ज्ञानकाण्ड के रूप से द्विधा विभक्त किया गया है। कुछ दार्शनिकों ने कर्मकाण्ड एवं ज्ञानकाण्ड के बीच उपासना काण्ड का निरूपण भी किया है। यह कर्म और उपासना मुक्ति के साक्षात् साधक न होने पर भी परम्परा से अर्थात् अन्तःकरण की शुद्धि एवं चित्त की एकाग्रता का साधन करने के कारण इनमें मोक्ष की आरादुपकारकता है ही। जैसे भी हो वेद का अन्तिम भाग ज्ञानकाण्ड जो कि उपनिषद् भाग के रूप में प्रसिद्ध है उसे वेदान्त कहा जाता है। इसी भाग के विचारात्मक ब्रह्मसूत्र एवं अनुकूल प्रतिपादक श्रीमद्भगवद्गीता आदि को भी वेदान्त शब्द से कहा गया है।

भिन्न-भिन्न अधिकारियों को लक्ष्य करके आप्तकाम भारतीय ऋषियों के द्वारा अभिव्यक्त विचारों को आस्तिक नास्तिक भेद से द्वादश दर्शन के रूप में विभक्त किया गया है। भारतवर्ष के सभी धर्म, सभी सम्प्रदाय किसी-न-किसी दर्शन पर आधारित हैं। जिन दर्शनों में निर्दुष्ट अपौरुषेय वेद को आधार मानकर विचारों को लक्ष्य या मोक्ष की ओर केन्द्रित किया गया उन्हें आस्तिक दर्शन कहा गया है जैसे वेदान्तादि। जिन दर्शनों में वेद को प्रमाण न मानते हुए केवल स्वच्छन्द विचारों से लक्ष्य की ओर अग्रसर होने का विधान है, उन्हें नास्तिक दर्शन कहा जाता है, जैसे—चार्वाकादि। चार्वाक दर्शन से आरम्भ करके वेदान्त दर्शन तक प्रत्येक भारतीय दर्शनशास्त्र का मुख्य उद्देश्य रहा आत्मा का स्वरूप बताते हुए मुक्ति का मार्ग प्रदर्शन कराना।

चार्वाकदर्शन—

चार्वाक दर्शन के प्रणेता देवगुरु बृहस्पति हैं। यह दर्शन व्यावहारिक सत्ता प्रधान है। इसे माने विना व्यवहार निभ नहीं सकता। भगवान् भाष्यकार ने

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भी 'पृथ्वादिभिचाविशेषात्' (अध्यासभाष्य ब्रह्मसूत्र) कहकर इसकी व्यावहारिकता अङ्गीकार की है। इनका कहना है कि पृथिवी, जल, तेज एवं वायु इन चार तत्त्वों के संघात देह में पान में सुपारी-चूना आदि के संयोग से मादकता की भाँति चैतन्य उत्पन्न होता है, सुतरां शरीर से अतिरिक्त आत्मा नामक कोई दूसरा वस्तु है ही नहीं। मृत्यु ही मोक्ष है। वे केवल प्रत्यक्ष को ही एकमात्र प्रमाण मानते हैं।

बौद्धदर्शन—

सौत्रान्तिक, वैभाषिक, योगाचार तथा माध्यमिक भेद से बौद्धदर्शन चार भागों में विभक्त है।

(क) वैभाषिक—

इनमें वैभाषिक सम्प्रदाय बाह्यार्थ की सिद्धि प्रत्यक्ष प्रमाण से ही मानते हैं। इनके मत में ज्ञान से अतिरिक्त ज्ञेय बाह्य वस्तु स्वीकार किया जाता है, क्योंकि व्याप्तिज्ञान के बिना अनुमान भी नहीं हो सकता। इन्होंने प्रत्यक्ष प्रमाण से गम्य अर्थ को ग्राह्य एवं अनुमान से गम्य अर्थ को अध्यवसेय के रूप से दो प्रकार का प्रमाण माना है। विनेय भेद से बुद्धि को भाषा को पृथक्-पृथक् रूप में सत्य मानने वाले को वैभाषिक कहा गया है।

(ख) सौत्रान्तिक—

सौत्रान्तिकों को बाह्यानुमेयवादी कहा गया है। इनके मत में बाह्यवस्तु स्वीकृत होने पर भी उनमें प्रत्यक्षता स्वीकार नहीं की जाती है। बाहर के जितने भी वस्तु दिखाई पड़ते हैं वे सबके-सब ज्ञानाकार से अनुमेय हैं, पर उनका अस्तित्व अस्वीकार्य नहीं है। क्योंकि बाह्य वस्तु का सर्वथा अभाव तो बाहर की तरह आन्तर वस्तु का अवभास होता है, इस प्रकार दृष्टान्त देना विज्ञानवादी के लिए समुचित नहीं है। वे रूप, विज्ञान, वेदना, संज्ञा तथा संस्कार के भेद से पाँच स्कन्ध मानते हैं। इनमें शब्दादि विषय रूपस्कन्ध है, आलयविज्ञान एवं प्रवृत्तिविज्ञान का प्रवाह विज्ञान-स्कन्ध है, सुख-दुःखादि प्रत्यय का प्रवाह वेदना स्कन्ध है, सविकल्पक प्रत्यय संज्ञा स्कन्ध है एवं धर्माधर्मादि को संस्कार स्कन्ध कहते हैं।

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

(ग) योगाचार—

योगाचार सम्प्रदाय में बाह्यार्थ को शून्य मानते हुए विज्ञानमात्र का ही अस्तित्व स्वीकार किया गया है, इनके मत में ज्ञाता और ज्ञेय दोनों विज्ञान के ही अन्तर्गत हैं। आलयविज्ञान और प्रवृत्तिविज्ञान के भेद से द्विविध होने पर भी वह विज्ञान क्षणिक एवं साकार है। क्षणिकविज्ञान को मानकर योगाचारों ने बाह्यार्थ-वाद एवं शून्यवाद का खण्डन किया है। वे कहते हैं विज्ञान को न मानने पर जगदान्ध्य प्रसङ्ग हो जायगा। इनके मत में 'सर्वं क्षणिकं, सर्वं दुःखं, सर्वं स्वलक्षणं एवं सर्वं शून्यम्' इस प्रकार चतुर्विध भावना से ही परमपुरुषार्थ की सिद्धि मानी गयी है।

(घ) माध्यमिक—

माध्यमिकों को शून्यवादी कहा गया है। वे पूर्वोक्त चतुर्विध भावना से मोक्ष की प्राप्ति को स्वीकार करते हैं। अन्तर इतना ही है कि वे योग अर्थात् अप्राप्त वस्तु की यथार्थरूप से प्राप्ति के लिए शङ्का तथा आचार अर्थात गुरूपदिष्ट अर्थ का अङ्गीकार रूप साधन योगाचार के मत में है परन्तु इनमें गुरूपदिष्ट वाक्यों में शङ्का नहीं है। इसलिए भी इन्हें माध्यमिक कहा गया है। शून्यवादी केवल अनुमान प्रमाण को ही मानते हैं। इस मत में आत्मनाश—शून्य को ही मोक्ष माना गया है।

जैनदर्शन—

जैनमत में आत्मा को मध्यम परिमाण माना गया है। ये जीव एवं अजीव भेद से दो तत्त्व मानते हैं। इसीका ही विस्तार जीव, आकाश, धर्म, अधर्म एवं पुद्गलास्तिकाय (पदार्थ) शब्द से किया गया है। इनमें संसारी और मुक्त भेद से जीव दो प्रकार के माने गये हैं। पूर्वोक्त आकाशादि को अजीव पदार्थ कहा जाता है। दूसरे प्रकार से जीव, अजीव, आस्रव, सम्बर, निर्जर, बन्ध एवं मोक्षरूप सात पदार्थ माने गये हैं। वे परोक्ष एवं अपरोक्ष भेद से दो प्रकार का प्रमाण मानते हैं। इनके मत में सततोर्ध्वगमन को ही मोक्ष माना गया है। वैसे जैन मत में भी श्वेताम्बर और दिगम्बर भेद से दो सम्प्रदाय हैं। दिगम्बर साधुओं की मान्यता है कि केवल ज्ञान से युक्त पुरुष भोजन नहीं करता एवं स्त्री को मोक्ष भी नहीं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मिलता अर्थात् इन्हें पुरुष का जन्म ग्रहण करने पर ही मोक्ष मिल सकता है। वे मोक्ष को 'कैवल्य' शब्द से व्यवहार करते हैं।

न्यायदर्शन—

न्यायदर्शन प्रणेता महर्षि गौतम ने प्रमाण, प्रमेय, संशय, प्रयोजन, दृष्टान्त, सिद्धान्त, अवयव, तर्क, निर्णय, वाद, जल्प, वितण्डा, हेत्वाभास, छल, जाति तथा निग्रह स्थान भेद से सोलह (१६) पदार्थ माने हैं एवं प्रत्यक्ष, अनुमान, उपमान और शाब्दबोध ऐसे चार प्रमाण माने हैं। न्याय शास्त्र में उक्त पदार्थों के ज्ञान से ही मोक्ष की प्राप्ति बतलाई गई है। इन पदार्थों के ज्ञान से मिथ्या ज्ञान की निवृत्ति होती है और उससे रागद्वेषादि दोषों की निवृत्ति होने पर शुभाशुभ कर्म की निवृत्ति होती है। कर्म की निवृत्ति से जन्म की निवृत्ति, उससे गर्भवास से मृत्यु पर्यन्त सम्पूर्ण दुःखों की निवृत्ति हो जाती है। इस प्रकार सकल दुःख की निवृत्ति को ही न्यायदर्शन में मोक्ष कहा गया।

वैशेषिकदर्शन—

वैशेषिकदर्शन में द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय तथा अभाव भेद से सात पदार्थ माने गये हैं। इसमें प्रत्यक्ष एवं अनुमान दो ही प्रमाण माने गये हैं। ये भी नैयायिकों की तरह पदार्थों के ज्ञान से मुक्ति मानते हैं। इनके मत में यह पदार्थों का ज्ञान ईश्वरानुग्रह से ही सम्भव है, यही विशेष है। उपर्युक्त रीति से न्याय एवं वैशेषिक दर्शन में भेद रहने पर भी प्रतिज्ञादि पञ्चावयव न्याय-प्रयुक्त विचार के साम्य को लेकर दोनों को न्याय शास्त्र कहा जाता है।

सांख्यदर्शन—

सांख्यदर्शन में महर्षि कपिल पुरुष, प्रकृति, महत्तत्त्व, अहंकार, मन, पञ्च ज्ञानेन्द्रिय, पञ्च कर्मेन्द्रिय, शब्द, स्पर्श, रूप, रस, गन्ध, आकाश, वायु, तेज, जल एवं पृथिवी भेद से पञ्चविंशति तत्त्व का विवेचन किये हैं। इसमें प्रकृति, विकृति, प्रकृतिविकृति तथा प्रकृतिविकृति से रहित इस प्रकार सामान्य रूप से चार विभाग करते हैं। सांख्यदर्शन में प्रत्यक्ष, अनुमान और आगम ये तीन प्रमाण माने गये हैं। सत्त्व, रज और तम इन तीनों की साम्यावस्था को प्रकृति

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

कहते हैं एवं यही सम्पूर्ण जगत् का कारण है। पुरुष को कारण नहीं माना गया, क्योंकि वह सर्वदा ही पुष्कर-पत्र की तरह निर्लेप रहता है। उसमें भोक्तृत्व रहने पर भी कर्तृत्व नहीं है। प्रकृति एव पुरुष के विवेक ज्ञान से आध्यात्मिकादि त्रिविध दुःखों की निवृत्तिरूप मोक्ष मिलता है।

योगदर्शन—

उपर्युक्त सांख्यदर्शन में ईश्वर माना नहीं गया, परन्तु उपर्युक्त पञ्चविंशति तत्त्व को स्वीकार करते हुए महर्षि पतञ्जलि इससे अतिरिक्त ईश्वर का भी प्रतिपादन करते हैं। वे कहते हैं 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' अर्थात् क्लेशादि से रहित पुरुष-विशेष ईश्वर है। चित्तवृत्ति को निरोध करना ही योगदर्शन का मुख्य कार्य है। इनके मत में परमेश्वर की अनुकम्पा से योगाभ्यास के द्वारा अविवेक के नष्ट हो जाने पर कैवल्य रूप मोक्ष की प्राप्ति होती है।

मीमांसादर्शन (पूर्व)—

पूर्वमीमांसादर्शन के प्रणेता महिष जैमिनि वेद के कर्मकाण्डगत वाक्यों का विचार करके निर्णय दिये हैं। इसमें धर्माधर्मादि का विचार किया गया है। वेदान्त की दृष्टि से यह शास्त्र अन्तःकरण शुद्धि के मुख्य उपाय का प्रतिपादक है। अधिकांश मीमांसकों ने छः प्रमाण माने हैं (कुमारिल भट्ट आदि)। मानव वेदों से धर्म एवं अधर्म का यथार्थ स्वरूप को जानकर तथा उसका विधिवत् अनुष्ठान करके सुखविशेष स्वर्गरूप मोक्ष को प्राप्त कर सकता है।

उपर्युक्त प्रक्रियाओं में जितने भी प्रकार का मोक्ष एवं आत्मा के स्वरूप के बारे में बताया गया है, वे सभी विभिन्न दोषों से दुष्ट हैं। अनुष्ठान के द्वारा प्राप्त मोक्ष भी शय्यादि की तरह क्षयशील होने के नाते अस्थायी सामयिक होने के नाते अनित्य है। इसलिए वेदान्त-सिद्धान्तोक्त स्वरूपानुभवात्मक मोक्ष को ही नित्य माना गया है। इससे ही निरतिशय सुखस्वरूप आत्मतत्त्व का बोध होता है।

वेदान्तसिद्धान्त में मुक्ति कोई पदार्थ नहीं है, या किसी देश या कालादि से परिच्छिन्न नहीं। इसलिए वह प्राप्य भी नहीं है। वह तो नित्य प्राप्त है, परन्तु नासमझी के कारण वह अप्राप्त की तरह प्रतीत होता है। जैसे कि अन्धकार

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिरोहित होने पर स्वतः ही वस्तुओं का प्रत्यक्ष होता है, उसी प्रकार अज्ञान की निवृत्ति होने पर आत्मस्वरूप का बोध स्वयं होता है। सुतरां अज्ञान की निवृत्ति को ही मोक्ष कहा गया है तथा अज्ञान को ही बन्धन का कारण बताया गया है। पञ्चपादिकाकार ने भी कहा है—'अज्ञानोऽस्तमयः मोक्षः स च बन्ध उदाहृतः'। इसलिए वेदान्तोक्त मुक्ति में कहीं जाना आना भी नहीं है। स्वयं भगवती श्रुति कहती है उसके प्राण का उत्क्रमण नहीं होता है। यहीं पर समा जाता है। जैसे कि घट के विनाश होने से घटान्तर्गत आकाश कहीं जाता-आता नहीं, वहीं-का-वहीं रह जाता - महाकाश में विलीन हो जाता है। उसी प्रकार अज्ञानरूप कारण-शरीर विनष्ट होने पर कार्यरूप सूक्ष्मशरीर कैसे रह सकता है? सीमाबद्धता (परिच्छिन्नता) के भङ्ग हो जाने पर वह असीम अपरिच्छिन्न के साथ विलीन हो जाता है। परमहंस श्रीरामकृष्णजी की भाषा से 'नमक का पुतला समुद्र में स्नान करने गया तो जो हुआ'।

यह वेदान्त ज्ञान प्राप्त कराने के लिए अपौरुषेय श्रुति स्वयं प्रयत्नशील है। भगवान् वेदव्यास ने—श्रुति-वाक्यों का तात्पर्य ब्रह्मात्म्यैक्यबोध में है, इस प्रकार विचार के लिए ब्रह्मसूत्र या वेदान्तदर्शन की रचना की। उत्तरवर्त्ती आचार्यों ने उसके ऊपर भाष्य, टीकाएँ तथा उस तात्पर्य को सुगमता से प्रकट करने के लिए उपनिषद् वाक्यों को ही आधार मान कर भिन्न-भिन्न ग्रन्थ प्रणयन किये हैं। वेदान्ततत्त्व प्रतिपादन के लिए उक्त रीति से सूत्र—भाष्य—टीका तथा प्रकरणात्मक अनेक ग्रन्थ विद्यमान रहने पर भी वेदान्तोक्त शब्दावलियों की परिभाषा अन्यत्र स्पष्ट रूप से उपलब्ध नहीं थी। विशेष रूप से यह अभाव पूर्ण करने के लिए ही मानो श्रीधर्मराज अध्वरीन्द्र वेदान्तपरिभाषा का निर्माण किये हैं। इसलिए 'वेदान्त-परिभाषा' अद्वैत वेदान्त के एक अनुपम प्रकरणग्रन्थ के रूप में प्रकट हुआ है।

सामान्यरूप से भारतीय दर्शन को आलोचना के तीन युगों में विभक्त किया जा सकता है। पहला दार्शनिक युग केवल सूत्रात्मक ही रहा है। क्योंकि प्राचीन काल में आद्यन्त कण्ठस्थ रखने की परम्परा रही, इसलिए मनीषियों ने तदनुकूल संक्षिप्त, सारवत् एवं विश्वतोन्मुख सूत्रों की रचना की थी। द्वितीय युग में वृत्ति, भाष्य तथा टीका आदियों की रचना करके संक्षिप्त एवं दुरूह सूत्रों को विशद

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

करने की चेष्टा की गयी। पर इसीसे एक असुविधा भी यह हुई कि वृत्ति, भाष्य और टीकाओं से समन्वित होने के नाते मूल-दर्शनसमूह वृहद् आकार धारण किया, जो कि अधिकांश व्यक्तिओं की ग्रहणक्षमता से बाहर रहा। इसीसे इन दर्शनों के ज्ञाता अत्यन्त सीमिति होने लगे। फलस्वरूप उत्तरकाल में एक प्रकार नवीन रीति से ग्रन्थों की रचना हुई। जिसे 'प्रकरण' कहा गया है। भाष्यादि सहित समग्र दर्शन-ग्रन्थों का अध्ययन करने के लिए जिन्हें सु-अवसर या सामर्थ्य न मिला हो, वे 'प्रकरण' ग्रन्थ के अध्ययन द्वारा सामान्यरूप से उन दर्शनों का ज्ञान लाभ कर सकते हैं—यही रहा 'प्रकरण' ग्रन्थ प्रणयन का मुख्य उद्देश्य। पराशरोप-पुराण में प्रकरण का लक्षण दिया गया है—

शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः॥

प्रकृत शास्त्र के एकदेश के साथ सम्बन्ध रखते हुए अर्थात् मूल प्रतिपाद्य किसी एक प्रधान विषय को अवलम्बन करके रचना की गई हो, पर मूल शास्त्र के अन्य कार्यों में अर्थात् उद्देश्य सम्पादन विषय में नियोजित ग्रन्थ-विशेष को प्रकरण आख्या दी गई है। अंग्रेजी में जिसे Monograph कहते हैं, प्रकरण प्रायः उसी प्रकार का ही ग्रन्थ होता है।

प्रकरण ग्रन्थ में ग्रन्थकार एक या दो प्रधान विषय को लेकर विचार करते हुए ग्रन्थ का मुख्य प्रतिपाद्य विषय भी निरूपण करते हैं। उदयनाचार्य विरचित न्याय-कुसुमाञ्जलि प्राचीन न्याय के तथा गङ्गेशोपाध्याय विरचित तत्त्वचिन्तामणि नव्य-न्याय के प्रसिद्ध प्रकरण—जातीय ग्रन्थ हैं। उदयनाचार्य अपने कुसुमाञ्जलि-ग्रन्थ में न्याय-दर्शन के अन्यान्य विषयों को विशेष रूप से ग्रहण न करके केवल ईश्वर को लेकर ही विचार किये हैं। इसी प्रकार तत्त्वचिन्तामणि में गङ्गेशोपाध्याय भी मुख्यरूप से न्यायदर्शन के प्रमाण पदार्थ को लेकर ही विचार-विमर्श किये हैं। सुतरां इन दोनों ग्रन्थों में प्रकरण का लक्षण विद्यमान है। इसी तरह वेदान्त दर्शन के भी कई प्रकरणग्रन्थ के प्रचलन दिखाई पड़ते हैं। वेदान्तसार, पञ्चदशी, उपदेशसाहस्री, विवेकचूडामणि, नैष्कर्म्यसिद्धि, तत्त्वप्रदीपिका, खण्डनखण्डखाद्य, अद्वैतसिद्धि इत्यादि वेदान्तदर्शन के प्रकरण-ग्रन्थ हैं। इन ग्रन्थों में भिन्न-भिन्न

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकार का मार्गदर्शन मिलता है। 'वेदान्तपरिभाषा' भी इन ग्रन्थों की श्रेणी में ही आती है। इसमें वेदान्त का प्रमाण, प्रमेय और प्रयोजन विशेष रूप से विवेचन किया गया है।

वैसे ग्रन्थों में संक्षेपनिर्वाह करने के लिए जिन संकेतों को व्यवहार किया जाता है, उसे 'परिभाषा' कहते हैं। यह परिभाषा विभिन्न शास्त्रों में भिन्न-भिन्न प्रकार की होती है। जैसे गुण एक पारिभाषिक शब्द है। यह व्याकरण शास्त्र में 'इ' के स्थान पर 'ए' कराने की विधि को समझाता है। न्यायदर्शन में यह रूप, रस, गन्ध इत्यादि चौबीस प्रकार के वस्तुओं को समझाता है। सांख्य और वेदान्त दर्शन में सत्त्व, रज और तम को समझाता है। वस्तुतः परिभाषा शब्द दो प्रकार के अर्थ में प्रयोग होता है। पहले आधुनिक सङ्केत को 'परिभाषा' कहा गया है, जिसके बारे में ऊपर ही विचार किया गया है, इस अभिप्राय से हम Technical term को पारिभाषिक शब्द कहते हैं। जिस सूत्र के द्वारा उक्त सङ्केत प्रकाशित होता है, उसे परिभाषा सूत्र कहा गया है। जो सूत्र एक अंश में रहते हुए शास्त्र को अधिकार करके उसका मर्म प्रकाशित करता है वही परिभाषा सूत्र कहलाता है। पर वेदान्तपरिभाषा के नामकरण में ग्रन्थकार परिभाषा शब्द कथित अर्थ में व्यवहार नहीं किये हैं। यहाँ पर परिष्कृत भाषण अर्थात् युक्तिपूर्ण वाक्य को परिभाषा शब्द से लिया गया है। विवेचक आचार्यों की युक्तिपूर्ण व्याख्या ही यहाँ 'परिभाषा' है। सुतरां वेदान्तपरिभाषा शब्द से वेदान्तार्थ-प्रतिपादक युक्तिपूर्ण कथाविशेष को ही बताया गया है। इसलिए ग्रन्थकार ग्रन्थ के आरम्भ में ही लिखते हैं —

तेन बोधाय मन्दानां वेदान्तार्थावलम्बिनी।
धर्मराजाध्वरीन्द्रेण परिभाषा वितन्यते॥

मन्दों के बोध के लिए धर्मराज अध्वरीन्द्र के द्वारा वेदान्तशास्त्र के अर्थ अवलम्बन करते हुए यह परिभाषा ग्रन्थ विरचित हुआ है। इसी श्लोक से वेदान्त-परिभाषाकार के रूप में हम श्रीधर्मराजाध्वरीन्द्र को भी जानते हैं।

'वेदान्त-परिभाषा' के मङ्गलाचरण श्लोक में ग्रन्थकार यतिश्रेष्ठ नृसिंह जी को और वेलङ्गुडि निवासी वेङ्कटनाथ जी को अपने गुरु के रूप से प्रणाम निवेदन

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

किये हैं। वेंकटनाथ 'वेदान्ताचार्य' या 'वेदान्तदेशिक' के रूप से प्रख्यात हैं। वे श्रीरामानुजाचार्य-प्रवर्त्तित वैष्णव-सम्प्रदाययुक्त एक आचार्य रहे हैं। धर्मराज अध्वरीन्द्र अपने को इन आचार्यों के शिष्य के रूप से प्रस्तुत करने से और वेल्लङ्गुडि स्थान का उल्लेख करने से यह अनुमान किया जा सकता है कि वे दक्षिण भारत के निवासी रहे हैं।

रचना—

धर्मराज अध्वरीन्द्र वेदान्तपरिभाषा के अतिरिक्त और भी कई ग्रन्थ प्रणयन किये हैं। वे गङ्गेशोपाध्यायकृत 'चिन्तामणि' ग्रन्थ के ऊपर 'तर्कचूडामणि' टीका, शशधरकृत 'न्यायसिद्धान्तदीप' की टीका तथा पद्मपादाचार्य-विरचित 'पञ्चपादिका' की एक व्याख्या भी किये हैं।

'पञ्चपादिका' धर्मराज अध्वरीन्द्रजी का अत्यन्त सुपरिचित रहा क्योंकि वे प्रकाशात्मयति विरचित 'पञ्चपादिका-विवरण' का बहु वचनावली वेदान्तपरिभाषा में उद्धृत किये हैं। धर्मराज अध्वरीन्द्र बहुशास्त्रों में व्युत्पन्न थे, यह उनके वेदान्तपरिभाषा के अध्ययन से ही स्पष्ट हो जाता है, क्योंकि वे इस ग्रन्थ में ऋग्वेद, कठ, मुण्डक, छान्दोग्य, बृहदारण्यक, श्वेताश्वतर, कौषतकी और तैत्तिरीय उपनिषत्, ब्रह्मसूत्र, ब्रह्मसूत्र के शाङ्करभाष्य, भामती, पूर्वमीमांसा, आत्मबोध, तत्त्वप्रदीपिका, श्रीमद्भगवद्गीता, विष्णुपुराण, मार्कण्डेयपुराण, पराशरस्मृति आदिओं का उद्धरण दिये हैं।

श्रीधर्मराज अध्वरीन्द्र के सुपुत्र श्री रामकृष्ण अध्वर ने वेदान्तपरिभाषा के ऊपर 'शिखामणि' नामक एक अनुपम टीका की रचना की है। उक्त टीका के मङ्गलाचरण में वे अपने पितृदेव की वन्दना करते हुए लिखे हैं—जिनकी कीर्त्ति सेतुबन्ध से सुमेरुपर्यन्त सर्वजनविदित है, मैं 'तर्कचूडामणि' प्रणेता श्रीधर्मराज अध्वरीन्द्र की पादवन्दना कर रहा हूँ। उनकी करुणा से ही मैं तीक्ष्णबुद्धि विशिष्ट जनों का भी दुरधिगम्य शास्त्रों को आयत्त करके रामकृष्ण नाम से प्रथित हुआ हूँ। अब मैं पितृविरचित वेदान्तपरिभाषा की व्याख्या कर रहा हूँ।'

आसेतोरासुमेरोरपि भुवि विदितान् धर्मराजाध्वरीन्द्रान्।
वन्देहं तर्कचूडामणिमणिजननक्षीरधीस्तातपादान्॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यत्कारुण्यान्मयाऽभूदधिगतमधिकं दुर्ग्रहं सूक्ष्मधीकै-
रप्यात्तं शास्त्रजातं जगति मखकृता रामकृष्णाह्वयेन ॥ २ ॥

श्रीधर्मराज अध्वरीन्द्र के समय के बारे में निःसंशय कुछ कहा नहीं जा सकता। वे वेदान्तपरिभाषा के मङ्गलाचरणों में श्रीनृसिंहाचार्य को परमगुरु बताये हैं। यहाँ पर शिखामणिकार श्रीनृसिंहाश्रमजी का उल्लेख किये हैं। पुनः वे श्रीगङ्गेशोपाध्यायकृत 'चिन्तामणि' नामक विख्यात न्याय ग्रन्थ के दीधटीकाविभञ्जनी—'तर्कचूडामणि' नामक टीकाकार रहे हैं। नव्यन्याय के प्रतिष्ठाता श्रीगङ्गेशोपाध्याय ईश्वीय चतुर्दश शताब्दी के रहे हैं, सुतरां श्रीधर्मराज अध्वरीन्द्र चतुर्दश शताब्दी के उत्तरवर्त्ती, यह अवश्य ही कहा जा सकता है। स्वामी प्रज्ञानानन्द सरस्वती अपने वेदान्तदर्शन के इतिहास में (बङ्गला) श्रीधर्मराज अध्वरीन्द्र ईश्वीय सप्तदश शताब्दी के हैं, इस प्रकार उल्लेख किये हैं।

वेदान्तपरिभाषा आठ परिच्छेदों में विभक्त है। प्रथम छः परिच्छेदों में प्रमाणों का निरूपण किया गया है। सप्तम परिच्छेद में प्रमेय अर्थात् वेदान्तशास्त्र का विषय तथा अष्टम परिच्छेद में वेदान्त शास्त्र का प्रयोजन निरूपित हुआ है।

इससे पूर्व वेदान्तदेशिक वेङ्कटनाथ जिस प्रकार 'न्यायपरिशुद्धि' में वेदान्तशास्त्रानुसार प्रत्यक्षादि प्रमाणों का निरूपण किये हैं, उसी प्रकार श्रीधर्मराज अध्वरीन्द्र वेदान्तपरिभाषा में अद्वैत मतानुसार प्रत्यक्षादि प्रमाणों का निरूपण किये हैं। प्रत्यक्षादि प्रमाण जिस प्रकार अद्वैत-वेदान्त में प्रायोजित हो सके उसी प्रकार वेदान्तपरिभाषा में सरल एवं विशदरूप से इन सब विषयों का निरूपण किया गया है।

वेदान्तपरिभाषा—

ग्रन्थकार कहते हैं कि धर्म, अर्थ, काम और मोक्ष इन चार पुरुषार्थों में मोक्ष ही परम पुरुषार्थ है—'चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः' क्योंकि धर्म, अर्थ और काम ये सभी अनित्य हैं, परन्तु मोक्ष (वेदान्तसिद्धान्तमत) ही नित्य एवं परमानन्द स्वरूप है। यह मोक्ष ब्रह्मज्ञान से ही लाभ हो सकता है। इसलिए परिभाषाकार यहाँ पर ब्रह्म, ब्रह्मज्ञान तथा उसके लिए प्रयोजनीय प्रमाणों के बारे में विस्तार रूप से वर्णन करने के लिए प्रवृत्त हुए हैं।

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रमाण के विना प्रमेय की सिद्धि नहीं हो सकती, कारण प्रमा के करण को ही प्रमाण कहा गया है। अर्थात् जिसके द्वारा प्रमा या यथार्थ ज्ञान उत्पन्न होता है, उसे ही प्रमाण कहा गया है। इसलिए ग्रन्थकार सर्वप्रथम प्रमाणों की आलोचना में प्रवृत्त हुए हैं। इन प्रमाणों के बारे में भारतीय दार्शनिकों में पर्याप्त मतभेद है— चार्वाकदर्शन के मतानुसार प्रत्यक्ष ही एकमात्र प्रमाण है, बौद्धों के मत में प्रत्यक्ष और अनुमान दो प्रमाण हैं (शून्यवादी बौद्ध केवल अनुमान को ही प्रमाण मानते हैं। जैनदर्शन में प्रत्यक्ष एवं परोक्षरूप दो प्रमाण हैं। वैशेषिकदर्शन में भी प्रत्यक्ष और अनुमान दो ही प्रमाण माने गये हैं। सांख्य एवं योग दर्शन में प्रत्यक्ष, अनुमान तथा आगम को प्रमाणत्वेन स्वीकार किया गया है,। न्यायदर्शन में प्रत्यक्ष, अनुमान, उपमान, शब्द ये चार प्रमाण माने गये हैं। मीमांसकों में प्रभाकर के मत में प्रत्यक्ष, अनुमान, उपमान, शब्द और अर्थापत्ति रूप पाँच प्रमाण माने गये हैं। भाट्टमतावलम्बी गण इन पाँच प्रमाणों के साथ अनुपलब्धि (अभाव) रूप छठा प्रमाण भी मानते हैं। वेदान्तसिद्धान्त में भी भाट्ट की तरह छः प्रकार का ही प्रमाण माना गया है। इन मतभेदों को देखाते हुए श्रीवार्त्तिककार कहते हैं—

प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः।
अनुमानञ्च तच्चापि सांख्याः शब्दं च ते अपि॥
न्यायैकदेशिनोऽप्येवमुपमानं च केचन।
अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः॥
अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा।
सम्भवैतिह्ययुक्तानि तानि पौराणिकाः जगुः॥
(मानसोल्लासः २।१७–१९)

प्रत्यक्ष—

प्रत्यक्ष प्रमाण प्रायः दर्शनों में स्वीकृत होने पर भी वेदान्तदर्शन के साथ अन्यान्य दर्शनों का काफी मतभेद है। अतः हम पहले भिन्न दर्शनकारों के अनुसार प्रत्यक्ष का निरूपण करते हुए वेदान्तदर्शनगत प्रत्यक्ष की भी आलोचना करेंगे। नैयायिकों का कहना है कि 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि-व्यवसायाऽत्मकं प्रत्यक्षम् (न्यायसूत्र १–१–४)। प्रत्यक्ष प्रमाण सिद्ध करने के

Jagannath Bhattarai Collection. Nagarjun-7, Kandmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिए इस प्रकार बहुलक्षण शास्त्रों में वर्णन किया गया है। प्रायशः ऐसा ही माना जाता है कि इन्द्रियों के सन्निकर्ष से उत्पन्न ज्ञान जिसका विषय समान देश-काल में हो तो उसे प्रत्यक्ष और दोनों भिन्न देश काल में हों तो परोक्ष कहते हैं। अथवा ज्ञानरूप करणों से उत्पन्न नहीं है ऐसा जो ज्ञान उसे प्रत्यक्ष कहते हैं। क्योंकि अनुमिति का करण है व्याप्तिज्ञान, उपमिति का करण है सादृश्यज्ञान, शाब्दबोध का करण है पदज्ञान, स्मृति का भी पूर्वानुभव करण है। सुतरां ये सभी ज्ञान–ज्ञान-रूपक करण से उत्पन्न हुए हैं। जीवगत प्रत्यक्ष का इन्द्रिय को करण माना गया है। ईश्वर प्रत्यक्ष नित्य होने के कारण किसी भी करण से उत्पन्न नहीं है, सुतरां ज्ञानगत करण से भी उत्पन्न नहीं है।

वह प्रत्यक्ष घ्राणज–रासन–श्रावण–चाक्षुष–त्वाच और मानस के भेद से छः प्रकार का है। अर्थात् घ्राणेन्द्रिय से जन्य जो प्रत्यक्ष, उसे घ्राणज प्रत्यक्ष कहते हैं। इसी प्रकार रसनादि ज्ञान भी उन इन्द्रियों के द्वारा उत्पन्न होने के नाते उन इन्द्रियों के नामानुसार प्रत्यक्ष का विभाग किया गया है। वह प्रत्यक्ष भी नित्य एवं अनित्य के भेद से दो प्रकार का है। जीवगत प्रत्यक्ष जन्य होने से वह अनित्य होता है और ईश्वरगत प्रत्यक्ष नित्य तथा सर्वविषयक है।

फिर भी वह प्रत्यक्ष सविकल्पक और निर्विकल्पक भेद से दो प्रकार के हैं। सविकल्पक प्रत्यक्ष से विशेष्यविशेषणभाव बिषयक ज्ञान होता है, अर्थात् सप्रकारक प्रत्यक्ष को सविकल्पक प्रत्यक्ष कहा जाता है। और निष्प्रकारक अर्थात् जिस प्रत्यक्ष में विशेषण को विषय के रूप से ग्रहण नहीं किया गया उसे निर्विकल्पक प्रत्यक्ष कहा गया है। प्रत्यक्षातिरिक्त सब प्रकार ज्ञानों का सविकल्पक ही होता है, न कि निर्विकल्पक।

लौकिक एवं अलौकिक भेद से भी प्रत्यक्ष दो प्रकार के हैं। लौकिक सन्निकर्ष से उत्पन्न प्रत्यक्ष को लौकिक प्रत्यक्ष कहते हैं। अलौकिक प्रत्यक्ष सामान्यलक्षण, ज्ञान-लक्षण तथा योगज भेद से तीन प्रकार के हैं। योगज भी युक्त एवं युञ्जान भेद से दो भागों में विभक्त है ऐसा नैयायिकों का अभिप्राय है।

वर्तमान काल में समुपस्थित विषयों का ग्राहकरूप से स्वीकृत छः प्रकार सन्निकर्ष ही लौकिक सन्निकर्ष है, उससे भिन्न अतीत एवं अनागत विषयों के ग्राहक के रूप से

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वीकृत जो सन्निकर्ष हैं उन्हें अलौकिक सन्निकर्ष कहा गया है, इनके द्वारा अलौकिक प्रत्यक्ष होता है। साधारणतः सामान्यलक्षण शब्द से 'स्वसम्बद्धविशेष्यकज्ञानप्रकारीभूतधर्मवत्तारूप सम्बन्ध' को समझाता है। अर्थात् जहाँ पर लौकिक सन्निकर्ष सम्मुखस्थ घटादिवस्तुओं का प्रत्यक्ष कराता है वहाँ पर सामान्यलक्षणरूप अलौकिक प्रत्यासत्ति से देशान्तरस्थित, कालान्तःस्थित घटादि सकल वस्तुओं का प्रत्यक्ष होता है। क्योंकि इस रीति से निखिल घट के साथ नेत्रेन्द्रिय का 'स्वसम्बद्ध-विशेष्यकज्ञानप्रकारीभूतधर्मवत्तारूप' सम्बन्ध है। इस सम्बन्ध को ही सामान्य-लक्षणा प्रत्यासत्ति कहा गया है। यहाँ पर सामान्य शब्द केवल जातिवाचक नहीं है, अपितु तादृश्यप्रकारीभूत धर्ममात्र का ही बोधक है। न्यायमत में अलौकिक सन्निकर्षों का उपयोग प्रत्यक्ष ज्ञान की उत्पत्ति में किया जाता है और वेदान्त के मत में वृत्युत्पत्ति के लिए उन सन्निकर्षों का उपयोग किया जाता है।

ज्ञान है लक्षण (स्वरूप) जिस सन्निकर्ष का उसे ज्ञानलक्षणसन्निकर्ष कहा जाता है। यहाँ चाक्षुषादि प्रत्यक्षस्थल पर 'स्वसंयुक्तमनःसंयुक्त–आत्मसमवेत है ज्ञान' तादृशज्ञानविषयक है सम्बन्ध ऐसा समझना चाहिए। मानस प्रत्यक्षस्थल पर 'स्वसंयुक्त आत्मसमवेतज्ञानविषयत्व' है इस प्रकार समझना चाहिए। 'सुरभि चन्दन यहाँ पर चाक्षुष प्रत्यक्षस्थल पर पहले चन्दन खण्ड के साथ नेत्र का सन्निकर्ष होते ही कालान्तर में अनुभूत सौरभ का स्मरण होता है, यह स्मृति ही ज्ञानलक्षण सन्निकर्ष है, इस प्रकार लौकिक और अलौकिक सन्निकर्ष दोनों के फलस्वरूप 'सुरभि चन्दन' यह चाक्षुष प्रत्यक्ष होता है।

वेदान्तपरिभाषाकार इस चाक्षुष प्रत्यक्ष का स्पष्ट रूप से निराकरण किये हैं। वे कहते हैं चन्दन खण्ड के साथ इन्द्रिय-सन्निकर्ष होने के नाते चन्दन खण्ड का प्रत्यक्ष तो हो जाता है, किन्तु सुरभि अंश का प्रत्यक्ष हो नहीं सकता, यहाँ पर अनुमान से ही सुरभि अंश का ज्ञान होता है। नहीं तो इन्द्रियार्थ सन्निकर्ष के अभाव रहते हुए भी ज्ञानलक्षण सन्निकर्ष के द्वारा पर्वत में वह्नि का प्रत्यक्ष होना चाहिए, ऐसा यदि माना जाय तो अनुमिति को मानने की आवश्यकता कहाँ? सुतरां अनुमिति का सर्वथा उच्छेद हो जायेगा।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रत्यक्ष प्रमाण का उत्कर्ष—

दार्शनिकों ने विभिन्न प्रकार प्रमाणों का प्रतिपादन करने पर भी प्रत्यक्ष प्रमाण की सहायता के बिना कोई भी प्रमाण सिद्ध हो नहीं पाता। जैसे कि हेतु प्रत्यक्ष से (पक्षप्रत्यक्ष के बाद) अनुमान, सादृश्य के प्रत्यक्ष से उपमान, शब्दप्रत्यक्ष के द्वारा शाब्दबोध, उपपाद्य वस्तु प्रत्यक्ष के द्वारा अर्थापत्ति, केवल अधिकरण के प्रत्यक्ष से अनुपलब्धि ज्ञान होता है। इससे अतिरिक्त इतिहास पुराणादि जो-जो प्रमाण स्वीकार किये गये, सर्वत्र प्रत्यक्ष की आवश्यकता अनुभव की जाती है। अतएव सब प्रकार प्रमाणों के लिए प्रत्यक्ष प्रमाण की प्रयोजनीयता अपरिहार्य है।

आद्वैत वेदान्त के सिद्धान्त में आधिकांश स्थल पर इन्द्रियजन्यत्व प्रत्यक्ष के द्वाररूप में रहने पर भी इन्द्रियजन्यत्व को ही प्रत्यक्ष का प्रयोजक कहा नहीं जा सकता। क्योंकि सुखदुःखादि प्रत्यक्ष के लिए इन्द्रियजन्यत्व स्वीकार नहीं किया गया है। वेदान्त-परम्परा में (विवरणप्रस्थानानुसार) मन का इन्द्रियत्व निषेध किया गया है। परमतत्त्व जो चैतन्यस्वरूप ब्रह्मात्मविज्ञान वही साक्षात् अपरोक्ष है। श्रुति भगवती स्वयं कह रही है—'यत्साक्षादपरोक्षाद् ब्रह्म' (बृ. ३–३–४·१)। अपरोक्षचैतन्यस्वरूप ब्रह्म ही प्रत्यक्षप्रमा का सार है। प्रत्यक्ष ज्ञान कहाँ किस प्रकार होता है यह वेदान्तपरिभाषा में विस्तार से विवेचन किया गया है।

अब प्रश्न हो सकता है कि वेदान्त-सिद्धान्त में अज्ञान विवृत्ति के लिए ब्रह्मज्ञान की अत्यन्त आवश्यकता है, और ब्रह्म अप्रमेय होने से प्रमाणों की आवश्यकता कहाँ है ? क्योंकि प्रमाण से प्रमेय की ही सिद्धि होती है।

इसका उत्तर यह है कि—वेदान्त-सिद्धान्त में ब्रह्म नित्य-सिद्ध होने पर भी अज्ञानरूप आवरण से आच्छादित होने के कारण वह स्पष्ट रूप से प्रकाशित नहीं हो रहा है, परन्तु उसके ही अस्ति (है) एवं भाति (प्रकाशित है) इत्यादि अंश से जगत् का भान हो रहा है। सुतरां आवरण भङ्ग के लिए ही प्रमाणों की आवश्यकता है। इसमें भी प्रत्यक्षातिरिक्त प्रमाणों से असत्त्वापादकावरणरूप प्रमातृगताज्ञान की ही निवृत्ति होती है। और प्रत्यक्ष प्रमाण से अभानापादकावरण-रूप प्रमातृगताज्ञान की निवृत्ति होती है।

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

सुखदुःख की तरह आत्मा साक्षात् अपरोक्ष होने से प्रत्यक्षतया अनुभव के द्वारा ही उसका साक्षात्कार होता है। ब्रह्म भी आत्मा से अभिन्न होने के नाते अपने आत्मस्वरूप से ब्रह्म की अपरोक्षानुभूति ही परम प्रयोजन है। अतः अभानापादकावरण का भङ्ग प्रत्यक्षप्रमा के द्वारा ही होता है। सुतरां प्रत्यक्षप्रमा का ही श्रेष्ठत्व वेदान्त-प्रक्रिया में स्वीकार किया गया है।

अनुमान—

जिन वस्तुओं का ज्ञान प्रत्यक्ष प्रमाण से हो नहीं सकता उन्हें जानने के लिए अनुमान प्रमाण की आवश्यकता है। चार्वाकातिरिक्त सभी दर्शनकार इसे मानते हैं। प्रत्यक्ष प्रमाण की तरह अनुमान प्रमाण भी अपने विषय-प्रकाशन में पूर्णतया समर्थ है। वह अनुमान 'जहाँ-जहाँ धूम वहाँ-वहाँ वह्नि' इस प्रकार नियतसाहचर्य-ज्ञानरूप है और उसके अवान्तर व्यापार को संस्कार कहा गया है। इस प्रकार जिस पुरुष को पहिले से ही साध्य के साथ हेतु का नियतसाहचर्य ज्ञान विद्यमान है, कालान्तर में उसे पर्वत में धूम का दर्शन होते ही व्याप्तिज्ञानजन्य संस्कार उद्बुद्ध होते हुए उद्बुद्ध संस्कार के साथ व्याप्तिज्ञानरूपानुमान से 'वह्निमान्' इस प्रकार अनुमिति प्रमा उत्पन्न होती है। इन्द्रियार्थ-सन्निकर्ष के सद्भाव न होने से इसे प्रत्यक्ष नहीं कहा जा सकता, अतः यह एक परोक्ष ज्ञान ही है।

यहाँ पर भी न्यायदर्शनादि के साथ वेदान्त की प्रक्रिया में कुछ भिन्नता दिखाई पड़ती है। वेदान्त की प्रक्रिया में वह्नि अंश की ही अनुमिति होती है, न कि पर्वतांश की भी, क्योंकि पर्वत के साथ इन्द्रियार्थ-सन्निकर्ष (प्रत्यक्ष प्रमाण के लिए प्रयोजक धर्म) विद्यमान है। यह बात स्पष्ट अनुभव में भी आती है, कि 'मैं पर्वत को देख रहा हूँ, वह्नि का अनुमान कर रहा हूँ'।

नैयायिक लोग केवलान्वयी केवलव्यतिरेकी एवं अन्वय-व्यतिरेकीरूप तीन प्रकार अनुमिति का भेद मानते हैं, परन्तु अद्वैत वेदान्त की प्रक्रिया में अनुमिति अन्वयिरूप एक ही प्रकार की है। क्योंकि परिभाषाकार कहते हैं—वेदान्त-सिद्धान्त में सभी धर्म ब्रह्मनिष्ठ अत्यन्ताभाव के प्रतियोगी होने से अत्यन्ताभाव के अप्रतियोगिसाधकत्व रूप केवलान्वयित्व की सिद्धि नहीं होगी। इसी प्रकार केवल-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यतिरेक का भी सम्भव हो नहीं सकता। कारण साध्याभाव के द्वारा साधनाभाव निरूपित व्याप्तिज्ञान का साधन के द्वारा साध्य की अनुमिति में अनुपयुक्तता है।

ब्रह्मज्ञान सम्पादनार्थ प्रपञ्च का मिथ्यात्व प्रतिपादन के लिए अनुमान प्रमाण का विशेषरूप से उपयोग किया गया है। जैसे कि–ब्रह्म से अतिरिक्त सब-कुछ मिथ्या ब्रह्मभिन्न होने के कारण शुक्तिरजत की तरह है। प्रपञ्च मिथ्या है, क्योंकि वह दृश्य है, जड़ है एवं परिच्छिन्न है, जैसे कि रज्जु-सर्प। यहाँ पर शुक्तिरजत, रज्जुसर्प, मरुमरीचिकादि भ्रमस्थलों में काचकामलादि–मदान्धकाररूप–दूरस्वादि दोषजन्य अनेक कारण स्वीकार करने की अपेक्षा सर्वत्र अनुस्यूत एकमात्र ब्रह्म-भिन्नत्व को ही मिथ्यात्व का प्रयोजक स्वीकार कर लेने से लाघव हो जाता है।

उपमान—

सांख्य वैशेषिकादि दर्शनों में उपमिति को पृथक् रूप से स्वीकार न करने पर भी न्याय-वेदान्तादि दर्शनों में इसकी प्रयोजनीयता स्वीकार की गयी है। यह सादृश्य प्रमारूप उपमिति के करण को ही उपमान कहा गया है। जैसे कि नगर में गाय को देखा है ऐसा पुरुष के वन में गवय के साथ इन्द्रियार्थ-सन्निकर्ष उत्पन्न होने पर उसे यह ज्ञात होता है कि मेरी गाय के साथ इस पिण्ड की सादृश्यता है। फिर अन्वय एवं व्यतिरेक के द्वारा गवयनिष्ठ गोसादृश्यज्ञानरूप फल लाभ होता है। परन्तु नैयायिकों का कहना है कि गोसदृश गवय होने से उपमान प्रमाण होता है, क्योंकि वन में गया हुआ उपरोक्त प्रकार के सादृश्यज्ञानवाले पुरुष के गवयपिण्ड दर्शन के उपरान्त यह पिण्ड गवय पद का वाच्य है–ऐसी उपमिति उत्पन्न होती है। उसी प्रकार इन लोगों के मत में उपमान का शक्तिग्राहकत्व बन जाता है।

सुतरां वेदान्ताभिमत उपमान एवं उपमिति का स्वरूप ही यथार्थ है, इस प्रकार ज्ञान होता है। इस विषय को लेकर दर्शन शास्त्रों में कोई बहुत ज्यादा विचार नहीं किया गया है? किन्तु लोगों में एवं वेद में भी इसका उपयोग दिखाई पड़ता है। भारतीय दर्शन शास्त्रों में भी इसका प्राचुर्य प्रतीत होता है। अनुमान की तरह उपमान का भी व्यतिरेक-मुख से प्रपञ्च के मिथ्यात्व प्रतिपादन कराने की सार्थकता है।

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

आगम—

चतुर्थ आगम प्रमाण निरूपण करते हुए परिभाषाकार ने कहा है जिस वाक्य के तात्पर्यविषयीभूत संसर्ग अन्य किसी भी प्रमाण से बाधित नहीं होता हो उसे आगम प्रमाण माना जाता है। जहाँ पर प्रत्यक्षादि प्रमाणों की गति नहीं है, वहाँ भी आगम प्रमाण अपना कार्य प्रतिपन्न कर देता है। वह आगम भी पौरुषेय-अपौरुषेयभेद से भिन्न है। अकारादिवर्ण उदात्तादिस्वर पूर्वसृष्ट का अनुरूप होने के नाते प्रतिसृष्टि परमेश्वर-निर्मित होने पर भी वेद का अपौरुषेयत्व अव्याहत रहता है। पर महाभारत और पुराणादि पूर्व-उच्चारण की अपेक्षा किये विना उच्चारण के विषय होने से ये सभी पौरुषेय कहलाते हैं।

शब्द प्रमाण में यह भी एक वैशिष्ट्य है कि कहीं-कहीं आक्षरिक अर्थ (वाच्यार्थ) वास्तविक अर्थ से सर्वथा भिन्न होता है। इसलिए भी शाब्दबोध स्थल पर यह अवश्य ध्यान रखना चाहिए कि जहाँ पर अन्य प्रमाणों से शब्दार्थ का आपात-प्रतीतार्थ बाधित होने पर भी तात्पर्यार्थ बाधित हो रहा है या नहीं। जैसे कि 'गङ्गायां घोष' यहाँ पर लक्षणा द्वारा गङ्गा पद से गङ्गातीर का बोध होता है। वेद में भी इस प्रकार प्रयोग दिखाई पड़ता है—'स प्रजापतिरात्मनो वपामुदखिदत्' इस वाक्य का वाच्यार्थ विचार करने से अप्रामाणिकता-सी प्रतीत होती है, परन्तु पशुयाग की प्रशंसा में इस वाक्य का तात्पर्य है।

वाक्यार्थ के ज्ञान में आकाङ्क्षा, योग्यता, आसत्ति एवं तात्पर्यज्ञान का प्रयोजनत्व वेदान्तपरिभाषाकार चतुर्थ प्रकरण में अति सुस्पष्ट रूप से प्रतिपादन किये हैं।

अद्वैत वेदान्त की प्रक्रिया में आगम प्रमाण का स्थान सबसे ऊपर है। क्योंकि अद्वैत वेदान्त के चरम लक्ष्य या ब्रह्मावगति या ब्रह्मात्मैक्य-बोध की अपरोक्षानुभूति, उसके लिए जिस प्रमाण का विशेष रूप से प्रयोजन है उसी से शाब्द बोध रूप महावाक्यों के श्रवणान्तर ही मनन एवं निदिध्यासन द्वारा तत्त्वज्ञान लाभ होता है। अद्वैत वेदान्त के सिद्धान्तांश में सभी आचार्य एकमत होने पर भी प्रक्रिया अंश में आचार्यों का कुछ मतभेद दिखाई पड़ता है। पद्मपादाचार्य, सुरेश्वराचार्य, प्रकाशात्म यति, सर्वज्ञात्ममुनि, विद्यारण्यस्वामी, मधुसूदन सरस्वती आदि प्रायः सभी आचार्यों

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ने शब्दप्रमाण को ही ब्रह्म-साक्षात्कार में कारण माना है। किन्तु भामतीकार वहाँ पर (संस्कृत) मन को ही कारण मानते हैं।

जैसे कि 'दशमस्त्वमसि' इत्यादि वाक्यों से 'मैं ही दशम हूँ' इस प्रकार अपरोक्षानुभूति होती है, यहाँ जिस प्रकार इन्द्रियों का प्रामाण्य स्वीकार नहीं किया गया, वाक्यगत शब्द का ही प्रामाण्य माना गया, उसी प्रकार ब्रह्मात्मतत्त्व का अपरोक्षानुभूति में तत्त्वमस्यादि महावाक्यों को ही प्रमाण रूप से अङ्गीकार किया गया है। इस प्रक्रिया को ही अधिकांश अद्वैताचार्य समर्थन करते हैं। इसको ही शब्दापरोक्षवाद कहा गया है। इस विषय में वार्त्तिककार ने भी कहा है कि—

सदेवेत्यादि वाक्येभ्यः प्रमा स्फुटतरा भवेत्।
दशमस्त्वमसीत्यस्माद् यथैव प्रत्यगात्मनि॥

बृह० भो० वा० २०८।

भामतीकारादि कतिपय आचार्य इन्द्रियजन्यत्व को प्रत्यक्ष के प्रयोजक के रूप में स्वीकार करते हैं। इसलिए संस्कृत (शुद्ध) अन्तःकरण ही ब्रह्मात्म साक्षात्कार में कारण है। यहाँ पर विवरणाचार्य के अनुयायियों ने इस प्रक्रिया का निराकरण किया है। वे कहते हैं कि प्रत्येक इन्द्रिय के विषय के रूप में रूप-रस-गन्ध आदियों का पृथक्-पृथक् निर्देश रहने पर भी मन के लिए किसी भी प्रकार के स्वतन्त्र विषय का निर्देश नहीं है। सुतरां मन का इन्द्रियत्व भी नहीं है, और यह भी कहते हैं कि जैसे तर्क अनुमिति का अनुग्राहक, आलोक प्रत्यक्ष का अनुग्राहक उसी प्रकार मन भी आगम प्रमाण का अनुग्राहक है, न कि पृथक् कोई प्रमाण। सुख एवं दुःखादि के प्रत्यक्ष के लिए मन का प्रमाणत्व नैयायिक लोग प्रतिपादन करते हैं। परन्तु अद्वैत वेदान्त के सिद्धान्त में सुख-दुःखादि साक्षिवेद्य हैं अतएव मन का प्रमाकरणत्व अथवा प्रमाणत्व सिद्ध नहीं होता है। 'यन्मनसा न मनुते' इत्यादि श्रुति-समूह स्पष्ट रूप से मन का करणत्व निषेध कर रही हैं और 'मनसैवानुद्रष्टव्यम्' 'दृश्यते त्वग्रया बुद्धया' इत्यादि श्रुति-समूह मन (बुद्धि) का दर्शनकर्तृत्व ही स्वीकार करते हैं, न कि दर्शन का करणत्व। क्योंकि करणत्व का स्पष्टरूप से प्रतिषेध किया गया है। मन (बुद्धि) अखण्डाकार है। कारितावृत्ति के द्वारा ब्रह्म-साक्षात्कार करता है। क्योंकि बुद्धि के तदाकाराकारित वृत्तिरूप

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

परिणाम ही साक्षात्कार है। सुतरां ब्रह्मात्मतत्त्व के साक्षात्कार में शब्द ही प्रमाण है, बुद्धि अथवा मन का प्रमाणत्व नहीं है। यहाँ पर उपनिषद्वाक्य रूप शब्द-प्रमाणगम्य होने के नाते ब्रह्म का औपनिषत्पुरुषत्व रूप उक्ति भी सुसङ्गत ही है। श्रुति भगवती भी कह रही हैं— तं त्वौपनिषदं पुरुषं पृच्छामी'ति।

अर्थापत्ति—

जहाँ पर अर्थ की आपत्ति अर्थात् कल्पना की जाती हो, उसे अर्थापत्ति कहा जाता है। जिससे अर्थ की आपत्ति होती हो उसे अर्थापत्ति प्रमाण माना गया है। वेदान्तपरिभाषाकार कहे हैं कि—उपपाद्य ज्ञान के द्वारा उपपादक कल्पना को ही अर्थापत्ति कहा गया है। इस विषय का अर्थापत्ति परिच्छेद में (वेदान्तपरिभाषा) विशेष रूप से निरूपण किया गया है।

न्यायशास्त्र में अर्थापत्ति को पृथक् प्रमाण के रूप में स्वीकार नहीं किया गया है। उनके वहाँ व्यतिरेक व्याप्ति से ही अर्थापत्ति प्रमाण की प्रयोजनीयता समाप्त हो जाती है, परन्तु वेदान्त-प्रक्रिया में अर्थापत्ति प्रमाण की पृथक्ता स्वीकार की गयी है। परिभाषाकार व्यतिरेक व्याप्ति का निराकरण अनुमान परिच्छेद में ही किये हैं। सुतरां व्यतिरेक अनुमान के अभाव से पुनः तज्जन्य कार्य का भी अभाव अवश्य स्वीकार्य होगा।

यह अर्थापत्ति भी दृष्टार्थापत्ति तथा श्रुतार्थापत्ति के भेद से द्विविध है। वेदान्त-प्रक्रिया में दृष्टार्थापत्ति दृष्टान्तांश को चरितार्थ कर रही है, क्योंकि जहाँ पर 'इदं रजतम्' इस प्रकार सामने दिखाई पड़नेवाला रजत का 'यह रजत नहीं है' इस प्रकार निषेध होने पर रजत की यथार्थता सद्भिन्नत्व सत्यत्व के अत्यन्ताभाववत्वरूप मिथ्यात्व की कल्पना करती है।

और श्रुतार्थापत्ति प्रमाण के द्वारा श्रुतिगत वाक्यों से श्रुतिसिद्धान्त का निरूपण किया जाता है। जैसे कि—'तरति शोकमात्मवित्' इस वाक्य से 'शोक' अर्थात् दुःख-बन्धनादि आत्मगत अज्ञान से उत्पन्न इस सिद्धान्त की कल्पगा की जाती है। नहीं तो आत्मविज्ञान के द्वारा इसका विनाश सम्भव नहीं है। इसलिए अद्वैत वेदान्त में अर्थापत्ति प्रमाण का विशिष्ट स्थान अवश्य स्वीकार्य है।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुपलब्धि—

अभावरूप वस्तुओं के प्रत्यक्ष के लिए अनुपलब्धि प्रमाण माना गया है। कभी-कभी वस्तु रहने पर भी प्रयोजनीय आलोकादि कारणों के अभाव से वस्तु उपलब्ध हो नहीं हो पाती, वेदान्तपरिभाषाकार इस विषय में भी विशेष रूप से विवेचना किये हैं। घटादि विषयों के अभाव प्रत्यक्षप्रमाण से ही सिद्ध होने से नैयायिक लोग इसके लिए पुनः पृथक् प्रमाण स्वीकार नहीं करते हैं। प्रत्यक्ष के योग्याधिकरण के स्थल पर अभाव की प्रतीति प्रत्यक्षात्मिका होने पर भी उसके करण के लिए अनुपलब्धिरूप प्रमाणान्तर अवश्य स्वीकार्य है। कारण परिभाषाकार ने ही कहा है कि—'न हि फलीभूतज्ञानस्य प्रत्यक्षत्वे तत्करणस्य प्रत्यक्षप्रमाणतानियतत्वमस्ति, दशमस्त्वमसीत्यादि-वाक्यजन्यज्ञानस्य प्रत्यक्षत्वेऽपि तत्करणस्य वाक्यस्य प्रत्यक्षप्रमाणातिरिक्त-प्रमाणत्वाभ्युपगमात्'।

वस्तुतस्तु अनुपलब्धि को पृथक् प्रमाण के रूप से स्वीकार करने पर भी उससे उत्पन्न जो प्रमिति वह अभाव का ही अपरोक्ष–अनुभवात्मिका है। प्रमाणों की विजातीयता प्रमागत विजातीयता के आधार पर होती है, ऐसा नियम नहीं है। क्योंकि पूर्व एवं उत्तर मीमांसा में प्रकार प्रमाण स्वीकार करने पर भी तत्तद् आचार्यों के द्वारा पाँच प्रकार का ही प्रमाण स्वीकार किया गया है। सुतरां अनुभव की विजातीयता के आधार पर ही प्रमाणों की विजातीयता की कल्पना की जाती है। जैसे कि ज्ञानरूप जो करण माना गया है—अनुमिति के प्रति व्याप्तिज्ञान, उपमिति के प्रति सादृश्य ज्ञान, शाब्दबोध के प्रति तात्पर्ययुक्त शब्दज्ञान, अर्थापत्तिके प्रति उपपाद्यज्ञान, इन सभी से जन्य नहीं जो अभाव-विषयक अनुभव उसके असाधारण कारण को ही अनुपलब्ध्यात्मक प्रमाण कहा गया है।

शङ्का हो सकती है–ज्ञानरूप करणों से अजन्य होने पर भी चक्षु आदि से जन्य जो अभाव का अनुभव उसके लिए असाधारण कारण चक्षु आदि को ही माना जाय, सुतरां अनुपलब्धि—स्वीकार करने की क्या आवश्यकता है। क्योंकि नैयायिक लोग मानते हैं कि जिस इन्द्रिय के द्वारा जिस वस्तु का ग्रहण किया जाता है, उस इन्द्रिय से ही उस वस्तु उस द्रव्यगत जाति एवं उसके अभाव का भी ग्रहण होता है। उत्तर—ऐसा कहा नहीं जा सकता, क्योंकि घट का अनुभव एवं घटाभाव का

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

जो अनुभव दोनों के अन्दर विजातीयता का अनुभव होता है या नहीं ? द्वितीय पक्ष समीचीन नहीं है, क्योंकि प्रत्यक्ष एवं अनुमिति प्रमाओं का अनुभवत्व साम्य रहने पर (अर्थात् प्रत्यक्ष प्रमाणोद्भूत अनुभव में जिस प्रकार अनुभवत्व है, उसी प्रकार अनुमान प्रमाणोद्भूत अनुभव में भी अनुभवत्व है ही) भी दोनों में विजातीयता सभी दार्शनिकों ने स्वीकार की है। सुतरां जिस प्रकार अनुभवत्व की समानता रहने पर भी उभय का भेद माना गया है, उसी प्रकार घटानुभव और घटाभाव का जो अनुभव दोनों में, अनुभवत्वरूप साम्यता रहने पर भी दोनों में अभेदत्व है ही। प्रथम पक्ष में अनुभव की विजातीयता में विजातीय प्रमाण की आवश्यकता होने के कारण अभावात्मक अनुपलब्धि ज्ञान प्रमाणान्तर ही है। और 'येनेन्द्रियेण' यह सिद्धान्त सम्पूर्णतया अपसिद्धान्त ही है। क्योंकि नीरूप, निस्पर्श, निर्गन्ध, नीरस, नि शब्द रूप अभावों का इन्द्रियगम्यत्व सम्भव ही नहीं। सुतरां अनुभव की विजातीयता से ही प्रमाणगत विजातीयता माननी समुचित है। नैयायिकों ने अभाव के प्रतियोगी अनुपलब्धि को अभाव-प्रत्यक्ष के लिए सहकारी कारण के रूप से अवश्य ही माना है, परन्तु प्रमा का करण या प्रमाण के रूप से अनुपलब्धि की सत्ता को स्वीकार नहीं करते हैं। अद्वैत वेदान्त-सिद्धान्त में प्रमा का असाधारण कारण या प्रमाण के रूप से ही इसकी प्रसिद्धि है। अन्य सिद्धान्तोक्त—प्रमाणरूप इन्द्रियाँ अभाव के अधिकरण ज्ञान में प्रयोजक हैं।

यहाँ पर ऐक्य यह भेदाभावरूपत्व ही ग्रहण किया गया है। इससे अनुपलब्धि-रूप प्रमाण की भी प्रकृतस्थल पर प्रयोजनीयता सिद्ध होती है।

इससे अतिरिक्त इतिहास—पुराण को भी प्रमाण के रूप में कुछ दार्शनिकों ने स्वीकार किया है। पर वेदान्त की दृष्टि से उसकी कोई विशेष उपयोगिता नहीं है।

विषय—

जीव एवं ब्रह्म की एकता प्रतिपादन ही वेदान्त का प्रतिपाद्य विषय है। इसी एकता का बोध कराने के लिए भगवती श्रुति अध्यारोपापवाद न्याय का अनुसरण करती है। इसमें जो सृष्टि-प्रक्रिया बतायी गयी है, उसका निषेध में तात्पर्य है। क्योंकि नेति नेति प्रक्रिया से कल्पित वस्तुओं का बाध करते हुए, अधिष्ठान स्वरूप ब्रह्म शेष रहेगा, वही अपना स्वरूप भी है। सुतरां जो भी सृष्टि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

की प्रक्रिया में बनाई गई वस्तुएँ हैं, वे सब-के-सब माया से कल्पित हैं। इसलिए सृष्टि की प्रक्रिया अंश में भिन्न-भिन्न श्रुति भिन्न-भिन्न प्रकार के बताने पर भी कोई विरोध नहीं है। अतएव ब्रह्म में ही माया से प्रपञ्च की सृष्टि बतलाकर उसके निषेध कर लेने से अद्वैत सिद्ध हो जाता है। उपासना प्रकरण में भी जो सगुण-ब्रह्मपरक वाक्य उपलब्ध होते हैं उन वाक्यों का तात्पर्य उपासना विधि में अपेक्षित गुणों के आरोपमात्र में है तथा निर्गुण प्रकरण में पठित सगुण वाक्यों का तात्पर्य निषेध वाक्य में अपेक्षित निषेध्य गुणों के प्रतिपादन में है।

सुतरां अद्वैत बोध में ही सम्पूर्ण श्रुतिओं का तात्पर्य है। 'तत्' और 'त्वं' पद के वाच्यार्थ 'जीव' एवं 'ईश्वर' में औपाधिक भेद रहने पर भी दोनों के लक्ष्यार्थ निरुपाधिक चैतन्य में किसी भी प्रकार के भेद के लेश भी नहीं हैं। इस प्रकार सब प्रमाण के अविरुद्ध श्रुति-स्मृति-पुराण-प्रतिपाद्य जीव एवं ब्रह्म की एकता ही वेदान्त शास्त्र का विषय है। इसे श्रुति युक्ति एवं अनुभव से समझना चाहिए।

प्रयोजन—

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इस न्याय के अनुसार वेदान्त की प्रयोजनीयता का प्रतिपादन भी अनिवार्य है। सकारण अखिल दुःखों की आत्यन्तिक निवृत्ति एवं परमानन्द की प्राप्ति ही वेदान्त शास्त्र का मुख्य प्रयोजन है। जो कि आनन्दस्वरूप आत्मतत्त्वोपलब्धि से होता है। श्रुति भगवती ने भी कहा है—'तरति शोकमात्मवित्' (छा० ७-१-३)। इसी को ही मोक्ष कहा गया है। वेदान्त-सिद्धान्त के अनुसार दुःखों की आत्यन्तिक निवृत्ति (दुःख का अत्यन्त अभाव) एवं परमानन्द की प्राप्ति नित्यसिद्ध होते हुए भी अज्ञान के द्वारा प्रतीत होने वाले दुःख तथा आनन्दाभाव को ब्रह्मविद्या से ही निवर्त्य बतलाया गया है। अन्य जितने भी साधन हैं वे सभी सहायक मात्र ही है।

वेदान्त-सिद्धान्त में आत्मस्वरूपावस्थान ही मोक्ष है। लोकान्तर की प्राप्ति को मोक्ष नहीं कहते, नहीं तो कृतिजन्य होने से उसमें अनित्यता आ जायेगी। प्रत्यग-भिन्न परमात्मचैतन्य सत्ता का अपरोक्षानुभव ही मोक्ष का अन्तरङ्ग साधन है। वह साधनचतुष्टय से सम्पन्न मुमुक्षुओं को श्रोत्रिय ब्रह्मनिष्ठ आचार्य के मुख से महा-वाक्य के श्रवणज्ञान से ही हो जाता है।

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्यपि ब्रह्मात्मैक्यबोध के लिए श्रवण के अनन्तर मनन एवं निदिध्यासन की व्यवस्था कुछ आचार्यों ने दी है तथापि उस बोध के लिए असम्भावना, विपरीत भावनादि दोष से रहित व्यक्ति को महावाक्य श्रवण ही पर्याप्त माना गया है। श्रवण से वेदान्त शास्त्र रूप प्रमाणगत असम्भावना की, मनन से ब्रह्म और आत्मा की एकता रूप प्रमेयगत असम्भावना की तथा निदिध्यासन से विपरीत भावना की निवृत्ति होती है। ब्रह्मात्मैक्यबोध तो महावाक्य से ही होता है।

नैयायिकधुरन्धर पण्डितप्रवर श्रीधर्मराज अध्वरीन्द्र जी विरचित यह वेदान्त-परिभाषा अद्वैत वेदान्त की एक अनुपम पुस्तक है। जिसकी भाषा अत्यन्त परिमार्जित एवं भाव अतीव गम्भीर है, कारण नव्यन्यायघटित भाषा में यह पुस्तक लिखी गयी है। इस ग्रन्थ में सम्यक् प्रवेश होने के उपरान्त वेदान्त के किसी भी ग्रन्थ में प्रवेश करना अत्यन्त सरल हो जाता है। इसलिए प्रायः सभी प्रान्तों में देश में जहाँ भी वेदान्त का अध्ययन-अध्यापन होता है इस ग्रन्थ को पाठ्यक्रम में रक्खा गया है।

इस ग्रन्थ की कई संस्कृत एवं हिन्दी टीकाएँ उपलब्ध हैं। चौखम्बा संस्कृत सीरीज आफिस, वाराणसी के अनुरोध से तथा अपना शास्त्रविनोदानन्द अनुभव करने के लिए एक हिन्दी अनुवाद किया हूँ। आशा है कि संस्कृत अनभिज्ञ व्यक्ति भी इससे उपकृत होंगे। अनुवाद के समय जिन पूर्वाचार्यों का अनुसरण किया हूँ उनके प्रति चिर कृतज्ञता ज्ञापन कर रहा हूँ। जिनकी चरण-सेवा से वेदान्तामृत प्राप्त हुआ है उन गुरुचरणों की सादर वन्दना कर रहा हूँ। इसमें जो भी गुण होगा वह मेरे गुरुओं का और जो भी त्रुटियाँ रहेंगी वह सब मेरी ही हैं। विभिन्न कारणों से अनुवाद एवं भूमिका में भाषागत त्रुटियाँ भी रह सकती हैं। अतः विद्वानों से निवेदन है कि—

अयुक्तं यदिह प्रोक्तं प्रमादेन भ्रमेण वा।
वचो मया दयावन्तः सन्तः संशोधयन्तु तत्॥

इस प्राचीनोक्ति के अनुसार सन्त-विद्वान् जन इसे सुधार लेंगे एवं प्रयोजनानुसार मुझे भी सूचित करेंगे। इति शम्।

श्रीमच्छङ्करभगवत्पादजयन्ती
वि० सं० २०४९

श्रीगुरुचरणाश्रित
स्वामी प्रज्ञानभिक्षु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयसूची

विषयाः	पृष्ठाङ्काः
प्रत्यक्षपरिच्छेदः	
मङ्गलाचरणम्	१
मोक्षस्य परमपुरुषार्थत्वम्	७
प्रमालक्षणम्	९
धारावाहिकद्वितीयादिबुद्धौ प्रमालक्षणसमन्वयः	१०
प्रमाणसङ्ख्याप्रदर्शनम्	१४
प्रत्यक्षप्रमाणलक्षणम्	,,
प्रत्यक्षे अन्तःकरणवृत्तिनिरूपणम्	१५
अन्तःकरणस्य सावयवत्वनिरूपणम्	१७
मनस इन्द्रियत्वखण्डनम्	२१
ज्ञानगतप्रत्यक्षत्वप्रयोजनकथनम्	२२
वृत्तेर्बहिर्निर्गमनप्रकारः	२३
स्मर्यमाणसुखे प्रत्यक्षलक्षणातिव्याप्तितन्निरासौ	२५
वह्निचनुमितिस्थले पर्वतांशे प्रत्यक्षत्वप्रतिपादनम्	२८
प्रसङ्गाज्जातिखण्डनम्	३०
समवायखण्डनम् (टीकायाम्)	३१
ज्ञानप्रत्यक्षनिष्कृष्टलक्षणम्	३४
विषयगतप्रत्यक्षत्वप्रयोजकनिर्वचनम्	३५
विषयप्रत्यक्षत्वे शङ्कासमाधी	३७
विषयप्रत्यक्षनिष्कृष्टलक्षणम्	४१
वृत्तेश्चातुर्विध्यम्	४२
सविकल्पकनिर्विकल्पकभेदात्प्रत्यक्षद्वैविध्यम्	४२
शाब्दत्वेन प्रसिद्धस्य सोऽयमित्यस्य ज्ञानस्य निर्विकल्पकप्रत्यक्षत्वव्यवस्थापनम्	४३
वेदान्तानामखण्डार्थपरत्वम्	४६
जीवसाक्षीश्वरसाक्षिभेदात्प्रत्यक्षद्वैविध्यम्	४८
विशेषणोपाध्योर्लक्षणे	४९
मायाया एकत्वम्	४९
मायावच्छिन्नस्य जगत्कर्तृलक्षणम्	५२
ज्ञप्तिगतप्रत्यक्षसामान्यलक्षणम्	५५
शुक्तिरजते प्रत्यक्षविचारः	५६
अनिर्वचनीयरजतोत्पत्तिः	५८
परिणामविवर्तलक्षणे	६०
रजतस्य साक्षिण्यध्यासः	६२
साक्षिण्यध्यासे पुरोवर्तिप्रत्ययानुपपत्तिशङ्कासमाधी	६३
विविधाध्यासिकप्रत्ययः	६४
रजतगोचराविद्यावृत्तेर्निष्प्रयोजनत्वशङ्कासमाधी	६५

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयाः	पृष्ठाङ्काः
रजतवृत्तीदंवृत्त्योर्भिन्नविषयत्वे गुरुमतप्रवेशापत्तिः	६६
प्रातिभासिकव्यावहारिकयोर्भेदः	६८
स्वाप्नपदार्थविचारः	६८
कार्यविनाशद्वैविध्यम्	७१
प्रातिभासिकसत्त्वाभ्युपगमे निषेधानुपपत्तिः	७४
व्याधिकरणाभावस्वीकारेणानुपपत्तिनिरासः	७४
उक्तप्रत्यक्षस्य पुनर्द्वैविध्यम्	७९
इन्द्रियाणि पञ्च	७९
अनुमानपरिच्छेदः	
अनुमानलक्षणम्	८१
तृतीयलिङ्गपरामर्शखण्डनम्	८२
वह्निमानित्यनुमितिप्रयोजकनिरूपणम्	८५
व्याप्तिलक्षणम्	८६
अनुमानस्यान्वयिभिन्नप्रकारखण्डनम्	८७
स्वार्थपरार्थभेदाद् अनुमानद्वैविध्यम्	९५
अनुमाने अवयवत्रित्वव्यवस्थापनम्	९५
मिथ्यात्वे अनुमानम्	९६
अद्वैतसिद्धीयं मिथ्यात्वलक्षणम्	९७
चित्सुखीयम् ,,	९८
मिथ्यात्वलक्षणस्य प्रत्यक्षबाधशङ्कासमाधी	९९
ब्रह्मणो द्रव्यत्वाभावः	१००
उपमानपरिच्छेदः	
उपमानलक्षणम्	१०२
उपमानस्यान्यप्रमाणैरगतार्थत्वम्	१०४
आगमपरिच्छेदः	
आगमनिरूपणम्	१०६
वाक्यजन्यज्ञाने कारणनिरूपणम्	१०६
आकाङ्क्षास्वरूपम्	१०८
बलाबलाधिकरणविचारः	१०९
योग्यतानिरूपणम्	११४
आसत्तिनिरूपणम्	११५
पदार्थद्वैविध्यम्	११६
शक्तिनिरूपणम्	११६
जातिशक्तिव्यवस्थापनम्	११८
गवादिपदाद् व्यक्तिभाने कल्पान्तराणि	११९
लक्ष्यपदार्थनिरूपणम्	१२१
लक्षणाद्वैविध्यम्	१२१
लक्षितलक्षणायां गौण्यन्तर्भावः	१ १
प्रकारान्तरेण लक्षणा त्रिविधा	१२२
सोऽयं देवदत्त इत्यत्र स्वमतम्	१२४
लक्षणाया वाक्यवृत्तित्वमपि	१२६
वाक्यैकवाक्यत्वम्	१२८
तात्पर्यनिरूपणम्	१३०
तात्पर्यनिराकरणपरकविवरणवाक्यस्याशयोद्घाटनम्	१३४
सिद्धार्थवाक्यानामपि प्रामाण्यम्	१३४
वेदनित्यत्वादिविचारः	१३५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयाः	पृष्ठाङ्काः
अर्थापत्तिपरिच्छेदः	
अर्थापत्तिनिरूपणम्	१३९
प्रमाप्रमाणयोरर्थापत्तिपदस्य विग्रह	१४०
अर्थापत्तिद्वैविध्यम्	१४०
श्रुतार्थापत्तिर्द्विविधा	१४१
अर्थापत्तेरनुमानेऽनन्तर्भावः	१४३
अनुपलब्धिपरिच्छेदः	
अनुपलब्धिलक्षणम्	१४५
योग्यानुपलब्धेरित्यत्र योग्यता-स्वरूपम्	१४६
इन्द्रियेणैवाभावग्रहोऽस्तु इति शङ्कासमाधी	१४७
अभाववचातुर्विध्यम्	१५३
स्वतः प्रामाण्यविचारः	१५९
अप्रामाण्यपरतस्त्वविचारः	१६२
विषयपरिच्छेदः	
प्रामाण्यद्वैविध्यनिरूपणम्	१६५
लक्षणद्वैविध्यम्	१६५
कर्तृलक्षणम्	१६८
जगतो जन्मक्रमनिरूपणम्	१७२
सूक्ष्मभूतानां गुणाः	१७३
शब्दस्याकाशमात्रगुणत्वनिराकरणम्	१७४
नवलक्षणानि (टीकायाम्)	१७५
पञ्चीकरणप्रकारः	१७७
लिङ्गशरीरोत्पत्तिनिरूपणम्	१७९

विषयाः	पृष्ठाङ्काः
भूरादिलोकोत्पत्तिः	१७९
प्रलयचातुर्विध्यम्	१८०
सुप्तस्य मृतादविशेषशङ्कासमाधी	१८२
लयक्रमनिरूपणम्	१८३
सृष्टिवाक्यानां तात्पर्यनिरूपणम्	१८७
उपासनाऽऽदिवाक्यानां तात्पर्य-निरूपणम्	१८९
ईश्वरजीवचैतन्ययोर्मतभेदाः	१९०
त्वंपदार्थनिरूपणम्	१९४
जीवस्यावस्थात्रयनिरूपणम्	१९४
अन्तःकरणवृत्तेः प्रयोजने मतभेदाः	१९५
जीवस्य स्वयंप्रकाशत्वनिरूपणम्	२०२
तत्त्वमोरैक्यप्रतिपादनम्	२०३
प्रयोजनपरिच्छेदः	
प्रयोजनलक्षणम्	२१०
प्रयोजनद्वैविध्यम्	२१०
अपरोक्षज्ञाने मतभेदाः	२१४
अपरोक्षज्ञाने पद्मपादाचार्यमतम्	२१५
,, वाचस्पतिमतम्	२१५
श्रवणादीनां ज्ञानसाधनत्वम्	२१८
श्रवणादिनिरूपणम्	२१८
श्रवणाङ्गत्वं मनननिदिध्यासनयोः	२१९
श्रवणाङ्गत्वं न तार्तीयशेषत्वम्	२२०
शमादिनिरूपणम्	२२१
ब्रह्मलोकगतानां मुक्तिः	२२३
ब्रह्मात्मसाक्षात्कारवतः प्रारब्धादिकर्मविचारः	२२६

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीः

वेदान्तपरिभाषा

'अर्थदीपिका' टीकासहिता

प्रत्यक्षपरिच्छेदः १

[1]यदविद्याविलासेन भूतभौतिकसृष्टयः ।
तं नौमि परमात्मानं सच्चिदानन्दविग्रहम् ॥ १ ॥

जिस परमात्मा को आश्रय तथा विषय करने वाली अविद्या के विलास मात्र से ही आकाशादि पञ्चमहाभूत एवं उन भूतों से उत्पन्न पदार्थों की सृष्टि, स्थिति तथा लय होता है, उस सत्य, ज्ञान और आनन्द स्वरूप परमात्मा को प्रणाम करता हूँ ॥ १ ॥

---

[2]पपुं चक्रुं देवं हरमचलमाराध्यममरैः,
सहोराप्यं वीध्रं खरुजनदुरापं शुभकरम् ।
परेशं सर्वेषामतसममृत सर्वमतुलं,
भजेऽहं तं विष्णुं शिवमखिलवेदान्तविदितम् ॥ १ ॥

नत्वा साम्बं सतनयं त्र्यम्बकं त्र्यम्बकः प्रभुम् । वेदान्तपरिभाषायाष्टिप्पणीमहमारभे ॥

१. यस्य परमात्मनोऽविद्या जीवाश्रिता ब्रह्मविषया तस्या विलासेन एताः भूतभौतिकसृष्टयः भवन्तीति शेषः । तं जीवब्रह्मभेदरहितम् आत्मानं नौमीति । ननु तस्यैव तम्प्रति उत्कर्षापकर्षाभावात् कुतो नमस्कार्यतेति चेन्न । कल्पितभेदमादाय व्यवस्थोपपत्तेः । अविद्याप्रतिबिम्बं कर्तृत्वादिविशिष्टमपकृष्टं नमस्कर्तृ, तद्भिन्नं सर्वज्ञत्वादिविशिष्टं नमस्कार्यमिति संसूचनायोक्तं—परमेति ।

२. चक्रुं पपुं हरमिति विशेषणत्रयेण सृष्टि-स्थिति-लय-कर्ता परमात्मा भजन-

CC-0. Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नुमः श्रीबालगोपालतीर्थान् व्यासमुखान् मुनीन् ।
विघ्नहर्तॄन् गणेशादीन् पण्डितांश्च विमत्सरान् ॥ २ ॥

पितरं मातरं नत्वा स्वीयनिबन्धयन्त्रितः ।
करोमि सुखबोधाय परिभाषार्थदीपिकाम् ॥ ३ ॥

श्रीमद्वेदान्तार्थनिर्णयात्मकं प्रकरणमारभमाणो धर्मराजाध्वरीन्द्रो ग्रन्थस्य निर्विघ्नपरिसमाप्त्यादिप्रयोजनमविगीतशिष्टाचारानुमितश्रुतिप्रमितकर्तव्यताकं मङ्गलमाचरन् प्रेक्षावत्प्रवृत्त्यङ्गभूते विषयप्रयोजने दर्शयति —**यदिति** । ननु शिष्टाचारः किमाचारत्वाद्वेदमूलतां कल्पयति उत धर्मत्वात् ? नाद्यो निष्ठीवनादेरपि [1]तत्कल्पकत्वप्रसङ्गात् । न द्वितीयः धर्मत्वसिद्धौ वेदमूलत्वं वेदमूलत्वे च धर्मत्वमित्यन्योन्याश्रयादिति चेन्न । शिष्टैर्धर्मबुद्ध्याऽनुष्ठीयमानस्याचारस्य [2]तत्कल्पकत्वात् । न च शिष्टासिद्धिः, वैदिकार्थानुष्ठातॄणां [3]तत्त्वात् । तं परं परमेश्वरं तत्पदवाच्यं नौमि । परम् एवं लक्षयितुं तटस्थलक्षणमाह—**यदिति** । यस्याविद्यायदविद्या यदधिष्ठिता यदधीना मायेत्यर्थः । 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' [श्वे० ४–१०] 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' (भ० गी० ७–१४) इति श्रुतिस्मृतिभ्याम् । तस्या विलासः कार्याकारेण परिणामस्तेन भूतानां वियदादीनां सूक्ष्माऽसूक्ष्माणां भौतिकानां चराचराणां भूतकार्याणां च सृष्टयः । सृष्टिग्रहणं स्थितिप्रलययोरप्युपलक्षणम् ; सृष्टिस्थितिप्रलयाः भवन्तीत्यध्याहारः 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः' (श्वे० ४–५) 'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्' (भ० गी० ९–४) इति श्रुतिस्मृतिभ्याम् । एवं तटस्थलक्षणमुक्त्वा स्वरूपलक्षणमाह—**यदिति** । एतेन शून्यवादिनः साङ्ख्यवैशेषिकादेश्च मतं निराकृतं वेदितव्यम् । न तावत् शून्यं जगत्कारणं भवति 'कथमसतः सज्जायेत' इति तर्कानुगृहीतया श्रुत्याऽसतस्तत्कारणत्व-

---

कर्मत्वेन विवक्षितः । तेष्वपि पपुभिति प्रथमप्रयोगेण सत्त्वप्रधाने पालनकर्तव्यादिरातिशयो दर्शितः । होराभिः सह वर्तन्ते ते सहोराः शास्त्रज्ञाः 'होरा लग्नेऽपि राश्यर्द्धे शास्त्ररेखाभिदोरपी'ति हैमकोशात्, तैराप्यः तं सहोराप्यम् । वीध्रं विमलम् । खरुजनाः कामिनस्तैर्दुरापम् । अततीत्यतस आत्मा तम् । विष्णुमहं भज इत्यन्वयः ।

१. वेदमूलकत्वप्रसङ्गात् । २. वेदमूलताकल्पकत्वात् । ३. शिष्टत्वात् ।

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिषेधात् निरधिष्ठानभ्रमानुपपत्तेः । 'सदेव सोम्येदमग्र आसीत् (छा० ६-२-१) 'सन्मूलाः सोम्येमाः प्रजाः' इत्यादि श्रुत्या सत एव जगत्कारणत्वावगमाच्च । 'असद् वा इदमग्र आसीत्' (तै० २–७) इति श्रुतिस्त्वासत्पदं तु अभिव्यक्तनामरूपत्वेन गौण्या वृत्त्या सत्येव योजनीयम्, 'समाकर्षात्' (ब्र० सू० १-४-१५) इति न्यायात् । प्रकृतस्यैव सत्यज्ञानादिलक्षणस्य सम्यङ्नामरूपादिराहित्येन प्रतिपादनादिति सूत्रार्थः । नापि प्रधानपरमाण्वादेर्जगत्कारणत्व सङ्गच्छते, 'सोऽकामायत बहुस्यां प्रजायेय' (तै० २–६) 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्ति' (तै० ३–६) इत्यादि श्रुत्या चिदानन्दात्मकस्यैव तत्कारणत्वप्रतिपादनात् । परमेश्वरस्य तादृस्थं वारयति—**आत्मानमिति** । अन्तर्यामिणमित्यर्थः 'एषत आत्माऽन्तर्याम्यमृतः' (बृ० ३–७–२–१) इति श्रुतेः । लक्ष्यपक्षे तु तं परं मायादिपरं तदसंस्पृष्टं शुद्धं तत्पदार्थं नौमि । तमेव लक्षयति—**यदिति** । यत् यस्मिन् । अविद्याया अविलासो यस्मिन् [1] तथा च यस्मिन्नविद्याविलासाभाववति भूतभौतिकसृष्टयो नैव सन्ति 'नेह नानाऽस्ति किञ्चन' इत्यादि श्रुतेः । तस्स्वरूपं दर्शयति—**सच्चिदानन्दविग्रहमिति** । सदादिपदलक्ष्यत्वात् तदात्मकमित्यर्थः । तस्यानात्मत्वं वारयति—**आत्मानमिति** । त्वं-पदवाच्यलक्ष्यार्थावप्यनेन श्लोकेन दर्शितौ । तथा हि तमात्मानं नौमि । देहाद्यात्मवादिनां मतं निराचष्टे—**परमिति** । तत्र न तावत् लौकायतिकेषु स्थूलोऽहं कृशोऽहमित्याद्यनुभवात् पृथिव्यादिभूतचतुष्टययोगजचैतन्यवान् स्थूलदेह एवात्मेति केषांचिदभिमत आत्मा । देहस्य स्वप्नसुषुप्तयोरभोक्तृत्वात्, योऽहं बाल्ये पितरौ अन्वभूवं सोऽहं स्थविरे नप्तॄन् अनुभवामीति प्रत्यभिज्ञाऽनुपपत्तेः कृतहान्यकृताभ्युपगमापत्तेश्च । नापि पश्याम्यहं शृणोम्यहमित्यनुभवादिन्द्रियाण्यात्मा इत्यपरेषामभिमतः । तेषां संहतानामात्मत्वे एकविनाशेऽप्यात्मनाशप्रसङ्गात्, प्रत्येकमात्मत्वे विरुद्धदिविक्रियतया शरीरोन्मथनतापातात्, अक्रियत्वापाताच्च । नाप्यशितपीतादिभोक्ता प्राण आत्मेत्यन्येषामभिमतः, सत्यपि प्राणे सुषुप्तौ तस्य भोक्तृत्वादर्शनात् । नापि सुखयहं दुःखयहमित्यनुभवात्सुखादिधर्मकं मन आत्मेत्यपरेषामभिप्रेतः, सर्वेन्द्रियानुग्राहकतया तस्य करणत्वानुभवात् । तथा बौद्धेष्वपि कर्तृरूपं विज्ञानमात्मा तच्च क्षणिकं प्रदीपकलिकावदिति

१. सः अविद्याविलासः तस्मिन्नविद्याविलासे इति शेषः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योगाचाराद्यभिमतोऽप्यात्मा न सम्भवति, उक्तप्रत्यभिज्ञाविरोधात् । तदेतत्सर्वमभिप्रेत्योक्तं—**परमिति** । देहादिभ्योऽन्नमयादिकोशेभ्यः परं व्यतिरिक्तमित्यर्थः । एवं परमिति विशेषणेनैव चन्दनबिन्दुवदेकदेशस्थत्वेऽपि सर्वाङ्गीणशैत्योपलम्भोपपत्तेरणुरनागन्तुकसुखदुःखादिमानित्येकदेशिमतं देहाद्विलक्षणो देहपरिमित इत्यार्हतमतं च निराकृतं वेदितव्यम्, परं प्रकृष्टं विभुमित्यर्थाविगमात् । आत्मनोऽणुत्वे चन्दनबिन्दुशैत्यवत् स्वाश्रयांशप्रसर्पणद्वारा निरंशाया आत्मोपलब्धेः सर्वाङ्गसङ्गित्वासम्भवेन गङ्गाह्रदनिमग्नस्य युगपत्सर्वाङ्गीणशैत्योपलम्भाभावप्रसङ्गात् । 'वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते' (श्वे० ५–९) 'अणोरणीयान्' (श्वे० ३–२०) इत्याद्या श्रुतिस्तु 'महतो महीयान्' (श्वे० ५–८०) इति वाक्यशेषात् 'महानज' (बृ० ४–४–२२) इति श्रुत्यन्ताच्चात्मनो दुर्लक्ष्यत्वमात्रपरा । नापि देहपरिमितः, एकस्यात्ममनःक्रमेण गजमनुजमशकशरीरप्राप्तावयवाऽपचयस्यावश्यकत्वेनानित्यत्वापातात् । एवं देहाद्यात्मवादिनो निराकृत्य शून्यमात्मेति वादिनो माध्यमिकान्, विभुत्वेऽपि तत्तदात्ममनसां स्वस्वामिभावसम्बन्धवशेन तत्तदात्मनि तत्तन्मनःसंयोगजसुखदुःखादिव्यवस्थोपपत्तेरनेको नित्योऽजोऽजडोऽपि बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारधर्माधर्मादिगुणानामाश्रयः कर्ता भोक्ता चेति वादिनः तार्किकवैशेषिकप्राभाकरान्, अहमनुभवस्योभयात्मत्वदर्शनात् जडबोधरूप इति वादिनो भाट्टांश्च निराचष्टे—**सच्चिदानन्दविग्रहमिति** । 'अस्तीत्येवोपलब्धव्य.' इत्यादिश्रुतेः निरधिष्ठानकभ्रमाऽसम्भवात् स्तनपानादिप्रवर्तकजन्मान्तरीयसंस्कारानुवृत्तिदर्शनाच्च सदात्मकमित्यर्थः । एतेन शून्यवादिमतं निरस्तम् 'अत्रायं पुरुषः स्वय ज्योतिः' (बृ० ४–३–९) 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० २–१–१) 'अयमात्मा ब्रह्मसर्वानुभूः' (बृ० २–५–१९) इत्यादिश्रुत्या स्वयं प्रकाशत्वेन स्वयंप्रकाशज्ञानात्मत्वेन च प्रतिपादनात् चिदात्मकमित्यर्थः । ननु विज्ञानस्य कथं स्वप्रकाशतेति चेन्न । विषयात्मविज्ञानानां त्रयाणामपि जडत्वे जगदान्ध्यप्रसङ्गात्, विज्ञानस्य विज्ञानान्तरसापेक्षत्वे तस्याऽपि जडत्वेनाऽनवस्थापाताच्च । [1]अत्रायं प्रयोगः—विमतं विज्ञानं स्वसमानाश्रयस्व-

१. विज्ञानस्य विज्ञानान्तरसापेक्षत्वाभावे इदमनुमानम् । पक्षीभूतविज्ञानशब्देऽर्थान्तरवारणाय विमतमिति पक्षविशेषणम् । नैयायिकादीनां मते व्यवसायज्ञानं

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

समानकालस्वगोचरसंवेदनविरहप्रयुक्तव्यवहाररहितं न भवति विज्ञानत्वाद् अनन्तरव्यवह्रियमाणविज्ञानवदिति। 'विज्ञानमानन्दं ब्रह्म' इत्यादिश्रुतौ मत्वर्थीयाच्प्रत्ययं प्रकल्प्य विज्ञानमस्यास्तीति विज्ञानमिति व्याख्यानं तु नादरणीयम्, स्वरितस्वरोच्चारणसम्प्रदायविरोधात्। आत्मनो विज्ञानात्मत्वे स्वयं प्रयोगः, विज्ञाता न स्वातिरिक्तविज्ञानाधीनप्रकाशः, विज्ञानकर्मतामन्तरेण अपरोक्षत्वात्, सवेदनवत्। यद्वा विज्ञाता स्वप्रकाशस्तत्त्वात्तद्वदिति। आत्मा परमानन्दस्वभावः परप्रेमास्पदत्वात् व्यतिरेके घटवदित्यादियुक्त्या 'आनन्दो ब्रह्म' (तै० ३–६) इत्यादिश्रुत्या चानन्दात्मकमित्यर्थः। जडाजडात्मकत्वं तु विरोधादेव न सम्भवति। एतेन तार्किकादिमतं पराकृतम्। तत्त्वज्ञाननिवर्त्यत्वं बोधयितुं प्रपञ्चस्य जीवाश्रिताज्ञानकल्पितत्वं दर्शयति– **यदिति**। यदाश्रिताऽविद्याऽनाद्यज्ञानं तस्या विलासेन भूतभौतिकसृष्टयो भवन्तीत्यर्थः। लक्ष्यपक्षे तु तं परमज्ञानादिसमस्तोपाधिविलक्षणमात्मानं नौमि। परमिति विशेषणेनाऽस्मानमित्येकवचनेन च तस्य भोक्तृत्वमनेकत्वं च वदन्तः साङ्ख्याः पातञ्जलाश्च पराकृता वेदितव्याः शिष्टं तत्पदलक्ष्यवद्योजनीयम्। अखण्डार्थोऽप्यनेन श्लोकेन दर्शितः। तथा हि तं परमात्मानं प्रत्यगभिन्नं परमात्मानं नौमि। तज्ज्ञाननिवर्त्यत्वबोधनाय तद्विषयकाऽज्ञानकल्पितत्वं नामरूपात्मकप्रपञ्चस्य दर्शयति –**यदिति**। यदविद्या यद्विषयकमनाद्यनिर्वचनीयमज्ञानं तस्या विलासेन भूतभौतिकसृष्टयो भवन्तीत्यर्थः। समानमन्यत्। तथा चानेन श्लोकेन बन्धस्याऽविद्यानिवर्त्यत्वं तत्त्वं पदाखण्डार्थत्वं प्रदर्शयता जीवब्रह्मणोरैक्यमेवाऽज्ञातं सद्विषयो ज्ञातं सत्प्रयोजनमिति प्रवृत्त्यङ्गभूते विषयप्रयोजने प्रकाशिते ॥ १ ॥

स्वगोचरानुव्यवसायज्ञानप्रयुक्तव्यवहारयुक्तं भवतीति बाधः स्यात्तदर्थस्वसमानकालेति। पुरुषान्तरीयज्ञानाभावमादाय सिद्धसाधनवारणाय स्वसमानाश्रयेति।

१. विज्ञानमानन्दं ब्रह्म इत्यादिश्रुतिस्थविज्ञानशब्दे 'अर्शआदिभ्योऽच्' इत्यनेन मत्वर्थीयमच्प्रत्ययमाश्रित्य विज्ञानाश्रयमात्मानं मन्यन्ते तार्किकाः। विज्ञायते यत्तद् विज्ञानं विज्ञातिर्वा विज्ञानं इति कर्मणि भावे वा ल्युटि विज्ञानस्वरूप एवात्मेति वेदान्तिनः। तत्र तार्किकमते 'चितः' इति सूत्रेणान्तोदात्तत्वं स्यात् तच्च विज्ञानशब्दस्य स्वरितान्तत्वसम्प्रदायविरुद्धम्।

२. विज्ञाता स्वयंप्रकाशः विज्ञानकर्मतामन्तरेणापरोक्षत्वात् संवेदनवत्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यदन्तेवासिपञ्चास्यैर्निरस्ता भेदिवारणाः ।
तं प्रणौमि नृसिंहाख्यं यतीन्द्रं परमं गुरुम् ॥ २ ॥
श्रीमद्वेङ्कटनाथाख्यान् वेलाङ्गुडिनिवासिनः ।
जगद्गुरूनहं वन्दे सर्वतन्त्रप्रवर्त्तकान् ॥ ३ ॥
येन चिन्तामणौ टीका दशटीकाविभञ्जिनी ।
तर्कचूडामणिर्नाम कृता विद्वन्मनोरमा ॥ ४ ॥
तेन बाधाय मन्दानां वेदान्तार्थावलम्बिनी ।
धर्मराजाध्वरीन्द्रेण परिभाषा वितन्यते ॥ ५ ॥

जिनके शिष्यरूपी केशरिओं के द्वारा द्वैतवादीरूप हाथियों ने पराभूत हुआ, उन्हीं नृसिंह नामक यतिवर परमगुरु को मैं (ग्रन्थकार) प्रणाम करता हूँ ॥ २ ॥

वेलाङ्गुडिग्राम के निवासी, सभी शास्त्रों के प्रचारक जगद्गुरु श्रीमद्वेङ्कटनाथ जी की मैं बन्दना करता हूँ ॥ ३ ॥

जिसने तत्त्वचिन्तामणि के ऊपर प्राचीन दश टीकाओं को खण्डन करने वाली तथा विद्वज्जनमनोहारिणी तर्कचूडामणि नामक टीका लिखी है, उसी धर्मराजाध्वरीन्द्र के द्वारा वेदान्तानभिज्ञों के ज्ञानोत्पादन के लिये (वेदान्त) परिभाषा लिखी जा रही है ॥ ४–५ ॥

एवमिष्टदेवतां नमस्कृत्य गुरुप्रसादात् परमात्मलाभ इत्यादिना गुरुप्रसादस्य विद्याप्राप्ति प्रत्यन्तरङ्गत्वप्रतीतेर्गुरवोऽवश्यं पूज्या इत्यभिप्रायेण परमगुरून् प्रथमं प्रणमति—**यदिति** । अन्ते समीपे वक्तुं शीलमेषां तेऽन्तेवासिनः शिष्यास्ते एव पञ्चास्याः सिंहास्तैः यदन्तेवासिपञ्चास्यैर्भेदवादिलक्षणा वारणाः गजा निरस्तास्तं यतीनां यदनशीलानां परमहंसपरिव्राजकानामिन्द्रं नृसिंहसंज्ञकं परमं गुरुं प्रणौमि प्रकर्षेण मनःकायवाक्प्रणिधानेन नौमीत्यर्थः ॥ २ ॥

एवं परमगुरुं प्रणिपत्य साक्षाद्विद्यागुरुमभिवन्दते—**श्रीमद्वेङ्कटनाथाख्यानिति** ॥ ३ ॥

चिकीर्षितग्रन्थस्योपादेयतासिद्धये स्वकीर्त्यनुवृत्तये च स्वस्य नानाविधग्रन्थकर्तृत्वप्रदर्शनपुरस्सरं चिकीर्षितं प्रतिजानीते—**येनेति द्वाभ्याम्** । येन दशटीकाविभञ्जिनी विद्वन्मनोरमा तर्कचूडामणिसंज्ञिका प्रसिद्धा चिन्तामणौ टीका कृता तेन धर्मराजाध्वरीन्द्रसंज्ञकेन परिभाषा वितन्यते इति योजना ॥ ४ ॥

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः 'न स पुनरावर्त्तते' छा० ८–१५–१ इति श्रुत्या तस्य नित्यत्वावगमात्। इतरेषां त्रयाणां प्रत्यक्षेण, 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' छा० ८–१–६ इत्यादिश्रुत्या चानित्यत्वावगमात्। स च ब्रह्मज्ञानाद् इति ब्रह्म तज्ज्ञानं तत्प्रमाणं च सप्रपञ्चं निरूप्यते ॥ १ ॥

इस जगत् में धर्म, अर्थ, काम और मोक्ष रूप चारों पुरुषार्थों में से मोक्ष ही परमपुरुषार्थ है। क्योंकि उसकी पुनरावृत्ति नहीं होती है इत्यादि श्रुतिओं से मोक्ष की नित्यता का बोध होता है। (मोक्ष से भिन्न अर्थ और काम में प्रत्यक्ष तथा श्रुति प्रमाण से एवं धर्म में अनुमान तथा श्रुति प्रमाण से अनित्यत्व का बोध होता है।) शेष तीनों पुरुषार्थों की अनित्यता (धर्म, अर्थ और काम) प्रत्यक्षप्रमाण से तथा "जिस प्रकार इस लोक में क्रिया से निष्पादित धान्यादि फल काल पाकर नष्ट हो जाते हैं उसी प्रकार पुण्यकर्म से निष्पादित स्वर्गादिलोक भी समय पर नष्ट हो जाते है" इस श्रुति प्रमाण से ज्ञात होता है। वह परमपुरुषार्थ-मोक्ष ब्रह्मज्ञान से ही होता है। इसलिये ब्रह्म, ब्रह्मज्ञान और उसके विषय में प्रमाण का बिस्तार से निरूपण किया जाता है ॥ १ ॥

प्रयोजनं निर्दिशति—**बोधायेति**। मन्दानां मन्दबुद्धीनामलसानामिति वा **बोधाय** तत्त्वज्ञानाय। यद्यपि बुद्धिमतामनलसानां सूत्रभाष्यादिकं बोधे साधनमस्त्येव तथाऽपि मन्दानुग्राहकोऽयं ग्रन्थ इति बोधनाय मन्दानामित्युक्तम्। बोधयोग्यतां दर्शयितुं विशिनष्टि—**वेदान्तेति**। वेदान्तानां श्रुतिमस्तकानामर्थानवलम्बितुं शीलमस्य अस्तीति तथा। एवं चास्य समस्तवेदान्ततात्पर्यार्थंप्रतिपादकस्येतरसंक्षिप्तग्रन्थैरगतार्थता इति बोध्यम्।

एवं देवतागुरुप्रगतिपुरस्सरं ग्रन्थकरणं प्रतिज्ञाय इदानीं करिष्यमाणग्रन्थस्य शारीरकमीमांसया सङ्गतिं द्योतयितुं ग्रन्थप्रतिपाद्य दर्शयति—**इहेत्यादि निरूप्यते इत्यन्तेन**। इहास्यां परिभाषायाम्। खल्विति वाक्यालङ्कारे, ब्रह्म तज्ज्ञानं तत्प्रमाणं च सप्रपञ्चं निरूप्यते इति संबन्धः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुत इत्यत आह—**धर्मेत्यादिना**[1] । यद्वा इह लोके वेदे च । खलु प्रसिद्धं धर्मार्थकाममोक्षसंज्ञकेषु चतुर्विधपुरुषार्थेषु—पुरुषैरर्थ्यमानेषु—मोक्ष एव परम—उत्कृष्टः पुरुषार्थः । परमत्वं च—निरतिशयत्वे सति क्षयशून्यत्वं तच्च मोक्षस्यैवास्तीत्यत उक्तम्—**एवेति** । मोक्षस्य परमपुरुषार्थत्वं श्रुतिबोधितम् । नित्यत्वे हेतुमाह—**नेति** । 'स ब्रह्मज्ञानेन मुक्तः पुनर्भूयो नाऽऽवर्तते पुनःपुनर्जन्ममरणलक्षणां संसृतिं न भजते' इति श्रुत्या मोक्षस्यैवञ्च [2]नित्यत्वमुक्तम् । एवं मोक्षस्य परमपुरुषार्थत्वे हेतुमुक्त्वा धर्मादित्रयाणां [3]तदभावे, प्रत्यक्षेण, यत्कृतकं तदनित्यमिति सामान्यतो दृष्टानुमानाऽनुगृहीतश्रुत्या चावगतं तेषामनित्यत्वं हेतुमाह—**इतरेषामिति** । इतरेषां धर्मादित्रयाणाम् । तद्यथा इहास्मिन् लोके कृष्यादिकर्मणा चितः सञ्चितः सस्यादिलोकः कृतकत्वात् क्षीयते तद्वदेव अमुत्र परलोके पुण्यादृष्टेन सञ्चितः स्वर्गादिलोकः क्षीयते इति श्रुत्या चानित्यत्वावगमात् । तत्रार्थकामयोः प्रत्यक्षेण श्रुत्या च, धर्मस्य तु श्रुत्या इति विभागः । यद्वा प्रत्यक्षस्य कृतकत्वबोधनद्वारा धर्मानित्यत्वबोधनसामर्थ्यमित्यविरोधः । तथा च तेषामपि पुरुषार्थत्वादिना नित्यत्वानुमानं पदार्थत्वादिना वह्नयौष्ण्यानुमानवदबाधितविषयम्' 'अपामसोममभूता अभूम' 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इत्याद्या श्रुतिश्चानुमानानुगृहीतोदाहृतश्रुतिविरोधेन प्रलयपर्यन्तस्थायिफलाभिप्राया इति भावः । एवं मोक्षस्य परमपुरुषार्थत्वं प्रसाध्य 'तरति शोकमात्मवित्' 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे० ६–१५) इत्यादि श्रुत्या तस्य साधनं ब्रह्मज्ञानमित्याह—**स चेति** । स च मोक्षः ब्रह्मज्ञानादेव इत्येवकारोऽनुषज्यते । यतो मोक्ष एव परमपुरुषार्थः स च ब्रह्मज्ञानादेव यतश्च भवतीति हेतोर्मन्दानां मुमुक्षूणामुपकाराय ब्रह्म तज्ज्ञानं तत्प्रमाणं चेति त्रितयं सपरिकरं निरूप्यते इत्यर्थः ।

---

१. धर्मेत्यादिना ब्रह्मज्ञानादित्यन्तेन ।

२. गपुस्तके ॐएतच्चिह्नद्वयमध्यगतो भागः प्रमादतो भ्रष्ट इति विज्ञायते । कपुस्तके वर्तते ॥

३. तदभावे—परमपुरुषार्थत्वाभावे—प्रत्यक्षेण श्रुत्या चावगतमनित्यत्वं हेतुमाहेत्यन्वयः ।

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र प्रमाकरणं प्रमाणम्[1]। तत्र स्मृतिव्यावृत्तं प्रमात्वं, अनधिगताबाधितविषयज्ञानत्वम्। स्मृतिसाधारणं त्वबाधितविषयज्ञानत्वम्।

प्रमाण का निरूपण—

ब्रह्म, ब्रह्मज्ञान और उसमें प्रमाण—इनमें प्रमाज्ञान का जो करण हो उसे प्रमाण कहते हैं। (यथार्थ ज्ञान को प्रमा कहते हैं) उसमें 'स्मृति से भिन्न' प्रमा का लक्षण करते समय कहा गया है कि—जो (वस्तु) पूर्व में अधिगत न हो और जिसका बोध भी न होता हो, इस प्रकार विषय के ज्ञान को प्रमा कहते हैं। पर स्मृत्यात्मक

एवं ग्रन्थाभिधेय प्रदर्श्य ब्रह्मणस्तज्ज्ञानाधीननिरूपणत्वात् तस्य च तत्प्रमाणायत्तनिरूपणत्वात् प्रथमं प्रमाणनिरूपणमारभते—**तत्रेत्यादिना**। तत्र तेषु ब्रह्म तज्ज्ञानतत्प्रमाणेषु। प्रमायाः करणं प्रमाणं करणत्वं चाऽसाधारणकारणत्वे सति व्यापारवत्त्वं तेन परामर्शादौ सव्यापारे मनसि च नातिप्रसङ्गः। प्रमाया लक्षणं किमित्याकाङ्क्षायां तल्लक्षणमाह—**तत्रेति**। तत्र प्रमाकरणमित्यत्र। **स्मृतिव्यावृत्तं प्रमात्वमिति**। तथा च तस्या अलक्ष्यत्वान्न तत्राव्याप्तिरिति भावः। स्मृतावतिव्याप्तिवारणायानधिगतेति विषये विशेषणम्। शुक्तिरूप्यज्ञानादौ तन्निरासाय अबाधितेति। ज्ञानपदं तु स्वरूपकथनाय, इच्छादीनाम् आद्यविशेषणेनैव निरासात्। यद्वा चक्षुरादिष्वतिव्याप्तिवारणार्थं ज्ञानेति. तेषामपि फलद्वारा घटादिविषयत्वाभ्युपगमात्। [2]ज्ञप्तिर्ज्ञानं तेन

---

१. करणं प्रमाणमित्युक्ते दण्डादावतिव्याप्तिरिति प्रमापदम्। तथा चेदम्प्रमाणसामान्यलक्षणम्, प्रमाणविशेषलक्षणन्तु प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणमित्यादिकमूह्यम्।

२. तत्रेति प्रमाणसामान्यलक्षणघटकप्रमापदार्थजिज्ञासायाम्। अत्रेदं बोध्यम्। ज्ञानं द्विविधं यथार्थमयथार्थञ्च। आद्यं द्वेधा स्मृतिरनुभवश्च। तत्रानुभव एव प्रमा, या हि प्रत्यक्षादिप्रमाणैर्जन्यते स्मृतिस्तु यथार्थाऽपि संस्कारजन्यत्वात् संस्कारस्य प्रमाणत्वाभावान्न प्रमेति केचित्। तन्मतेन अनधिगतेत्यादिप्रथमं प्रमालक्षणम्। तद्वति तत्प्रकारकत्वं सफलप्रवृत्तिजनकत्वं वा प्रमात्वमिति मतेन स्मृतेरपि तथात्वात् प्रमात्वमिति मतेन द्वितीयमिति।

३. ज्ञायतेऽनेन तज्ज्ञानमिति करणव्युत्पत्त्या ज्ञानशब्दवाच्यं चक्षुरादिकं तच्च चक्षुराद्यविषयमित्यनधिगतमबाधितमपि इति प्रथमलक्षणस्य चक्षुरादावतिव्याप्तिभिया भावव्युत्पत्त्याऽऽश्रयणम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

[1]नीरूपस्यापि कालस्येन्द्रियवद्यत्वाभ्युपगमेन धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानाविषयतत्तत्क्षणाविशेषविषयकत्वेन न तत्राव्याप्तिः ॥ २ ॥

ज्ञान को भी प्रमा मानने वालों के मत में अबाधित वस्तु के ज्ञान को ही प्रमा कहा गया है। जिस प्रकार रूपरहित होता हुआ भी काल को प्रवर्तमान में घट को आँखों से देख रहा हूँ, इस प्रकार ज्ञान में) चक्षुरादि इन्द्रियों का विषय माना गया है, उसी प्रकार धारावाहिक ज्ञान स्थल में पूर्वक्षणविशिष्ट घट ज्ञात होता हुआ भी उत्तरक्षण विशिष्ट घट तो अज्ञात ही है, उसका ज्ञान भी अनधिगत विषय का माना जायेगा। अतएव 'अयं घटः' अयं घटः इस प्रकार धारावाहिक ज्ञान में प्रमा के लक्षण की अव्याप्ति नही है ॥ २ ॥

न तत्करणे ज्ञानेऽतिव्याप्तिः। स्मृतावपि प्रामाण्यव्यवहारदर्शनादाह—**स्मृतीति**। [2]इच्छादिव्यावृत्त्यर्थं ज्ञानपदम्। नन्वयं घट अयं घट इत्येवमादिरूपधारावाहिकबुद्धिस्थले द्वितीयादिज्ञानानामधिगतविषयत्वात् प्रथमलक्षणं तत्राऽव्याप्तमिति चेत्तत्राह—**नीरूपस्येति**। इदानी घटो वर्त्तते इत्येवंरूपानन्यथासिद्धप्रतीतिबलेन महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्य कालातिरिक्तद्रव्यचाक्षुषताप्रयोजकत्वकल्पनात्, प्रयोजकानुसारेण प्रतीतिकल्पने तु नीरूपस्य रूपस्याऽचाक्षुषत्वापत्तेः, नीरूपस्यापि कालस्य प्रत्यक्षप्रमाणजन्यानुभवविषयत्वस्वीकारेण धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानाविषयतत्तदुत्तरक्षणविशेषविषयकत्वेनाऽधिगतविषयत्वाभावान्न तत्र धारावाहिकबुद्धिस्थलेऽव्याप्तिरित्यर्थः। न चैवं शाब्दधारावाहिकद्वितीयादिज्ञानेष्वव्याप्तिरिति शङ्क्यम्, आकाङ्क्षायाः पदार्थज्ञानस्य चाभावेन तत्र धारावाहिकबुद्धेरेवाधिक्यः। अत एव न धारावाहिकद्वितीयाद्यनुमितावव्याप्तिर्द्वितीयानुमितिक्षणे प्रथमानुमितेर्विनष्टत्वेन तस्या अनधिगतविषयत्वात्।

---

१. नीरूपस्येति। कालस्य रूपरहितत्वान्नेन्द्रियवेद्यतेति वादिनः। तव मते नीरूपस्यापि रूपस्य चाक्षुषत्वं यथा तथा कालस्यापि कुतो नेति सिद्धान्तिनः। तथा च अयं घट अयं घट अयं घट इत्यादौ द्वितीयादिज्ञानानां विषयो घटः पूर्वक्षणविशिष्टोऽधिगतोऽपि द्वितीयक्षणविशिष्टघटस्य अनधिगतत्वमस्त्येवेति।

२. आदिपदेन कृत्यादीनां ग्रहणम्।

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

[1]किञ्च सिद्धान्ते धारावाहिकबुद्धिस्थले न ज्ञानभेदः, किन्तु यावद्घटस्फुरणं तावत् घटकारान्तःकरणवृत्तिरेकैव न तु नाना, वृत्तेः स्वविरोधिवृत्त्युत्पत्तिपर्यन्तं स्थायित्वाभ्युपगमात्। तथा च तत्प्रतिफलितचैतन्यरूपं घटादिज्ञानमपि तत्र तावत्कालीनमेकमेवेति नाव्याप्तिशङ्काऽपि ॥ ३ ॥

और भी वेदान्त सिद्धान्त में धारावाहिक ज्ञानस्थल पर (क्षणभेद से) ज्ञान का भेद (विषयाकार वृत्ति का भेद) स्वीकार नहीं किया गया है, किन्तु जबतक विच्छेदरहित होते हुए घट का (यह घट है, यह घट है इस प्रकार) प्रकाश होता रहता है, तबतक एक ही घटाकार अन्तःकरणवृत्ति मानी गयी, नाना नहीं। क्योंकि एक वृत्ति तबतक स्थायी बनी रहेगी, जब तक उसकी विरोधी वृत्ति उत्पन्न न हो जाय ऐसा माना गया है। उस एकाकार अन्तःकरण की वृत्ति में प्रतिबिम्बित चैतन्य रूप जो घटादि ज्ञान है, वह भी उतनी देर तक बना रहता है। इसलिए धारावाहिक ज्ञान स्थल में भी अव्याप्ति की आशङ्का नहीं कर सकते ॥ ३ ॥

नन्वेवं तर्ह्याकाशे बलाकेतिप्रतीतिबलादाकाशस्यापि प्रत्यक्षत्वं स्यात्, न चेष्टापत्तिस्तत्सद्भावे शब्दलिङ्गकानुमानप्रमाणानुसरणाऽनुपपत्तेः। 'अप्रत्यक्षे ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति' इति भाष्यकृद्वचनविरोधाच्च। नीरूपस्य रूपस्य चाक्षुषत्वं त्वद्रव्यत्वादविरुद्धम्, तस्मात्सुरभिचन्दनमित्यत्र यथा सौरभ्यांशे परोक्षत्वं तद्वत्कालांशे परोक्षत्वमेवाभ्युपेयं न चाक्षुषत्वम्। तथा च नीरूपस्य तत्तत्क्षणस्याऽचाक्षुषत्वात् धारावाहिकबुद्धावव्याप्तिस्तदवस्थेत्यरुचेराह—**किंचेति**। ननु कुतस्तत्र ज्ञानभेदो नास्तीति पृच्छति—**किन्त्विति**। यावत्कालम् अस्ति प्रकाशत इति घटस्य स्फुरणं तावत्कालं लाघवेन घटाकारान्तःकरणवृत्तेरेकत्वादित्युत्तरमाह—**यावदिति**। एवकारव्यावर्त्यमाह—**न त्विति**। गौरवादिति भावः। नन्वतिलाघवात् सुषुप्तिपर्यन्तमेकैव वृत्तिः कुतो नाङ्गीक्रियते ? इत्याशङ्क्य स्वविरोधिवृत्त्युत्पत्तिकाले तस्थितेरसम्भवेन न तस्यास्तत्पर्यन्तं स्थायित्वाभ्युपगम इत्याह—**वृत्तेरिति**। प्रकृतवृत्तेरित्यर्थः।

---

1. इदानीमयं घट इति प्रतीतौ कालस्यापि प्रत्यक्षत्वे आकाशे पतत्रिरिति प्रतीत्या आकाशस्यापि प्रत्यक्षत्वं सिद्धान्तानभिमतमापद्येत प्रतीतिसाम्यादिति हेतोः युक्त्यन्तरेणाप्यव्याप्तिनिराकरणं किञ्चेत्यादिना।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु सिद्धान्ते घटादेर्मिथ्यात्वेन बाधितत्वात्तज्ज्ञानं कथं प्रमाणम्। उच्यते। ब्रह्मसाक्षात्कारानन्तरं हि घटादीनां बाधः[1]। 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' (बृ० ४-५-१५) इति श्रुतेः, न तु संसारदशायां बाधः, 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' (बृ० ४-५-१५) इति श्रुतेः। तथा चाबाधितपदेन संसारदशायामबाधितत्वं विवक्षितमिति न घटादिप्रमायामव्याप्तिः। तदुक्तम्—

शङ्का—वेदान्त के सिद्धान्त में (ब्रह्मातिरिक्त) घटादि सभी पदार्थों को मिथ्या होने से बाधित कहा गया है, तो फिर घटादि ज्ञान को प्रमाण कैसे माना जायेगा?

समाधान—ब्रह्मसाक्षात्कार के बाद घटादि का बाध होता है। श्रुति भी कह रही है—"जहाँ इस ज्ञानी की दृष्टि में सब आत्मा ही हो गया, वहाँ पर किस साधन से किस को देखेगा"। संसार दशा में तो घटादि का बोध नहीं मना गया है। श्रुति भी कह रही है—"जहाँ पर द्वैत-सा होता है, वहाँ एक दूसरे को देखता है।" तात्पर्य यह है कि प्रमा के लक्षण में आये हुए अराधित' पद से संसार दशा में अबाधित कहना इष्ट है। सुतरां घटादि ज्ञान में प्रमा के लक्षण की अव्याप्ति नहीं है। इस विषय में प्राचीन आचार्यों ने भी कहा है—

ननु ज्ञानभेदनिरासार्थं वृत्तेरेकत्ववर्णनमयुक्तं सिद्धान्ते चैतन्यस्य ज्ञानत्वादित्याशङ्क्य वृत्तिप्रतिफलितस्यैतस्य घटादिज्ञानत्वेन तदेकत्वसिद्धया तत्प्रतिफलितचैतन्यरूपघटादिज्ञानस्याप्येकत्वं सिद्धयतीत्याशयेनाह—**तथा चेति**। वृत्तिभेदाभावे सिद्धे सति तत्र धारावाहिकस्थले यावत्कालीनं घटस्फुरणं तावत्कालीनमेकमेवेति हेतोरव्याप्तिशङ्काऽपि नास्ति। नन्वेवमपि विरोधिवृत्त्युत्तरं पुनर्जायमानस्य घटादिज्ञानस्याधिगतविषयत्वेन तत्राव्याप्तिरिति चेत् न, अनधिगतविषयपदेन स्वाऽन्यूनविषयकानुभवाऽजन्यत्वस्य विवक्षितत्वात्।

ननु सिद्धान्ते घटादेः शुक्तिरूप्यवन्मिथ्यात्वेन बाधितत्वात् तज्ज्ञानस्याऽप्रमात्वेन लक्ष्यत्वाभावात्तत्राव्याप्तिशङ्का तन्निरासावनुपपन्नाविति आशयेन शङ्कते—**नन्विति**।

---

१. स्वोपादानेन सह स्वनिवृत्तिर्बाधः यथा शुक्तिरजतस्थले शुक्तिरियमित्याकारकज्ञानेन रजतस्य तदुपादानस्य शुक्तित्वाज्ञानस्य च निवृत्तिरिति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।
लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात्॥

आ–आत्मनिश्चयात्—ब्रह्मसाक्षात्कारपर्यन्तमित्यर्थः। लौकिकमिति घटादिज्ञानमित्यर्थः॥ ४॥

आत्मसाक्षात्कार से पहले 'मैं स्थूल हूँ' 'मैं गौर हूँ' इत्यादि देह में आत्मज्ञान जिस प्रकार प्रमाण माना गया है, वैसे ही आत्मसाक्षात्कार से पूर्व तक घटादि व्यावहारिक पदार्थ का ज्ञान भी प्रमारूप माना जायेगा।

आत्मनिश्चय पर्यन्त अर्थात् ब्रह्मसाक्षात्कार पर्यन्त। लौकिक शब्द का तात्पर्य है घटादि व्यावहारिक ज्ञान॥ ४॥

कथं ... माणम् ? प्रमात्वेन लक्ष्यं न भवतीत्यर्थः। समाधानं प्रतिजानीते—**उच्यते इति**। किं ब्रह्मसाक्षात्कारानन्तरं घटादीनां बाधः? उत शुक्तिरूप्यवत् संसारदशायाम्? इति विकल्प्याद्यमङ्गीकरोति—**ब्रह्मेति**। तत्र श्रुतिं प्रमाणयति—**यत्रेति**। यत्र यस्यां तत्त्वसाक्षात्कारदशायाम्। अज्ञानावस्थावैलक्षण्यद्योतकस्तु-शब्दः। अस्य ब्रह्मसाक्षात्कारवतः सर्वमात्मैवाभूत् तत्तस्यां दशायां केन करणेन कं विषयं पश्येत्सर्वस्यापि तत्त्वज्ञानेन बाधितत्वादित्यर्थः। द्वितीयं निरस्यति—**नन्विति**। अत्रापि श्रुतिं प्रमाणयति—**यत्रेति**। यत्र यस्यां संसारदशायां द्वैतमिव तत् तस्यामितरः सन्नितरं पश्यतीत्यर्थः। तथा च संसारदशायां घटादेरबाधितत्वेन तज्ज्ञानस्य लक्ष्यत्वात्तत्राव्याप्तिशङ्का तन्निरासावपेक्षितावेवेति भावः। नन्वेवं सति घटादेः कालत्रयेऽबाधितत्वाभावादुक्तलक्षणं तत्राऽव्याप्तमिति चेत्तत्राह—**तथा चेति**। संसारदशायामबाधितत्वेन घटादिप्रमायाः लक्ष्यत्वे सति तत्राव्याप्तिनिरासायाबाधित-पदेन संसारदशायामेवाऽबाधितत्वं विवक्षितमिति न तत्प्रमायामव्याप्तिरित्यर्थः। स्वोक्तं घटादिज्ञानप्रामाण्यमभियुक्तवचनेन द्रढयितुमाह—**तदुक्तमिति**। आत्म-निश्चयस्य संसारदशायामपि सत्त्वादाह—**ब्रह्मेति**। लौकिकं प्रत्यक्षजन्यज्ञानमात्रमिति भ्रमव्यवच्छेदायाह—**घटादीति**। आ आत्मनिश्चयात् इत्युक्तत्वेन ब्रह्मातिरिक्तवस्तु-ज्ञानं सर्वं तेन ग्राह्यमित्यर्थः। तेन स्वर्गेष्टसाधनतादिज्ञानस्यालौकिकत्वेऽपि न क्षतिः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तानि च प्रमाणानि षट्-प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धि-भेदात्। तत्र [1]प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम्। प्रत्यक्षप्रमा चात्र चैतन्यमेव[2] 'यत्साक्षादपरोक्षाद् ब्रह्म' (बृ-३-४-१) इति श्रुतेः। अपरोक्षादित्यस्यापरोक्षमित्यर्थः।

प्रमाणों के भेद—

वे प्रमाण प्रत्यक्ष, अनुमान, उपमान, आगम (शाब्दबोध), अर्थापत्ति तथा अनुपलब्धि के भेद से छः प्रकार है।

उक्त छः प्रमाणों में प्रत्यक्ष प्रमा का जो करण हो, उसे प्रत्यक्ष प्रमाण कहते हैं। वेदान्त सिद्धान्त में चैतन्य अर्थात् ब्रह्म को ही प्रत्यक्षप्रमा कहा जाता है, क्योंकि श्रुति में कहा गया—"ब्रह्म ही साक्षात् अपरोक्ष स्वरूप है"। मूल श्रुति में 'अपरोक्षात्' यह पञ्चम्यन्त पद 'अपरोक्षं' प्रथमान्त के अर्थ में है।

एवं लक्षणलक्षितप्रमाकरणं प्रमाणं कतिविधमित्यपेक्षायामाह—**तानीति**। प्रत्यक्षमेकमिति चार्वाकः, प्रत्यक्षानुमाने इति कणादसुगतमतानुयायिनः, शब्देन सह त्रीणीति साङ्ख्याः, प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति नैयायिकाः, अर्थापत्त्या सह पञ्चेति प्राभाकरास्तेषां निराकरणायोक्तं—**षडिति**। तानि कानीत्यपेक्षायामाह—**प्रत्यक्षेति**। तत्र प्रत्यक्षस्य सर्वप्रमाणोपजीव्यत्वाज्ज्येष्ठत्वाच्च

---

१. अत्रेदं बोध्यम्। प्रत्यक्षशब्दो हि प्रमाप्रमाणयोर्द्वयोरपि वर्तते, यथा घटे चक्षुःसन्निकर्षानन्तरम् अयमुघट इत्याकारं प्रमाऽऽत्मकं ज्ञानं जायते तत्प्रत्यक्षपदाभिधेयम्। तज्ज्ञानस्य करणं चक्षुरपि प्रत्यक्षपदाभिधेयम्। (तथा च वेदान्तमते मनस इन्द्रियत्वनिराकरणात्प्रत्यक्षप्रमाणानि पञ्चैव श्रोत्रादीनीति ध्येयम्) महानसादौ गृहीतव्याप्तेः पुरुषस्य कदाचित्पर्वतादौ क्वचिच्छिन्नमूलधूमदर्शनानन्तरं व्याप्तिस्मरणं तदनन्तर वह्निमानयम् इत्याकारा प्रमा या साऽनुमितिपदवाच्या तत्करणं व्याप्तिज्ञानमनुमानपदाभिधेयम्। यामे दृष्टगोपिण्डस्य कदाचिद्वने यातस्य गोसदृशगवयपिण्डेनेन्द्रियसन्निकर्षानन्तरं पूर्वदृष्टगोपिण्डसदृशोऽयमिति प्रतीतिर्जायते तदनन्तरं तस्य निश्चयो भवति 'अनेन सदृशी मदीया गौरिति' इयं प्रमा उपमितिशब्दवाच्या तत्करणं सादृश्यज्ञानम् उपमानपदवाच्यम्। 'अहरहः सन्ध्यामुपासीत' 'वत्सं वधान' इत्यादिवैदिकलौकिकवाक्यश्रवणसमनन्तरं जायमाना मानान्तराबाधिततात्पर्यविषयीभूतसंसर्गस्य प्रमा शाब्दीतिपदाभिधेया तत्करणं वैदिकं लौकिकं वा तात्पर्यवद् वाक्यज्ञानं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु चैतन्यमनादि तत्कथं चक्षुरादेस्तत्करणत्वेन प्रमाणत्वमिति। उच्यते। चैतन्यस्यानादित्वेऽपि तदभिव्यञ्जकान्तःकरणवृत्तिरिन्द्रियसन्निकर्षादिना जायते इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते। ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः। तदुक्तं विवरणे—'अन्तःकरणवृत्तौ ज्ञानत्वोपचारात्' इति ॥ ५ ॥

शङ्का—(यदि चैतन्य ही साक्षात् प्रमा है तो) चैतन्य के अनादि होने से कारण निरपेक्ष है, सुतरां उसके करणरूप से चक्षुरादि इन्द्रियों को कैसे प्रमाण कह सकते हैं ?

समाधान—चैतन्य के अनादि होने पर भी उसकी अभिव्यक्ति अन्तःकरण की वृत्तियों से ही होती है और अन्तःकरण की वृत्ति इन्द्रियों एवं अर्थों के सम्बन्ध होने पर उत्पन्न होती है। इस प्रकार वृत्तिविशिष्ट चैतन्य को सादि कहा जाता है। (वृत्ति ज्ञानरूप नहीं होने पर भी) ज्ञान के अवच्छेदक होने से औपचारिक दृष्टि से वृत्ति को भी ज्ञान कह दिया जाता है। विवरण ग्रन्थ में भी कहा गया है—"अन्तःकरण की वृत्ति में ज्ञानत्व औपचारिक है ॥ ५ ॥

तन्निरूपणमेव प्रथममारभते—**तत्रेति**। तेषु प्रमाणेष्वित्यर्थः। अनुमानादावतिव्याप्तिवारणाय **प्रत्यक्षेति**। शुक्तिरूप्यज्ञानादिसाधने [1]तन्निरासाय—**प्रमा**पदम्।

शब्दप्रमाणपदाभिधेयम्। प्रत्यक्षशब्दवदेव अर्थापत्तिशब्दोऽपि प्रमाप्रमाणसाधारणः, यथा पीनो देवदत्तोऽयं दिवा न भुङ्क्ते इति शब्दश्रवणसमनन्तरं दृश्यमानस्य श्रूयमाणस्य वा पीनत्वस्य रात्रिभोजनाभावेऽनुपपत्तिः अतस्तेन पीनत्वज्ञानेन जायमाना 'अयं रात्रावश्यं भुङ्क्ते' इत्याकारा या प्रमा सा अर्थापत्तिपदाभिधेया तस्याः प्रमायाः उत्पादकं पीनत्वज्ञानमपि अर्थापत्तिपदाभिधेयम्, परन्तु तत्प्रमाणमेव। निघंटे देशे घटाभावाकारा या विलक्षणप्रमा सा अभावानुभव इत्यादिपदाभिधेया तस्याः करणं घटानुपलब्धिः सा अनुपलब्धिपदाभिधेयेति संक्षेपः।

२. वेदान्तनये ज्ञानं चैतन्यं ब्रह्मेत्याद्यनर्थान्तरम्। ज्ञानविशेषः प्रमा, तथा च प्रत्यक्षप्रमाया एव चैतन्यत्वकथनं युक्तमित्याशयः।

१. शुक्तिरूप्यज्ञानसाधने साक्षिणि तन्निरासाय-प्रत्यक्षप्रमाणलक्षणातिव्याप्तिनिरासाय प्रमापदम्। तथा च प्रत्यक्षज्ञानकरणं प्रत्यक्षप्रमाणमित्युक्तौ रजतमिदमित्यस्यापि प्रत्यक्षज्ञानस्य करणं साक्षी तस्मिन्नतिव्याप्तिः स्यात् तन्निरासाय प्रमापदमावश्यकमिति भावः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु प्रत्यक्षप्रमात्वमिन्द्रियजन्यज्ञानत्वं ज्ञानाजन्यज्ञानत्वं वा ज्ञानाकरणज्ञानत्वं वा। नाद्यः, सिद्धान्ते मनसोऽनिन्द्रियत्वेन सुखादिप्रत्यक्षेऽव्यापकत्वात्[२]। न द्वितीयः, मतान्तरे प्रत्यक्षज्ञानमात्रस्यैवेश्वरज्ञानजन्यतया तत्राव्यापकतापातात्। नापि तृतीयः, अनुभवस्य संस्कारे उपक्षीणतया स्मृत्यकरणत्वेन[3] तत्रातिव्याप्तेः, संस्कारद्वारा करणत्वे प्रत्यभिज्ञायामव्याप्तेः। इत्येवं प्रत्यक्षप्रमाया दुरुपपादत्वात्सूपपादः पक्ष आश्रयणीय इत्यभिप्रायवानाह—**प्रत्यक्षप्रमा चेति**। तत्र श्रुतिं प्रमाणयति—**यदिति**। प्रमाणद्वारकप्रत्यक्षत्वव्यावृत्त्यर्थं साक्षात्पदम्। अपरोक्षप्रमाणाद् ब्रह्मणः साक्षात्त्वमिति भ्रमनिरासायाह—**अपरोक्षादिति**। ननु चैतन्यस्याऽनादित्वेन[४] करणाकाङ्क्षशून्यत्वात् चक्षुरादेस्तस्य करणत्वेन प्रमाणत्वं कथमिति शङ्कते—**नन्विति**। तत् तस्मात्। चैतन्यस्यानादित्वेऽपि चैतन्याभिव्यञ्जकान्तःकरणवृत्तेरिन्द्रियसन्निकर्षादिना जन्यत्वेन तद्विशिष्टचैतन्यस्यादिमत्तायाः सुवचत्वेन चक्षुरादेस्तत्करणत्वसम्भवेन प्रामाण्योपपत्तेर्मैवमिति परिहरति—**उच्यते इति**। अविशिष्टं चैतन्यं प्रति चक्षुरादेरकरणत्वं त्विष्टमेव तस्य स्वप्रकाशत्वेन स्वात्मनि प्रमाणव्यापारानपेक्षत्वादिति भावः। ननु वृत्तिरेव प्रत्यक्षप्रमा किं न स्यात्? तस्यां ज्ञानव्यवहारोपलम्भेः, स्वरूपेणेन्द्रियजन्यत्वोपपत्तेश्च इत्याशङ्क्य सत्यं ज्ञानमित्यादिश्रुत्या चैतन्यस्यैव मुख्यज्ञानत्वावगमात्, वृत्तेश्चं जडान्तःकरणधर्मत्वेन जडत्वान्न

---

१. अनुमित्युपमितिशब्दार्थापत्त्यभावप्रमाणानां व्याप्तिज्ञान-सादृश्यज्ञानतात्पर्यवत्पदज्ञान-पीनत्वज्ञाना-नुपलब्धिज्ञानजन्यानां सर्वासामेव तदितरप्रमाव्यक्तीनां ज्ञानजन्यत्वम् इत्यतः पारिशेष्यात् ज्ञानाजन्यज्ञानत्वं प्रत्यक्षप्रमालक्षणमिति द्वितीयकल्पानुसरणम्। २. लक्षणस्याव्याप्तिः।

३. पूर्वानुभूतस्य पदार्थस्य संस्कार आत्मनि वर्तते अदृष्टवशात् तस्य पुनः सन्निकर्षादिना संस्कारोद्बोधे स्मृतिर्जायते। ज्ञानाकरणकं ज्ञानं प्रत्यक्षमित्यभ्युपगमे स्मृतेरपि संस्कारजन्यत्वात् प्रमात्वापातः, अनुभवज्ञानस्य संस्कार एवोपक्षीणतया स्मृतौ करणत्वायोगादित्यतिव्याप्तिः प्रत्यक्षलक्षणस्येति। स्मृतौ संस्कारोऽवान्तरव्यापारः करणन्तु अनुभव एव व्यापारवतस्तस्य करणत्वादिति चेत्, तर्हि सोऽहं देवदत्त इत्यादिप्रत्यभिज्ञाप्रत्यक्षे स्मृतिज्ञानकरणकेऽव्याप्तिरिति॥

४. चैतन्यस्यैव प्रत्यक्षप्रमात्वे तस्यानादित्वात् तत एवाजन्यत्वात् करणानपेक्षा। कारणविशेषः करणम्। कारणं च कारकमेव तेन चेत्प्रत्यक्षप्रमाणेन चैतन्ये किमप्य-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु निरवयवस्यान्तःकरणस्य परिणामात्मिका वृत्तिः कथम् ? इत्थम्। न तावदन्तःकरणं निरवयवं सादिद्रव्यत्वेन सावयवत्वात्। सादित्वं च 'तन्मानोऽसृजत' इत्यादि श्रुतेः। वृत्तिरूपज्ञानस्य मनोधर्मत्वे च 'कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' (बृ०-१-५-३) इति श्रुतिर्मानम्। [1]धीशब्देन वृत्तिरूपज्ञानाभिधानात्। अत एव कामादेरपि मनोधर्मत्वम्।

शङ्का—अवयवरहित अन्तःकरण में परिणामरूपा वृत्ति कैसे बनेगी ? (क्योंकि परिणाम सावयव वस्तु का ही होता है, निरवयव का नहीं)।

समाधान—अन्तःकरण निरवयव नहीं है, सादि द्रव्य होने के नाते वह सावयव है। मन के सादि होने में यह श्रुति प्रमाण है—'उसने मन की सृष्टि की'। वृत्तिरूप ज्ञान भी मन का ही धर्म है, इस विषय में भी यह श्रुति प्रमाण है—"इच्छा सङ्कल्प, संशय, धृति, अधृति, धी, लज्जा और भय यह सभी मन (अन्तःकरण) का ही परिणाम है"। यहाँ पर धी शब्द से वृत्तिरूप ज्ञान को कहा गया, इसलिए कामादि भी मन का ही धर्म है।

तस्याः प्रत्यक्षप्रमात्वमपि तु तस्यां चैतन्यरूपज्ञानावच्छेदकत्वात्तत्त्वोपचार[2] इत्याशयेनाह-**ज्ञानेति**। नन्विदं केनाचार्येणोक्तमित्याकाङ्क्षायामाह-**तदुक्तमिति**। तथा च प्रकाशात्मकसंज्ञकैराचार्यैर्विवरणाख्ये ग्रन्थेऽभिहितत्वान्नायमपसिद्धान्त इति भावः।

[3]नन्वन्तःकरणं न परिणामि निरवयवत्वादाकाशवदित्यनुमानादन्तःकरणस्य परिणामात्मिकाया वृत्तेरेवासम्भवेन तद्वृत्तिविशिष्टं चैतन्यं ज्ञानमिति वक्तुमशक्यत्वेनाऽऽत्मभिन्नमेव ज्ञानं तच्चेन्द्रियजन्यत्वात् प्रत्यक्षमिति नैयायिकः शङ्कते-**नन्विति**। **कथं ?** कथमपि नास्तीत्यर्थः। अन्तःकरणं निरवयवं न भवति सादि-

---

तिशयाधानं न कृतम्, कृतं तस्य कारणत्वाभ्युपगमेनेति शङ्काऽभिप्रायः। प्रत्यक्षप्रमाणेन अविषयिष्टचैतन्येऽतिशयाधानाभावेऽपि अन्तःकरणवृत्तिविशिष्टचैतन्येऽतिशयाधानसम्भव इति परिहाराभिप्रायः।

१. पूर्वोक्तश्रुतौ धीशब्देनेत्यादिः। २. ज्ञानत्वोपचारः।

३. नैयायिकैर्ज्ञानस्यात्मगुणत्वमङ्गीकृतम्। वेदान्तिभिस्तु वृत्तिविशिष्टचैतन्यमेव ज्ञानमित्यङ्गीकृतम्। तत्रान्तःकरणस्य निरवयवत्वात् तेनैव च परिणामाभावात् परिणामरूपवृत्तेरसम्भवः। ततश्च तद्विशिष्टचैतन्याभावात् प्रत्यक्षप्रमात्वाभाव इति निष्कर्षः शङ्कायाः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु कामादेरन्तःकरणधर्मत्वेऽहमिच्छाम्यहं जानाम्यहं बिभेमीत्याद्यनुभव आत्मधर्मत्वमवगाहमानः कथमुपपद्यते ? उच्यते । अयःपिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासात् यथा अयो दहतीति व्यवहारस्तथा सुखाद्याकारपरिणाम्यन्तःकरणैक्याध्यासात् अहं सुखी दुःखीत्यादिव्यवहारः ॥ ६ ॥

शङ्का—इच्छा, सङ्कल्पादि को अन्तःकरण का धर्म मानने पर 'मैं चाहता हूँ', मैं जानता हूँ', 'मैं डरता हूँ' इत्यादि अनुभव में इच्छा ज्ञान भय आदि की प्रतीति जो आत्मा के धर्म के रूप से हो रहे हैं, इनकी सङ्गति कैसे बैठेगी ?

समाधान—जिस प्रकार लोहे के गोले में दग्धृत्व (जलाने की शक्ति) न रहने पर भी दग्धृत्व का आश्रय वह्नि के साथ तादात्म्य का अभ्यास ही जाने से लोहे का गोला जलाता है ऐसा व्यवहार लोक में दिखता है । ठीक उसी प्रकार हो सुख-दुःखादि आकाररूप परिणाम का आश्रय अन्तःकरण के साथ आत्मा की एकता का अभ्यास हो जाने से 'अहं सुखी' 'अहं दुःखी' व्यवहार होने लगता है ॥ ६ ॥

द्रव्यत्वात् घटवदित्यनुमानेन भवदुक्तहेतोरसिद्धत्वेन[1] सादिद्रव्यत्वहेतुना सिद्धेन सावयवत्वेन तत्परिणामित्वानुमानात् तत्परिणामात्मिकाया वृत्तेः सम्भवात् तद्विशिष्टमात्मचैतन्यमेव ज्ञानं न तु तद्भिन्नमित्याशयवान् परिहरति—**इत्थमिति** । आत्मादौ व्यभिचारनिरासाय—**सादीति** । रूपादौ तद्वारणाय **द्रव्यत्वेति** ।

नन्वन्तःकरणस्य सादित्वे प्रमाणभावाद्विशेषासिद्धो हेतुरिति चेत् तत्सादित्वे भगवत्याः श्रुतेः प्रमाणत्वान्नेत्याह **सादित्वं चेति** । तद् ब्रह्म मनः अन्तःकरणमसृजदित्यर्थः । एवमन्तःकरणस्य सादित्वे प्रमाणमुक्त्वा तत्परिणामित्वे न केवलमनुमानमेव प्रमाणम्, अपि तु भगवतो श्रुतिरपीत्याह—**वृत्तिरूपज्ञानस्येति** । चकारादनुमानसमुच्चयः । काम इच्छा, चिचिकित्सा सशयः । ननु श्रुतौ ज्ञानस्यानुक्तत्वात्तस्य मनोधर्मत्वे श्रुतेः कथं मानतेति चेत्तत्राह—**धीशब्देनेति** । ननु धीशब्दाभिहितं ज्ञानमन्तःकरणोपादानकं न भवति मानसप्रत्यक्षत्वात्, न च श्रुतिविरोधः मनोजन्यत्वपरतयाऽपि तदुपपत्तेरित्याशङ्क्य मृद्घट इत्यादिवत् 'सर्वं मन एव' (बृ० १-५-३) इति सामानाधिकरण्यश्रुतेरनुपादानपरत्वानुपपत्त्या कामादेरपि तदुपादानकत्वात् दृष्टान्तस्य साध्यविकलत्वेन ज्ञानमन्तःकरणोपादानकमेवेत्याशयेनाह—**अत एवेति** । सामानाधिकरण्यश्रुतेरित्यर्थः ।

---

१. तन्मनोऽसृजतेत्यादिश्रुत्या मनसः सादित्वसिद्धिः सादित्वेन हेतुना सावयवत्व-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

नन्वन्तःकरणस्येन्द्रियतयाऽतीन्द्रियत्वात्[1] कथमहमिति प्रत्यक्षविषयतेति। उच्यते[2]। न तावदन्तःकरणमिन्द्रियमित्यत्र मानमस्ति। 'मनःषष्ठानीन्द्रियाणि' इति भगवद्गीतावचनं प्रमाणमिति चेत्, न, अनिन्द्रियेणाऽपि मनसा षट्त्वसङ्ख्यापूरणाविरोधात्। न हीन्द्रियगतसङ्ख्यापूरणमिन्द्रियेणैवेति नियमः, 'यजमानपञ्चमा इडां भक्षयन्ति' इत्यत्र ऋत्विग्गतपञ्चत्वसङ्ख्याया अनृत्विजाऽपि

शङ्का—अन्तःकरण (मन) इन्द्रिय होने के नाते अतीन्द्रिय है (क्योंकि इन्द्रियाँ अतीन्द्रिय (प्रत्यक्ष के अयोग्य) होती हैं)। अत एव मैं सुखी हूँ इत्यादि प्रत्यक्षानुभव मनोविषयक कैसे हो सकते हैं ?

समाधान—अन्तःकरण इन्द्रिय है, इस विषय में कोई प्रमाण नहीं है, यदि कहो कि 'मन जिसमें कहा है ऐसी इन्द्रियाँ' यह भगवद्गीतावचन मन के इन्द्रिय होने में प्रमाण है, सो ठीक नहीं, क्योंकि मन का इन्द्रिय नहीं होने पर भी उससे इन्द्रियगत षट्त्व की संख्या के पूरण में कोई भी बाधा नहीं है। इन्द्रियगत संख्या

नन्वहमिच्छाम्यहं जानामीत्याद्यनुभवस्य कामादेरात्मधर्मत्वेनावगाहमानस्य विरोधात्तेषामन्तःकरणधर्मत्वं नोपपद्यते, श्रुतिस्तु आयुर्वै घृतमितिवत् हेनावुपचरितार्थेति शङ्कते—**नन्विति**। कामादेरन्तःकरणधर्मत्वमेव उक्तव्यवहारस्तु सुखाद्याकारपरिणाम्यन्तःकरणैक्याध्यासादुपपद्यते, यथाऽयःपिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासादयो दहतीति व्यवहारः तद्वदिति समाधत्ते—**उच्यते** इति।

नन्वस्तु वह्न्ययःपिण्डयोरुभयोरपि प्रत्यक्षविषयत्वेन तादात्म्याध्यासादुक्तव्यवहारः आत्मान्तःकरणयोस्तु प्रत्यक्षविषयत्वाविषययोस्तत्त्वाभावात् कथमुदाहृतव्यवहारः ? न चान्तःकरणस्य प्रत्यक्षविषयता, तस्येन्द्रियतयाऽतीन्द्रियत्वाच्चक्षुरादीन्द्रियवदिति शङ्कते—**नन्विति**। अन्तःकरणस्येन्द्रियत्वे प्रमाणाभावाद् अतीन्द्रियत्वासिद्धया प्रत्यक्षविषयताऽभावासिद्धिरित्याशयेन परिहरति—**नेति**। षष्ठस्य

सिद्धिः सिद्धेन सावयवत्वहेतुना परिणामित्वं सिद्ध्यति, अतो न सत्प्रतिपक्षः। इदमत्रानुमानशरीरम्—अन्तःकरणं परिणामि अन्त्यावयविभिन्नत्वे सति सावयवत्वात्। मृद्वत्।

१. अन्तःकरणमतीन्द्रियम् इन्द्रियत्वात् चक्षुरादिवत् इत्यनुमानशरीरम्।

२. सिद्धेन इन्द्रियत्वहेतुना अन्तःकरणस्यातीन्द्रियत्वं साधनीयम्, नासिद्धेन। अत्र च हेतोरेवासिद्धिरित्युत्तरमाह—उच्यत इति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यजमानेन पूरणदर्शनात्। 'वेदानध्यापयामास महाभारतपञ्चमान्' इत्यत्र वेदगतपञ्चत्वसङ्ख्याया अवेदेनापि महाभारतेन पूरणदर्शनात्। 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः' (का० १-३-१०) इत्यादि श्रुत्या मनसोऽनिन्द्रियत्वावगमाच्च।

इन्द्रिय से ही पूरण होगी ऐसा कोई नियम नहीं है, जैसे कि देखा गया "यजमान पञ्चम व्यक्ति जहाँ पर ऋत्विक्गण (अध्वर्यु, होता उद्गाता और ब्रह्मा) इड़ा (यज्ञीय हविविशेष) भक्षण करेंगे। यहाँ पर (वैदिक वाक्य में) ऋत्विग्गत पञ्चत्व संख्या की पूर्त्ति ऋत्विक् से भिन्न यजमान से देखी गयी है। "महाभारत जिसमें पाँचवाँ है ऐसे वेदों को पढ़ाया" इस (स्मृति) वाक्य में वेदगत पञ्चत्व संख्या की पूर्त्ति वेदभिन्न महाभारत से देखी गई है। और 'इन्द्रियों से परे अर्थ है तथा अर्थों से परे मन है' इस श्रुति से मन अनिन्द्रियत्व जाना जाता है।

मनस इन्द्रियत्वप्रतिपादकस्य भगवद्वाक्यस्य परमप्रमाणस्य सत्त्वान्मानं नास्तीत्ययुक्तमिति चोदयति—**मन इति**। अनिन्द्रियेणापि मनसा इन्द्रियगतषट्त्वसंख्यापूरणाविरोधेन उदाहृतभगवद्वचसस्तदिन्द्रियत्वे[1] प्रमाणत्वाभावान्मैवमित्याह—**नेति**। तथा च श्रुतेरनुपलम्भात् स्मृतेश्च तदिन्द्रियत्वावोधकत्वान्न मानमस्तीति सुस्थम्। न च मन इन्द्रियम् इन्द्रियगतसंख्यापूरकत्वादित्यनुमानं मानमिति शङ्क्यम्, अनिन्द्रियेणापि तद्गतसंख्यापूरणाविरोधेनाप्रयोजकत्वात्। किंचोक्तानुमाने यदिन्द्रियगतसंख्यापूरकं तदिन्द्रियमिति विशेषव्याप्तेर्मूलम् उत यद्यद्गतसंख्यापूरकं तत्तज्जातीयं यथा—'पशौ प्रतिप्रस्थातृषष्ठा ऋत्विजः' इत्यत्र ऋत्विग्गतसंख्यापूरकऋत्विग्जातीय इति सामान्यव्याप्तिः इति विकल्प्य नोभयमित्याशयेनाह—**न हीति**। दृष्टान्ताभावेनाद्यनिरासमभिप्रेत्य द्वितीयो व्यभिचारान्नेत्याशयेन हेतुमाह—**यजमानेति**। तथा च यजमाने ऋत्विग्गतसंख्यापूरकत्वं वर्त्तते तज्जातीयत्वं नास्तीति व्यभिचार इति भावः।

एवं श्रुतौ व्यभिचारं प्रदर्श्य स्मृतावपि तं दर्शयति—**वेदानिति**। **अवेदेनापीति**। पौरुषेयस्येतिहासत्वेन प्रसिद्धस्य वेदत्वाप्रसिद्धेरिति भावः। यथा—'नक्षत्राणामहं शशी' इति वचनं न शशिनो नक्षत्रतायां प्रमाणं तथा 'इन्द्रियाणां मनश्चास्मी'ति भगवद्वाक्यमपि मनस इन्द्रियत्वे न प्रमाणमित्यपि ज्ञेयम्। ननु मनस इन्द्रियत्वे बाधकाभावात् किमर्थमेवमुच्यते इत्याशङ्क्याव्यवच्छेदाय हेत्वन्तरमाह—

---

१. तस्य मनस इन्द्रियत्वे प्रमाणाभावादित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न चैवं मनसोऽनिन्द्रियत्वे सुखादिप्रत्यक्षस्य साक्षात्त्वं[1] न स्यादिन्द्रियाजन्यत्वादिति वाच्यम्। न हीन्द्रियजन्यत्वेन ज्ञानस्य साक्षात्त्वम्, अनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः ईश्वरज्ञानस्यानिन्द्रियजन्यस्य साक्षात्त्वानापत्तेश्च ॥ ७ ॥

शङ्का—इस प्रकार मन को इन्द्रिय न मानने पर सुख दुःखादि के प्रत्यक्ष में साक्षात्व की सिद्धि नहीं हो सकेगी, क्योंकि इन्द्रियजन्य ज्ञान को प्रत्यक्ष कहते हैं। (और सुख, दुःखादि का प्रत्यक्ष तो इन्द्रियजन्य है)।

समाधान—इन्द्रियजन्यज्ञान प्रत्यक्ष होता है ऐसी बात नहीं है, नहीं अनुमित्यादि ज्ञान भी (आपके मत में) मन रूप इन्द्रिय से जन्य होने के नाते इन्हें प्रत्यक्ष मानना पड़ेगा। ईश्वर का ज्ञान इन्द्रिय से जन्य नहीं होने से उसमें प्रत्यक्षत्व का अभाव सिद्ध होने लगेगा ॥ ७ ॥

इन्द्रियेभ्य इति। इन्द्रियपरार्थेभ्यः परत्वप्रतिपादनेन मनसोऽनिन्द्रियत्वबोधकतयेत्यर्थः। ननु मनोव्यतिरिक्तेन्द्रियेभ्यः परा ह्यर्था इति व्याख्यानसम्भवेन न तस्य[2] तत्त्वबाधकम् इति शङ्कानिरासाय 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' मु० २। ३ इत्येवमादिश्रुतिरादिपदेन संगृहीता तथा चादिपदोपात्तश्रुत्येकवाक्यतामापन्नेयं श्रुतिरिन्द्रियपरेभ्यः परत्वं मनसः प्रतिपादयन्ती तस्यानिन्द्रियत्वं बोधयतीति भावः। ननु मनसोऽनिन्द्रियत्वे प्रत्यक्षस्येन्द्रियजन्यत्वादनिन्द्रियमनोजन्यसुखाद्युपलब्धेः प्रत्यक्षत्वं न स्यात् तस्मात्तत्प्रत्यक्षत्वसिद्धये तस्येन्द्रियत्वमदृष्टमभ्युपेयमित्याशङ्क्य निराकरोति—**न चेति**। हि यस्मादिन्द्रियजन्यत्वं ज्ञानस्य प्रत्यक्षत्वे प्रयोजकं न भवति तस्मादिन्द्रियाजन्यत्वेन सुखाद्युपलब्धेरप्रत्यक्षत्वं स्यादिति न च वाच्यमित्यर्थः। तस्य तत्प्रयोजकत्वे किं बाधकमिति चेत्तत्राह—**अनुमित्यादेरिति**। उक्तप्रयोजकानुसारेण सुखादिज्ञानस्य प्रत्यक्षत्वसिद्धये मनसोऽपीन्द्रियत्वाश्रयणान्मनोजन्यानुमित्यादेः प्रत्यक्षत्वापत्तिर्बाधिकेत्यर्थः। नन्विन्द्रियत्वेनेन्द्रियजन्यत्वमेव [3]तत्प्रयो-

---

१. प्रत्यक्षत्वं न स्यात्। इन्द्रियजन्यं ज्ञानं प्रत्यक्षम् इति प्रत्यक्षलक्षणवादिनः तार्किकस्य प्रत्यवस्थानमिदम्।

२. तस्य—मनसः। तत्त्वबाधकम् इन्द्रियत्वे बाधकम् 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः' इति श्रुतिवचनमिति शेषः।

३. तत्प्रयोजकम्—प्रत्यक्षताप्रयोजकमित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिद्धान्ते प्रत्यक्षत्वप्रयोजकं किमिति[1] चेत्, किं ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं पृच्छसि किं वा विषयगतस्य। आद्ये प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेद इति ब्रूमः। तथा हि—त्रिविधं[2] चैतन्यं प्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यं चेति। तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यम्, अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्, अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्॥

प्रत्यक्ष प्रमाण का निरूपण—

शङ्का—(प्रश्न हो सकता है कि इन्द्रियजन्यत्व प्रत्यक्ष का प्रयोजक नहीं है तो वेदान्त) सिद्धान्त में प्रत्यक्षत्व का प्रयोजक क्या है?

समाधान—क्या आप ज्ञानगत प्रत्यक्षत्व का प्रयोजक पूछते हैं? प्रथम कल्प में तो प्रमाण चैतन्य को विषयावाच्छिन्न चैतन्य के साथ अभेद ही ज्ञान के प्रत्यक्ष होने में प्रयोजक है। उसी को स्पष्टरूप से समझते हैं—स्वरूपतः चैतन्य एक होता हुआ भी उपाधि भेद से प्रमातृ चैतन्य, प्रमाण चैतन्य एवं विषय चैतन्य के रूप से तीन प्रकार का हो जाता है। उसमें घटादि विषयों से अवच्छिन्न (घिरा हुआ) चैतन्य को विषय चैतन्य कहते हैं। अन्तःकरण की वृत्ति से अवच्छिन्न चैतन्य को प्रमाण चैतन्य कहते हैं। एवं अन्तःकरण से अवच्छिन्न चैतन्य को प्रमातृ चैतन्य कहते हैं।

जकम्, अनुमित्यादेश्च मनस्त्वेन तज्जन्यत्वान्नातिप्रसङ्ग इत्यत आह—**ईश्वरज्ञानस्येति॥**

एवं निरस्तस्वाभिमतप्रत्यक्षत्वप्रयोजकः सिद्धान्तेऽपि प्रयोजकान्तरमपश्यन्नाक्षिपति—**सिद्धान्ते इति। किम्?** न किमपीत्यर्थः सिद्धान्ते तत्प्रयोजकस्य

---

१. प्रत्यक्षत्वरूपकार्यतावच्छेदकस्य प्रयोजकेन केनापि भाव्यम्। तच्चेन्द्रियजन्यत्वमिति तार्किकाः। मनस इन्द्रियत्वनिराकरणेन अन्यस्य चानुपलम्भेन अहं सुखीत्यादिसाधारणासु प्रत्यक्षतयाऽनुभूयमानासु ज्ञानव्यक्तिष्वनुगतप्रयोजकाभावादेव प्रत्यक्षता न स्यादिति कर्कशाशय आक्षिपति=किमिति।

२. जगतीतलस्थितानां समेषां पदार्थानां प्रमातृ–प्रमाण–प्रमेयेष्वन्तर्भावः तेषु सर्वेषु पदार्थेषु। यथा घटशरावमणिकमल्लिकोदञ्चनादिभिर्वस्तुतोऽपरिच्छिन्नमपि वियद् परिच्छिद्यते, एवम् अनवच्छिन्नमपि चैतन्यमवच्छिद्यते, वस्तुतश्चैतन्यमेवेति न विरोधोऽद्वैतश्रुतेः इति तत्त्वम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान्प्रविश्य तद्वदेव चतुष्कोणाद्यकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरित्युच्यते। अनुमित्यादिस्थले तु नान्तःकरणस्य वह्न्यादिदेशगमनं वह्न्यादेश्चक्षुराद्यसन्निकर्षात्। तथा चायं घट इत्यादिप्रत्यक्षस्थले घटादे-

जैसे कि तालाब का जल छिद्र से निर्गत होकर नाली का आकार धारण करता हुआ खेत में जाता है और खेत के त्रिकोण चतुष्कोण आकार के समान ही जल का भी आकार हो जाता है—ठीक उसी तरह तैजस अन्तःकरण भी चक्षुरादि इन्द्रियों के द्वारा निकलकर घटादि देश में जाता है और वह घटादि के आकर रूप से ही परिणत हो जाता है। इसी परिणाम को अन्तःकरण की वृत्ति कहते हैं। अनुमित्यादि ज्ञान जहाँ पर होना है वहाँ वह्न्यादि विषय में अन्तःकरण जाता नहीं, क्योंकि वहाँ पर वह्न्यादि के साथ चक्षुरादि इन्द्रियों का सम्बन्ध तो हुआ नहीं है। परन्तु 'यह घट है'

सत्त्वादाक्षेपप्रतिक्षेपाय पृच्छति—**किमिति**। ज्ञानगतप्रत्यक्षत्वस्य तत्पृच्छामीति चेत्तत्राह—**आद्य इति**। नन्वद्वैतवादिनस्तव कथं चैतन्यभेदो येन प्रमाणचैतन्यस्य विषयचैतन्येनाभेदस्य ज्ञानगतप्रत्यक्षत्वप्रयोजकत्व भवेत् इत्याशङ्क्योपाधिकं भेदमुपपादयति—**तथा हीति**।

नन्वन्तःकरणस्य वृत्तेरेवासम्भवात् तदवच्छिन्नं चैतन्यं प्रमाणचैतन्यमित्युक्ति-रयुक्ता, न ह्यणुपरिमाणस्य तस्य वृत्तिः सम्भवति। न च तत्परममहत्परिमाणम्, प्राणशक्त्याश्रयस्य तस्यैवोत्क्रान्तिगत्यादिश्रवणात्। नापि मध्यमपरिमाणम्, तथात्वे देहवन्मन्दगतित्वेन झटितिविषयप्रतिभासानुपपत्तेः आन्तरस्य बहिर्निर्गमनानुपपत्ते-श्चेत्याशङ्क्यान्त करणस्याणुत्वे देहव्यापिसुखाद्युपलब्ध्यनुपपत्तिम्, तस्य प्राणशक्त्या-श्रयस्य दूरवर्तिध्रुवादिपर्यन्तगमने तदवच्छिन्नजीवस्यापि गतत्वेन देहस्य निर्जीवत्वा-पत्तिं चाभिप्रेत्य तस्य मध्यमपरिमाणत्वमाश्रित्योत्तरमाह—**तत्रेति**। तेषु त्रिषूपा-धिष्वित्यर्थः। तैजसमित्यनेनातिस्वच्छविरलतैजसद्रव्यतया सवितृकिरणवच्छीघ्रप्रसरो-पपत्तिर्बोधिता। ननु अनुमित्यादिस्थलेऽप्यन्तःकरणस्य वह्न्यादिदेशगमनेन वृत्त्यव-च्छिन्नस्य तदवच्छिन्नाभेदादुक्तप्रयोजकं तत्रातिव्याप्तमित्याशङ्क्याह—**अनुमितीति**। तत्र हेतुमाह—**वह्न्यादेरिति**। ननु प्रत्यक्षस्थलेऽपि वृत्तिघटयोर्भेदाद्भिन्नोपाधिकयोः प्रमाणप्रमेयचैतन्ययोर्भेदावश्यंभावादुक्तप्रयोजकं तत्राव्याप्तमित्यत आह—**तथा**

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तदाकारवृत्तेश्च बहिरेकत्र देशे समवधानात्तदुभयावच्छिन्नं चैतन्यमेकमेव, विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वात्। अत एव मठान्तर्वर्तिघटावच्छिन्नाकाशो न मठावच्छिन्नाकाशाद्भिद्यते। तथा चायं घट इति घटप्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया घटावच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य चाभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वम्।

इस प्रकार प्रत्यक्ष स्थल पर घटादि विषय और घटाकार वृत्ति दोनों ही एक बाह्य घटादि देश में एकत्रित होने के नाते घटावच्छिन्न चैतन्य और घटाकार वृत्यवच्छिन्न चतन्य एक ही है, दो नहीं। क्योंकि इन दोनों के विभाग करने वाले घटादिविषय और अन्तःकरण की वृत्ति एक देश में स्थित हो चुके हैं। इसलिए वे भेद पैदा नहीं कर सकते। जिस प्रकार मठ के भीतर रखा हुआ घट से अवच्छिन्न आकाश मठावच्छिन्न आकाश से भिन्न नहीं है, क्योंकि मठ और घट दोनों एक ही देश में हैं। उसी प्रकार 'यह घट है' यहाँ पर जो घट का प्रत्यक्ष हो रहा है इस स्थल में घट के साथ अन्तःकरण का सम्बन्ध होने पर ही घटाकार परिणामरूप वृत्ति बनी है। अतः घटावच्छिन्न और घटाकार वृत्यवच्छिन्न चैतन्य का अभेद घट ज्ञान के प्रत्यक्ष का प्रयोजक है (जो कि पहले कहा गया है)। इस प्रकार घटावच्छिन्न चैतन्यरूप ज्ञान का प्रत्यक्ष हुआ करता है॥ ८॥

चेति। चक्षुरादिसन्निकर्षस्थले मनोनिर्गमने सिद्धे सतीत्यर्थः। **समवधानात्सहावस्थानात् तदुभयावच्छिन्नं** घटादितदाकारवृत्त्युपहितम्।

ननु विशेषणयोरिवोपाध्योरेकदेशस्थितत्वेऽपि भेदजनकत्वात्कथमुपहितचैतन्यैक्यमित्याशङ्क्य उपाध्योर्भिन्नदेशस्थत्वेनैव भेदजनकत्वं, न तु विशेषणयोरिव स्वरूपेणापीत्याशयेनाह—**विभाजकयोरपीति**। भिन्नदेशस्थत्वेनोपधेयभेदप्रयोजकयोरपीत्यर्थः। **ननु** लाघवात्स्वरूपेणैव भेदजनकत्वमुपाध्योरप्यस्त्वत आह—**अत एवेति**। एकदेशस्थितत्वेनोपाध्योर्भेदाजनकत्वादेवेत्यर्थः। एवं च प्रामाणिकत्वादगौरवं न दोषावहमिति भावः। फलितमाह—**तथा चेति**। एकदेशस्थितत्वेनोपाध्योर्भेदाजनकत्वे सिद्धे सतीत्यर्थः। **तद्वृत्त्यवच्छिन्नचैतन्यस्य**—घटवृत्त्यवच्छिन्नचैतन्यस्य। **तत्र—अयं घट इति प्रत्यक्षस्थले।**

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

सुखाद्यवच्छिन्नचैतन्यस्य[1] तद्वृत्त्यवच्छिन्नचैतन्यस्य च नियमेनैकदेशस्थितोपाधिद्वयावच्छिन्नत्वाद् नियमेनाहं सुखीत्यादिज्ञानस्य प्रत्यक्षत्वम्। नन्वेवं स्ववृत्तिसुखादिस्मरणस्यापि सुखाद्यंशे प्रत्यक्षत्वापत्तिरिति चेन्न। तत्र स्मर्यमाणसुखस्यातीतत्वेन स्मृतिरूपान्तःकरणवृत्तेर्वर्तमानत्वेन तत्रोपाध्योर्भिन्नकालीनतया तत्तदवच्छिन्नचैतन्ययोर्भेदात्। उपाध्योरेकदेशस्थत्वे सत्येककालीनत्वस्यैवोपधेयाभेदप्रयोजकत्वात्॥

सुखादि से अवच्छिन्न चैतन्य और सुखाद्याकार वृत्त्यवच्छिन्न चैतन्य नियम से देह के भीतर ही एक देश में स्थित है। इसलिए इन दोनों उपाधियों से अवच्छिन्न होने के नाते 'अहं सुखी' इस अनुभव में सुखादि ज्ञान का नियम से प्रत्यक्ष होता है। (अर्थात् सुखादि ज्ञान का कभी भी परोक्ष नहीं होता)।

शङ्का—(विषय और विषयाकार वृत्ति के एकदेश में हो जाने से ज्ञान का प्रत्यक्ष होता है। अतएव) अन्तःकरण स्थित (अतीत) सुखादि के स्मरण में भी सुखादि विषयांश में प्रत्यक्षत्व आजायगा (अर्थात् लक्षण की अति व्याप्ति होगी)।

समाधान—यहाँ पर स्मृति को विषयीभूत सुख अतीत कालीन होने के कारण एवं स्मृत्यात्मक अन्तःकरण की वृत्ति वर्तमान कालीन होने के कारण दोनों उपधियों के काल विभिन्न है। अतएव (समान कालीन न होने से) उन उपाधियों से अवच्छिन्न चैतन्य का भी भेद ही रहता है क्योंकि विषय और विषयाकार दोनों उपाधियों को एक देश में होते हुए भी एक काल में होने पर ही दोनों उपाधियों से अवच्छिन्न चैतन्य का अभेद हो सकेगा अन्यथा नहीं।

ननु चक्षुराद्यसन्निकृष्टे सुखादौ तद्वृत्त्यनुदयात् कथं तदंशे प्रत्यक्षत्वमित्याशङ्क्य तस्यान्तरत्वेन चक्षुरादिसन्निकर्षानपेक्षणादित्याशयेनाह–**सुखादीति**। **तत्**–सुखादि।

[2]एकस्मिन्नन्तःकरणरूपे देशे स्थितं यदुपाधिद्वयं सुखादि तद्वृत्तिरूपं तदवच्छिन्नत्वात्।

प्रत्यक्षत्वमिति। सुखाद्यंशे इति शेषः। नन्वेवमुपाध्योरेकदेशस्थत्वेन भेदाजनकत्वे अहं पूर्वं सुखीत्यादेः स्ववृत्तिसुखादिस्मरणस्यापि सुखाद्यंशे प्रत्यक्षत्वं स्यादिति

---

१. सुखाद्याकारपरिणतान्तःकरणवृत्त्यवच्छिन्नचैतन्यस्य च।

२. अत्रेदं तत्त्वम्–वेदान्तनये सुखादीनामन्तःकरणधर्मत्वेन तेषामन्तःकरणदेशस्थत्वम्, सुखाद्याकारा वृत्तिरपि तदा अन्तःकरणस्था, इति सुखावच्छिन्नसुखाकारवृत्त्यवच्छिन्नचैतन्यस्य पूर्वप्रदर्शित—(उपाध्योरेकदेशस्थत्वेन उपधेयभेदाप्रयोजकत्वमिति)-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यदि चैकदेशस्थत्वमात्रमुपधेयाभेदप्रयोजकं तदा अहं पूर्वं सुखीत्यादि-स्मृतावतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणं देयम् ॥ ९ ॥

यदि (भिन्न कालीन होने पर भी) एक देश में स्थित दो उपाधियों को अभेद का प्रयोजक मानें तो 'मैं पूर्व सुखी था' इस स्मृति में अतिव्याप्ति होगी । इस अतिव्याप्ति दोष वारण के लिए विषय में 'वर्तमानत्व' विशेषण दे देना चाहिए ॥ ९ ॥

---

[1]शङ्कते —**नन्विति** । न केवलमुपाध्योरेकदेशस्थत्वमात्रमुपहिताभेदप्रयोजकम्, अपि त्वेककालीनत्वमपि इति न स्मृतावतिव्याप्तिस्तत्रोपाध्योर्भिन्नकालीनत्वादिति परिहरति—**नेति** । **तत्र**—स्ववृत्तिसुखादिस्मरणे । **तत्र** तयोः सुखतद्वृत्तिरूपयोरुपाध्योः **तत्तदवच्छिन्नचैतन्ययोः** —सुखतद्वृत्त्यवच्छिन्नचैतन्ययोः । **उपधेयेति** उपहितचैतन्येत्यर्थः ।

नन्वेवं तर्हि भिन्नकालीनयोरेकदेशस्थयोर्घटमठयोर्भेदकत्वापत्तिः उपधेयाभेदसमये उपाध्योरेककालत्वविवक्षायां त्वन्योन्याश्रय[2] इत्यरुचेराह—**यदीति** । उपाध्योरित्यनुषज्यते । प्रमाणचैतन्यस्य विषयचैतन्याभेद इत्यत्र वर्तमानत्वं विषयविशेषणं देयम्[3], तथा च स्मर्यमाणसुखादेरवर्तमानत्वेन न स्मृतावतिव्याप्तिरित्यर्थः । यद्यप्यवर्तमानस्यानुपाधित्वेन विषयावच्छिन्नेनैवोक्तातिव्याप्तिनिरासः, तथाऽपि विषयस्योपलक्षणत्वनिरासद्वारोक्तातिव्याप्तिनिरासाय वर्तमानत्वं विषयविशेषणमपेक्षितमिति ध्येयम् ।

दिशा एकत्वात् सुखांशे प्रत्यक्षत्वम् । बाह्यविषयाकारवृत्तेरिन्द्रियसन्निकर्षापेक्षा, आन्तरविषयाकारवृत्तिस्तु स्वत एवेति आन्तरबाह्यविषययोर्विशेषः ।

१. स्मर्यमाणसुखाकारवृत्त्यवच्छिन्नसुखावच्छिन्नचैतन्ययोः पूर्वोक्तदिशा एकत्वात् इति शङ्काऽभिप्रायः ।

२. उपधेयाभेदसिद्धावेककालीनोपाधिद्वयावच्छेदसिद्धिः तत्सिद्धावुपधेयाभेदसिद्धिरित्यन्योन्याश्रयः । एकदेशस्थत्वापेक्षया एकदेशस्थत्वे सत्येककालीनत्वस्य उपधेयाभेदप्रयोजकत्वे गौरवमपि बाधकमुन्नेयम् ।

३. तथा च प्रमाणचैतन्यस्य वर्तमानकालीनविषयावच्छिन्नचैतन्याभेदः प्रत्यक्षप्रयोजक इति फलितम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

नन्वेवमपि स्वकीयधर्माधर्मौ वर्त्तमानौ यदा शब्दादिना ज्ञायेते तदा तादृशशाब्दज्ञानादावतिव्याप्तिः, तत्र धर्माद्यवच्छिन्नतद्वृत्त्यवच्छिन्नचैतन्ययोरेकत्वादिति चेन्न। योग्यत्वस्यापि विषयविशेषणत्वात्। अन्तःकरणधर्मत्वाविशेषेऽपि किञ्चिद्योग्यं किञ्चिद्योग्यमित्यत्र फलबलकल्प्यः स्वभाव एव शरणम्, अन्यथा न्यायमतेऽप्यात्मधर्मत्वाविशेषात् सुखादिवद्धर्मादेरपि प्रत्यक्षत्वापत्तिर्दुर्वारा ॥ १० ॥

शङ्का—तब भी अपना धर्म और अधर्म जो कि अन्तःकरण देश में वर्तमान है, उनका 'तुम धार्मिक हो' 'तुम अधार्मिक हो' इत्यादि वाक्य श्रवण से जब अपने धर्माधर्म का शब्दज्ञान हुआ उसमें अतिव्याप्ति होने लग जायेगी क्योंकि वर्तमान धर्मादि से अवच्छिन्न चैतन्य अन्तःकरण देश में है, उसी देश में शब्द से धर्मादि के आकार रूप अन्तःकरण की वृत्ति भी बनी है। इसलिए वर्तमान धर्मादि से अवच्छिन्न चैतन्य और तदाकार वृत्यवच्छिन्न चैतन्य एक देश में स्थित हो जाने के कारण दोनों का अभेद है। (अतएव इस शाब्द ज्ञान में उक्त लक्षण को अतिव्याप्ति हो जायेगी)।

समाधान—उक्त लक्षण के विषयांश में 'योग्यत्व' विशेषण दे देने पर अतिव्याप्ति दोष की निवृत्ति हो जायगी। भी धर्म और अधर्म सुखादि की तरह अन्तःकरण के धर्म होने पर भी सुखादि की तरह योग्य (प्रत्यक्ष योग्य) नहीं। यह कार्य को देखकर ही कल्पना कर लेनी चाहिए। क्योंकि ऐसी स्थिति में फलबल से कल्पनीय स्वभाव ही एकमात्र शरण होता है। इस प्रकार स्वीकार नहीं करने पर न्यायमत में भी सुखादि की तरह धर्म और अधर्म आत्मा के विशेष गुण होने से उनका भी प्रत्यक्ष होना चाहिए। इस दोष का कारण कहना दुष्कर हो जायेगा ॥ १० ॥

ननु वर्तमानस्य विषयविशेषणत्वेऽपि धर्माधर्मविषयकशाब्दादिज्ञानेऽतिव्याप्तिस्तयोर्वर्त्तमानत्वादिति शङ्कते—**नन्विति**। एकदेशस्थत्वं बोधयितुं **स्वकीये**त्युक्तम्। भवान् धार्मिकस्त्वमधार्मिक इत्यादिशब्दः। आदिशब्देनाहं सुकृतादृष्टवान् सुखित्वाद् अहं दुष्कृतादृष्टवान् दुःखित्वादित्यनुमानादिकं ग्राह्यम्। **तत्र** शाब्दज्ञानादौ। 'तद्धर्मादिप्रमाणचैतन्यस्य वर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वमिति।

---

१. तेषु धर्मादिषु यानि प्रमाणानि शब्दादीनि तदवच्छिन्नचैतन्यं तस्य तद्धर्मादिप्रमाणचैतन्यस्य वर्तमानधर्मादिविषयावच्छिन्नचैतन्याभेदो वर्तत इति पुनः प्रत्यक्षत्वापत्तिरिति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न चैवमपि वर्तमानतादशायां त्वं सुखीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षता स्यादिति वाच्यम्। इष्टत्वात्। 'दशमस्त्वमसि' इत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानाभ्युपगमात्। अत एव पर्वतो वह्निमानित्यादिज्ञानमपि वह्न्यंशे परोक्षं पर्वतांशेऽपरोक्षम्। पर्वताद्यवच्छिन्नचैतन्यस्य बहिर्निःसृतान्तःकरणवृत्त्यवच्छिन्नचैतन्याभेदात्।

शङ्का—इस प्रकार मानने पर वर्तमान दशा में 'तुम सुखी हो' इस वाक्य के श्रवण से जो वाक्यजन्य सुख का ज्ञान उत्पन्न हुआ, उसमें भी प्रत्यक्ष का लक्षण चला जायेगा।

समाधान - यह आपत्ति हमारे लिए इष्ट ही है। क्योंकि 'तू दशवाँ है' इस स्थल पर आप्त वाक्य से सन्निहित विषय दशम का शब्द से भी अपरोक्ष ज्ञान माना गया है। इसलिए 'पर्वतो वह्निमान्' इत्यादि अनुमिति ज्ञान भी वह्नि अंश में परोक्ष है और पर्वत अंश में प्रत्यक्ष ही है। क्योंकि पर्वतादि से अवच्छिन्न और बाहर निकली हुई पर्वतादि के आकारवाली अन्तःकरण की वृत्ति से अवच्छिन्न चैतन्य का

प्रत्यक्षत्वप्रयोजके योग्यत्वस्यापि विषयविशेषणत्वाद्धर्मादिश्चायोग्यत्वान्नातिव्याप्तिरिति परिहरति—**नेति। योग्यत्वस्य**—प्रत्यक्षयोग्यत्वस्य। ननु सुखादेर्धर्मादिश्चान्तःकरणधर्मत्वाविशेषात्कस्यचिद्योग्यत्वं कस्यचिन्नेत्यत्र किं नियामकमिति चेत्तत्राह—**अन्तःकरणेति**। विपक्षे बाधकमाह—**अन्यथेति**। फलबलकल्प्यस्वभावस्याश्रयणत्वं इत्यर्थः॥

ननु योग्यत्वविशेषणदानेऽपि सुखवर्तमानतासमये त्वं सुखीति वाक्यजन्यज्ञानस्य प्रत्यक्षता स्यादित्याशङ्क्येष्टापत्त्या परिहरति—**न चैवमिति**। ननु त्वं सखीत्यादिवाक्यं न स्वविषयपरोक्षज्ञानजनकं वाक्यत्वाज्ज्योतिष्टोमादिवाक्यवदित्यनुमानात्कथमुक्तवाक्यादपरोक्षज्ञानमिति चेत्, दशमस्त्वमसीत्यादिवाक्ये व्यभिचारान्नेत्याह—**दशम इति**। उक्तानुमाने सन्निकृष्टविषयत्वमुपाधिरपीत्याशयेनाह—**सन्निकृष्टविषय इति**। नन्वेवं तर्हि पर्वतो वह्निमानित्याद्यनुमितेरपि प्रत्यक्षत्वं स्यादिति चेत्, तत्र किं पर्वतांशे तदापाद्यते वह्न्यंशे वा? नाद्यः इष्टत्वादित्याशयेनाह—**अत एवेति**। प्रमाणचैतन्यस्य योग्यवर्तमानविषयचैतन्याभेदस्य प्रत्यक्षत्वप्रयोजकत्वाभ्युपगमादेवेत्यर्थः। द्वितीयं प्रत्याह—**वह्न्यंश इति**। आद्ये हेतुमाह—**पर्वतादीति**। द्वितीये हेतुमाह—**वह्न्यंशे त्विति**। ननु 'सिद्धानुगममात्रं हि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वह्न्यंशे त्वन्तःकरणवृत्तिनिर्गमनासम्भवेन वह्न्यवच्छिन्नचैतन्यस्य प्रमाणचैतन्यस्य च परस्परं भेदात्। तथा चानुभवः 'पर्वतं पश्यामि वह्निमनुमनोमीति'।

न्यायमते तु पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिः। असन्निकृष्टपक्षकानुमितौ तु सर्वांशेऽपि ज्ञानं परोक्षम्। सुरभिचन्दनमित्यादिज्ञानमपि चन्दनखण्डांशे अपरोक्षं सौरभांशे तु परोक्षं सौरभ्यस्य चक्षुरिन्द्रियायोग्यतया योग्यत्वघटितस्य निरुक्तलक्षणस्याभावात्॥ ११॥

अभेद होता ही रहता है। परन्तु वह्नि अंश में अन्तःकरणवृत्ति का निकलना सम्भव नहीं है अतः वह्नि अवच्छिन्न चैतन्य और बह्याकारवृत्त्यवच्छिन्न चैतन्य का वहाँ पर परस्पर भेद है। इसलिए ही तो 'पर्वत का प्रत्यक्ष कर रहा हूँ' 'वह्नि का अनुमान कर रहा हूँ' ऐसा अनुभव होता है। न्यायमत में तो 'पर्वत का अनुमान करता हूँ' इस प्रकार अनुव्यवसाय की आपत्ति होगी। किन्तु जहाँ पर पक्ष के साथ इन्द्रिय सन्निकर्ष नहीं है वहाँ पर अनुमिति ज्ञान सभी अंश (पक्ष, साध्य और दोनों के सम्बन्ध) में परोक्ष ही रहता है। 'चन्दनखण्ड सुरभियुक्त है' यह ज्ञान भी चन्दन खण्डांश में अपरोक्ष है और सुरभित्व अंश में परोक्ष है। क्योंकि सौरभ (सुगन्धि) अंश चक्षुरिन्द्रिय के योग्य न होने से 'योग्यत्व' घटित पूर्वोक्त ज्ञानगत प्रत्यक्ष का लक्षण वहाँ पर सम्भव नहीं है॥ ११॥

कर्तुं युक्तं परीक्षकैः। न सर्वलोकसिद्धस्य लक्षणेन निवर्तन'मिति भट्टपादैरुक्तत्वात् लक्षणेन प्रसिद्धस्यानुमितित्वस्य निवर्तनमयुक्तमिति चेत्तत्राह—**तथा चेति**। अनुभवोऽपीत्यर्थः। तमेवावेदयति—**पर्वतमिति**। तथा च तस्याः प्रसिद्धेर्वह्न्यंशविषयत्वान्न तन्निवर्त्तनमस्माभिः क्रियते इति भावः॥

एवं स्वपक्षे प्रसिद्धानुमानं प्रदर्श्य परमते तदतिक्रमणमापादयति—**न्यायमत इति**। स्वपक्षात्तत्पक्षे वैलक्षण्यद्योतकस्तुशब्दः। पृथिवीपरमाणवो गन्धवन्तः पृथिवीत्वात्, घटादिवदित्यादावप्रत्यक्षपक्षकानुमितौ पक्षे साध्ये च ज्ञानं परोक्षमेवेत्याह—**असन्निकृष्टेति**। ननु सुरभिचन्दनमित्यादौ सौरभ्यांशे ज्ञानं परोक्षमपरोक्षं वा? नाद्यः, [1]तत्सामग्र्यभावाद्योग्यविषयत्वाच्च। न द्वितीयः, तदाकार-

---

१. परोक्षसामग्र्यभावात्। परोक्षज्ञानसामग्री च सुरभित्वव्याप्यं चन्दनखण्डत्वमिति व्याप्तिज्ञानादिरूपा तस्याः सुरभिचन्दनमित्याकारकज्ञानात्पूर्वमभावादित्यर्थः। विषयस्यापि योग्यत्वेन अनुमानस्यानुपयोगाच्च।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न चैवमेकत्र ज्ञाने परोक्षत्वापरोक्षत्वयोरभ्युपगमे तयोर्जातित्वं[1] न स्यादिति वाच्यम्। इष्टत्वात्। जातित्वोपाधित्वपरिभाषायाः[2] सकल-प्रमाणागोचरतया अप्रामाणिकत्वात्। घटोऽयमित्यादि प्रत्यक्षं हि घट-त्वादिसद्भावे मानं न तु तस्य जातित्वेऽपि ॥

शङ्का—(सुरभि चन्दनम्) इस प्रकार एक ज्ञान में ही परोक्षत्व और अपरोक्षत्व (प्रत्यक्षत्व) रूप विरुद्ध धर्मद्वय स्वीकार करने पर दोनों का सांकर्य होने के नाते इसमें जातित्व की सिद्धि न हो सकेगी।

समाधान—इसप्रकार (परोक्षत्व और प्रत्यक्षत्व) जाति नहीं बनता तो हमें इष्ट ही है। क्योंकि जातित्व तथा उपाधित्व परिभाषा सभी दार्शनिक तो मानते नहीं। अतएव यह दोनों परिभाषा (सङ्केत) अप्रामाणिक है। 'यह घट है' इस प्रकार प्रत्यक्ष ही घटत्वादि के सद्भाव में प्रमाण है, किन्तु उसके जाति होने में प्रामाणिकता नहीं है। (घटत्वादि में) जातित्वरूप साध्य की प्रसिद्धि नहीं होने के नाते, उसके साधक अनुमान की भी प्रवृत्ति नहीं हो सकती।

वृत्त्यभावादित्याशङ्क्याद्यपक्षमवलम्ब्याह—**सुरभीति**। आदिपदेन मधुरमाम्र-फलमित्यादिपरिग्रहः। **परोक्षमिति**। आघ्रातपूर्वं तत्सौरभं चेत्तर्हि [3]चन्दनखण्ड-त्वाल्लिङ्गादनुमितिरित्यर्थः। ननु सौरभ्यस्यापि योग्यविषयत्वात्तदंशेऽपि ज्ञानपरोक्ष-मेव किं न स्यादिति चेत्तत्राह—**सौरभ्यस्येति**। तथा च तत्तदिन्द्रिययोग्यत्वघटित-लक्षणस्याभावाददोष इत्यर्थः ॥

नन्वसन्निकृष्टपक्षकानुमितिस्थले पक्षापरोक्षतायां यथाऽसन्निकृष्टत्वं बाधकं तथा

---

१. पर्वतो वह्निमान् इति वह्निप्रकारक—पर्वतविशेष्यक-संयोगसंसर्गकं विशिष्ट-ज्ञानम् एकमेव। एकस्मिन्नेव ज्ञाने पर्वतरूपविशेष्यांशे प्रत्यक्षत्वे वह्निरूपविशेषणांशे परोक्षत्वे स्वीकृते तु प्रत्यक्षत्वपरोक्षत्वयोर्जातित्वं न स्यात्, सांकर्यरूपजातिबाधक-घटितत्वात्। परम्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः सङ्करः। पृथिवीपरमाणवो गन्धवन्त इत्यनुमितौ अपरोक्षत्वात्यन्ताभावसमानाधिकरणं परोक्षत्वं वर्तते, घटोऽयमिति प्रत्यक्षज्ञाने परोक्षत्वात्यन्ताभावसमानाधिकरणं प्रत्यक्षत्वं वर्तते। तयोः परस्परविरुद्धधर्मयोः परोक्षत्वापरोक्षत्वयोः एकत्र पर्वतो वह्निमानित्यत्र समावेश इति तयोर्जातित्वं न स्यादिति तार्किकाणामाक्षेपः।

२. परिभाषासङ्केतः आदेचोवृद्धयादिरिव स्वस्वशास्त्रीयसंज्ञा इति यावत्।

३. अयं चन्दनखण्डः सुरभिः चन्दनखण्डत्वात् चन्दनखण्डान्तरवत्।

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

जातित्वरूपसाध्याप्रसिद्धौ तत्साधकानुमानस्याप्यनवकाशात्। समवायासिद्ध्या ब्रह्मभिन्ननिखिलप्रपञ्चस्यानित्यतया च नित्यत्वसमवेतत्वघटितजातित्वस्य घटत्वादावसिद्धेश्च[1]। एवमेवोपाधित्वमपि निरसनीयम्।

(जो नित्य हो और अनेकों में समवाय सम्बन्ध से रहता हो उसे जाति कहते हैं इस जाति के लक्षण में समवाय सम्बन्ध और नित्यत्व दो पद आये हैं। जब) समवाय की सिद्धि ही नहीं होती और ब्रह्मभिन्न निखिल प्रपञ्च ही अनित्य है तो नित्यत्व और समवेतत्व घटित जातित्व की सिद्धि घटत्वादि में सम्भव नहीं है। इसी प्रकार ही उपाधित्व का भी खण्डन समझ लेना चाहिए।

सन्निकृष्टपक्षकानुमितिस्थले सुरभिचन्दनमित्यादौ परोक्षत्वापरोक्षत्वयोरभ्युपगमे प्रसिद्धजातिबाधकसाङ्कर्यप्रसङ्गो बाधकस्तथा च नेदं युक्तमित्याशङ्क्य निराचष्टे—न चेति। एवम्—उक्तप्रकारेण जात्युपाध्युदासीनधर्ममात्रस्याभ्युपगमेन। तयोर्जातित्वाभावस्येष्टत्वादिति हेतुमाह—इष्टत्वादिति। ननु घटत्वादिवत्परोक्षत्वापरोक्षत्वयोरपि प्रामाणिकतया प्रसिद्धस्यास्यानभ्युपगमेऽतिप्रसङ्ग इति चेत्तत्राह—जातित्वेति। ननु नीलघटत्वादावुपाधित्ववद् घटत्वादौ जातित्वं कुतो न प्रामाणिकमित्याशङ्कानिरासायोपाधित्वग्रहणम्। घटत्वादौ जातित्वमित्येवंरूपा परिभाषा तथा नीलघटत्वादावुपाधित्वमित्येवंरूपा या परिभाषा तयोर्द्वयोरपि सकलप्रमाणाविषयतयाऽप्रामाणिकत्वादिति परिभाषाया एवोभयत्र सम्बन्धः। अप्रामाणिकत्वाज्जातित्वोपाधित्वयोरिति शेषः इति केचित्[2]। ननु कुतः सकलप्रमाणगोचरता घटोऽयमिति प्रत्यक्षगोचरत्वादित्याशङ्क्य तस्य तत्सद्भाव एवोपक्षीणस्य तज्जातित्वसाधने उदासीनत्वादित्याह—घटोऽयमिति।

ननु प्रत्यक्षाभावेऽपि घटत्वादिकं जातिः उपाधिभिन्नसामान्यधर्मत्वात्सत्तावदित्यनुमानमस्तु तत्र प्रमाणमित्याशङ्क्याह—जातित्वेति। जातित्वरूपस्य नित्या-

---

१. घटत्वस्य जातित्वे प्रत्यक्षानुमाने प्रमाणे तार्किकैर्दीयेते तयोरन्यथासिद्धत्वप्रदर्शनान्न ताभ्यां घटत्वस्य जातित्वं सेत्स्यतीति तात्पर्यम्। घटत्वस्य उपाधित्वमपि प्रत्यक्षानुमायोरन्यथासिद्धत्वप्रदर्शनद्वारा निरसनीयमिति।

२. केचित्-शिखामणिकाराः। 'घटत्वनीलघटत्वयोः जातित्वोपाधित्वयोरितिशेषः' इतिशेषं प्रपूर्य व्याख्यातवन्तः। तच्च युक्तं दृश्यते परिभाषाया अप्रामाणिकत्वोक्तावपि फलतः घटत्वनीलघटत्वयोरेवाप्रामाणिकत्वकथनं स्यात्। घटोऽयमित्यादिप्रत्यक्षस्य घटत्वसद्भावेऽप्रमाणत्वं प्रदर्शयतो ग्रन्थकर्तुस्तत्रैव तात्पर्याच्च।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नैकसमवेतत्वलक्षणस्य साध्यस्य[1] प्रसिद्धौ तदायत्तव्याप्तिज्ञानाद्यभावेनानुमानानवसरादित्यर्थः। नन्वेवं भूतजातित्वाप्रसिद्धावपि तद्घटकनित्यत्वैकत्वानेकसमवेतत्वानामस्त्याकाशघटादिषु प्रसिद्धिरिति तामादाय तद्घटितजातित्वं घटत्वादौ सेत्स्यतीत्याशङ्क्याह—**समवायेति**—। ननु रूपी घटो मृद् घट इति प्रत्ययस्य संयोगानवगाहितया परिशेषात्समवायः सिद्धयतीति चेत्। न। गुणगुणिनोरवयवावयविनोश्चात्यन्तभेदे तत्सम्बन्धस्य च[2] तथात्वे दण्डपुरुषादाविव शुक्लो घटो मृद्घट इति समानाधिकरणप्रत्ययानुपपत्तेः। किञ्च समवायिभ्यां सम्बद्धः समवायो[3] विशिष्टप्रत्ययनियामक उतासम्बद्धः? नाद्यस्तस्यान्यस्तस्याप्यन्यः सम्बन्धः कल्प्य इत्यन[4]वस्थाप्रसङ्गात्। ननु समवायिभिर्नित्यसम्बद्ध एवायं गृह्यतेऽतो नोक्तदोष इति चेत्तर्हि संयोगोऽपि संयोगिभिर्नित्यसम्बद्धत्वात्सम्बन्धान्तरं नापेक्षेत। अर्थान्तरत्वादपेक्षत इति चेत्, तर्हि समवायोऽपि तथात्वात्कुतो नापेक्षते। संयोगो गुणत्वात्तथेति

---

१. साध्ये साध्यतावच्छेदकस्याभावः साध्याप्रसिद्धिः, यथा घटत्वं जातिरित्यत्र जातित्वस्य नित्यानेकसमवेतत्वरूपस्याप्रसिद्धिः। तथा च काञ्चनमयवह्निमान् इत्यत्र साध्यतावच्छेदकविशिष्टसाध्यव्याप्यवत्ताज्ञानरूपपरामर्शप्रतिबन्धादनुमित्यभावः तथैव। प्रकृतेऽप्यनुमित्यभावः।

२. तत्सम्बन्धस्य—समवायस्य च तथात्वे अत्यन्तभेदे सामानाधिकरण्यानुपपत्तेः। न हि जातु दण्डः पुरुष इति भवति। भवति तु शुक्लो घटः मृद्घट इत्यादि। अतोऽभेद एव शुक्लघटयोरिति। तथा च दण्डः पुरुष इति व्यतिरेकोदाहरणम्।

३ दण्डी पुरुष इतिवद् रूपी घट इति विशेषितविषयकप्रत्ययनियामक इत्यर्थः।

४. रूपी घटः इत्यत्र रूपघटावत्यन्तभिन्नौ सम्बद्धौ च। अयुतसिद्धयोरनयोर्न संयोगादिः सम्भवति, अतो नित्यसम्बन्धस्य समवायस्य सिद्धिर्नैयायिकानाम्। तत्रेदं प्रतिवक्तव्यम्। समवायेऽपि सम्बन्धः स च तत्त्वादेव द्विष्ठः रूपे घटे च वर्तते न रूपघटात्मक एव। रूपतत्समवायावप्यत्यन्तभिन्नावेव इत्यन्तभेदसाम्यात्तावपि न सम्बन्धान्तरमृते सम्मन्तस्यतः। असम्बद्धेन अतदात्मना च समवायेन उपकाराधानासम्भवात्। तथा च कल्पितोऽपि रूपसमवाययोः सम्बन्धोऽपि सम्बद्ध एव अतिशयाधानसमर्थो नासम्बद्ध इति भवेदनवस्था समवायकल्पने। समवायस्य रूपघटयोः स्वरूपेणैव स्थितिकल्पने तु संयोगस्यापि घटपटयोः स्वरूपेणैव स्थितिकल्पनैवैव सामञ्जस्ये संयोगस्य समवायेन स्थितिकल्पना अकारणिका स्यात् तस्माद् रूपघटयोस्तादात्म्यमेव। विस्तरस्त्वाकरे द्रष्टव्यः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

चेन्न। गुणपरिभाषाया अतन्त्रत्वादपेक्षाकरणस्य च तुल्यत्वात्। न[1] द्वितीयोऽति-प्रसङ्गात्। किञ्च स अनेक एको वा? आद्येऽपसिद्धान्तो गौरवं च, द्वितीये रूपज्ञानादिसमवायस्य वायुघटादिवृत्तिसमवायाभेदाद्रूपवान् वायुः घटो विलक्षण-गतिमानिति प्रतीतिप्रसङ्गात्। न च तत्र[2] रूपाद्यभावान्नोक्तप्रतीतिप्रसङ्ग इति वाच्यम्।[3] तद्वृत्तित्वप्रयोजनकसम्बन्धे सति तदभावव्यवहारस्य व्याहृतत्वात्। इत्येवं समवायसिद्धया प्रत्यक्षेण, कार्यत्वब्रह्माभिन्नत्वलिङ्गकानुमानेन, 'सदेवसोम्येदमग्र आसीत्' (छा० ६–२–१) इति श्रुत्या च ब्रह्माभिन्नसकलप्रपञ्चस्यानित्यतया च नित्यत्वसमवेतत्वघटितजातित्वस्य घटत्वादावसिद्धेश्चेत्यर्थः। अप्रामाणिकत्व-मिष्टत्वे हेतुस्तत्र[4] प्रत्यक्षस्य घटत्वादेर्जातित्वे मानभावादिहेतुत्रयम्[5]। ननूपाधि-त्वपरिभाषाया अप्यप्रामाणिकत्वं प्रतिज्ञाय कथं जातित्वपरिभाषाया एव [6]तत्त्वे हेतूपन्यास इत्याशङ्क्योक्तहेतुभिरेव तस्या अप्यप्रामाणिकत्वसाधनस्य सुवचत्वादित्याशये-नातिदिशति—**एवमिति**। तथा च नीलघटत्वादेरुपाधित्वपरिभाषा न प्रामाणिकी नीलोऽयं घट इत्यादिप्रत्यक्षस्य नीलघटत्वसद्भावे मानतया तस्योपाधित्वेऽमानत्वात्। उपाधित्वरूपसाध्याप्रसिद्धौ तत्साधकस्य नीलघटत्वादिकमुपाधिः जातिभिन्नसामान्य-धर्मत्वाद् आकाशत्वादिवदित्यनुमानस्य अनवकाशात् समवायाद्यसिद्धयोपाधित्वासिद्धे-श्चेत्येवं निरसनीयमित्यर्थः॥

१. द्वितीयः पक्षः उत असम्बद्ध इति। असम्बद्धेन चेत्समवायेन रूपी घट इति प्रत्ययः तदा असम्बद्धत्वाविशेषात् असम्बद्धेन पटेनापि रूपी घट इति प्रत्ययप्रसङ्गः।

२. तत्र वायौ घटे च, रूपविलक्षणगत्याद्यभावात्।

३. वायौ तद्वृत्तित्व–रूपवृत्तित्व–प्रयोजके रूपसमवायसम्बन्धे सत्यपि .रूपं नास्तीति तदभाव–रूपाभाव–व्यवहारस्य व्याहृतत्वादित्यर्थः।

४. अप्रामाणिकत्वे।

५. प्रत्यक्षस्य घटत्वसद्भावे प्रमाणत्वं न तस्य जातित्वे इति एको हेतुः। जाति-स्वरूपसाध्याप्रसिद्धया अनुमानस्यानवकाश इति द्वितीयः। जातिलक्षणघटितनित्यत्व-समवेतत्वाद्यसिद्धयाऽपि जातित्वासिद्धिरिति तृतीयः।

६. तत्त्वे–अप्रामाणिकत्वे।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पर्वतो वह्निमानित्यादौ च पर्वतांशे वह्न्यंशे चान्तःकरणवृत्तिभेदाङ्गीकारेण तत्तद्वृत्त्यवच्छेदकभेदेन परोक्षत्वापरोक्षत्वयोरेकत्र[1] चैतन्ये वृत्तौ न विरोधः। तथा च तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम् ॥ १२ ॥

'पर्वत वह्निवाला है' इस अनुमिति ज्ञान के पर्वतांश तथा वह्नि-अंश में अन्तकरण वृत्ति का भेद माना गया है। अतएव वृत्तिरूप अवच्छेदक के भेद से एक ही चैतन्यरूप ज्ञान में परोक्षत्व एवं अपरोक्षत्व दो धर्मों के रहने में कोई विरोध नहीं है। अब लक्षण का निष्कृष्टरूप यह हुआ कि—घट पट इत्यादि विषयाकार वृत्ति से अवच्छिन्न चैतन्य का और चक्षुरादि इन्द्रियों से प्रत्यक्ष के योग्य वर्तमान विषयावच्छिन्न चैतन्य का अभेद ही घट पटादि विषय अंश में प्रत्यक्षत्व का प्रयोजक माना गया है ॥ १२ ॥

नन्वेवमप्येकस्यैव चैतन्यस्य परोक्षत्वापरोक्षत्वात्मविरुद्धधर्माक्रान्तत्वं विरुद्धमित्याशङ्क्याह—**पर्वत इति**। **चैतन्ये**—प्रमात्मकचैतन्ये। एवं सतीदं फलितमित्याह—**तथा चेति**। तत्तदवृत्त्यवच्छिन्नचैतन्यस्य तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तस्मिंस्तस्मिञ्ज्ञानांशे प्रत्यक्षत्वप्रयोजकमिति ज्ञानगतस्य प्रत्यक्षत्वस्य प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वमित्युक्तप्रयोजकेन विवक्षितमित्यर्थः।

---

१. एकत्रेति। मूले, घटावच्छिन्नाकाशो मठावच्छिन्नाकाशान्न भिद्यते विभाजकयोर्घटमठयोरेकदेशस्थत्वात्। एवम् अन्तःकरणवृत्तिघटयोरप्येकदेशस्थत्वान्नोपधेयभेदकत्वमित्युक्तमवश्यतात्। तथा च पर्वतवह्नचोरप्येकदेशस्योपाधिद्वययोर्नोपाधेयचैतन्यभेदकत्वमिति कुतः परोक्षत्वापरोक्षत्वे एकस्मिन्नेव चैतन्ये सम्भवतः इत्याक्षेपं मनसि निधाय उत्तरयति—पर्वतो वह्नीत्यादिना। तथा च अयं घट इत्यादौ घटावच्छिन्नमन्तःकरणावच्छिन्नं च चैतन्यम् एकमेव, पर्वतकारा वृत्तिस्तु चक्षुःसन्निकर्षाज्जाता बाह्यगोचरा, तदवच्छिन्नं चैतन्यं पर्वतदेशीयम्, वह्न्याकारा वृत्तिस्तु व्याप्तिज्ञानजन्या हृदयदेशीयचैतन्यावच्छेदिका, अतः परोक्षत्वापरोक्षत्वयोरविरोध इत्याशयः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

[1]घटादेर्विषयस्य प्रत्यक्षत्वं तु प्रमात्रभिन्नत्वम्। ननु कथं घटादेरन्तःकरणावच्छिन्नचैतन्याभेदः? अहमिमं पश्यामि इति भेदानुभवविरोधादिति चेत्। उच्यते—

घटादि विषय का प्रमातृ चैतन्य के साथ अभेद ही घटादि विषय के प्रत्यक्षत्व का नियामक है।

शङ्का—घटादि विषयों के साथ अन्तःकरणावच्छिन्न चैतन्य का अभेद कैसे हो सकेगा? 'मैं यह वस्तु देख रहा हूँ' इस प्रकार अनुभवों में विषय और प्रमाता का स्पष्ट भेद दीखता है। इस भेदानुभव के साथ विरोध पड़ता है।

एवं ज्ञानप्रत्यक्षत्वस्य प्रयोजकमभिधाय प्रमेयगतस्य [2]तस्य तदाह—**घटादेरिति**। तुशब्देनेन्द्रियजन्यज्ञानविषयत्वं विषयप्रत्यक्षत्वमित्यादितल्लक्षणनिरासः। मनोरूपेन्द्रियजन्यानुमितिज्ञानविषयेतिव्याप्तेः[3]। **प्रमात्रभिन्नत्वमिति**। घटादेर्विषयस्येत्यनुषज्यते[4]। ननु विषयस्य घटादेः प्रमात्रभिन्नत्वमुच्यते तदवच्छिन्नचैतन्यस्य वा? नाद्यः, तस्य जडत्वेन तत्त्वासम्भवात्। न द्वितीयः, अहं मनुष्य इति प्रतीतिः स्यात्। न च सोपलभ्यते, उपलभ्यते च तद्विरुद्धम्। अहमिमं पश्यामीति भेदप्रतीतिः, अतः कथं विषयस्य प्रमात्रभेद इति शङ्कते—**नन्विति**। प्रमात्रभेदो

---

१. द्वितीये घटादेरित्यधिकः पाठो दृश्यते पुस्तकान्तरेषु स च युक्ततरः। किं ज्ञानगतेत्यादिना विकल्प्य आद्ये प्रमाणचैतन्येत्यादिना दत्तोत्तरत्वादत्र द्वितीयकल्पस्य निराकरिष्यमाणत्वादिति। अत्र प्रत्यक्षत्वं तु इत्यस्य प्रत्यक्षत्वप्रयोजकम् इत्यर्थः, तथैवोपक्रान्तत्वात्। अत्रेदमूह्यम्। अयं घट इति ज्ञानमपि प्रत्यक्षं ज्ञानविषयो घटोऽपि प्रत्यक्षः। आद्यस्य घटज्ञानं प्रत्यक्षमिति व्यपदेशः द्वितीयस्य घटः प्रत्यक्ष इति। तत्र ज्ञानगतप्रत्यक्षप्रयोजकमुक्तं विषयगतस्य तस्य प्रयोजकमिदानीमाह—प्रमात्रभिन्नत्वमिति। अत्र यद्यपि घटादेर्विषयस्य प्रत्यक्षत्वं प्रत्यक्षज्ञानविषयत्वं ज्ञानस्य तु प्रत्यक्षत्वं पूर्वोक्तमेव, अनुमित्यादिज्ञानानां चित्त्वेन स्वांशे प्रत्यक्षत्वेऽपि प्रमाणचैतन्यविषयावच्छिन्नचैतन्याभेदाभावादेव अनुमितिविषये नातिप्रसङ्गः। तथापि विषयस्यापरोक्ष्यं संविदभेदात् इति विवरणे विषयप्रत्यक्षलक्षणत्वेन प्रमात्रभेदस्यैवोक्तत्वादेवमुक्तमिति तत्त्वम्।

२. तस्य-प्रत्यक्षत्वस्य, तत्-प्रयोजकम्।

३. न्यायमते मनस इन्द्रियत्वात् तज्जन्यानुमितिविषये परमाण्वादावतिव्याप्तेरित्यर्थः। ४. घटादेर्विषयस्य प्रमात्रभिन्नत्वं प्रत्यक्षत्वमित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रमात्रभेदो नाम न तदैक्यम्, किन्तु प्रमातृसत्ताऽतिरिक्तसत्ताकत्वाभावः[1]। तथा च घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता, अधिष्ठानसत्ताऽतिरिक्ताया आरोपितसत्ताया अनङ्गीकारात्। विषयचैतन्यञ्च [2]पूर्वोक्तप्रकारेण प्रमातृचैतन्यमेवेति[3] प्रमातृचैतन्यस्यैव घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्ता नान्येति सिद्धं घटादेरपरोक्षत्वम्॥ १३॥

समाधान—प्रमाता के साथ विषय के अभेद होने का अर्थ दोनों का ऐक्य नहीं है किन्तु अन्तःकरणावच्छिन्न रूप प्रमाता को सत्ता से भिन्न घटादि विषय की सत्ता का अभाव ही इन दोनों का अभेद पद से कहा गया है। वेदान्तसिद्धान्तानुसार घटादि विषय-समूह स्वावच्छिन्न (घटाद्यवच्छिन्न) चैतन्य में अध्यस्त (आरोपित) है, अतः अधिष्ठानीभूत विषयावच्छिन्न चैतन्य की सत्ता ही (घटादि) विषय की सत्ता, है क्योंकि अधिष्ठान सत्ता से अतिरिक्त आरोपित (कल्पित) वस्तु की सत्ता नहीं मानी गयी है। विषय-चैतन्य पूर्वोक्त (तड़गोदक) रीति से प्रमातृ-चैतन्य हो है, इसलिए प्रमातृ-चैतन्य ही घट की सत्ता मानी जायेगी, भिन्न नहीं। इस प्रकार घटादि विषयों का अपरोक्षत्व सिद्ध हो जाता है॥ १३॥

नाम घटादे[4]स्तदवच्छिन्नचैतन्यस्य चैक्यं न विवक्षितं येन विरोधः स्यादपि त्वन्यदेव। तदभिन्नत्वमिति समाधत्ते—**उच्यत इति**। प्रमातृसत्तेत्यस्य प्रमातृलक्षणसत्तेत्यर्थः। न तु तन्निष्ठसत्ता जातिः, प्रमातृप्रमेयनिष्ठसत्ताजातेरेकतया तन्निष्ठसत्ताऽतिरिक्तसत्ताया असिद्धेः। तथा च प्रमात्रभेदस्योक्तलक्षणे सतीदं फलितमित्याह—**तथा चेति। प्रमातृचैतन्यमेवेति**। अतः प्रमातृसत्ताऽतिरिक्तसत्ताशून्यत्वं घटादेरपरोक्षत्वं सिद्धमित्यर्थः।

---

१. वह्निमान् पर्वत इत्यत्र वह्न्यवच्छिन्नस्य देवदत्तीयान्तःकरणावच्छिन्नस्य च चैतन्यस्य वस्तुतः एकत्वादतिव्याप्तिः स्यादतः चैतन्यपदं विहाय प्रमातृपदोपादानं कृतम्। तच्च मूले अनुमित्यादिस्थले त्वित्यादिना स्पष्टीकरिष्यते।

२. पूर्वोक्तेति। यथा तडागोदकं कुल्यात्मनेत्यत्रोक्तेनेत्यर्थः।

३. इतिशब्दो हेत्वर्थः।

४. तदवच्छिन्नस्येत्यस्य घटावच्छिन्नस्य अन्तःकरणावच्छिन्नस्य वाऽर्थः, तयोः पूर्वोक्तप्रकारेणैक्यात्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुमित्यादिस्थले त्वन्तःकरणस्य वह्न्यादिदेशनिर्गमनाभावे वह्न्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्यानात्मकतया वह्न्यादिसत्ता प्रमातृसत्तातो भिन्नेति नातिव्याप्तिः।

[1]नन्वेवमपि धर्माधर्मादिगोचरानुमित्यादिस्थले धर्माधर्मयोः प्रत्यक्षत्वापत्तिः, धर्माद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभिन्नतया धर्मादिसत्तायाः प्रमातृसत्तानतिरेकादिति चेत्। न। योग्यत्वस्यापि विषयविशेषणत्वात्।१४।

[2]नन्वेवमपि रूपी घट इति प्रत्यक्षस्थले घटगतपरिमाणादेः प्रत्यक्षत्वापत्तिः, रूपावच्छिन्नचैतन्यस्य परिमाणाद्यवच्छिन्नचैतन्यस्य चैकतया

परन्तु अनुमित्यादि स्थल में अन्तःकरण वह्न्यादि बाह्य देश में जाता नहीं। इसलिए बाह्यवच्छिन्नचैतन्य प्रमातृ-चैतन्य से अभिन्न नहीं हो पाता, इसीलिए प्रमाता की सत्ता से वह्न्यादि की सत्ता भिन्न रह जाती है। सुतरां अनुमिति ज्ञान में प्रत्यक्ष के लक्षण की अतिव्याप्ति नहीं है।

शङ्का—ऐसा मानने पर धर्म-अधर्मादि विषयक अनुमिति (या शाब्दबोध) स्थल पर धर्म और अधर्मादि विषयों में प्रत्यक्षता का व्यवहार होना चाहिए क्योंकि धर्मादि से अवच्छिन्न चैतन्य प्रमातृ-चैतन्य से अभिन्न है। इसलिए प्रमातृ-सत्ता से अभिन्न सत्ता वाला धर्मादि हो गया है. ऐसा कहा जाय तो,

समाधान—नहीं, विषय में योग्यत्व विशेषण भी दे देना चाहिए। (धर्मादि में प्रत्यक्षता की योग्यता नहीं रहने के नाते प्रत्यक्षत्वापत्ति नहीं होगी)॥ १४॥

अनुमेयवह्न्यादेश्चैतन्यसत्ताऽतिरिक्तसत्ताशून्यत्वेऽपि तस्य प्रमात्रनात्मकतया नातिव्याप्तिरिति चैतन्यपदं विहाय प्रमातृपदोपादानमित्याशयेनाह—**अनुमित्यादीति**। नन्वेवमप्यतिव्याप्तिरस्तीति शङ्कते—**नन्विति**। प्रत्यक्षयोग्यत्वस्यापि विषयविशेषणत्वेन योग्यविषयस्य प्रमात्रभिन्नत्वरूपलक्षणस्य धर्मादावभावान्नातिव्याप्तिरित्याह—**नेति**।

ननु घटगतरूपप्रत्यक्षदशायां तद्गतपरिमाणादावतिव्याप्तिः, रूपावच्छिन्नचैत-

---

१. एवमपि प्रमातृसत्ताऽतिरिक्तेत्यादिलक्षणस्य अनुमेयवह्न्यादावतिव्याप्त्यभावेऽपि। तत्रान्तःकरणगमनाभावादिति भावः।

२. योग्यत्वस्य विषयविशेषणत्वेऽपीत्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रूपावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदे परिमाणाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया परिमाणादिसत्तायाः प्रमातृसत्ताऽतिरिक्तत्वाभावादिति चेत् । न । तत्तदाकारवृत्त्युपहितत्वस्यापि प्रमातृविशेषणत्वात् । रूपाकार-वृत्तिदशायां परिमाणाद्याकारवृत्त्यभावेन परिमाणाद्याकारवृत्त्युपहित-प्रमातृचैतन्याभिन्नसत्ताकत्वाभावेनातिव्याप्त्यभावात् ॥ १५ ॥

[1]नन्वेवं वृत्त्यव्याप्तिः, अनवस्थाभिया वृत्तिगोचरवृत्त्यनङ्गीकारेण

शङ्का—तथापि 'रूपवान् घट' इस प्रत्यक्ष स्थल में घट गत परिमाणादि का भी प्रत्यक्ष होना चाहिए क्योंकि रूपावच्छिन्न और परिमाणावच्छिन्न चैतन्य का एक होने से रूपावच्छिन्न चैतन्य जैसे प्रमातृ-चैतन्य से अभिन्न है ही । अतएव परिमाणादि की सत्ता प्रमातृसत्ता से अतिरिक्त नहीं है ।

समाधान—यहाँ पर अतिव्याप्ति वारण करने के लिए 'तत्तद् विषयाकार वृत्ति उपहितत्व' प्रमातृचैतन्यांश में विशेषण हम दे देते हैं । इससे रूपाकारवृत्ति-दशा में परिमाणाद्याकार वृत्ति न होने के कारण परिमाणाद्याकार वृत्ति–उपहित प्रमातृचैतन्य से परिमाणादि की अभिन्न सत्ता नहीं है, अतः अतिव्याप्ति भी नही है ॥ १५ ॥

न्यस्यैव परिमाणाद्यवच्छिन्नचैतन्यरूपतया तस्य [2]तदभिन्नप्रमातृसत्ताऽतिरिक्तसत्ताकत्वा-भावादिति शङ्कते–**नन्वेवमपीति** । परिमाणादेः प्रमातृसत्ताऽतिरिक्तसत्ताशून्यत्वेऽपि परिमाणाद्याकारवृत्त्युपहितप्रमातृचैतन्यसत्ताशून्यत्वाभावान्नाव्याप्तिरिति समाधत्ते-**नेति**

---

१. जडाः सर्वे पदार्थाः अज्ञानावृता अतो न प्रकाशन्ते, तद्गोचरवृत्त्या आवरण-नाशेन ते प्रकाशन्ते । यथा घटादयो जडाः स्वगोचरवृत्त्यैवावभासन्ते, तथैव वृत्तिरपि जडा न स्वतो भानयोग्या अतस्तदगतावरणनिवृत्तिपूर्वकं तस्या भानं वक्तव्यम् । तथा च तदर्थं वृत्त्यन्तरानुसरणेऽनवस्था, वृत्त्यभावे भानाभाव इत्युभयतः पाशारज्जुरिति शङ्कुकस्याशयः । यद्यपि ब्रह्मातिरिक्तं सर्वमेव जडं, तथापि प्रत्यक्षतोऽनुभूयमानवै-लक्षण्येन कस्यचित् किञ्चित्स्वभावविशेषादिकमास्थेयम् । यथा घटदीपकौ द्वावपि जडौ तथाऽपि घटस्य स्वभाने आलोकचक्षुःसन्निकर्षाद्यपेक्षा प्रदीपस्य तु आलोकानपेक्षा स तु घटं प्रकाशयत् स्वात्मानमपि प्रकाशयति, एवमेव वृत्तिरपि विनैव वृत्त्यन्तरं तदर्थं जाता तं प्रकाशयन्ती स्वात्मानमपि प्रकाशयिष्यतीति समाधातुर्वेदान्तिनोऽभिप्रायः ।

२. तस्य-परिमाणादेः, तदभिन्ना-परिमाणाभिन्ना, या प्रमातृसत्ता तदतिरिक्त-

Nagarjun Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र स्वाकारवृत्त्युपहितत्वघटितोक्तलक्षणाभावादिति चेत्। न। अनवस्थाभिया वृत्तेर्वृत्त्यन्तराविषयत्वेऽपि स्वविषयत्वाभ्युपगमेन स्वविषयवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वस्य तत्रापि भावात्। एवं चान्तःकरणतद्धर्मादीनां केवलसाक्षिविषयत्वेऽपि तत्तदाकारवृत्त्यभ्युपगमेन उक्तलक्षणस्य तत्रापि सत्त्वान्नाव्याप्तिः ॥ १६ ॥

शङ्का—उक्त रीति से अतिव्याप्ति दोष हटाने पर भी वृत्ति के प्रत्यक्ष में अव्याप्ति हो ही जायेगी, क्योंकि अनवस्था के भय से घट को विषय करने वाली घटाकार वृत्ति जैसे मानते हैं वैसे वृत्ति को विषय करने वाली अन्य वृत्ति मान नहीं सकते तब तो वृत्तिप्रत्यक्ष स्थल में विषयाकार वृत्ति उपहितत्व घटित पूर्वोक्त लक्षण का अभाव होने से अव्याप्ति है।

समाधान—(उक्त लक्षण में स्वीकार शब्द का अर्थ है–स्वविषयक।) अनवस्था के भय से वृत्त्याकार भिन्नवृत्ति स्वीकार न करने पर भी जिस प्रकार घटादि को विषय करता है, उसी प्रकार अपने को भी विषय करता है इस प्रकार स्वीकार करने से अव्याप्ति दोष नहीं होता। इस प्रकार अन्तःकरण और अन्तःकरण के धर्म सुखादि केवलसाक्षिवेद्य होने पर भी तत्तदाकार अर्थात् अहमाकार तथा सुखाद्याकार वृत्ति स्वीकार करने से तत्तदाकार वृत्त्युपहितत्व घटित लक्षण का समन्वय हो जाता है। (सुतरां अव्याप्ति दोष भी नहीं रहा) ॥ १६ ॥

ननु परिमाणादावतिव्याप्तिवारणाय तत्तदाकारवृत्त्युपहितत्वस्यापि प्रमातृविशेषणत्वे वृत्तावव्याप्तिरिति शङ्कते **-नन्वेवमिति**। अनवस्थाभयेन वृत्तिगोचरवृत्त्यनङ्गीकारेऽपि घटमहं जानामीति वृत्तेः स्वविषयत्वाभ्युपगमात्स्वेतरवृत्त्यवच्छिन्नचैतन्याप्रकाश्यतया स्वावच्छिन्नचैतन्यप्रकाश्यत्वे सति प्रकाशमानत्वान्नाव्याप्तिरित्याशयेनाह—**नेति**। यथावृत्तेर्वृत्त्यन्तराविषयत्वेऽपि स्वविषयत्वाभ्युपगमादव्याप्तिनिरास एवमन्तःकरणस्य तद्धर्माणां कामादीनां च केवलसाक्षिविषयत्वेऽपि वृत्तिविषयत्वस्वीकारान्न तत्राव्याप्तिरित्याह-**एवं चेति**। आदिना प्रातिभासिकरजतादिसंग्रहः।

सत्ताकत्वाभावादित्यर्थः। परिमाणादीनां कल्पितत्वेन स्वाधिष्ठानभूतचैतन्यसत्ताकत्वात्, तस्य च प्रमात्रभिन्नत्वादिति भाव.।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न चान्तःकरणतद्धर्मादीनां वृत्तिविषयत्वाभ्युपगमे केवलसाक्षिविषयत्वाभ्युपगमविरोध इति वाच्यम्। न हि वृत्तिं विना साक्षिविषयत्वं केवलसाक्षिवेद्यत्वं किन्त्विन्द्रियानुमानादिप्रमाणव्यापारमन्तरेण साक्षिविषयत्वम्[1]। अत एवाहंकारटीकायामाचार्यैरहमाकारान्तःकरणवृत्तिरङ्गीकृता, अत एव च प्रातिभासिकरजतस्थले रजताकाराविद्यावृत्तिः साम्प्रदायिकैरङ्गीकृता, तथा चान्तःकरणतद्धर्मादिषु केवलसाक्षिवेद्येषु वृत्त्युपहितत्वघटितलक्षणस्य सत्वान्नाव्याप्तिः॥

यदि कहो कि अन्तःकरण और उसके धर्म (सुखादि) को वृत्ति का विषय मानने पर केवल साक्षी विषयत्व सिद्धान्त का विरोध स्पष्ट ही हो गया। तो यह बात ठीक नहीं। वृत्ति के विना साक्षिविषयत्व को केवल साक्षिवेद्यत्व नहीं कहते, परन्तु इन्द्रियाँ अनुमानादि प्रमाणों के व्यापार के विना ही जो वस्तु साक्षी का विषय हो उसे केवल साक्षिवेद्य कहते हैं। इसलिए ही अहङ्कार टीका में पद्मपादाचार्य ने अहमाकार अन्तःकरण को वृत्ति मानी है। अतः प्रातिभाषिक रजताकार अविद्या की वृत्ति साम्प्रदायिकों ने मानी है। इसलिए अन्तःकरण और उसके धर्म सुख दुःखादि केवल साक्षिवेद्य विषय में भी वृत्ति उपहितत्व घटित लक्षण विद्यमान होने से किसी भी प्रकार से अव्याप्ति नहीं है।

ननु वृत्त्यादिव्यावर्तककेवलपदविरोधात् कथं वृत्तिविषयत्वमभ्युपगन्तुं शक्यमित्याशङ्क्य परिहरति—**न चेति**। केवलपदं न वृत्तिनिरासार्थमपि त्विन्द्रियानुमानादिप्रमाणव्यापारनिवृत्त्यर्थम्, अतो न सद्विरोध इत्याह—**न हीति**। स्वोक्तार्थे पद्मपादाचार्यसम्मतिमाह—**अत एवेति**। यतो न वृत्तेः केवलपदव्यावर्त्यत्वमत एवाहंवृत्त्यवच्छिन्नमेवान्तःकरणं चैतन्यविषयभावमापद्यत इत्यहङ्कारटीकायामार्यैरह-

---

१. केवलसाक्षिविषयत्वमिति योजना।

२. अहंकारटीकायामिति। 'अथातो ब्रह्मजिज्ञासा' इति सूत्रस्य यद्भाष्यं तस्य शारीरकभाष्यस्यापि या टीका पद्मपादाचार्यस्य पञ्चपादिकाख्या तस्यापि यद्विवरणं श्रीप्रकाशाचार्यकृतं सा अहंकारटीका तस्याम्। प्रथमवर्णके 'अहंवृत्त्यवच्छिन्नमेवान्तःकरणं चैतन्यस्य विषयभावमापद्यते' इत्यत्र इदं विजयनगरसिरीजमुद्रितपुस्तके ५५ पृष्ठे २१ पङ्क्तौ द्रष्टव्यम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तदयं निर्गलितोऽर्थः स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्ताऽतिरिक्त-सत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वम्। तत्र संयोगसंयुक्त-तादात्म्यादीनां सन्निकर्षाणां चैतन्याभिव्यञ्जकवृत्तिजनने विनियोगः॥१७॥

प्रत्यक्ष प्रमाण का चरम रूप से निरूपण—

उक्त लक्षण का निर्गलितार्थ यह हुआ कि जो वस्तु स्वीकार वृत्युपहित-प्रमातृचैतन्य सत्ता से अतिरिक्त सत्ता रहित होते हुए जो वस्तु (प्रत्यक्ष के) योग्य हो तादृश विषय में प्रत्यक्षत्व का व्यवहार होता है। प्रत्यक्ष स्थल पर प्रत्यक्ष प्रमारूप चैतन्य का अभिव्यञ्जक जो वृत्ति, उसकी उत्पत्ति में संयोग सयुक्त-तादात्म्यादि सन्निकर्षों का उपयोगिता समझनी चाहिए॥ १७॥

मित्याकारान्तःकरणविषया वृत्तिरङ्गीकृतेत्यर्थः। **साम्प्रदायिकंरिति**। [1]सर्वज्ञ-मुनिप्रमुखैः। अन्तःकरणादीनां वृत्तिविषयत्वे निर्विवादे सति फलितमव्याप्तिनिरा-करणमुपसंहरति—**तथा चेति**।

श्रोतृमुखप्रतिपत्तये दत्तेविशेषणैर्निष्पन्नलक्षणं निष्कृष्य दर्शयति—**तदयमिति**। [2]तत्तस्य पूर्वोक्तस्यायम्, तत्तस्मादयमिति वा। स्वं विषयस्तदाकारा तद्गोचरा या वृत्तिस्तदुपहितं यत्प्रमातृचैतन्यं तद्रूपाया सत्ता तदतिरिक्ता सत्ता यस्य स तथा तस्य भावस्तत्त्वं तेन शून्यत्वे सति—तदतिरिक्तसत्तावत्त्वरहितत्वे सति—प्रत्यक्षयोग्यत्वं प्रत्यक्षव्यवहारप्रयोजकमित्यर्थः। एवं ज्ञानगतस्य ज्ञेयगतस्य च प्रत्यक्षत्वस्य प्रयोज-कमुक्तं तत्र तादृशवृत्त्यवच्छिन्नचैतन्यस्य तादृशविषयावच्छिन्नचैतन्याभिन्नत्वं विषय-गतप्रत्यक्षत्वस्य प्रयोजकमिति विवेकः। तत्र प्रत्यक्षस्य विषयस्य प्रत्यक्षज्ञानं चैतन्यमेव तच्चानादीति संयोगादिसन्निकर्षाणां क्व विनियोग इत्यपेक्षायामाह—**तत्रेति**। उक्तरीत्योभयप्रयोजकसिद्धे सति, संयोगः संयुक्तातादात्म्यं संयुक्ताभिन्नतादात्म्यं [[3]तादात्म्यमभिन्नतादात्म्य]मित्येवंरूपाणां सन्निकर्षाणां घटतद्गतरूपरूपत्वशब्द-शब्दत्वावच्छिन्नचैतन्याभिव्यञ्जकवृत्त्युत्पादने विनियोग इत्यर्थः॥

---

१. सर्वज्ञमुनिः—संक्षेपशारीरकाचार्यः।

२. तदयमित्यस्य मूलस्थस्य पदस्य षष्ठ्या पञ्चम्या च समासं दर्शयति—तत्तस्ये-त्यादिना।

३. मुद्रितपुस्तके एतत्पाठः प्रमादभ्रष्टः प्रतिभाति, कखपुस्तकयोस्तु वर्तत एव।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सा च वृत्तिश्चतुर्विधा[1] संशयो, निश्चयो, गर्वः, स्मरणमिति। एवंविधवृत्तिभेदेन एकमप्यन्तःकरणं मन इति बुद्धिरिति अहङ्कार इति चित्तमिति व्याख्यायते। तदुक्तम्—

मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्।
संशयो निश्चयो गर्वः स्मरणं विषया इमे॥ १८॥

तच्च प्रत्यक्षं द्विविधम्। सविकल्पकनिर्विकल्पकभेदात्। तत्र सविकल्पकं वैशिष्ट्यावगाहिज्ञानं यथा घटमहं जानामीत्यादि ज्ञानम्।

वृत्तिभेद निरूपण—

वह सन्निकर्षजन्य वृत्ति चार प्रकार की होती है—संशय, निश्चय, गर्व और स्मरणरूप। अन्तकरण के एक होने पर भी संशयादि वृत्ति के भेद से मन, बुद्धि, अहंकार और चित्त ऐसा नाम पड़ जाता है। पूर्वाचार्यों ने भी कहा है—मन, बुद्धि, अहकार और चित्त रूप से अन्तःकरण चार प्रकार का है, तथा संशय, निश्चय, गर्व और स्मरण ये उनके विषय है॥ १८॥

यस्या जनने एतेषां विनियोगः सा वृत्तिः कतिविधेत्यपेक्षायामाह—**सा चेति**। सन्निकर्षजन्यवृत्त्यवच्छिन्नचैतन्यस्य प्रत्यक्षत्वाद् वृत्तश्चान्तःकरणपरिणामत्वात्तद्घटकवृत्तिमदन्तःकरणनिरूपणं न प्रकृतासङ्गतमिति द्रष्टव्यम्। संशयाकारा निश्चयाकारा गर्वाकारा स्मरणाकारा, संशयाद्याकारेण परिणामरूपा वृत्तिश्चतुर्विधेत्यर्थः। एवं संशयादिविषयाकारपरिण[2]तविविधवृत्तिभेदेनैकमप्यन्तःकरणं संशयाकारकवृत्तिमन्मन इत्याख्यायते, निश्चयाकारवृत्तिमद्बुद्धिरित्युच्यते, गर्वाकारवृत्तिमदहङ्कार इत्यभिधीयते, स्मरणाकारवृत्तिमच्चित्तमिति व्यपदिश्यते इत्यर्थः। स्वोक्तविभागे पूर्वाचार्यसंमतिमाह—**तदुक्तमिति**। वृत्तिभेदेन तत्तद्वृत्तिमतो भेदादन्तःकरणं मन आदिभेदेन चतुर्विधम्, संशयादयोऽमी विषयाः, एतेषां विषयत्वे एतदाकारवृत्तीनामप्येतन्नामकत्वान्न प्रकृतप्रतिकूलतेति भावः।

प्रत्यक्षघटकवृत्तिस्वरूपमभिधाय विषयावच्छिन्नचैतन्याभिन्नवृत्यवच्छिन्नचैतन्यरूपमुक्तं प्रत्यक्षं विभज्य दर्शयति—**तच्चेति**। तत्र प्रथमोद्दिष्टत्वात्सकलवादिसंमतत्वा-

---

१. चक्षुःसंयोगादिना घटाद्याकारा या वृत्तिर्जायते, सा संशयरूपा निश्चयरूपा-गर्वरूपा स्मरणरूपेति तस्याश्चातुर्विध्यमित्यर्थः।

२. णाम इति पाठः गपुस्तके।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

निर्विकल्पकं तु संसर्गानवगाहिज्ञानम्। यथा—सोऽयं देवदत्तः, तत्त्वमसीत्यादिवाक्यजन्यज्ञानम्॥ १९॥

ननु शाब्दमिदं ज्ञानं न प्रत्यक्षमिन्द्रियाजन्यत्वादिति चेत्। न।

वह प्रत्यक्ष दो प्रकार का है, एक सविकल्पक, दूसरा निर्विकल्पक। इनमें विशेषण विशेष्य और उन दोनों के संसर्ग को विषय करने वाला सविकल्पक ज्ञान है जैसे 'मैं घट जानता हूँ। विशेषण विशेष्य के संसर्ग को विषय न करने वाला ज्ञान निर्विकल्पक कहा जाता है। यथा 'यह वही देवदत्त है' 'वह तुम ही हो' इत्यादि वाक्य जन्य ज्ञान निर्विकल्पक ज्ञान है॥ १९॥

दखिलव्यवहारप्रयोजकत्वादादौ सविकल्पकं लक्षयति—**तत्रेति**। तत्र तयोर्मध्ये। विकल्पो वैशिष्ट्यं तेन सह वर्तत इति सविकल्पकं वैशिष्ट्यविषयकमित्यर्थमभिप्रेत्याह—**वैशिष्ट्यावगाहीति**।[1] तथात्वमिच्छादावतिव्याप्तमित्यत उक्तम्—**ज्ञानमिति**[2] तत्त्वं तु निर्विकल्पकेऽतिव्याप्तमित्यत उक्तं—**वैशिष्ट्यावगाहीति**। उदाहरणमाह—**यथेति**। घटमहं जानामीत्यादिज्ञानं घटरूपविशेषणविशिष्टज्ञानावगाहिज्ञानत्वाद्वैशिष्ट्यावगाहीत्यर्थः। निर्गता विकल्पो यस्मादिति निर्विकल्पकमित्यर्थमभिप्रेत्य द्वितीयं लक्षयति—**निर्विकल्पकं त्विति**। संसर्गो विशेषणविशेष्यसम्बन्धो वैशिष्ट्यमिति यावत्। उदाहरणमाह—**यथेति**। देशकालोपलक्षितदेवदत्तलक्षणाभेदविषये सोऽयं देवदत्त[3] इतीन्द्रियजन्यैक्यप्रत्यक्षे सन्निकर्षवशादुपलक्षकदेशकालादेरपि भानसम्भवात्, शाब्दे तु ज्ञाने तात्पर्यविषयस्यैव भाननियमात्, अभेदमात्रविषयत्वाच्छाब्दमेवैतदुदाहरणमित्यभिप्रेत्याह—**वाक्यजन्येति**। प्रकृष्टप्रकाशश्चन्द्रः, 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्याद्यवान्तरवाक्यमादिशब्दार्थः॥

ननु निर्विकल्पकप्रत्यक्षं लक्षयित्वा वाक्यजन्यज्ञानस्य तल्लक्ष्यत्वाभिधानमप्यन्तासङ्गतमित्याशयेन शङ्कते—**नन्विति**। [4]शाब्दज्ञानस्य इन्द्रियाजन्यत्वेऽपि निरुक्त-

---

१. तथात्वं—वैशिष्ट्यावगाहित्वम्।

२. तत्त्वं—ज्ञानत्वम्।

३. ननु सोऽयं देवदत्त इत्यैक्यप्रत्यभिज्ञयैव वाक्यप्रयोगात् देशाद्युपलक्षितदेवदत्तलक्षणाभेदविषयम् इन्द्रियजन्यज्ञानमप्यस्ति निर्विकल्पकप्रत्यक्षम्, तद् विहाय कथं शाब्दमेवोदाह्रियते इत्याशङ्कां कृत्वा पश्चादयं ग्रन्थो योजनीयः।

४. 'शाब्दज्ञानस्य' इति पाठः कखपुस्तकयोर्नास्ति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न हि इन्द्रियजन्यत्वं प्रत्यक्षत्वे तन्त्रं दूषितत्वात्। किन्तु योग्यवर्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वमित्युक्तम्। तथा च सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य सन्निकृष्टविषयतया बहिर्निःसृतान्तःकरणवृत्त्यभ्युपगमेन देवदत्तावच्छिन्नचैतन्ययोरभेदेन सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य प्रत्यक्षत्वम्। एवं तत्त्वमसि इत्यादिवाक्यजन्यज्ञानस्यापि। तत्र प्रमातुरेव विषयतया तदुभयाभेदस्य सत्त्वात्।

शङ्का—('सोऽयं देवदत्ता'दि) वाक्य जन्य जितने भी ज्ञान वे सभी शाब्दबोध (परोक्ष) है, प्रत्यक्ष नहीं है क्योंकि प्रत्यक्ष तो इन्द्रिय जन्य ज्ञान को कहते हैं।

समाधान—यह कहना उचित नहीं, क्योंकि प्रत्यक्ष के प्रति इन्द्रियजन्यत्व प्रयोजक है, इसका खण्डन पहले हि कर दिया गया। अतः ज्ञान के प्रत्यक्ष होने में योग्य वर्तमान विषयावच्छिन्न चैतन्य का प्रमाण चैतन्य के साथ में अभिन्नत्व ही ही प्रयोजक है। 'यह वह देवदत्त है' यह वाक्य जन्य ज्ञान भी सन्निकृष्ट वस्तु को विषय कर रहा है। अतः अन्तः करणवृत्ति का बाहर निकलना यहाँ गया है। वृत्ति का बाहर निकलना स्वीकार करने पर देवदत्तावच्छिन्न चैतन्य तथा देवदत्ताकारवृत्यवच्छिन्न चैतन्य का अभेद होने से 'सोऽयम् देवदत्तः' यह वाक्य जन्य ज्ञान तथा 'तत्त्वमसि' इत्यादि भी प्रत्यक्ष ही है क्योंकि इस ज्ञान में प्रमाता का ही विषय होने से दोनों का अभेद है ही—इसलिए कोई दोष भी नहीं।

प्रत्यक्षत्वप्रयोजकसत्त्वात् सन्निहितविषयकवाक्यजन्यज्ञानस्यापि प्रत्यक्षत्वाभ्युपगमान्नासङ्गतिरित्याशयेनाह—**न हीति**। इन्द्रियजन्यत्वस्य मनोरूपेन्द्रियजन्यानुमित्यादावतिव्याप्त्यादिप्रदर्शनेन दूषितत्वात्। उक्तं विस्मृत्य पृच्छति—**किन्त्विति**। प्रोक्तं स्मारयति—**योग्येति**। यद्यपि प्रमाणचैतन्यस्य योग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं पूर्वमुक्तम्, तथाऽपि तत्त्वे योग्यवर्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वे च विशेषाभावादेव[1] मुक्तम्। तथा च प्रमाणचैतन्यस्य योग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं पूर्वमुक्तमिति भावः।

---

१. एवं—योग्यवर्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वम्—इत्यभिप्रायः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा चेन्द्रियजन्यत्वस्याप्रयोजकत्वे निरुक्तस्य प्रयोजकर्त्वे च सतीमं फलितमित्याह — **तथा चेति ।**

नन्वेवं लौकिकोदाहरणसम्भवेऽपि वैदिकं न सम्भवति 'विज्ञातारमरे केन विजानीयात्' इत्यादिश्रुत्या प्रमातुर्विषयत्वनिरासात् । तत्पदार्थाभिन्नत्वं पदार्थ-प्रमातृचैतन्यस्य विषयावच्छिन्नचैतन्यत्वाभावान्निरुक्तप्रयोजकस्यासत्त्वादित्याशङ्क्याह—**एवमिति ।** तत्त्वमसीत्यादिवाक्यजन्यज्ञानस्यापि [1]सन्निकृष्टत्वं पदलक्ष्यविषयतयोक्तवाक्यजन्यान्तःकरणवृत्त्यभ्युपगमेन लक्ष्यचैतन्यस्य वृत्त्यवच्छिन्नचैतन्यस्याभेदेन प्रत्यक्षत्वमित्यर्थः । **तत्र**—तस्मिञ्ज्ञाने । प्रमातृपदेन लक्ष्यं ग्राह्यं त्वंपदलक्ष्यात्तत्पदलक्ष्यस्याभिन्नत्वादेवमुक्तम्[2] । [3]श्रुतिस्तु फलव्याप्यत्वनिषेधपरा ।

---

१. अयं भावः—तत्त्वमसीत्येवं शब्दश्रवणे सर्वज्ञत्वकिञ्चिज्ज्ञात्वाकर्तृत्वाकर्तृत्वादि-विशिष्टाभेदविषयं ज्ञानं न जायते, किन्तु तत्त्वमिति पदद्वयलक्ष्यस्वरूपविषयमेव जायते कर्तृत्वाकर्तृत्वादिविरुद्धधर्मवतोरैक्ययोगात् । तत्त्वं पदलक्ष्यञ्च केवलं चैतन्यं सन्निकृष्टमेवेति उक्तवाक्यजन्यान्तःकरणवृत्त्यभ्युपगमे न किञ्चिद्बाधकम् । तथा च लक्ष्यचैतन्यस्य वृत्त्यवच्छिन्नचैतन्यस्य च एकदेशस्थितोपाधिद्वयावच्छिन्नत्वात् अभेदे सति प्रत्यक्षत्वं सुस्थमेव ।

२. प्रमातुरेव विषयतयेत्याद्युक्तमित्यर्थः ।

३. ननु तत्त्वंपदलक्ष्यस्य ब्रह्मणः शास्त्रजन्यज्ञानविषयत्वे 'विज्ञातारमरे केन विजानीयात्' इत्यादिश्रुतीनां का गतिरित्याशङ्क्य समाधत्ते—श्रुतिस्तु फलव्याप्यत्व-निराकरणपरेति । तथा चोक्तम्—

फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥

इन्द्रियसन्निकर्षद्वारा अन्तःकरणस्य घटाद्याकारवृत्तौ सत्यां तत्र चैतन्यं प्रति-बिम्बते, तच्च चैतन्यं 'फलम्' इत्यभिधीयते । चैतन्यप्रतिबिम्बयुता च सा वृत्तिः विषयं व्याप्नोतीति फलरूपचैतन्यस्यापि व्याप्तिर्जाता, तथा च घटादीनां जडानां फलव्याप्यत्वम् । तच्च ब्रह्मणि न सम्भवति जडत्वापत्तेः । तत्त्वमस्यादिवाक्यश्रवण-समनन्तरजायमानया वृत्त्या ब्रह्मणो व्याप्यत्वे न कापि हानिः, प्रत्युत तद्विषयाज्ञान-निवृत्तिं विना भानासम्भवात् अज्ञाननाशार्थं वृत्तिः स्वीकार्यैवेति कारिकाऽभिप्रायः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्विकल्पकत्वम् । उच्यते । वाक्यजन्यज्ञानविषयत्वे हि न पदार्थसंसर्गत्वं तन्त्रम्, अनभिमतसंसर्गस्यापि वाक्यजन्यज्ञानविषयत्वापत्तेः, किन्तु तात्पर्यविषयत्वम् ॥

प्रकृते च 'सदेवसोम्येदमग्र आसीत्' छा०-६-२-१ इत्युपक्रम्य 'तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' छा०-६-८-७ इत्युपसंहारे विशुद्धे ब्रह्मणि वेदान्तानां तात्पर्यमवसितमिति कथं तात्पर्याविषयसंसर्गमवबोधयेत् ॥ २० ॥

शङ्का—वाक्य जन्यज्ञान तो उस वाक्य में स्थित प्रत्येक पदों के अर्थ के संसर्ग को विषय करता है। फिर तो पदार्थ-संसर्गावगाही होने से सविकल्पक हुआ, इसे निर्विकल्पक कैसे कहा जाय ?

समाधान—वाक्यजन्य ज्ञान पदार्थ संसर्ग को विषय करता है, यह नियम नहीं, क्योंकि अनभिमत संसर्ग भी वाक्यजन्य ज्ञान का विषय होने लगेगा, किन्तु वाक्यजन्य ज्ञान विषयत्व में तात्पर्य विषयत्व को ही नियामक मानना चाहिए। (अर्थात् वक्ता के तात्पर्य के आधार पर वाक्यजन्य ज्ञान का विषय निरूपण किया जाता है।)

('यह वह देवदत्त है' इस वाक्य की तरह) इस प्रसङ्ग में हे सोम्य ! सृष्टि से पूर्व यह नाम रूपात्मक जगत् केवल अद्वितीय सत्य ही था, इस प्रकार प्रारम्भ कर 'वह सत्य है, वह आत्मा है, हे श्वेतकेतु ! वह तुम हो' इस उपसंहार वाक्य से वेदान्त का तात्पर्य विशुद्ध चैतन्य ब्रह्म में ही निश्चित हुआ है। अतः कैसे कह सकते कि तात्पर्य के अविषय संसर्ग को महावाक्य बोधित करता है ॥ २० ॥

ननु सोऽयं देवदत्त इत्यादिवाक्यजन्यं ज्ञानं संसर्गावगाहिवाक्यजन्यज्ञानत्वात् गामानयेति वाक्यजन्यज्ञानवत् । उक्तवाक्यजन्यं ज्ञानं न निर्विकल्पकं संसर्गावगाहित्वात्तद्वदिति वेत्याशयेन शङ्कते—**नन्विति** । भवेदेवं यदि वाक्यजन्यज्ञानविषयत्वे पदार्थसंसर्गत्वं तन्त्रं भवेन्न तु तथा, तथात्वे हि भोजनप्रकरणे सैन्धवमानयेत्यत्रानभिमतस्याश्वादिसंसर्गस्यापि 'तत्त्वापत्तेरित्याशयेनाह— **उच्यत इति** । ननु पदार्थसंसर्गत्वस्य तत्र तन्त्रत्वाभावे किं तत्र तन्त्रमिति पृच्छति—**किन्त्विति** । यस्तात्पर्यविषयः स एव वाक्यजन्यज्ञानगोचरः, स च संसर्गोऽसंसर्गो वेति विशेषो नादर्तव्य इत्याह—**तात्पर्य्येति** ।

---

१. तत्त्वापत्तेः—वाक्यजन्यज्ञानविषयत्वापत्तेः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

इदमेव तत्त्वमस्यादिवाक्यानामखण्डार्थत्वम्, यत्संसर्गानवगाहि-यथार्थज्ञानजनकत्वमिति ॥ तदुक्तम्—

संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् ।
उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता ॥

प्रातिपदिकार्थमात्र[1]परत्वं वाऽखण्डार्थत्वमिति चतुर्थपादार्थः ॥२१॥

तत्त्वमस्यादि महावाक्य में अखण्डार्थत्व यही है कि जो सम्बन्ध को विषय न करने वाले यथार्थ ज्ञान का जनकत्व है। (चित्सुखाचार्य ने भी) कहा —(तत्त्वमस्यादि महावाक्यों में संसर्गानवगाहि-यथार्थ ज्ञान की जनकता ही वाक्य की अखण्डार्थता अथवा उक्त वाक्यों में प्रातिपदिकार्थत्व ही अखण्डार्थत्व है। श्लोकगत चतुर्थ पाद का अर्थ यह है कि-प्रातिपदिकार्थ (शब्दार्थ) मात्र तात्पर्य परक वाक्य ही अखण्डार्थक है। (अन्यथा द्वितीय लक्षण में अतिव्याप्ति हो जायेगी) ॥२१॥

प्रकृते तु पिण्डमात्रे लौकिकवाक्यस्येव उपक्रमोपसंहारादितात्पर्यलिङ्गैः तत्त्वमस्यादिवेदान्तवाक्यानामद्वितीये विशुद्धे ब्रह्मणि तात्पर्यावधारणादसंसर्गस्यैव तात्पर्यगोचरत्वात्सोऽयमित्यादिवाक्यानां तात्पर्याविषयसंसर्गावगाहित्वं बाधितमित्याशयेनाह—**प्रकृते इति**।

ननु तत्त्वमस्यादिवाक्यानां प्रसिद्धमखण्डार्थत्वं विहाय कथं संसर्गानवगाहिज्ञानजनकत्वमपूर्वमुक्तमित्याशङ्क्याह—**इदमेवेति**। [2]एवकारोऽप्यर्थे। तेन[3] च प्रातिपदिकार्थमात्रपरत्वमखण्डार्थमित्यस्य समुच्चयः। तत्राचार्यसम्मतिमाह—**तदुक्तमिति**। चित्सुखाचार्यैरिति शेषः। गिरां तत्त्वमस्यादिवाक्यानां संसर्गासङ्गिसम्यग्धीहेतुता या सेयमखण्डार्थतोक्ता तदनवगाहियथार्थज्ञानहेतुत्वं यत्तदिदमखण्डार्थत्वमुक्तमित्यर्थः। तासां प्रातिपदिकार्थतोऽखण्डार्थतोक्तेति लक्षणस्य संसर्गपरे वाक्येऽतिव्याप्तिस्तत्रापि प्रातिपदिकार्थप्रतिपादकत्वसत्त्वादित्याशङ्क्याह—**प्रातिपदिकार्थमात्रपरत्वमिति**। तथा च तत्र तन्मात्रप्रतिपादकत्वाभावान्नातिव्याप्तिरिति भावः।

---

१. यद्वा तत्प्रातिपदिकार्थतेति पादस्य प्रातिपदिकार्थमात्रपरत्वमिति मात्रपदपूरणपूर्वकव्याख्यानाभावे संसर्गविशिष्टप्रमाजनके बोधेऽतिव्याप्तिः। तासां गिरां प्रातिपदिकार्थता तत्प्रातिपदिकार्थता, इत्येवंभूतलक्षणस्य तत्र सत्त्वादित्यर्थः।

२. इदमेव तत्त्वमस्यादिवाक्यानामखण्डार्थत्वमित्यत्रस्थ एवकारोऽप्यर्थ इत्यर्थः। अवधारणार्थं एवकारे प्रातिपदिकार्थमात्रपरत्वरूपलक्षणान्तरस्यानवकाशादिति।

३. तेन च—अप्यर्थकेन एवकारेण च।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तच्च प्रत्यक्षं पुनर्द्विविधं जीवसाक्षि ईश्वरसाक्षि चेति। तत्र जीवो नामान्तःकरणावच्छिन्नं चैतन्यम्। तत्साक्षि तु अन्तःकरणोपहितं चैतन्यम्। अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः ॥ २२ ॥

जीवसाक्षी और ईश्वरसाक्षी—

उक्त प्रत्यक्ष ज्ञान पुनः जीवसाक्षी, ईश्वरसाक्षी भेद से दो प्रकार का है। (अर्थात् जीव प्रत्यक्ष और ईश्वर प्रत्यक्ष)। उनमें अन्तःकरणावच्छिन्न चैतन्य को जीव कहते हैं और अन्तःकरण से उपहित चैतन्य को जीवसाक्षी कहते हैं। एक ही अन्तःकरण विशेषण और उपाधि के भेद से जीव तथा जीवसाक्षी का भेद हो जाता है ॥ २२ ॥

उक्तप्रत्यक्षज्ञानस्य साक्षिद्वैविध्येन द्वैविध्यमाह—**तच्चेति**। संसर्गविगाहित्वानवगाहित्वभेदेऽपि ज्ञानं चैतन्यरूपमेकमेव, तच्च जीवसाक्षीश्वरसाक्षिभेदेन द्विविधमित्यर्थः। यत्तु साक्षिपदं तज्जन्यपरम्, तथा च जीवसाक्षिजन्यमीश्वरसाक्षिजन्यमिति द्विविधमित्यर्थ इति केचित्[1] तन्नोपादेयम्। ज्ञानस्य चैतन्यरूपत्वप्रतिपादनात्[2]। तत्र जीवसाक्षिनिरूपणस्य जीवनिरूपणाधीनत्वाज्जीवस्वरूपनिरूपणपूर्वकं तत्साक्षिस्वरूपं लक्षयति—**तत्रेति**। जीवसाक्षीश्वरसाक्षिणोर्मध्ये। अन्तःकरणस्य विशेषणत्वे चैतन्यस्य जीवत्वं तस्योपाधित्वे तस्य तत्साक्षित्वमिति तयोर्भेदः, एतदेव स्फोटयति—**अन्तःकरणस्येति**।

---

१. शिखामणिकाराः।

२. चैतन्यस्य च जन्यत्वायोगादिति शेषः। वस्तुतस्तु ज्ञानस्य स्वरूपतोऽजन्यत्वेऽपि वृत्तिरूपज्ञानस्य वृत्तिविशिष्टज्ञानस्य वा जन्यत्वं स्वीकृतमेव, तथा च जीवसाक्षिजन्यमीश्वरसाक्षिजन्यमिति भेदः साधीयान्। तथैव मणिप्रभाकारेण व्याख्यातम्—जीवस्य यः साक्षी तज्जन्यमित्यादि। तथात्वे एव 'एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्य'मित्युत्तरग्रन्थसङ्गतिः। अन्यथा—जीवसाक्षि ईश्वसाक्षि चेति वाक्येन साक्षिद्वैविध्यप्रतिपादने प्रत्यक्षज्ञानद्वैविध्यं निरूपितमित्युत्तरग्रन्थासङ्गतिः स्फुटैव। तच्च प्रत्यक्षं पुनर्द्विविधमिति स्वशब्देन प्रक्रमता अकस्माज्जीवेश्वरसाक्षिणो निरूपणं प्रमत्तप्रगानवत्स्यात्। अतः शिखामणिकारखण्डनेन स्वकौशलं प्रदर्शयता नेत्रे पिधायैव लेखनी सञ्चालितेति दृश्यते।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

विशेषणं च कार्यान्वयिव्यावर्तकम्। उपाधिश्च कार्यानन्वयी व्यावर्तको वर्तमानश्च। रूपविशिष्टो घटोऽनित्य इत्यत्र रूपं विशेषणम्। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र कर्णशष्कुल्युपाधिः। अयमेवोपाधिर्नैयायिकैः परिचायक इत्युच्यते ॥

प्रकृते चान्तःकरणस्य जडतया विषयभासकत्वायोगेन विषयभासकचैतन्योपाधित्वम्। अयं च[1] जीवसाक्षी प्रत्यात्मं नाना। एकत्वे मैत्रावगते। चैत्रस्याप्यनुसन्धानप्रसङ्गः ॥ २३ ॥

जो कार्य के साथ अन्वित होते हुए इतर का व्यावर्त्तक हो उसे विशेषण कहा जाता है। और जो कार्य के साथ अन्वित न होते हुए इतरक भाव तक और वर्त्तमान हो उसे उपाधि कहा जाता है। 'रूपविशिष्ट घट अनित्य है' यहाँ पर विशेषण है। (क्योंकि रूप घट के साथ युक्त होकर इतरव्यावृत्त करता है।) कर्णगोलक के द्वारा अवच्छिन्न आकाश को श्रोत्र कहते हैं। इसमें कर्णगोलक आकाश की उपाधि है। इसी उपाधि को नैयायिकों ने परिचायक कहा है।

वस्तुतस्तु अन्तःकरण के जड़ होने से उसमें विषय की अवभासकता नहीं है, इसलिए विषय के अवभासक चैतन्य की उपाधि अन्तःकरण को कहते हैं। यह जीवसाक्षी प्रत्येक शरीर में पृथक्-पृथक् है। यदि सभी शरीरों में साक्षी को एक मानें तो मैत्र व्यक्ति से जानी गयी वस्तु का अनुसन्धान चैत्र को होने लगेगा ॥२३॥

विशेषणोपाध्योर्वर्त्तमानत्वे सति व्यावर्त्तकत्वं यद्यपि समानम् तथाऽपि कार्यान्वयित्वतदनन्वयित्वभेदात्तद्विशिष्टतदुपहितचैतन्ययोरपि भेद इत्याशयेनाह—**विशेषणं चेति**। कार्यान्वयि व्यावर्तकं वर्तमानं चेत्यपि बोध्यम्। तथा च कार्यान्वयित्वे सति वर्तमानत्वे सति व्यावर्तकत्वं विशेषणत्वम्। कार्यानन्वयित्वे सति यथोक्तत्वमुपाधित्वम्। कार्यपदमत्रावच्छेद्यान्वययोग्यपरम्। विशेषणोदाहरणमाह—**रूपेति**। रूपस्य कार्यान्वयित्वादिसत्त्वाद्विशेषणत्वम्। उपाध्युदाहरणमाह—**कर्णेति**। कर्णशष्कुल्याः कार्यानन्वयित्वादिसत्त्वादुपाधित्वम्। स्वोक्तोपाधेर्नैयायिकैर्व्यवह्रियमाणं संज्ञामाह—**अयमेवेति** ॥

---

१. अयञ्चेति। यद्यपि सर्वेषु पुस्तकेषु अयञ्च जीवसाक्षीति पुंल्लिङ्गप्रयोग उपलभ्यते। तथाऽपि इदञ्च जीवसाक्षि इति नपुंसकप्रयोगेण भाव्यम्, जीवसाक्षीश्वरसाक्षिणोः प्रत्यक्षयोश्चैतन्ययोश्च नियतनपुंसकत्वात्। यद्यपि कथञ्चित् अयञ्चेत्यस्योपपत्तिः शक्यते कर्तुं तथापि टीकायामग्रे जीवसाक्षिणं निरूप्येश्वरसाक्षिणं निरूप-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ईश्वरसाक्षि तु मायोपहितं चैतन्यम्। तच्चैकम्। तदुपाधिभूत-मायाया एकत्वात्। 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिश्रुतौ माया-भिरिति बहुवचनस्य मायागतशक्तिविशेषाभिप्रायतया मायागतसत्त्व-रजस्तमोरूपगुणाभिप्रायतया वोपपत्तेः॥

परन्तु मायोपहित चैतन्य को ईश्वरसाक्षी कहते हैं और वह भी एक ही है, क्योंकि उसकी उपाधि माया एक है। 'परमेश्वर माया से बहुत रूप धारण कर लेता है' इस श्रुति में मायाभिः (मायाओं से) इस बहुवचनान्त द्वारा माया में शक्तियाँ बहुत हैं—ऐसा समझना चाहिए अथवा माया में सत्त्वगुण, रजोगुण एवं तमोगुण के अभिप्राय से बहुवचन का प्रयोग किया गया है (न कि माया बहुत हैं इस बात की सिद्धि की गयी)।

नन्वस्तु कर्णशष्कुल्यादेरुपाधित्वमन्तःकरणस्य तु तत्त्वं[1] प्रयोजनशून्यम्। न हि प्रमाता विषयभासनाय स्वसाक्षिणमपेक्षते चक्षुरादिजन्यवृत्त्यवच्छिन्नचैतन्येनैव विषय-प्रकाशसम्भवादित्याशङ्क्य अन्तःकरणस्य जडतया विषयभासकत्वायोगाद्, वृत्तीनो नानात्वेन तदवच्छिन्नचैतन्यस्याप्यनेकतया समस्तविषयानुसन्धातृत्वानुपपत्तेः, प्रमातुं-श्चान्तःकरणावच्छिन्नत्वेन विषयानुसन्धानार्थमन्यापेक्षत्वात्तदन्वितस्य ब्रह्माभिन्नस्य साक्षिण आवश्यकत्वात्तदुपाधित्वमन्तःकरणस्यावश्यमभ्युपेयमित्याशयेनाह—**प्रकृत इति**। ननु जीवसाक्षिणो ब्रह्माभेदेन स्वयंप्रकाशत्वेन सर्वविषयानुसन्धातृत्वाभ्युपगमे ब्रह्मण एकत्वात्तदभिन्नसाक्षिणोऽपि एकत्वाच्चैत्रावगते मैत्रस्याप्यनुसन्धानप्रसङ्ग इत्या-सङ्क्योपाधिभेदेन तस्य नानात्वस्वीकाराददोष इत्याह—**अयं चेति**॥ २३॥

एवं जीवसाक्षिणं निरूप्येश्वरसाक्षिणं निरूपयति—**ईश्वरसाक्षीति**। तदपि जीवसाक्षिवन्नाना किं वैकमित्यपेक्षायामाह—**तच्चैकमिति**। तत्र हेतुमाह—**तदिति**।

यतीति सर्वेषु पुस्तकेषूपलभ्यते, तत्तु दुरुपपादमेव मूले 'ईश्वरसाक्षि तु' इत्यत्र नपुंसकप्रयोगोपलब्धे,। तथा च विशेष्यनिघ्नस्य साक्षिपदस्यात्र क्लीवे प्रयोग आवश्यकः। अथवा कालीनादिपदवत् क्षन्तव्यमिति।

१. तत्त्वम्—उपाधित्वम्। अन्तःकरणस्य जीवसाक्षिचैतन्योपाधित्वं निष्प्रयोजनम्। यदि प्रमाता विषयभासनाय स्वसाक्षिणमपेक्षेत, स्यात् सप्रयोजनकत्वम्। प्रमाता हि चक्षुरादिजन्यवृत्त्यवच्छिन्नचैतन्येनैव विषयं भासयिष्यति इति चेन्न। जडेनान्तःकरणेन विषयावभासायोगात्, नानावृत्त्यवच्छिन्ननानाचैतन्येन समस्तविषयानुसन्धातृत्वानुप-पत्तेः, प्रमात्रा च। असहायेन विषयानुसन्धानं न स्यात्। अतः प्रमात्रन्वितो ब्रह्मा-भिन्नः अन्तःकरणोपहितः साक्षी स्वीकार्यः। तथा चान्तःकरणस्य जीवसाक्षिचैतन्य-पाधित्वमावश्यकमिति तात्पर्यम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्। श्वे० ४।१०। 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजास्सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥' श्वे० ४।५। 'तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः॥ १॥' इत्यादि श्रुतिस्मृतिषु एकवचनबलेन लाघवानुगृहीतेन मायाया एकत्वं निश्चीयते। ततश्च तदुपहितं चैतन्यम् ईश्वरसाक्षि तच्चानादि तदुपाधेर्मायाया अनादित्वात्॥ २४॥

'माया को जगत् की प्रकृति (उपादान) और मायावी को महेश्वर (सर्वनियन्ता या सर्वाधिष्ठाता) जानों', 'रक्त, श्वेत तथा काले रङ्ग की एक माया ही बहुत-सी समान-जातीय प्रजा की सृष्टि करता है। 'उसमें एक (अज्ञानी) जीव उसे भोगता हुआ (उसमें लिपटा रहता है) और दूसरा उसे भोगकर विवेक से निःसार समझकर छोड़ देता है।' 'जिसमें हृदय स्थापित करके अध्यात्मयोगी सर्वतः प्रसारि मायारूप अविद्याबन्धन से मुक्त होता है, ऐसे प्रमाणों के अविषय ज्ञानस्वरूप परमात्मा को नमस्कार है' इन श्रुति-स्मृति वाक्यों में एकवचन का प्रयोग होने से एवं माया को मानने में लाघव है, इसलिए भी माया में एकत्व का निश्चय हो जाता है। अतएव वह मायोपाधिक चैतन्य ही ईश्वरसाक्षी और वही अनादि है, क्योंकि उसकी उपाधि माया अनादि है॥ २४॥

अनाद्यनिर्वचनीयत्वे सति विपर्ययोपादानभूता विक्षेपशक्तिप्रधाना माया। ननु तस्या एकत्वं मायाभिरिति श्रुतिविरुद्धमित्याशङ्क्याह—**इन्द्र इति**। इन्द्रो निरङ्कुशैश्वर्यः परमात्मा मायाभिः पुरुषरूपो बहुरूप ईयते प्रतीयते, यथा वह्न्यादेर्दाहकत्वप्रकाशकत्वादिकार्यदर्शनात्तदनुकूलाः शक्तिविशेषाः कल्प्यन्ते तथा जगद्रूपविचित्रकार्यदर्शनान्मायायास्ते कल्प्यन्त इति तदभिप्रायतयेत्यर्थः॥

ननु मुख्यार्थपरित्यागे किं कारणमित्याशङ्क्यानेकश्रुतिस्मृतिगतैकवचनसिद्धतदेकत्वनिश्चय एवेत्याह—**मायां त्विति**। नन्विदमेकवचनं जात्यभिप्रायकं किं न स्यादित्याशङ्क्य तच्छङ्कानिवर्तकैकपदयुक्तां श्रुतिं पठति—**अजामिति**। जन्मशून्यामनादिभूतां स्वसमानजातीयेतरप्रकृतिशून्यामेकां लोहितशुक्लकृष्णां रजःसत्त्वतमोमयीं बह्वीः प्रजास्समानरूपास्त्रिगुणात्मिकाः सृजमानाम् एकोऽजन्मा जीवो जुषमाणः सेवमानोऽनुशेते तत्तादात्म्यापन्नो भवति जहात्येनां मुक्तभोगामजोऽन्य ईश्वर इत्यर्थः। मायाया एकत्वं श्रुतितात्पर्यसिद्धमिति कथं ज्ञातं श्रुतितात्पर्यस्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मायावच्छिन्नं चैतन्यं परमेश्वरः, मायाया विशेषणत्वे ईश्वरत्वमुपाधित्वे साक्षित्वमिति ईश्वरत्वसाक्षित्वयोर्भेदः, न तु धर्मिणोरीश्वरतत्साक्षिणोः ॥

स च परमेश्वर एकोऽपि स्वोपाधिभूतमायानिष्ठसत्त्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वर इत्यादिशब्दवाच्यतां लभते ॥

ईश्वर का निरूपण—

मायावच्छिन्न-चैतन्य को ईश्वर कहते हैं। माया को विशेषण मानेन पर उसमें ईश्वरत्व और उपाधिरूप मानने पर ईश्वरसाक्षित्व है। अतः ईश्वरत्व उसके साक्षित्वरूप धर्म में भेद है, किन्तु ईश्वर और ईश्वरसाक्षीरूप धर्मी में भेद नहीं है। वह परमेश्वर एक होता हुआ भी अपनी उपाधिभूत माया में सत्त्व, रज एवं तमोगुण के भेद से ब्रह्मा, विष्णु एवं महेश्वर शब्द से कहा जाता है।

दुरूहत्वादित्याशङ्क्य स्मृतिकारानुसारेणेत्याशयेन पराशरस्मृतिं पठति—**तरतीति**। यस्मिन् परात्मनि हृदि निवेशिते वृत्त्यारूढे कृते योगी अविद्यां तरति तस्मै ज्ञानस्वरूपायामेयाय वृत्त्यवच्छिन्नचैतन्यगोचराय नमः। अविद्यां विशिनष्टि—**विततामिति**। प्रपञ्चाकारेण परिणतत्वात् सर्वत्र व्याप्तामित्यर्थः। ननु तन्निवृत्तावपि नानर्थनिवृत्तिः, सर्वानर्थभूताया मायाया अवशिष्टत्वादित्याशङ्क्याह—**मायामिति**। स्वाश्रयाव्यामोहकत्वव्यामोहकत्वविशेषेऽपि वस्तुतो न तयोर्भेद[1] इत्याशयः। ननु स्मृतावपि जातावेकवचनस्य सम्भवादेकपदस्यामुख्यार्थकताया अपि सुवचत्वात्कथं तदेकत्वनिश्चय इत्याशङ्क्याह—**लाघवेति**। 'अविद्यायामन्तरे वर्तमानाः' (का० १।२।५) 'मम माया दुरत्यया' (भ० गी० ७।१४) इत्यादिश्रुतिस्मृतीनामादिपदेन संग्रहः। उपसंहरति—**ततश्चेति**। यथोपाधिभूतमायाया एकत्वात्तस्यैकत्वं तथा तस्या अनादित्वात्तस्याऽनादित्वमपीत्याह **तच्चेति**। तच्चैतन्यमनाद्यपीत्यर्थः॥

ईश्वरसाक्षिज्ञानस्येश्वरज्ञानापेक्षत्वादाह—**मायेति**। पूर्ववदत्रापि। मायाया विशेषणत्वोपाधित्वाभ्यामीश्वरत्वसाक्षित्वयोर्भेद इत्याह—**मायाया इति**। तथा च यथा नास्ति पाचकपाठकयोर्भेदः[2], किन्तु पाचकत्वपाठकत्वयोस्तद्वन्नेश्वरतत्साक्षिणोर्भेदोऽपि त्वीश्वरत्वसाक्षित्वयोरित्यर्थः।

---

१. मायाऽविद्ययोः।

२. यथा यो हि पाचकः स एव पाठकश्चेत् पाचकव्यक्तेः पाठकव्यक्तिर्न भिन्ना,

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

नन्वीश्वरसाक्षिणोनादित्वे 'तदैक्षत बहु स्यां प्रजायेय' छा० ६।२।१ इत्यादिना सृष्टिपूर्वसमये परमेश्वरस्यागन्तुकमीक्षणमुच्यमानं कथमुपपद्यते ? उच्यते—

शङ्का—ईश्वरसाक्षी के अनादि मानने पर 'उसने ईक्षण किया—मैं बहुरूप से प्रकाशित होऊँ' इत्यादि श्रुति द्वारा सृष्टि से पूर्वकाल में परमेश्वरगत आगन्तुक ईक्षण कहना कैसे युक्तिसङ्गत हो सकता है।

ननु मायाया एकत्वाद्यथेश्वरसाक्षिण एकत्वं तथा तदवच्छिन्नस्याप्येकत्वावश्यंभावात्कथं तस्य ब्रह्मादिरूपेण भेदः[1]। तथा च तस्य विशेषणभेदमूलत्वात्तद्भेदे च तस्या एवोपाधितया तदुपहितस्याप्येकत्वौचित्यात्कथं तदनेकतेत्याशङ्क्य च यथा मायोपाधिगतगुणभेदाभिप्रायेण तदनेकत्वव्यपदेशस्तथा तद्गतगुणावच्छेदेनेश्वरभेदो, न तु वस्तुत इत्याशयेनाह—**स चेति**। उपाधिपदमत्र विशेषणपरम्। तथा च मायावच्छिन्नेश्वरचैतन्यमेवोद्भूतसत्त्वगुणमायावच्छिन्नं पालयितृ-विष्णु-नारायणादिशब्दवाच्यतां भजते, तदेवोद्भूतरजोगुणमायावच्छिन्नं स्रष्टृ-ब्रह्म विधात्रादिशब्दप्रतिपाद्यतां लभते, तदेवोद्भूततमोगुणमायावच्छिन्नं संहर्तृ-महेश्वर-रुद्रादिशब्दाभिधेयतामधिगच्छति। अथ यो ह खलु वावास्य राजसोंऽशोऽसौ योऽयं ब्रह्मा, अथ यो ह खलु वावास्य तामसोंऽशोऽसौ स योऽयं रुद्रोऽथ यो ह खलु वावास्य सात्त्विकोंऽशोऽसौ स योऽयं विष्णुरिति मैत्रेयोपनिषदि तथैवावगतेरित्यर्थः। उपास्यं तु त्रिगुणमायावच्छिन्नमेव विष्णुमहेशगणेशदिनेशदुर्गारूपेण स्थित न त्वेकैकगुणप्रधानमायाविशिष्टमुपास्यं तस्य निरङ्कुशैश्वर्यवत्त्वाश्रवणादिति द्रष्टव्यम्।

तथाऽपि तस्थे पाचकत्वपाठकत्वे भिन्ने एव। एवमीश्वरतत्साक्षिणोः जीवसाक्षिणोश्च न भेदः, किन्तु जीवत्वसाक्षित्वरूपयोर्धर्मयोरेव भेदः।

१. भेदः तस्येति पाठो गपुस्तके। खपुस्तके यद्यपि तथाऽपि तस्येति पाठः। परञ्च तदग्रवर्ती उपास्य तु त्रिगुणेत्यादि पाठः। सर्वेषु पुस्तकेषु तस्यैवोपाधितया तदुपहितस्याप्यनेकत्वौचित्यात् कथं तदेकता इति पाठः दृश्यते, तथाऽप्यसङ्गत एव सः प्रतिभाति। अस्मदुपन्यस्तपाठस्यायमर्थः—तथा च तस्य—ब्रह्मादिभेदस्य, विशेषणभेदमूलायत्तत्वात् तत्र च तस्या मायाया एव उपाधितया तदुपहितस्याप्येकत्वौचित्यात्कथं तदनेकता—ब्रह्माद्यनेकतेत्याशङ्क्येत्यादिर्ज्ञेयः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथा विषयेन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदा जायन्ते, तथा सृज्यमानप्राणिकर्मवशेन परमेश्वरोपाधिभूतमायाया वृत्तिविशेषा[1] इदमिदानीं सृष्टव्यमिदमिदानीं पालयितव्यमिदमिदानीं संहर्तव्यमित्याद्याकारा जायन्ते। तासां च वृत्तीनां सादित्वात्तत्प्रतिविम्बितं चैतन्यमपि सादीत्युच्यते। एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्यम्। प्रत्यक्षत्वं च ज्ञेयगतं ज्ञप्तिगतं चेति निरूपितम् ॥ २५ ॥

समाधान—जैसे कि विषय और इन्द्रिय सन्निकर्ष आदि कारणों से जीव की उपाधिरूप अन्तःकरण में भिन्न-भिन्न वृत्तियाँ उत्पन्न होती हैं। उसी प्रकार सृज्यमान प्राणियों के कर्म-संस्कार के कारण परमेश्वर की उपाधिरूप माया में विशेष वृत्तियाँ उत्पन्न होती हैं कि इस समय इसकी सृष्टि करनी चाहिए, इसका पालन अथवा संहार करना चाहिए। ये वृत्तियाँ सादि होने से उनमें प्रतिबिम्बित चैतन्य भी सादि कहा जाता है। इस प्रकार साक्षी दो प्रकार के होने से प्रत्यक्ष ज्ञान भी दो प्रकार का हुआ। ज्ञानगत प्रत्यक्षत्व और विषयगत प्रत्यक्षत्व तो पहले ही निरूपण किया गया है ॥ २५ ॥

नन्वीक्षणस्येश्वरसाक्षिणः सृष्टिपूर्वकालीनत्वप्रतिपादनात्तस्यानादित्वं बाधितम्, तस्य सादित्वे ईश्वस्याप्यनादित्वं बाधितमिति शङ्कते—**नन्विति**। यथाऽभिव्यञ्जकान्तःकरणवृत्तेः सादित्वेन तत्प्रतिबिम्बितजीवसाक्षिस्वरूपज्ञानस्यापि सादित्वं तथेक्षणाद्यभिव्यञ्जकमायावृत्तेः सादितया तत्प्रतिबिम्बितेश्वरसाक्षिचैतन्यस्येक्षणादिज्ञानस्वरूपस्यापि सादित्वमतो न तयोः स्वतोऽनादित्वे बाधकमित्याशयेनाह—**उच्यत इति**। एवं साक्षिद्वैविध्यप्रतिपादनात्तस्यैव तत्तद्वृत्त्यनुगतस्य ज्ञानत्वात्प्रत्यक्षज्ञानद्वैविध्यमपि सिद्धमित्याह—**एवमिति**। एवं साक्षिद्वैविध्यनिरूपणाज्जीवेश्वरसाक्षिजन्यप्रत्यक्षभेदेन प्रत्यक्षज्ञानस्य द्वैविध्यं सिद्धमिति तु न[3] रम्यं ज्ञप्तिगतं प्रत्यक्षत्वं

---

१. जायन्ते इत्यनेनान्वयः।

२. समानाधिकरणे षष्ठ्यौ। तथा च ईश्वरसाक्षिण ईक्षणस्य सृष्टिपूर्वकालिकत्वप्रतिपादनात् कालिकादधिरहितत्वस्यानादित्वस्याभाव ईश्वरसाक्षिणि तस्य क्षणस्य सादित्वे तद्विशिष्टस्येश्वरस्यापि सादित्वमिति शङ्कते—नन्विति।

३. वस्तुतस्त्विदमेव रम्यं तच्च प्रत्यक्षं पुनर्द्विविधमिति प्रकृतानुसारात् तत्र जीवसाक्षीति पदस्य जीवसाक्षिण्यपरत्वौचित्यं दर्शितमधस्तादस्माभिः। उत्तरग्रन्थविरोधविभीषिकाऽपि धूलिप्रक्षेपरूपेवेत्यपि दर्शितम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र ज्ञप्तिगतप्रत्यक्षत्वस्य सामान्यलक्षणं चित्त्वमेव[1]। पर्वतो वह्निमानित्यादावपि वह्न्याद्याकारवृत्त्युपहितचैतन्यस्य स्वात्मांशे स्वप्रकाशतया प्रत्यक्षत्वात्। तत्तद्विषयांशप्रत्यक्षत्वं तु पूर्वोक्तमेव। तस्य च भ्रान्तिरूपप्रत्यक्षे नातिव्याप्तिः, भ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचनेन तस्यापि लक्ष्यत्वात्। यदा तु प्रत्यक्षप्रमाया एव लक्षणं वक्तव्यं तदा[2] पूर्वोक्तलक्षणेऽबाधितत्वं विषयविशेषणं देयम्। शुक्तिरूप्यादिभ्रमस्य संसारकालीनबाधविषयप्रातिभसिकरजतादिविषयकत्वेनोक्तलक्षणाभावान्नातिव्याप्तिः॥ २६॥

वहाँ पर (प्रत्यक्षद्वय के बीच में) ज्ञानगत प्रत्यक्षत्व का सामान्य लक्षण चैतन्य ही है। 'पर्वतो वह्निमान्' इत्यादि अनुमिति ज्ञान में भी वह्नि के आकार वाली अन्तःकरण की वृत्ति से उपहित चैतन्य अपने अंश में स्वप्रकाश होने के कारण प्रत्यक्ष ही है। उस-उस विषय में प्रत्यक्षत्व पहले कह आये हैं। इसलिए भ्रान्तिरूप प्रत्यक्षत्व में अतिव्याप्ति नहीं है, क्योंकि यहाँ पर भ्रम तथा प्रमा दोनों ही प्रत्यक्षत्व का सामान्यरूप से निर्वचन होने के कारण भ्रान्तिरूप प्रत्यक्ष भी लक्ष्य ही है।

जिस समय प्रत्यक्ष प्रमा मात्र का लक्षण करना इष्ट हो तो पूर्वोक्त लक्षण में अबाधितत्व विषय में विशेषण दे देना चाहिए। शुक्ति-रजत आदि भ्रम का विषय संसार-काल में ही बाधित हो जाता है, इसलिए उक्त भ्रमज्ञान प्रातिभासिक रजत को विषय करने वाला होने के कारण उक्त (प्रमा के) लक्षण की (शुक्ति-रजत भ्रम में) अतिव्याप्ति नहीं हुई॥ २६॥

चित्त्वमेवेत्युत्तरग्रन्थविरोधात्। कञ्चिद्विशेषमभिधातुं वृत्तमनुवदति-**प्रत्यक्षत्वमिति।**

तत्र – ज्ञेयगतज्ञप्तिगतप्रत्यक्षत्वयोर्मध्ये। नन्वनुमित्यादावतिव्याप्तिरित्याशङ्क्य सर्वत्रापि तत्तदाकारवृत्त्युपहितचैतन्यस्य स्वात्मांशे प्रत्यक्षत्वेन सर्वस्यापि ज्ञानस्य लक्ष्यत्वान्नातिव्याप्तिरित्याह–**पर्वत इति**। 'यत्साक्षादपरोक्षाद् ब्रह्म' (बृ० ३-४-१)-

---

१. चित्त्वं–स्वप्रकाशत्वम्। न चास्य लक्षणस्य भ्रमेऽतिव्याप्तिः, भ्रमज्ञानस्यापि स्वांशे (ज्ञानांशे) प्रत्यक्षतया सामान्यलक्षणस्य लक्ष्यत्वात्। विशेषलक्षणस्याति व्याप्तिनिरासस्तु मूलकृतैव अबाधितविशेषणोपादेन करिष्य इति।

२. खपुस्तके पूर्वोक्तमबाधितत्वमिति पाठः, स चायुक्तः अबाधितविशेषणस्य पूर्वमनुक्तत्वात्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु [1]विसंवादिप्रवृत्त्या भ्रान्तिज्ञानसिद्धावपि तस्य प्रातिभासिक-तत्कालोत्पन्नरजतादिविषयत्वे न प्रमाणम्, देशान्तरीयरजतस्य कल्पितस्यैव तद्विषयत्वसम्भवादिति चेत्, न।

शङ्का—(जहाँ रजत बुद्धि से व्यक्ति की शुक्तिरजत में प्रवृत्ति होती है, पर रजत न मिलने से वह प्रवृत्ति विफल हो जाती है।) इस विफल प्रवृत्ति से शुक्ति-रजत का ज्ञान भ्रान्ति रूप सिद्ध होता है। किन्तु उस भ्रान्ति ज्ञान का विषय प्रातिभासिक तत्काल उत्पन्न (अनिर्वचनीय) रजत है, इसमें कोई प्रमाण नहीं है, इसलिए इस भ्रान्तिज्ञान का विषय देशान्तरीय (विपणस्थ) रजत जो सिद्ध है, वही सम्भव है तो फिर अनिर्वचनीय-रजत भ्रमज्ञान का विषय क्यों मानना ?

इत्यादिश्रुत्या चित्त्वस्यैव प्रत्यक्षत्वाभिधानाच्चिद्रूपस्य ज्ञानस्य स्वात्मांशे स्वप्रकाशतया सर्वस्यापि ज्ञानस्य प्रत्यक्षत्वादित्यर्थः। नन्वनुमित्यादौ प्रत्यक्षत्वव्यवहारः कुतो नास्तीत्याशङ्क्य तत्तद्विषयांशनिरूपितप्रत्यक्षत्वप्रयोजकस्य पूर्वोक्तस्याभावादित्याशये-नाह—**तत्तदिति**। ननु योग्यविषयस्य स्वगोचरवृत्युपहितप्रमातृचैतन्यसत्ताऽतिरिक्त-सत्ताशून्यस्य[2] शुक्तिरूप्यादिज्ञानेऽतिव्याप्तिरित्याशङ्क्याह—**तस्येति**। प्रत्यक्ष-प्रमाणनिरूपणे भ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचनमनुपपन्नं मत्वाऽऽह-**यदेति**। प्रत्यक्षप्रमाया-ज्ञेयगतस्य यथार्थप्रत्यक्षस्येत्यर्थः। नन्वबाधितत्वं पारमार्थिकत्वम् ? उत सत्त्वमात्रम् ? नाद्यः घटादिज्ञानेऽव्याप्तेः[3]। न द्वितीयः, शुक्तिरूप्यादिज्ञानेऽतिव्याप्ते-स्तादवस्थ्यादित्याशङ्क्य संसारदशायामबाधितत्वं विवक्षितमित्याह-**शुक्तीति**। भ्रमस्य —भ्रान्तिज्ञानस्य। प्रातिभासिकत्वं प्रतीतिकालमात्रवृत्तित्वमनिर्वचनीयत्वमिति[4] यावत्। तथा च तदानीमनिर्वचनीयं रजताद्युत्पद्यते तस्य शुक्तिज्ञानबाध्यत्वात् तज्ज्ञा-नस्य बाधितविषयकत्वमिति भावः।

इदमसहमानोऽन्यथाख्यातिवादी शङ्कते—**नन्विति**। यद्यपि विसंवादिप्रवृत्त्या

---

१. विफला प्रवृत्तिर्विसंवादिनी यथा तोयबुद्ध्या मरीचिषु प्रवृत्तस्य पिपासोः। सफला प्रवृत्तिः संवादिनी यथा गाङ्गे जले पिपासोरिति।

२. शुक्तिरूप्यादेर्ज्ञाने इति पाठो गपुस्तके। अस्मिन् पाठे स्वगोचरेत्यादिशुक्ति-रूप्यादेर्विशेषणम्। तथा च तत्र 'पूर्वोक्तलक्षणस्य' इति शेषः पूरणीयः। पूर्वोक्त लक्षणस्य अतिव्याप्तिरित्यर्थः।

३. वेदान्तमते घटादीनामपि बाधितत्वात्।

४. अनिर्वचनीयत्वमिति गपुस्तके नास्ति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्यासन्निकृष्टतया प्रत्यक्षविषयत्वायोगात्। न च ज्ञानं तत्र प्रत्यासत्तिः, ज्ञानस्य प्रत्यासत्तित्वे तत एव वह्न्यादेः प्रत्यक्षत्वापत्तावनुमानाद्युच्छेदापत्तेः ॥ २७ ॥

समाधान--(देशान्तरीय रजत के सहित इन्द्रिय-सन्निकर्ष न होने से वह असन्निकृष्ट है) इसलिए वह (आपणस्थ रजत) असन्निकृष्ट होने से उसका प्रत्यक्ष होना सम्भव नहीं है (क्योंकि इन्द्रियसन्निकर्ष रूप प्रत्यक्ष ज्ञान की सामग्री वहाँ है नहीं)। वहाँ ज्ञानरूप प्रत्यासत्ति भी नहीं मान सकते, क्योंकि उसी ज्ञानरूप प्रत्यासत्ति में 'पर्वतो वह्निमान्' इस स्थल पर 'वह्नि' आदि का भी प्रत्यक्ष मानना पड़ेगा, इससे अनुमान आदि प्रमाणों का उच्छेद होने लगेगा ॥ २७ ॥

भ्रान्तिज्ञानं सिध्यति, तस्य च विषयं विनाऽनुपपत्तिस्तद्विषयं साधयति, तथाऽपि स विषयः प्रातिभासिकस्तत्कालोत्पन्न इत्यत्र नास्ति प्रमाणमित्याह—**विसंवादीति**। यद्विषयकप्रवृत्तिस्तस्य लाभे तस्याः संवादित्वमलाभे तु विसंवादित्वं, तच्च भ्रान्तिजन्यप्रवृत्तेरित्यर्थः। ननु विषयान्तरानुपपत्तिस्तत्र प्रमाणमित्याशङ्क्याह—**देशान्तरीयेति**। असन्निकृष्टदेशान्तरीयं वस्तु न प्रत्यक्षविषयत्वयोग्यमिति दूषयति—**नेति**। असन्निकृष्टस्य भ्रमे भानं नोपपद्यते प्रत्यक्षसामग्र्याः सन्निकर्षघटितत्वेन तद्रहितस्य प्रत्यक्षविषयत्वायोगादिति भावः। नन्वस्तु अलौकिकः सन्निकर्ष इत्याशङ्क्य स च किं सामान्यात्मकः किं वा ज्ञानरूप इति विकल्प्य नाद्यः। तत्र प्रमाणाभावात्[1]। सन्निकृष्टधूमादिकमेव प्रत्यक्षविषयीभूतं न तु तन्मात्रं येन सामान्यं प्रत्यासत्तिरिति कल्पना स्यादिति प्रथमपक्षपरिहारं मनसि निधाय द्वितीयं पक्षं परिहरति—**न चेति**। **तत्र**—भ्रान्तिप्रत्यक्षविषये। ज्ञेयेन रजतादिना ज्ञानमेव सन्निकर्ष इति, न च प्रमाणाभावादिति भावः। विपक्षे बाधकं हेतुमाह—**ज्ञानस्येति**। **तत एव**—ज्ञानलक्षणप्रत्यासत्तेरेव। अलौकिकाऽपि प्रत्यक्षसामग्री अनुमितिसामग्रीतो बलवती, लाघवादिति भावः।

---

१. तत्र प्रमाणाभावादिति। अयमाशयः—महानसे वह्निधूमयोर्व्याप्तिग्रहसमये धूमत्वेन वह्नित्वेन च सकलधूमवह्निव्यक्तीनामुपस्थितिर्जायते, सत्याञ्चोपस्थितौ सकलधूमवह्निव्यक्तीनां व्याप्यव्यापकभावो गृह्यते नो चेन्महानसीयधूमवह्निव्याप्त्या पर्वते धूमदर्शनानन्तरमनुमितिर्न स्यात्, अतो व्याप्तिग्रहसमये सकलव्यक्त्युपस्थितये सामान्यलक्षणा स्वीकार्येति तार्किकाः। अत्र वदामः—धूमत्वेन वह्नित्वेन च सकल-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु रजतोत्पादकानां रजतावयवानामभावे शुक्तौ कथं तवापि रजतमुत्पद्यते इति चेत्। उच्यते—

शङ्का—भ्रमज्ञान स्थल पर प्रातिभासिक रजत की उत्पत्ति मानने वाले आप (वेदान्तियों के) मत में रजत के उत्पादक रजतावयव के अभाव में शुक्ति में रजत कैसे उत्पन्न होता है, (क्योंकि अवयव के बिना अवयवी का उत्पन्न सम्भव नहीं)।

नन्वेवं तर्हि अपूर्वरजतोत्पत्तिपक्षोऽप्यसङ्गतो रजतोपादानलौकिकतदवयवाभावात्। अलौकिकानां तेषां तदुपादानत्वे प्रमाणाभावादिति शङ्कते—**नन्विति**। अन्यथा उपपत्त्यभावात्पारिशेष्याद्रजतोत्पत्त्यङ्गीकारस्यावश्यकत्वात्तदनुकूला तत्सामग्री कल्पनीयेति समाधानं प्रतिजानीते—**उच्यते इति**। लौकिकोपादानाभावाद् रजतोत्पत्तिर्न सम्भवतीति न साम्प्रतम्, उपादानोपादेययोः सादृश्यावश्यम्भावाद-

---

धूमवह्न्यनुपस्थितिश्चेत् सामान्यलक्षणया स्यात् सर्वेषां सर्वज्ञत्वमयत्नलब्धम्। तथा हि, सामान्यलक्षणा नाम प्रत्यासत्तिः सन्निकर्षविशेषः, स चेदसन्निहितविषयेऽपि भवति अथ च भूतभाविवर्त्तमानयावदव्यक्त्या आत्मानं संयुनक्ति किमवशिष्टमसार्वज्ञ्यप्रयोजकमिति। तथा चेश्वरोऽसीति दृष्टविरुद्धमपि कल्पय। कस्ते निवारकः स्यात्। अस्माभिस्तु सन्निहितधूमादिसंयुक्तस्य चक्षुषः अतीतानागतासन्निहितवर्तमानविषयसमर्पणे सामर्थ्यन्नोपलब्धम्। दृष्टिविरुद्धं तत्कल्पयतस्ते साहसविजृम्भितमेतत्। कथं तर्हि वेदान्तनये महानसीयधूमवह्निव्याप्त्या पर्वते तदनुमानमिति। शृणु समाहितः सन्। व्याप्तिग्रहकाले महानसे महानसीयधूमवह्न्योः गोष्ठे गोष्ठीययोश्च तयोरेव व्याप्यव्यापकभावो गृह्यते, गृहीते च पृथक्पृथग् व्याप्यव्यापकभावे सामान्यतो धूमवह्निविषयं तमनुमिनोति। यथा धूमो वह्निव्याप्यः महानसादिषु तथोपलम्भात् पृथिवीव्याप्यगन्धवत् इति। ननु महानसादिवृत्तिप्रत्यक्षधूमे वह्निसम्बन्धस्य गृहीतत्वात् देशान्तरीयकालान्तरीयस्यानुपस्थितत्वाच्च धूमो वह्निव्याप्यो न वेति संशयो न स्यात्, सामान्यलक्षणया च सकलव्यक्त्युपस्थितौ देशान्तरीयादिषु वह्निनिरूपितव्याप्तिसन्देहो भविष्यतीति चेन्न। समानप्रकारनिश्चयस्यैव संशयविरोधित्वात्। धूमो वह्निव्याप्यो न वेत्याकारकसंशयस्य वह्निव्याप्यो धूम इति निश्चय एव विरोधी। अत्र सामान्यलक्षणाऽस्वीकारेण महानसादौ तत्तद्धूमत्वेन सामानाधिकरण्यनिश्चये सत्यपि सामान्यतो धूमत्वेन निश्चयाभावान्न संशयानुपपत्तिरिति संक्षेपः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

न हि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका, किन्तु विलक्षणैव। तथा हि काचकामलादिदोषदूषितलोचनस्य पुरोवर्तिद्रव्य-संयोगादिदमाकारा चाकचिक्याकारा काचिदन्तःकरणवृत्तिरुदेति तस्यां च वृत्ताविदमवच्छिन्नं चैतन्यं प्रतिबिम्बते। तत्र पूर्वोक्तरीत्या वृत्तेर्निर्गमने-नेदमवच्छिन्नं चैतन्यं वृत्त्यवच्छिन्नं चैतन्यं प्रमातृचैतन्यं चाभिन्नं भवति। ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽ-विद्या[1] चाकचिक्यादिसादृश्यसन्दर्शनसमुद्बोधितरजतसंस्कारसहकृता काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च[2] परिणमते ॥ २८ ॥

समाधान—प्रातिभासिक रजत की उत्पत्ति में लोकसिद्ध सामग्री कारण नहीं है, परन्तु (इसका कारण) कुछ विलक्षण ही है, जैसे कि—काचकामलादि दोष से दूषित नेत्र का पुरोवर्ति द्रव्य के साथ संयोग होते ही इदमाकार तथा चाकचिक्याकार कोई अन्तःकरण की वृत्ति उत्पन्न होती है। उसी वृत्ति में इदमांश से अवच्छिन्न चैतन्य का प्रतिबिम्ब पड़ता है। पूर्वोक्त रीति (तडागोदक रीति) से वृत्ति बाहर निकली है। अतएव इदमावच्छिन्न चैतन्य, इदमाकार-वृत्त्यवच्छिन्न चैतन्य तथा प्रमातृचैतन्य का अभेद हो गया। इसके अनन्तर प्रमातृचैतन्य से अभिन्न जो विषयचैतन्य, उसमें रहने वाली शुक्तित्वप्रकारिका अविद्या चाक-चिक्यादि सादृश्य संदर्शन से उद्बुद्ध रजत के संस्कार से सहकृत है, काचादि दोष-युक्त है, अतः वही अविद्या रजत रूप से, तथा रजत ज्ञानाभासरूप से परिणत हो जाती है ॥ २८ ॥

लौकिकरजतोत्पादने न लौकिकसामग्यपेक्षेत्याह—न हीति। तद्व्यतिरिक्तसामग्य-भावात्पृच्छति—किन्त्विति। यथा प्रातिभासिकं रजतं लौकिकरजतविलक्षणं

---

१. वियदाद्युपादानाविद्यातो वैलक्षण्यं द्योतयितुं विषयचैतन्यनिष्ठा शुक्तित्व-प्रकारिकेति विशेषणद्वयम्। वियदाद्युपादानमूलाविद्या तु चिन्मात्राश्रिता चिन्मात्र-विषया निर्विकल्पकज्ञाननिर्वर्त्या च, इयन्तु तूलाविद्या शुक्त्यवच्छिन्नचैतन्याश्रितर-जतभिन्ना या शुक्तिस्तन्निष्ठं यच्छुक्तित्वं तत्प्रकारिका सविकल्पकज्ञाननिर्वर्त्या चेति वैलक्षण्यम्।

२. अविद्या प्रातिभासिकरजताकारेण—तज्ज्ञानाकारेण—रजताकारवृत्तिरूपेण च

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

'परिणामो नाम उपादानसमसत्ताककार्यापत्तिः। विवर्तो नाम उपा-

तथा तदुत्पादिका सामग्र्यपि लोकप्रसिद्धसामग्रीतो विलक्षणेवेत्युत्तरमाह—**विलक्षणेति**। तर्हि तत्स्वरूपं वक्तव्यमित्यपेक्षायां प्रतिज्ञातमर्थमुपपादयति—**तथा हीति**। **तत्र**—चैतन्ये प्रतिबिम्बिते सति। **पूर्वोक्तरीत्या**—ताडागोदकमित्याद्युक्तरीत्या। **ततश्च**—त्रिविधचैतन्याभेदसम्पत्यनन्तरञ्च। **अविद्या**—रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमत इत्यन्वयः। ननु अविद्याया एवाकाशादिप्रपञ्चोपादानत्वाभ्युपगमात्प्रतिज्ञाहानिरित्याशङ्क्यानिरासाय प्रमातृचैतन्येत्यादिविशेषणद्वयम्। ननु यथोक्ताविद्या सर्वदा यथोक्ताकारेण कुतो न परिणमत इति चेत्, निमित्तकारणविरहादित्यभिप्रेत्य निमित्तकारणमाह—**रजतसंस्कारेति**। यद्यपि संस्कारोऽपि सर्वदा वर्त्तते, तथाऽप्युद्बोधितस्य निमित्ततेत्यभिप्रेत्योक्तम्—**चाकचिक्यादीति**। चाकचिक्यादेः सादृश्यस्य सन्दर्शनेन समुद्बोधितो रजतसंस्कारस्तल्लक्षणया सामग्र्या सहकृता। ननु चाकचिक्यादिसादृश्यसन्दर्शने नीलपृष्ठत्रिकोणताऽदर्शने च किं निमित्तमित्यपेक्षायामाह—**काचादीति**।

नेत्रनिष्ठकाचादिदोषसंयुक्ता परिणमत इत्युक्तम्, तत्र किंलक्षणः परिणाम इत्यपेक्षायां तल्लक्षणमाह—**परिणाम इति**। यदभिन्नं कार्यमुत्पद्यते तदुपादान-

---

परिणमते इत्यर्थः। वृत्तेरेव ज्ञानशब्दवाच्यत्वादिति भावः। अविद्यायाः वृत्याकारपरिणामप्रयोजकस्तु, इन्द्रियाणामनिर्वचनीयरजतेन सन्निकर्षाभावात् करणासहकृतेन साक्षिणा तत्प्रकाशकत्वायोगात् तद्भ्रानासम्भवो यतः अतः साक्षिणा प्रातिभासिकस्य भासनाय—साक्षिसम्बन्ध एवेति बोध्यम्।

१. यादृशी सत्ता उपादानस्य तादृक्सत्ताककार्यापत्तिः परिणाम इत्यर्थः। यथा व्यावहारिकसत्ताकानां तन्तूनां व्यावहारिकसत्ताकपटभावापत्तिः सा परिणामपदवाच्या। पारमार्थिकसत्ताकस्य ब्रह्मण उपादानरूपस्य सत्तायाः विषमा—व्यावहारिकी वियदादेः, प्रातिभासिकी शुक्तिरजतादेः—सत्ता येषान्तानि उपादानविषमसत्ताकानि, तानि च कार्याणि चेति तेषामापत्तिस्तथा। तथा च ब्रह्मणो वियदादिप्रपञ्चस्य विवर्तोपादानत्वं निमित्तत्वञ्चेति 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' ब्र० सु० १–४–२३ इति न्यायात्। परिणाम्युपादानन्तु मायैव, सा च क्वचित्तुला क्वचिन्मूलेत्यन्यदेतत्।

Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

दानविषमसत्ताककार्यापत्तिः। प्रातिभासिकरजतं चाविद्यापेक्षया परिणामः चैतन्यापेक्षया विवर्त इति चोच्यते।[1] अविद्यापरिणामरूपं च तद्रजतमविद्याधिष्ठाने इदमवच्छिन्नचैतन्ये वर्तते। अस्मन्मते सर्वस्यापि कार्यस्य स्वोपादानाविद्याधिष्ठानाश्रितत्वनियमात्॥ २९॥

परिणाम एवं विवर्त्त का निरूपण—

उपादान के समान सत्ता वाले कार्य को परिणाम कहते हैं तथा उपादान के विषम सत्ता वाले कार्य को विवर्त्त कहते हैं। प्रातिभासिक रजत अविद्या की अपेक्षा से परिणाम है और चैतन्य की अपेक्षा से विवर्त्त कहा जाता है। क्योंकि अविद्या का परिणामरूप रजत अविद्या के अधिष्ठान इदमवच्छिन्न चैतन्य में वर्तमान है। कारण हमारे (वेदान्तियों के) मत में सभी कार्यों का उपादान कारण अविद्या है और वे अपने उपादान कारण अविद्या के अधिष्ठान में आश्रित है—यह नियम है॥ २९॥

कारणम्। तेन समा सत्ता यस्य कार्यस्य तथा, भूतकार्यस्यापत्तिः यथोक्तकार्याकारेणोद्भवः, यथा व्यावहारिकसत्ताकदुग्धे तत्समसत्ताकदधिरूपकार्यापत्तिरित्यर्थः। विवर्तेऽतिव्याप्तिवारणाय **समसत्ताकेति**। समसत्ताकपदव्यावर्त्यत्वाद् वक्ष्यमाणोपयुक्तत्वाच्च। विवर्तं लक्षयति—**विवर्तो नामेति**। उपादानाद्विषमः सत्ता यस्य कार्यस्य तदापत्तिः। परिणामेऽतिव्याप्तिनिरासाय **विषमसत्ताकेत्युक्तम्**। प्रातिभासिकरजतादेः परिणामत्वं विवर्तत्वं चास्तीत्याह—**प्रातिभासिकेति**। नन्वविद्यापरिणामस्य रजतस्याविद्यायां तादात्म्यसम्बन्धेन वर्तमानस्य चैतन्ये तत्सम्बन्धेनावर्तमानत्वाच्चैतन्योपादानकत्वासम्भवात् कथमुक्तविवर्तता[2] रजतस्य? इत्याशङ्क्य अविद्यापरिणामस्य तदधिष्ठानाश्रितत्वनियमान्नोक्तदोष इत्याह—**अविद्येति**।

---

१. यथा तन्तुपरिणामस्य पटस्य तन्तुदेशत्वम्, तथा अविद्यापरिणामस्य शुक्तिरूप्यस्यापि अविद्यादेशत्वम्। अविद्या च चैतन्यनिष्ठा, तथा च शुक्तिरूप्यस्यापि चैतन्यनिष्ठत्वमुचितमिति भावः।

२. कथमुक्ता चैतन्यविवर्तता रजतस्य इति पाठेन भाव्यम्। अथवा अस्यैव समासवृत्त्या उक्तस्य—चैतन्यस्य विवर्तता उक्तविवर्तता सा कथमित्येकोऽर्थः कार्यः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

'ननु चैतन्यनिष्ठस्य रजतस्य कथमिदं रजतमिति पुरोवर्तितादात्म्यम् ? उच्यते । यथा न्यायमते आत्मनिष्ठस्य सुखादेः शरीरनिष्ठत्वेनोपालम्भः शरीरस्य सुखाद्यधिकरणतावच्छेदकत्वात्, तथा चैतन्यमात्रस्य रजतं प्रत्यधिष्ठानतया इदमवच्छिन्नचैतन्यस्य तदधिष्ठानत्वेन इदमोऽवच्छेदकतया रजतस्य पुरोवर्तिसंसर्गप्रत्यय उपपद्यते ।

तस्य च विषयचैतन्यस्य तदन्तःकरणोपहितचैतन्याभिन्नतया विषयचैतन्याध्यस्तमपि रजतं साक्षिण्यध्यस्तं केवलसाक्षिवेद्यं सुखादिवदनन्यवेद्यमिति चोच्यते ॥ ३० ॥

शङ्का—चैतन्यनिष्ठ रजत का 'यह रजत है' इस प्रकार पुरोवर्त्ति वस्तु के साथ तादात्म्य कैसे दीखता है ?

समाधान—कहते हैं, कि जिस प्रकार न्याय-मत में आत्मा में रहते हुए भी सुख-दुःखादि की उपलब्धि शरीर में होती है, क्योंकि सुखादि की अधिकरणता का अवच्छेदक शरीर है । उसी प्रकार ही शुद्ध चैतन्य मात्र को तो रजत का अधिष्ठान हम मानते नहीं, किन्तु इदमवच्छिन्न चैतन्य हम मानते हैं। चैतन्यनिष्ठ रजत की अधिष्ठानता का अवच्छेदक इदं होने के नाते अवच्छेदक के पुरोवर्त्तित्व धर्म का सम्बन्ध (इदमवच्छिन्न) चैतन्यनिष्ठ कल्पित रजत में दीखता है । वहाँ पर विषयचैतन्य का अन्तःकरणोपहित चैतन्य से अभिन्न होने के नाते विषयचैतन्य में कल्पित रजत भी साक्षी में अध्यस्त माना गया है । केवल साक्षिवेद्य तथा सुखादि के समान अनन्यवेद्य भी कहा गया है ॥ ३० ॥

नन्वेवं तर्हि पुरोवर्तितादात्म्यप्रत्ययानुपपत्तिरिति शङ्कते—**नन्विति** । अविद्यापरिणामस्याविद्याधिष्ठानाश्रितत्ववच्चैतन्याध्यस्तस्य रजतादेः तदवच्छेदकपुरोवर्तितादात्म्यप्रत्ययोपपत्तिरित्याशयेन **समाधत्ते—उच्यत इति** । ब्राह्मणोऽहं सुखी मम देहः सुखीत्येवं शरीरनिष्ठत्वेन देहस्यात्मनि सुखाद्युपलब्ध्यवच्छेदकत्ववदिदमश्चैतन्ये रजताध्यासस्यावच्छेदकत्वादुक्तप्रत्यय उपपद्यत इत्याह—**तथा चैतन्येति** ।

नन्विदमवच्छिन्नचैतन्याध्यस्तरजतादेः साक्षिण्यनध्यस्ततया तस्य केवलसाक्षि-

---

१. ननु अग्रे भूतलस्थतन्तुषु विद्यमानस्य पटस्य प्रत्यक्षकाले इहेदानीं पट इत्याकारो यथा तथा चैतन्यनिष्ठाविद्यायां वर्तमानस्य शुक्तिरूप्यस्य चैतन्ये रजतम् इति प्रत्ययो भविष्यति, भवति तु इह रजतमिथ्याशङ्कते—नन्विति । सर्वव्यापिनः चैतन्यस्य । इहेति प्रादेशिकत्वन्न युक्तमिथ्याशयः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु साक्षिण्यध्यस्तत्वेऽहं रजतमिति प्रत्ययः स्यात्, अहं सुखीतिवदिति चेत्। उच्यते। न हि सुखादीनामन्तःकरणावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वप्रयुक्तम् अहं सुखीति ज्ञानम्। सुखादीनां घटादिवच्छुद्धचैतन्य एवाध्यासात्, किन्तु यस्य यदाकारानुभवाहितसंस्कारसहकृताविद्याकार्यत्वं तस्य तदाकारानुभवविषयत्वमित्येवानुगतं नियामकम्।

शङ्का—साक्षिचैतन्य में रजत का अध्यस्त मानने पर (साक्षी चैतन्य में सुख-दुःखादि कल्पित होने के नाते जैसे कि) 'मैं सुखी हूँ' इस प्रतीति के समान 'मैं रजत हूँ' ऐसी प्रतीति होनी चाहिए।

समाधान—सुख-दुःखादि अन्तःकरणावच्छिन्न चैतन्य के आश्रित अविद्या का कार्य होने से 'मैं सुखी हूँ' ऐसा ज्ञान होता है, ऐसी बात नहीं है, क्योंकि सुखादि भी घटादि के समान शुद्ध चैतन्य में अध्यस्त है, किन्तु जिस वस्तु में आकार का अनुभव पहले हुआ हो, उस अनुभव का संस्कार अन्तःकरण में पड़ा हुआ है, पुनः उस संस्कार से सहकृत अविद्या-कार्यत्व उस वस्तु में है। अतः तदाकार अनुभव-विषयत्व भी उसमें है। यही सर्वत्र अनुगत प्रतीति का विषय समझना चाहिए।

वेद्यता। सुखादेरिवानन्यवेद्यता च[1] साम्प्रदायिकैरुच्यमाना कथमुपपद्यत इत्याशङ्क्याह—**तस्य चेति**।

ननु सुखादीनामवच्छेदकशरीरनिष्ठत्वेनोपलम्भो न सर्वदा, अहं सुखीत्यात्मनिष्ठत्वेनाप्युपलम्भदर्शनात्। तथा रजतादेरप्यन्तःसाक्षिण्यध्यस्त्वाभ्युपगमादहं मनुष्य इतिवदहं रजतम्, अहं सुखीतिवदहं रजतवान् इत्येवं वा प्रत्ययः कदापि कुतो न भवति इत्याशङ्क्ते—**नन्विति**। न हि यत्र[2] यदध्यासस्तस्य तन्निष्ठाविद्याकार्यत्वप्रयुक्तं तन्निष्ठतयैव भानमिति नियमः सम्भवति, सुखादेर्घटादिवत् शुद्धचैतन्यध्यस्तत्वेऽप्यहं सुखीति प्रत्ययदर्शनाद् इत्याशयेन समाधत्ते—**उच्यत इति**। तर्हि घटादेः सुखादेः शुक्तिरूप्यादेश्च तत्तत्प्रतीतिविषयत्वे पृथक्-पृथक् नियामकमुतैकमिति पृच्छति—**किन्त्विति**। नाना नियामकाभ्युपगमे गौरवादनुगतं नियामकस्वीकार उचित इत्युत्तरमाह—**यस्येति**।

---

१. पञ्चपादिकाचार्यैः।

२. यदज्ञानाध्यास इति पाठो गपुस्तके।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा च इदमाकारानुभवाहितसंस्कारसहकृताविद्याकार्यत्वात् घटादेरिदमाकारानुभवविषयत्वम्। अहमाकारानुभवाहितसंस्कारसहिताविद्याकार्यत्वादन्तःकरणादेरहमाकारानुभवविषयत्वम्। शरीरेन्द्रियादेरुभयविधानुभवसंस्कारसहिताविद्याकार्यत्वादुभयविधानुभवविषयत्वम्। तथा चोभयविधोऽनुभवः इदं शरीरमहं देहोऽहं मनुष्योऽहं ब्राह्मण इदं चक्षुरहं काण इदं श्रोत्रमहं बधिर इति ॥

प्रकृते च प्रातिभासिकरजतस्य प्रमातृचैतन्याभिन्नेदमंशावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वेऽपि इदं रजतमिति सत्यस्थलीयेदमंशाकारानुभवाहितसंस्कारजन्यत्वादिदमाकारानुभवविषयता, न त्वहं रजतमित्यहमाकारानुभवविषयतेत्यनुसन्धेयम् ॥ ३१ ॥

(अनादि काल से ही) इदमाकार अनुभव से उत्पन्न संस्कार सहकृत अविद्या का कार्य घट होने के नाते इदमाकार अनुभव-विषयत्व घट में है। (इसी प्रकार) अन्तःकरण में अहमाकार अनुभव-विषयत्व का नियामक (अनादि काल से) 'अहं अहं' इस प्रकार अनुभव से उत्पन्न संस्कार के साथ अविद्या-कार्यत्व है। इसलिए (आज भी) उसमें अहमाकार अनुभव-विषयत्व है। शरीर और इन्द्रियों का दोनों प्रकार से अनुभव होता रहा है, अतएव दोनों प्रकार के अनुभव-जनित संस्कार से सहकृत अविद्या कार्य होने के नाते आज भी दोनों प्रकार के अनुभव-विषयत्व शरीर और इन्द्रियों में हैं। इसलिए यह शरीर है, मैं देह हूँ, मैं मनुष्य हूँ मैं ब्राह्मण हूँ. यह आँख है, यह कर्ण है, मैं काना हूँ, मैं बहिरा हूँ, इस प्रकार दोनों प्रकार से शरीर-इन्द्रियों में अनुभव-विषयत्व है।

प्रकृत स्थल में प्रातिभासिक रजत प्रमातृचैतन्य के साथ अभिन्नता प्राप्त-इदमंशावच्छिन्न चैतन्यनिष्ठ अविद्या का कार्य होने पर भी सदा से सत्य रजत का 'यह रजत है' इदमाकार अनुभवजनित संस्कार अविद्या का सहकारी होने से आज भी रजत में इदमाकार अनुभवविषयता है। 'अहं रजतम्' इस प्रकार अहमाकार अनुभवविषयता नहीं है। इस प्रकार समझना चाहिए ॥ ३१ ॥

उक्तनियामकं सर्वत्र योजयति—**तथा चेति**। निरुक्तानुगतनियामके सति अयं घटः, अहम्, इतीदमाकारानुभवस्याहमाकारानुभवस्य च स्पष्टत्वमभिप्रेत्योभयविधाकारानुभवमावेदयति—**तथा चेति**। यस्योभयविधानुभवस्य विषयत्वं देहेन्द्रियादेः स चोभयविधोऽनुभव एवमित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

नन्वेवमपि मिथ्यारजतस्य साक्षात्साक्षिसम्बन्धितया भानसम्भवे रजतगोचरज्ञानाभासरूपाया अविद्यावृत्तेरभ्युपगमः किमर्थः ? इति चेत् । न[1] । स्वगोचरवृत्त्युपहितचैतन्यभिन्नसत्ताकत्वाभावस्य विषयापरोक्ष-रूपतया रजतस्यापरोक्षत्वसिद्धये तदभ्युपगमात् ॥

शङ्का—इस प्रकार यदि मिथ्या रजत साक्षी के साथ साक्षात् रूप से सम्बद्धित होने के नाते साक्षी से ही रजत का भान हो सकता है । फिर रजत को विषय करने वाली रजतविषयक ज्ञानाभासरूप अविद्या की वृत्ति मानने की क्या आवश्यकता है ?

समाधान—यह कथन उचित नहीं है, स्ववृत्त्युपहित प्रमातृचैतन्य सत्ता-तिरिक्त सत्ताहीनता ही विषयगत अपरोक्षत्व के व्यवहार का नियामक होने से भ्रमस्थल पर रजत का अपरोक्षत्व सिद्धि के लिए वह (अविद्यावृत्ति) स्वीकार किया जाता है ।

निरुक्तनियामकं प्रकृते योजयति—**प्रकृते चेति** । यद्यपि शुक्तिरूप्यादेः प्रमातृचैतन्याभिन्नेदमंशावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वमस्ति तथाऽपि तत्सहकारि-कारणम् इदं रजतमित्यादिसत्यरजतस्थलीयेदमाकारानुभवाहितसंस्कारः[2], अतः तस्येदमाकारानुभवविषयत्वं न त्वहमनुभवविषयत्वमिति भावः ।

नन्वस्तु शुक्तिरूप्यस्येदमाकारानुभवविषयत्वं तथाऽपि न तद्विषयाऽविद्यावृत्तिरा-श्रयणीया, तस्य[3] साक्षादनावृत्तसाक्षिसम्बन्धितयाऽपरोक्षभानसम्भवादिति स्वयूथ्यः[4] शङ्कते—**नन्वेवमपीति** । यद्यपि साक्ष्यध्यस्तरजतस्य साक्षिचैतन्याभिन्नसत्ताकत्व-मस्ति, तथाऽपि न तस्यापरोक्षत्वं सम्भवति साक्षिचैतन्यस्य रजतगोचरवृत्त्युपहितत्वा-भावात् तस्मात्तदपरोक्षतार्थमविद्यावृत्तेरावश्यकतेति समाधत्ते—**नेति** । **चैतन्यभिन्न-सत्ताकत्वाभावस्य**—चैतन्याभिन्नसत्ताकत्वस्य ।

---

१. शुक्तिरूप्यस्य ।

२. संस्कारः तत्सहकारिकारणमित्यन्वयः ।

३. गपुस्तके न इति पदं नास्ति । टीकाऽनुरोधादपि रक्ष्यमेव ।

४. कखपुस्तकयोः स्वयूथी इति पाठः, गपुस्तके स्वयूथ्यमिति पाठश्च । स्वयूथ्यः सिद्धान्त्येकदेशीत्यर्थः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नन्विदंवृत्ते[1] रजताकारवृत्तेश्च प्रत्येकमेकैकविषयत्वे गुरुमतवद् विशिष्टज्ञानानभ्युपगमे कुतो भ्रमज्ञानसिद्धिरिति चेत्। न[2]। वृत्तिद्वय-प्रतिबिम्बितचैतन्यस्यैकस्य सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेन[3] भ्रमत्वस्य स्वीकारात्। अत एव साक्षिज्ञानस्य सत्यासत्यविषयतया प्रामाण्यानियमाद् अप्रामाण्योक्तिः साम्प्रदायिकानाम्॥ ३२॥

शङ्का—इससे इदमाकार अन्तःकरणवृत्ति और रजताकार अविद्यावृत्ति, इस प्रकार प्रत्येक विषय में वृत्तिद्वय स्वीकार करने पर प्रभाकर मतानुसार भ्रमस्थल पर दो ज्ञान स्वीकार करने पड़े। इसलिए विशिष्ट ज्ञान स्वीकार किये विना भ्रम-ज्ञान की सिद्धि (वेदान्तसिद्धान्त में भी) कैसे हो सकती है?

समाधान—इदमाकार और रजताकार दोनों वृत्तियों में प्रतिबिम्बित चैतन्य एक ही है। वही सत्य शुक्ति के सामान्य अंश को तथा मिथ्याकल्पित रजत के तादात्म्य को प्रकाशित करता रहता है। इसलिए एक ज्ञान होने से उसमें भ्रमत्व स्वीकार किया गया है। इसलिए ही साक्षिज्ञान को सत्य और असत्य का विषय करने के कारण साम्प्रदायिकों ने उसे प्रामाण्य कोटि में नहीं गिना है॥ ३२॥

नन्वेवमेकं सन्धातुं प्रवृत्तस्यापर हीयत इति न्यायापातः, रजतापरोक्षतासिद्धयेऽविद्यावृत्त्यभ्युपगमे प्राभाकरमतवद्विशिष्टज्ञानानभ्युपगमप्रसङ्गेन रजतज्ञानस्य भ्रमत्व-हानात्। प्राभाकरमते हि इदं रजतमित्यत्र ज्ञानद्वयमङ्गीकृतम्। तत्रेदमिति पुरोवर्ति-विषयमनुभवात्मकं ज्ञानं रजतमित्यसन्निकृष्टरजतविषयं स्मरणात्मकम्, अतो वस्तु-द्वयतादात्म्यावगाहिविशिष्टज्ञानं क्वापि नास्तीति सर्वमपि ज्ञानं यथार्थमेवेति भ्रमज्ञाना-

---

१. इदमाकारा पुरोवर्तिविषयाऽन्तःकरणवृत्तिरेका प्रातिभासिकरजतविषयाऽविद्यावृत्तिरपरा। तथा च यथा व्यस्ताश्रयेषु पत्र–शुष्कपत्र–भ्रमर–जपाकुसुमेषु गृह्यमाणैर्हरित–पीत–नील–रक्तवर्णैर्न जात्वपि भ्रमरे चित्ररूपी भ्रमर इति विशिष्टबुद्धिः, तथैव इदं रजतमिति विशिष्टबुद्धिर्भिन्नविषयाभ्यां वृत्तिभ्यामेव भविष्यतीत्याक्षेप्तुर-भिप्रायः।

२. न इति पदं गपुस्तके नास्ति। टीकायाश्चास्त्येव।

३. ननु इदं रजतमित्यत्र वृत्तिद्वयं स्वीकृतं पूर्वग्रन्थे तत्रेदमाकाराऽन्तःकरणवृत्तिरेका तया च पुरोवर्ति वस्तु गृह्यते, इदमवच्छिन्नचैतन्यनिष्ठशुक्तित्वादिद्याया: परिणामरूपा

Nagarjun Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु सिद्धान्ते देशान्तरीयरजतमप्यविद्याकार्यमध्यस्तं चेति कथं शुक्तिरूप्यस्य ततो वैलक्षण्यमिति चेत्। न। त्वन्मते सत्यत्वाविशेषेऽपि

शङ्का—वेदान्त-सिद्धान्त में देशान्तरीय (व्यावहारिक) रजत भी अविद्या का कार्य एवं कल्पित है और (प्रातिभासिक) शुक्ति-रजत भी अविद्या का कार्य एवं कल्पित है, तो इन दोनों रजतों में विलक्षणता कैसे ?

सिद्धिः, तद्वद्भवन्मतेऽपि[1] वृत्तितद्विषयभेदाभ्युपगमे वस्तुद्वयतादात्म्यावगाह्येकज्ञानानभ्युपगमाद् भ्रमज्ञानं न सिध्यतीति स एव शङ्कते—**नन्विदमिति**। वृत्तिभेदेऽपि नास्ति ज्ञानभेदस्तयोरेकदेशस्थत्वेन तत्प्रतिबिम्बितचैतन्यस्यैकत्वान्मैवमित्याह—**नेति**। यत एकस्यैव साक्षिज्ञानस्य सत्यासत्यवस्तुविषयत्वमत एव तस्याप्रामाण्योक्तिः साम्प्रदायिकानां सङ्गता इत्याह—**अत एवेति**।

नन्वेवं महता प्रयासेन शुक्तिरूप्यस्याविद्याकार्यत्वाध्यस्तत्वसाधनं देशान्तरीयरजतादैलक्षण्यसिद्ध्यर्थम्[2] तच्च न संभवति, भवत्सिद्धान्ते देशान्तरीयरजतादेरपि तथात्वाभ्युपगमात्[3]। तथा चोपलभ्यमानवैलक्षण्ये को हेतुरिति नैयायिकः शङ्कते—**ननु सिद्धान्त इति**। त्वन्मते सत्यत्वविशेषेऽपि शब्दज्ञानेच्छादीनां क्षणिकत्वं घटादीनां स्थायित्वमिति वैलक्षण्ये यन्नियामकं तदेव ममाप्यस्त्विति परिहरति—**नेति**। कालान्तरोपलम्भानुपलम्भादिकमादिपदेन गृह्यते . तथा च पक्षद्वयेऽपि दोषपरिहारयोः

वृत्तिद्वितीया तथा च रजतं गृह्यत इति वृत्तिद्वयेन विषयद्वये गृहीते ज्ञानद्वयमेवेदं तथा च रजतमिदमित्येक ज्ञानं भ्रमात्मकमिति सिद्धान्तो भज्येत प्राभाकरमतप्रवेशश्च स्यादिति चेन्न। भिन्नविषयकवृत्त्योर्भेदेऽपि तयोः प्रतिबिम्बितस्य चैतन्यस्यैक्यात्। प्रत्यक्षस्थले सर्वत्र वृत्तिप्रमातृविषयावच्छिन्नचैतन्यानां पूर्वोक्तप्रणाड्या ऐक्यावश्यम्भावात् तस्य च प्रत्यक्षज्ञानस्य व्यावहारिकसत्येन पुरोवर्तिवस्तुना प्रातिभासिकेन रजतवस्तुना च तादात्म्यावगाहितया विशिष्टज्ञानत्वं भ्रमत्वं च सिद्धमिति।

१. तस्या वृत्तेर्विषयः तद्विषयः वृत्तिश्च तद्विषयश्च वृत्तितद्विषयौ तयोर्भेदाभ्युपगमः तस्मिन्। वृत्तिभेदो यथा एका इदमाकारा अपरा रजताकारा। विषयभेदो यथा अविद्यायाः पुरोवर्ति वस्तु विषयः अन्यस्या अविद्यापरिणामरूपं प्रातिभासिकं रजतमिति।

२. कृतमिति शेषः। ३. अविद्याकार्यत्वाध्यस्तत्वाभ्युपगमादित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केषाञ्चित्क्षणिकत्वं केषाञ्चित्स्थायित्वमित्यत्र यदेवं नियामकं तदेव स्वभाव-विशेषादिकं ममापि। यद्वा घटाद्यध्यासे अविद्यैव दोषत्वेनापि हेतुः, शुक्तिरूप्याद्यध्यासे तु काचादयो दोषा अपि। तथा चागन्तुकदोषजन्यत्वं प्रातिभासिकत्वे प्रयोजकम्। अत एव स्वप्नोपलब्धरथादीनामागन्तुक-निद्रादिदोषजन्यत्वात्प्रातिभासिकत्वम्॥ ३३॥

ननु स्वप्नस्थले पूर्वानुभूतरथादेः स्मरणमात्रेणैव व्यवहारोपपत्तौ न रथादिसृष्टिकल्पनं गौरवादिति चेत्। न। रथादेः स्मरणमात्राभ्युपगमे

समाधान—तुम्हारे मत में (घट, गन्ध, आत्मा तथा बुद्धि में) सत्यत्व समान रूप से रहने पर भी बुद्धि आदि में क्षणिकत्व और घटादि में स्थायित्व का नियामक जो कारण हो सकता है, वही स्वभाव-विशेषादि मेरे मत में भी व्यावहारिक और प्रातिभासिक रजत की विलक्षणता में नियामक हो जायगा। अथवा घटादि के अध्यास में अविद्या ही दोष रूप से हेतु मानी गई है। शुक्ति-रजत के अध्यास में अविद्या एवं काच-कामलादि दोष भी कारण है। इसलिए आगन्तुकदोषजन्यत्व (शुक्ति-रजतादि के) प्रातिभासिक होने में प्रयोजक है। अतएव स्वप्न में दीखने वाले रथादि आगन्तुक निद्रा-दोष से जन्य होने के कारण प्रातिभासिक माने जाते हैं॥ ३३॥

समत्वादेकस्य नियोगोऽनुपपन्न[1] इति भावः। मम त्वन्यदपि वैलक्षण्यं नियामकमित्याशयेनाह—**यद्वेति**। **अत एव**—आगन्तुकदोषजन्यत्वस्य प्रातिभासिकत्वप्रयोजकत्वादेव।

ननु स्वप्नोपलब्धरथादीनां प्रातिभासिकत्वाभ्युपगमे तेषां तात्कालिकोत्पत्तिरायाता सा चानुपपन्ना स्मरणमात्रेण लब्धव्यवहारोपपत्त्या सृष्टिकल्पनानौचित्यादित्यख्यातिवादी शङ्कते—**ननु स्वप्नेति**। प्रतीतिविरोधान्नैवमित्याह—**नेति**। स्वप्ने रथादेः स्मरणमात्रमस्तीत्ययुक्तं, रथं पश्यामि गीतं शृणोमीत्याद्यनुभवविरोधात्। ननु दोषवशात् स्मरामीत्यस्य [2]प्रमोषात्पश्यामीत्याद्याकारा प्रतीतिरित्याशङ्क्याह—**स्वप्न इति**। दोषनिवृत्तिकालेऽपि स्वप्ने रथमद्राक्षमित्येव प्रतीतिर्न

---

१. 'यश्चोभयोः समो दोषः परिहारस्तयोः समः' इति न्यायात्।

२. प्रमोषादिति। मुष् स्तेये इत्यस्य रूपम्, अभानादित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

रथं पश्यामि स्वप्ने रथमद्राक्षमित्याद्यनुभवविरोधापत्तेः, 'अथ रथान् रथयोगान् पथः सृजते' बृ० ४।३।१० इति रथादिसृष्टिप्रतिपादकश्रुति-विरोधापत्तेश्च। तस्माच्छुक्तिरूप्यवत् स्वप्नोपलब्धरथादयोऽपि प्रातिभासिकाः यावत्प्रतिभासमवतिष्ठन्ते ॥

ननु स्वप्नरथाद्यधिष्ठानतयोपलभ्यमानदेशविशेषस्यापि तदाऽसन्निष्ठतयाऽनिर्वचनीयप्रातिभासिकदेशोऽभ्युपगन्तव्यः, तथा च रथाद्यध्यासः[1]

शङ्का—स्वप्नस्थल में पूर्वानुभूत (जाग्रतकालीन अनुभूत) रथादि के स्मरण मात्र से ही व्यवहार की सिद्धि हो सकती है, फिर वहाँ (प्रातिभासिक) रथादि की सृष्टि की कल्पना में गौरव ही होगा।

समाधान—ऐसा नहीं कह सकते, क्योंकि स्वप्न में रथादि का स्मरणमात्र मानने पर 'रथ को मैं देखता हूँ' 'स्वप्न में रथ को मैंने देखा था' इस प्रकार अपरोक्ष अनुभव का विरोध होने लगेगा। और भी 'स्वप्न में रथों घोड़ों एवं मार्गों को रच लेता है' इस रथादि की सृष्टि बताने वाली श्रुति का विरोध भी होगा। इसलिए शुक्ति-रजत की तरह स्वप्न में उपलब्ध रथादि भी प्रातिभासिक हैं और जब तक उनका प्रतिभास होता है, तब तक बने रहते हैं, ऐसा मानना ही उचित है।

तु स्मृतवानिति प्रतीतिरत उक्तप्रत्ययव्यवहारस्य न स्मृतिमात्रादुपपत्तिरिति भावः। अत्रानुभवपदम् प्रतीतिपरम्। ननु जाग्रत्कालीनप्रतीतिरपि न विरुद्धयते, स्वप्ने स्मृतेरनुभवाकारतयोत्पन्नत्वेन तथैव परामर्शौचित्यात्, तस्मादगौरवग्रस्तरथादिसृष्टिर्न कल्पनीयेत्याशङ्क्याह—**अथेति**। जाग्रद्भोगप्रदकर्मोपरमे स्वाप्नभोगप्रदकर्माभिव्यक्त्यनन्तरम्। **रथान्**—रथयोगान् तदुपकरणभूतानश्वादीन्, तद्योग्यमार्गाश्च सृजत इति तत्सृष्टिप्रतिपादकश्रुत्या गौरवस्य प्रामाणिकतया उक्तप्रतीतेरन्यथानयनमयुक्तमिति भावः। उक्तश्रुतिविरोधादन्यथाख्यातिरप्ययुक्तेति मनसि निधायोपसंहरति—**तस्मादिति**। प्रातिभासिकपदविवरणं यावत्प्रतिभासमवतिष्ठन्त इति—प्रतिभासनियतसत्ताका—इति यावत्।

ननु शुक्तिरूप्यादेर्यथा पुरोवर्ति वस्त्वधिष्ठानं तथा स्वप्नस्थादेरप्यधिष्ठानं

---

१. कुत्रेति। निरधिष्ठानभ्रमायोगाद् अधिष्ठानत्वेन प्रतीयमानस्य देशविशेषस्यापि प्रातिभासिकत्वेन रथभ्रमात् पूर्वमभावाद् रथाद्यधिष्ठानाभावादेव रथाद्यध्यासाभाव इत्याक्षेप्तुरभिप्रायः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुत्रेति चेत्। न। चैतन्यस्य स्वयंप्रकाशस्य रथाद्यधिष्ठानत्वात्प्रतीयमानं रथाद्यस्तीत्येव प्रतीयते इति सद्रूपेण प्रकाशमानं चैतन्यमेवाधिष्ठानम्। देशविशेषोऽपि चिदध्यस्तः प्रातिभासिकः। रथादाविन्द्रियग्राह्यत्वमपि प्रातिभासिकम्, तदा सर्वेन्द्रियाणामुपरमात्। 'अहं गजः' इत्यादिप्रतीत्यापादनन्तु पूर्ववन्निरसनीयम्॥ ३४॥

शङ्का—स्वप्न में रथादि के आधार रूप से लब्ध देशविशेष के साथ इन्द्रिय-सन्निकर्ष न रहने के कारण रथादि की तरह उस देश को भी प्रातिभासिक ही मानना पड़ेगा। अब रथादि का अध्यास किस देश में होता है यह बताइये, (क्योंकि रथ और उसके आधारभूत पथ समान-कालीन होने से एक में दूसरे का अध्यास सम्भव नहीं है।)

समाधान—स्वयंप्रकाश चैतन्य ही स्वप्नदृष्ट रथादि का अधिष्ठान है, क्योंकि यहाँ पर रथादि 'अस्ति' ऐसा ही प्रतीत होता है। अतएव सद्रूप से प्रकाशमान चैतन्य ही स्वप्न में दिखने वाले रथादि का अधिष्ठान माना गया है। स्वप्नगत देशविशेष भी तो चैतन्य में अध्यस्त प्रातिभासिक है। स्वप्नगत रथादि में इन्द्रिय-ग्राह्यता भी प्रातिभासिक है क्योंकि सभी इन्द्रियां स्वप्न में उपरत हो चुकी हैं। यदि आपत्ति करें कि साक्षिचैतन्य में स्वप्न के दृश्य कल्पित हैं, तब तो 'मैं हाथी हूँ' ऐसा प्रतीत होना चाहिए? इसका समाधान पूर्व की (यस्य यदाकारानुभवाहितः) तरह कर लेना चाहिए॥ ३४॥

वक्तव्यम्। तर्हि चैतन्यम्? उत देशविशेषः? आद्येऽपि तर्हि शुद्धमुतान्तःकरणावच्छिन्नम्? नोभयमपि, तयोरधिष्ठानत्वेनाप्रतीतेः। द्वितीयेऽपि स किं बाह्य उत स्वाप्निकः?। नाद्यः, तस्यासन्निकृष्टतया प्रत्यक्षज्ञानविषयत्वायोगात्। न द्वितीयः, [1]अधिष्ठानतयोपलभ्यमानस्यापि तस्य सन्निकृष्टतया प्रातिभासिकत्वावश्यम्भावेनाधिष्ठानसापेक्षतया तत्त्वायोगादित्याशयेन शङ्कते—ननु स्वप्नेति। तदा स्वप्ना-

---

१. अधिष्ठानतयेति। स्वाप्नरथाद्यधिष्ठानतया उपलभ्यमानस्य तस्य स्वाप्नदेशस्य पुरोवर्तित्वेन प्रतीयमानस्य प्रातिभासिकस्य पुनः अधिष्ठानसापेक्षत्वनियमात्तस्याप्यधिष्ठानं किञ्चिद्वक्तव्यमापतत्यतोऽनवस्थैव भविष्यतीति भावः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वप्नगजादयः साक्षान्मायापरिणामा इति केचित्।

अन्तःकरणद्वारा तत्परिणामा इत्यन्ये।

ननु गजादेः शुद्धचैतन्याध्यस्तत्वे इदानीमधिष्ठानसाक्षात्काराभावेन जागरणेऽपि स्वप्नोपलब्धगजादयोऽनुवर्तेरन्। उच्यते—

स्वप्नगत गजादि दृश्य माया के परिणाम हैं ऐसा कुछ लोग कहते हैं, दूसरों के मत में स्वप्न के गजादि अन्तःकरण द्वारा माया का परिणाम है।

शङ्का—यदि स्वप्नगत गजादि शुद्ध चैतन्य में कल्पित है तो अभी जाग्रत में स्वप्नगजादि का अधिष्ठान शुद्ध चैतन्य का साक्षात्कार न होने के कारण में भी स्वप्नगजादि की अनुवृत्ति होनी चाहिए?

वस्थायां रथाद्यधिष्ठानतयोपलभ्यमानदेशविशेषस्यापि सन्निकृष्टतयाऽनिर्वचनीयप्रातिभासिकदेशोऽभ्युपगन्तव्य इत्यन्वयः। प्रथमपक्षमवलम्ब्य परिहरति—**नेति**। ननु चैतन्यपुरोवर्तिवद् वृत्त्यवच्छिन्नज्ञानविषयत्वाभावात् कथमधिष्ठानता इत्याशङ्क्याह—**स्वयंप्रकाशेति**। स्वप्रकाशपरप्रकाश्यसाधारणं ज्ञायमानत्वमेवाधिष्ठानत्वप्रयोजकं लाघवादिति भावः। **ननु स्वयं प्रकाशस्यापि तस्य न तदा चिद्रूपेण भानं**[1] रथादिजडाद्यधिष्ठानत्वनिर्वाहकं प्रतिकूलरूपत्वात्। नाप्यानन्दरूपेण, तस्य मूलाज्ञाननिवृत्तिमन्तरा भानासम्भवादित्याशङ्क्याह—**प्रतीयमानेति**। अत्रायं रथ इत्यधिष्ठानतया प्रतीयमानस्यापि देशविशेषस्य प्रातिभासिकत्वान्नाधिष्ठानतेत्याह—**देशविशेषोऽपीति**। किं च इन्द्रियग्राह्यत्वमपि तत्र कल्पितमित्याह **रथादाविति**। तत्र हेतुमाह—**तदेति**। ननु स्वप्नगजाद्यधिष्ठान यद्यपि चैतन्यं, तथाऽपि तस्यान्तःकरणावच्छिन्नत्वमस्त्येव 'सुधीः स्वप्नो भूत्वेमं लोकमनुसञ्चरेत्' इत्यादिश्रुतेः। तथा चाहं गज इति प्रतीत्यापत्तिरित्याशङ्क्याह—**अहं गज इति। पूर्ववदिति**। यथा शुक्तिरजतादेरिदमाकारानुभवाहितसंस्कारसहकृताविद्याजन्यत्वादहं रजतमिति प्रतीत्यापादानयुक्तं तद्वदहं गज इति प्रतीत्यापादानमपीत्यर्थः।

ननु स्वप्नगजादेस्तत्कालोत्पन्नत्वमनुपपन्नं तेषामुपादानासम्भवात्। न तावच्चैतन्यं तदुपादानं तस्यापरिणामित्वात्। नापि मूलाविद्या, तस्यास्तत्तदवयवसापेक्षायाः

---

१. चिद्रूपेण भानमिति कर्तृपदम्। चिद्रूपेण भानमधिष्ठानत्वनिर्वाहक न भवति आनन्दरूपेण भानमपि नाधिष्ठानत्वनिर्वाहकमित्यन्वयः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्यविनाशो हि द्विविधः—कश्चिदुपादानेन सह, कश्चिद्विद्यमान एवोपादाने । आद्यो बाधः । द्वितीयस्तु निवृत्तिः । आद्यस्य कारणमधिष्ठानतत्त्वसाक्षात्कारः, तेन विनोपादानभूताया अविद्याया अनिवृत्तेः । द्वितीये विरोधिवृत्त्युत्पत्तिर्दोषनिवृत्तिश्च । तदिह ब्रह्मसाक्षात्काराभावात् स्वप्नप्रपञ्चो माबाधि[1] । मुसलप्रहारेण घटादेरिव विरोधिप्रत्ययान्तरोदयेन

साक्षात्तदुपादानत्वासम्भवात् । नापि तूलाविद्या,[2] तस्या बाह्यदेशावच्छिन्नचैतन्याश्रितायास्तत्त्वादित्याशङ्क्याह—**स्वप्नगजादय इति । मायापरिणामा**—मूलाविद्योपादानकाः । न चैवं सुषुप्तौ तत्प्रतिभासापत्तिरिति वाच्यम् । रागद्वेषादिवन्निमित्तकारणस्यान्तःकरणस्य[3] तदानीमभावात् । अन्तःकरणस्य निमित्तकारणत्वकल्पनापेक्षया तद्द्वाराऽविद्यापरिणामित्वकल्पनं वरम् इत्यभिप्रायवताम् पक्षमाह—**अन्तःकरणेति ।**

नन्वध्यस्तस्याधिष्ठानसाक्षात्कारनिवर्त्यत्वनियमात् तत्साक्षात्काराभावाज्जागरणे तेषामनुवृत्तिप्रसङ्गो दुर्वार इति शङ्कते—**ननु गजादेरिति ।** यद्यप्यधिष्ठानसाक्षात्कारं विनाऽध्यस्तस्य बाधो न सम्भवति तथाऽपि तं विनाऽपि तन्निवृत्तिसम्भवाद् न तदनुवृत्तिप्रसङ्ग इति समाधानं प्रतिजानीते—**उच्यते इति ।** बाधरूपनाशाभावेऽपि निवृत्तिरूपनाशं प्रकृते दर्शयितुं नाशद्वैविध्यमाह—**कार्यविनाशो हीति ।**

---

१ यद्यपि लब्धेषु सर्वपुस्तकेषु 'स्वप्नप्रपञ्चो मा बाधिष्ट' इत्येव पाठ उपलभ्यते, तथाऽपि माङुपपदस्य बधेः कर्मणि लुङि 'चिण्भावकर्मणोः' इत्यनेन मावाधि इति 'स्वप्नप्रपञ्चं मावाधिष्ट' इति वा प्रयोगेण भाव्यम् । जागरणवृत्त्येत्यध्याहारः । तथा च जागरणवृत्तिः स्वाप्नप्रपञ्चं मा बाध्यताम्, परन्तु तं निवर्तयतीत्यभ्युपगमे को विरोधः ? विरोधो नास्तीत्यर्थः । कर्मण एव कर्तृत्वविवक्षया यथाश्रुतपाठस्य उपपत्तिः कर्तुं शक्यते, तथाऽपि क्लिष्टकल्पनया अपेक्षितस्यार्थस्यानुपलब्धेश्च 'मा बाधि' इति पाठः स्थापित इति । वेङ्कटेश्वरीयमुद्रितयोः पुस्तकयोः तट्टीकयोश्च मा बाधिष्ठ इति ठकारान्तः पाठः, स चातिस्थवीय इति विभावनीयं सुधीभिः ॥

२. तूलाविद्या हि बाह्यदेशावच्छिन्नचैतन्याश्रिता स्वप्नाधिष्ठानम् ? उत अन्तःकरणावच्छिन्नचैतन्याश्रिता ? नाद्यः, बाह्यदेशस्यापि प्रातिभासिकत्वात् । नान्त्यः, अन्तःकरणस्य गजाद्युपादानाविद्याधिष्ठानत्वे प्रमाणाभावात् । इदं सर्वमभिप्रेत्योक्तं नापीत्यादिना तत्त्वादित्यन्तेन । तत्त्वादित्यस्य उपादानत्वादित्यर्थः ।

३. यथा शुक्तिरजतस्थले रागादयो निमित्तं, तथैव स्वाप्नगजादावन्तःकरणं निमित्तं सुषुप्तौ तदभावान्नानुवृत्तिः स्वाप्नगजादीनामिति ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वप्नजनकीभूतनिद्रादिदोषनाशेन वा गजादिनिवृत्तौ को विरोधः ॥

एवं च शुक्तिरूप्यस्य शुक्त्यवच्छिन्नचैतन्यनिष्ठतूलाविद्याकार्यत्वपक्षे[1]

समाधान—कार्य का विनाश दो प्रकार से होता है कहीं उपादान के सहित कार्य का विनाश और कहीं उपादान के रहते हुए भी केवल कार्य का विनाश। पहले का नाम बाध है तथा दूसरे का नाम निवृत्ति। पहिले का कारण तो अधिष्ठान तत्त्व का साक्षात्कार ही है क्योंकि अधिष्ठान तत्त्व साक्षात्कार के विना उस कल्पित पदार्थ के कारण अविद्या की निवृत्ति सम्भव नहीं है। परन्तु द्वितीय कार्यनाश तो विरोधी वृत्ति की उत्पत्ति एवं दोष की निवृत्ति से भी सम्भव है। प्रकृत स्थल में ब्रह्मसाक्षात्कार न होने से स्वप्न में उपलब्ध गजादि वस्तु का बाध न भी माना जाये, किन्तु मुसल के प्रहार से जिस प्रकार घटादि का अपने कारण मिट्टी में विलय हो जाता है वैसे ही विरोधी वृत्ति (जाग्रद्वृत्ति) के उदय होने से या कारणीभूत निद्रादि दोष के नाश होने से (स्वप्नगत) गजादि की निवृत्ति में किसी भी प्रकार का विरोध नहीं है।

उपादानेन–अज्ञानेन। **आद्यस्य**–बाधसंज्ञस्य उपादानेन सह नाशस्य। **तत्** तस्मान्नाशस्य द्वैविध्याद्धेतोः। **इह**–जागरणे। ब्रह्मसाक्षात्कारामावात् स्वप्नप्रपञ्चो मावाधि गजादिनिवृत्तौ को विरोध इत्यन्वयः। तत्र हेतुमाह **विरोधीति**। यथोपादानसत्त्वेऽपि मुसलप्रहारेण घटादिनिवृत्तिर्भवति तथा विरोधिवृत्त्यन्तरोदयेन गजादेरपि निवृत्तिरुपपद्यते, स्वप्न एव अश्वादिप्रत्यये गजादिनिवृत्तिदर्शनात्। विरोधिवृत्त्यन्तरनिवृत्तौ पुनरुत्पत्तिमाशङ्क्य हेत्वन्तरमाह—**स्वप्नजनकीभूतेति**। स्वप्नप्रतीतिजनकीभूतेत्यर्थः। आदिपदेनादृष्टादिसङ्ग्रहः।

ननु शुक्तिरूप्यस्य बाधो निवृत्तिर्वेत्यपेक्षायामाह–**एवं चेति**। कार्यनाशस्य

---

१. प्रातिभासिकाः पदार्थाः तूलाविद्याकार्या इति पद्मपादाचार्याः। तन्मते शुक्तिरियमित्यादिज्ञानेन शुक्तित्वाज्ञानरूपया तूलाविद्यया प्रातिभासिकोपादानभूतया सह रजतादेर्बाधः। मूलाविद्याकार्या इति मिश्रादिमते मूलाविद्याया ब्रह्मज्ञानमात्रबाध्यायास्तस्याः शुक्तिरित्याकारकज्ञानेन बाधाभावेऽपि मुसलप्रहारेण विद्यमाने एवोपादाने मृदि घटनिवृत्तिवद् रजतस्य निवृत्तिरेवेति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुक्तिरिति ज्ञानेन तदज्ञानेन[1] सह रजतस्य बाधः। मूलाविद्याकार्यत्वपक्षे तु मूलाविद्याया ब्रह्मतत्त्वसाक्षात्कारमात्रनिवर्त्यतया शुक्तित्वज्ञानेनानिवर्त्यतया रजतस्य तत्र शुक्तिज्ञानान्निवृत्तिमात्रं, मुसलप्रहारेण घटस्येव ।३५।

ननु शुक्तौ रजतस्य प्रतिभाससमये प्रातिभासिकसत्त्वाभ्युपगमे नेदं रजतमिति त्रैकालिकनिषेधज्ञानं न स्यात्, किन्त्विदानीम् इदं न रजतमिति[2], इदानीं घटः श्यामो नेतिवदिति चेत्। न। न हि तत्र रजतत्वा-

इस प्रकार शुक्ति-रजतादि प्रातिभासिक वस्तु के जो लोग शुक्त्यवच्छिन्न चैतन्यनिष्ठ तूलाविद्या का कार्य मानते हैं उन लोगों के मत में रजतभ्रम के बाद शुक्तिज्ञान होने पर उपादनभूत अविद्या के साथ रजत का बाध हो जाता है। और जिन्होंने इन सभी को मूलाविद्या का कार्य माना है उनके मत में मूलाविद्या की निवृत्ति ब्रह्मतत्त्व-साक्षात्कार मात्र से होती है, शुक्तित्व के ज्ञान से नहीं। अतएव दण्ड प्रहार से घट का अपने कारण में विलय की तरह ही शुक्ति के ज्ञान से रजत का उपादान कारण मूलाविद्या में विलय रूप निवृत्ति मात्र होती है ।। ३५ ।।

शङ्का—शुक्ति में रजतप्रतीति के समय प्रातिभासिकसत्ता मान लेने पर 'यह रजत नहीं है' इस निषेधज्ञान को त्रैकालिक निषेध नहीं कह सकते, किन्तु 'इस समय यह रजत नहीं है' ऐसा ही कह सकते हैं। जिस प्रकार पके हुए घड़े को 'इस समय यह घट श्याम नहीं है' ऐसा कहा जाता है।

द्वैविध्ये सिद्धे सति। **शुक्तिरिति ज्ञानेनेति**। नेदं रजतमिति ज्ञानं ह्वनुवादः शुक्तित्वप्रकारकज्ञानस्य रजतादिभेदाज्ञाननिवर्तकत्वात्। तदुक्तं पञ्चपादिकायाम्—'शुक्तित्वज्ञानमेव बाधकं नेदं रजतमित्यनुवाद' इति। **रजतस्य बाधः**—उपादानेन सह नाशः। तूलाविद्याश्च मूलाज्ञानस्यैवावस्थाविशेषाः। तदुक्तं विवरणे—'मूलाज्ञानस्यैवावस्थाभेदा रजताद्युपादानानि शुक्तिकादिज्ञानैः सहाध्यासेन निवर्तन्ते' इति। मूलाविद्याकार्यत्वपक्षे तु स्वप्नगजादिवन्निवृत्तिरित्याह—**मूलाविद्येति**। नन्वस्मिन् पक्षे शुक्तिरूप्यज्ञाने प्रमात्वप्रसङ्गः, संसारदशायामबाधितत्वघटितस्य लक्षणस्य सत्त्वादिति चेन्न। अबाधितपदेनागन्तुकदोषाजन्यत्वस्य विवक्षितत्वात्।

ननु शुक्तिरजतस्याविद्याकार्यत्वात् प्रतिभाससमये सत्त्वस्वीकारे नेदं रजतमिति त्रैकालिकनिषेधानुपपत्तिरिति शङ्कते—**ननु शुक्ताविति**। विषयभेदादविरोध इति

---

१. शुक्तित्वाज्ञानेन तूलाविद्यारूपेण।

२. इति ज्ञानं स्यादिति शेषः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

वच्छिन्नप्रतियोगिताकाभावो निषेधधीविषयः, किन्तु[1] लौकिकपारमार्थिकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिताकः, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमात् ।

ननु प्रातिभासिके रजते पारमार्थिकत्वमवगतम् ? न वा ? अनवगमे[2] प्रतियोगितावच्छेदकावच्छिन्नरजतत्वज्ञानाभावादभावप्रत्यक्षानुपपत्तिः,

समाधान—ऐसा नहीं कह सकते, क्योंकि वहाँ पर 'यह रजत नहीं है' इस त्रैकालिक निषेध ज्ञान में रजतत्त्वावच्छिन्न प्रतियोगिताक अभाव को निषेधबुद्धि का विषय नहीं माना गया, किन्तु 'व्यावहारिकत्वावच्छिन्न प्रातिभासिक रजतप्रतियोगिताकाऽभाव' को ही त्रैकालिक निषेधज्ञान का विषय माना गया है। इसलिए व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाव मानने पर उक्त दोष नहीं रहता ।

परिहरति—**नेति** । **हि**—यस्मात्, **तत्र** नेदं रजतमिति त्रैकालिकनिषेधज्ञाने **रजतत्वावच्छिन्नप्रतियोगिताकाभावो** निषेधज्ञानविषयो न भवति । तर्हि कीदृशोऽभावस्तद्विषय इति पृच्छति—**किन्त्विति** । व्यावहारिकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिताकोऽभावो निषेधबुद्धिविषयः । तत्र हेतुमाह—**व्यधिकरणेति** । विरुद्धं व्यावहारिकं रजताद्यधिकरणं यस्य स व्यधिकरणः, स चासौ धर्मश्च लौकिकपारमार्थिकत्वं—तदवच्छिन्ना प्रातिभासिकरजते प्रतियोगिता यस्य तादृशाभावस्याभ्युपगमात् ।

---

१. लौकिकपारमार्थिकपदेन सर्वत्र व्यावहारिकेत्यर्थो ज्ञेयः । नेदं रजतमित्यत्र इदं (प्रातिभासिकम्) लौकिकपारमार्थिकम् (व्यावहारिकम्) नास्तीति प्रातिभासिकरजतप्रतियोगिताको व्यावहारिकत्वावच्छिन्नोऽभावो निषेधधीविषयः । यथा नैयायिकैः कपालेऽपि पटत्वेन घटाभावोऽङ्गीकृतस्तद्वद्व्यधिकरणाभावोऽस्माभिरपि स्वीक्रियत इत्यर्थः ।

२. यत्र शुक्तिकादौ 'इदं रजतम्' इत्याकारा बुद्धिर्जायते तत्र रजते पारमार्थिकत्वम् (अत्र पारमार्थिकत्वमिति मूलेन लौकिकपारमार्थिकत्वं विवक्षितं तच्च व्यावहारिकत्वमेव) अवगतम् ? न वा ? नान्त्यः, रजतनिष्ठव्यावहारिकत्वानवगमे 'नेदं रजतम्' इत्यभावप्रत्यक्षानुपपत्तेः । तथा हि—अभावीया प्रतियोगिता रजते तदवच्छेदकं रजतत्वं तस्य तत्त्वज्ञानाभावेन—यथार्थज्ञानाभावेन—अभावप्रत्यक्षानुपपत्तिरिति । ननु, प्रतियोगिनि रजते वर्तमानं प्रातिभासिकं रजतत्वमेव प्रतियोगितावच्छेदकं गृह्यते तद्विहाय कुतो व्यावहारिकं रजतत्वमन्विष्यत इति चेन्न । अभावज्ञानं येन रूपेण

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अवगमेऽपरोक्षावभासस्य तत्कालीनविषयसत्तानियतत्वाद् रजते पारमार्थिकत्वमत्वमप्यनिर्वचनीयं रजतवदेवोत्पन्नमिति तदवच्छिन्नरजतसत्त्वे तदवच्छिन्नाभावस्तस्मिन् कथं वर्तते ? इति चेत् । न । पारमार्थिकत्वस्याधिष्ठाननिष्ठस्य रजते प्रतिभाससम्भवेन रजतनिष्ठपारमार्थिकत्वोत्पत्त्यनभ्युपगमात् । यत्रारोप्यमसन्निकृष्टं तत्रैव प्रातिभासिकवस्तूत्पत्तेरङ्गीकारात् ।

शङ्का—प्रातिभासिक रजत में पारमार्थिकत्व का ज्ञान है या नहीं ? यदि नहीं है तो रजत में रहने वाली प्रतियोगिता का अवच्छेदक रजतत्व ज्ञान के अभाव में उसके अभाव का प्रत्यक्ष भी नहीं हो सकता । यदि प्रातिभासिक रजत में पारमार्थिकत्व का ज्ञान है तो उसे प्रत्यक्ष ज्ञान के विषय तत्कालीन विषय सत्ता नियत रूप से माननी ही होगी । उस शुक्ति-रजत में पारमार्थिकत्व ज्ञान का विषय लौकिक पारमार्थिकत्व अनिर्वचनीय रजत के समान उत्पन्न हुआ है – ऐसा मानना पड़ेगा । जब तत्काल उत्पन्न अनिर्वचनीय पारमार्थिकत्व से अवच्छिन्न रजत वहाँ विद्यमान हो तो फिर उसमें पारमार्थिकत्व से अवच्छिन्न प्रातिभासिक रजत प्रतियोगिताक अभाव कैसे रह सकता ?

समाधान—शुक्ति में रहने वाले पारमार्थिकत्व का ही प्रातिभासिक रजत में प्रतीति सम्भव होने से उसमें अनिर्वचनीय व्यावहारिकत्व की उत्पत्ति नहीं मानते, जहाँ पर आरोप्य वस्तु निकट में न हो वहाँ ही प्रातिभासिक वस्तु की उत्पत्ति मानी जाती है ।

नन्विदमनुपपन्नं व्यधिकरणधर्मस्यावगमेऽनवगमे चानुपपत्तेरिति शङ्कते–**नन्विति** । अवगमपक्षमवलम्ब्य परिहरति–**नेति** । नन्वत्र लौकिकपारमार्थिकत्वोत्पत्तिः कुतो नाभ्युपगम्यत इत्याशङ्क्याह–**यत्रेति** ।

प्रतियोगिनं विषयीकरोति नियमेन तद्रूपमेव प्रतियोगितावच्छेदकं भवति नेदं रजतमित्यत्र अभावज्ञानं रजतं व्यावहारिकं नास्तीति प्रतियोगिनं व्यावहारिकत्वेन विषयीकरोतीति व्यावहारिकत्वमेव प्रतियोगितावच्छेदकं तस्यानवगमेऽभावप्रत्यक्षानुपपत्तिरिति । नाद्यः, प्रत्यक्षावभासो हि सन्निकृष्टवस्तुन एव भवतीति नियतम् । तथा च यथा रजतं प्रातिभासिकं तत्कालोत्पन्नमङ्गीकृतं तथैव तद्वृत्तिव्यावहारिकत्वास्यापि उत्पत्तिरङ्गीकार्या । अङ्गीकृतायां व्यावहारिकत्वोत्पत्तौ नेदं रजतमिति निषेधो न स्यात् । यतः व्यावहारिकत्वावच्छिन्ने रजते व्यावहारिकत्वावच्छिन्नं रजतं नास्तीति तदा स्यात् । तच्च व्याहतमिति आक्षेप्तुराशयः । उत्तरग्रन्थः स्पष्टार्थः ।

Nagarjun Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत एवेन्द्रियसन्निकृष्टतया जपाकुसुमगतलौहित्यस्य स्फटिके भान-संभवाद् न स्फटिकेऽनिर्वचनीयलौहित्योत्पत्तिः। नन्वेवं यत्र जपाकुसुमं द्रव्यान्तरव्यवधानादसन्निकृष्टं तत्र लौहित्यप्रतीत्या प्रातिभासिकलौहित्यं स्वीक्रियतामिति चेत्। न। इष्टत्वात्। एवं प्रत्यक्षभ्रमान्तरेष्वपि प्रत्यक्ष-सामान्यलक्षणाऽनुगमो[1] यथार्थप्रत्यक्षलक्षणासद्भावश्च प्रदर्शनीयः ॥३६॥

इसलिए इन्द्रिय से सन्निकृष्ट होने के कारण 'लोहित स्फटिक' इस प्रतीति में जपाकुसुम की लालिमा का स्फटिक में भान सम्भव हो जाने से उस स्फटिक में अनिर्वचनीय लालिमा की उत्पत्ति नहीं मानी गयी।

शङ्का—जहाँ पर जपाकुसम अन्य द्रव्य से व्यवहित होने से इन्द्रियसन्निकृष्ट नहीं होता है, वहाँ पर लालिमा की प्रतीति होने से प्रातिभासिक लोहित की उत्पत्ति माननी चाहिए।

समाधान—(स्फटिक और जपाकुसुम के व्यवधान स्थल पर लालिमा की प्रतीति होने से, वहाँ प्रातिभासिक लालिमा हम मानते ही हैं, अर्थात्) इष्टापत्ति है।

इस प्रकार दूसरे-दूसरे प्रत्यक्ष भ्रम में भी प्रत्यक्ष का सामान्य लक्षण (चित्त्व-रूप का) अनुगम एवं यथार्थ प्रत्यक्ष-लक्षण का अभाव समझना चाहिए ॥ ३६ ॥

यत एवमत एव यत्रारोप्यं सन्निकृष्टं न तत्र प्रातिभासिकवस्तूत्पत्तिः स्वीक्रि-यत इत्याह—**अत एवेति**। ननु यत्र सन्निकृष्टमपि जपाकुसुमं हस्तादिद्रव्यान्तर-व्यवधानादसन्निकृष्टं तत्र स्फटिकेऽनिर्वचनीयलौहित्योत्पत्तिरङ्गीकार्येति शङ्कते—**नन्विति**। इष्टापत्त्या परिहरति—**नेति**। नन्विन्द्रियसन्निकृष्टप्रभायाः स्फटिके भानसम्भवादनिर्वचनीयलौहित्योत्पत्तिरनुपपन्नेति चेन्न। अस्वच्छद्रव्यस्य जपाकुसु-मस्य प्रभाया एवासिद्धेः। तदुक्तं पञ्चपादिकायाम्—'यथा पद्मरागादिप्रभा निराश्र-याऽप्युन्मुखोपलक्ष्यते न तथा जपाकुसुमादेः' इति। तथा चासन्निहितस्य परत्रावभासोऽध्यास इत्यध्यासलक्षणं न क्वापि व्यभिचरितमिति भावः। ननु शुक्त्यादौ रजताध्याससम्भवेऽप्यहङ्कारादेरात्मनि स न सम्भवति, तस्याधिष्ठानत्वानुपपत्तेः।

---

१. प्रत्यक्षसामान्यलक्षणं 'चित्त्वम्' तस्य भ्रमप्रमासाधारणप्रत्यक्षलक्षणत्वान्न भ्रमेऽतिव्याप्तिः, तस्यापि लक्ष्यत्वात्। यथार्थप्रत्यक्षलक्षणम् 'प्रमाणचैतन्यस्य अबाधि-तयोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वम्' तस्य भ्रमे नातिव्याप्तिः, विषयस्य बाधित्वाद् इति तात्पर्यम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अधिष्ठानं ह्यध्यस्यमानसदृशमंशद्वयवत्परिच्छिन्नमध्यस्यमानेन सहैकज्ञानविषयत्वयोग्यं च दृष्टमिति चेत्। उच्यते। अहङ्कारादिकार्यं ह्यज्ञानविकल्पित[1] एवाध्यस्यते, कार्यस्य कारणावच्छिन्न एवाध्यासौचित्यात्। न चैतावता समानाश्रयत्वभङ्गः, बिम्बप्रतिबिम्बयोरेकत्वेन तद्भङ्गाभावात्। तस्मादहङ्कारादयधिष्ठानचैतन्यस्याभिधेयत्वासम्भवात्, प्रतीतितो घटादिव्यावृत्तत्वाकारेणाप्यहङ्कारादिभिरात्मनः सादृश्यसम्भवादविद्यया सांशत्वविषयत्वपरिच्छिन्नत्वानामपि सम्भवादात्मा अधिष्ठानं भवत्येव। नापि प्रमाणदोषाभावः, अविद्याया एव दोषत्वात्। न चात्मनो विषयत्वादिसमाश्रयणेऽपसिद्धान्तः शङ्क्यः, अमुख्यस्य तस्य 'न तावदयमेकान्तेनाविषयोऽस्मत्प्रत्ययविषयत्वात्' इत्यादि वदद्भिर्भाष्यकारैरेव[2] समाश्रितत्वात्। किञ्चाध्यवधानेन प्रकाशमानत्वमेवाधिष्ठानत्वप्रयोजकं न त्वधिष्ठानस्य विषयत्वमपि गौरवात्। न च विषयत्वं विनाऽधिष्ठानस्याध्यवधानेन प्रकाशमानत्वमेव न दृष्टमिति वाच्यम्, यथाऽधिष्ठानस्यापरोक्षत्वं परमते क्वचिन्मनसा क्वचिन्नेत्राभ्यां तथाऽस्मन्मते स्वतोऽपीत्यत्र बाधकाभावात्। ननु स्वतोऽपरोक्षे कस्याध्यासो दृष्ट इति चेदज्ञानशोकमोहस्वप्नादेरिति गृहाण। तथा च परैर्यथाऽक्षिगम्ये शुक्तिकादौ रजतादिभ्रमः स्वीकृतस्तथा स्वतोऽपरोक्षे आत्मन्यहंकारादिविभ्रमेऽपि नास्ति बाधकम्। ननु स्वयं प्रकाशस्यात्मनो ज्ञाताज्ञातांशसम्भवात्कथमधिष्ठानतेति चेदुच्यते। दूरस्थयोर्वृक्षत्वेन प्रतीयमानयोरपि तावन्मात्ररूपो भेदो न ज्ञायत इत्यङ्गीकार्यम्, अन्यथा भेदभ्रान्त्यनुदयापाताद् एवं ज्ञातेऽप्यात्मन्यज्ञातत्वसम्भवात्तस्याधिष्ठानत्वमुपपद्यते। भेदो हि वस्तुनः स्वरूपं न धर्मः, अन्योन्याश्रयापातादित्यन्यत्र[3] विस्तरः। उक्तमर्थमन्यत्राप्यतिदिशति—**एवमिति**। प्रत्यक्षभ्रमान्तरेषु पीतः शङ्खस्तिक्तो गुड इत्यादिषु। प्रत्यक्षसामान्यलक्षणं चित्त्वम्। प्रमाणचैतन्यस्याबाधितयोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं यथार्थप्रत्यक्षलक्षणम्।

---

१. अज्ञानप्रतिबिम्बिते। कार्यस्य—अहङ्कारादेः। कारणावच्छिन्ने—अहङ्कारस्य कारणमज्ञानं तदवच्छिन्नमिति।

२. नित्यज्ञानस्वरूपस्यात्मनोऽविषयत्वेऽपि बुध्याद्युपहितस्यात्मनो विषयत्वस्य भाष्यकारैः समाश्रितत्वादित्यर्थः।

३. अन्यत्र—संक्षेपशारीरकप्रथमाध्याये तत्र हि—

अपरोक्षस्वरूपविषयभ्रमधीरपरोक्षमांस्पदमपेक्ष्य भवेत्।
मनसः स्वतो नयनतो यदि वा स्वपनभ्रमादिषु तथा प्रथितेः॥ ४१॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

उक्तं प्रत्यक्षं प्रकारान्तरेण द्विविधम्, इन्द्रियजन्यं तदजन्यं चेति। तत्रेन्द्रियाजन्यं सुखादिप्रत्यक्षम्, मनस इन्द्रियत्वनिराकरणात्। इन्द्रियाणि पञ्च–घ्राणरसनचक्षुःश्रोत्रत्वगात्मकानि। सर्वाणि चेन्द्रियाणि स्वस्वविषयसंयुक्तान्येव प्रत्यक्षज्ञानं जनयन्ति। तत्र घ्राणरसनत्वगिन्द्रियाणि स्वस्थानस्थितान्येव गन्धरसस्पर्शोपलम्भाञ्जनयन्ति। चक्षुःश्रोत्रे तु स्वत एव विषयदेशं गत्वा स्वस्वविषयं गृह्णीतः। श्रोत्रस्यापि चक्षुरादिवत् परिच्छिन्नतया भेर्यादिदेशगमनसम्भवात्। अत एवानुभवो भेरीशब्दो

प्रत्यक्ष का प्रकारान्तर से भेद—

उक्त प्रत्यक्ष प्रकारान्तर से दो प्रकार का है—(१) इन्द्रियजन्य और (२) इन्द्रियाजन्य। उनमें से सुखादि का प्रत्यक्ष इन्द्रिय से अजन्य है, क्योंकि मन में इन्द्रियत्व का निराकरण पहले ही कर दिया गया है। इन्द्रियाँ (ज्ञानेन्द्रियाँ) पांच है—घ्राण, रसना, चक्षुः, त्वचा और श्रोत्र। सभी इन्द्रियाँ अपने-अपने विषयों से युक्त होकर ही प्रत्यक्ष ज्ञान को उत्पन्न करती हैं।

उनमें घ्राण, रसना तथा त्वचा अपने-अपने गोलक में रहते हुए ही (विषय से संयुक्त होकर) गन्ध, रस और स्पर्शज्ञान को उत्पन्न करती हैं। परन्तु नेत्र और श्रोत्र स्वतः ही विषयदेश में जाकर अपने-अपने विषयों को ग्रहण करते हैं। श्रोत्र भी चक्षु आदि की तरह परिच्छिन्न होने से भेरी मृदङ्ग आदि बाजों के निकट जा सकता है। इसलिए ही 'भेरी शब्द मैंने सुना है' इसप्रकार अनुभव होता है।

उक्तप्रत्यक्षं पुनर्विभजते–**उक्तमिति**। तथा चेन्द्रियजन्यमित्यत्रेन्द्रियशब्देन ज्ञानेन्द्रियाणि पञ्च गृह्यन्ते, न तु नैयायिकवत् षट्। नापि दश कर्मेन्द्रियाणां ज्ञानाजनकत्वादित्याशयेनाह–**इन्द्रियाणि पञ्चेति**। तान्यपि कानीत्यपेक्षायामाह–**घ्राणेति**। तत्सद्भावे च रूपादिज्ञानानि सकरणकानि क्रियात्वाच्छिदिक्रियावद् इत्यनुमानं प्रमाणम्। 'तमुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इत्याद्या श्रुतिश्च

स्वतोऽपरोक्षाचितिरत्र विभ्रमस्तथापि रूपाकृतिरेव जायते।
मनोनिमित्तं स्वपने मुहुर्मुहुर्विनाऽपि चक्षुर्विषयं स्वमास्पदम् ॥ ४२ ॥

मनोऽवगम्येऽप्यपरोक्षताबलात्तथाऽम्बरे रूपमुपोल्लिखन्भ्रमः।
सितादिभेदैर्बहुधा समीक्ष्यते यथाऽक्षिगम्ये रजतादिविभ्रमः ॥ ४३ ॥

शान्तेऽपि तावति ततोऽनतिरिक्तरूपेऽप्यज्ञानतः स्फुरणमंस्फुरणं च दृष्टम्।
दूरस्थयोर्ननु वनस्पतिवस्तुनोस्तद्भेदो न दृष्टिविषयोऽवगते च ते नः ॥ ४४ ॥

इत्यादिकमुक्तमत्र टीकाकृता सर्वमर्थतः उपनिबद्धमिति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मया श्रुत इति वीचीतरङ्गादिन्यायेन कर्णशष्कुलीप्रदेशेऽनन्तशब्दोत्पत्ति-कल्पनागौरवम्[1], भेरीशब्दो मया श्रुत इति प्रत्यक्षस्य भ्रमत्वकल्पनागौरवं च स्यात्। तदेवं व्याख्यातं प्रत्यक्षम् ॥ ३७ ॥

इति प्रत्यक्ष प्रमाणम्।

(न्यायमत के अनुसार) वीचि-तरङ्ग आदि (कदम्बमुकुल) न्याय से कर्णशष्कुलि प्रदेश में अनन्त शब्द की उत्पत्ति कल्पना में गौरव है। 'मैंने भेरी का शब्द सुना है' इस प्रत्यक्ष ज्ञान में भी भ्रमत्व की कल्पना रूप गौरव दोष आ जायेगा। इस प्रकार हमने प्रत्यक्ष का व्याख्यान कर दिया ॥ ३७ ॥

प्रत्यक्षपरिच्छेद का भाषानुवाद समाप्त हुआ ॥ १ ॥

—: ० :—

मानम्। इन्द्रियाण्यप्राप्यकारीणीति सौगतास्तान्निराकर्तुमाह–**सर्वाणि चेति**। तत्रापि फलबलकल्प्यस्वभावविशेषमाश्रित्याह–**तत्रेति**। ननु चक्षुषस्तत्संभवेऽपि कर्णशष्कुल्यवच्छिन्नभोरूपश्रोत्रस्य विषयदेशगमनं न सम्भवति इत्याशङ्क्याह–**श्रोत्रस्यापीति**। आकाशादुत्पन्नं श्रोत्रमपि चक्षुरादिवत्परिच्छिन्नमिति भावः। यतः श्रोत्रस्य शब्ददेशगमनमत एव नैयायिकप्रक्रिया तु गौरवग्रस्तत्वादुपेक्ष्येत्याह–**वीचीति**। यथा वीचेस्तरङ्गस्ततोऽपि वीच्यन्तरं ततोऽपि तरङ्गान्तरमिति न्यायः। तथा भेरीदण्डसंयोगान्नभस्युत्पन्नाच्छब्दादसमवायिकारणाच्छब्दान्तरस्योत्पत्तिस्ततोऽन्यस्येति परम्परयाऽन्त्यशब्दस्य श्रोत्रसम्बन्धकल्पनागौरवम्। कदम्बमुकुलन्याय आदिपदाज्ज्ञेयः।[2] **प्रदेशे**–प्रदेशसम्बन्धार्थम्। परमप्रकृतसुपसंहरति–**तदेवमिति**।

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंस-रामकुमारसूनुघनपतिसूरिसुतशिवदत्तविरचितायां वेदान्तपरिभाषार्थ-दीपिकायां प्रत्यक्षपरिच्छेदः समाप्तः ॥ १ ॥

---

१. यद्यपि सर्वेषु पुस्तकेषु भ्रमत्वकल्पनागौरवमिति पाठः, तथाऽप्यत्र 'कल्पना-यान्तु गौरवम्' इति पाठो ग्रन्थानुगुण इति प्रतिभाति।

२. कखपुस्तकयोः अप्रदेशे प्रदेशसम्बन्धार्थमित्यादिः पाठः, गपुस्तके तु प्रदेशो सम्बन्धार्थमित्यादिः पाठः, तयोरनुपपत्तिमालोक्य अस्माभिरेष कल्पितः। अस्यार्थस्तु मूले वीचीतरङ्गन्यायेन कर्णशष्कुलीप्रदेशे अनन्तशब्दोत्पत्तिकल्पनागौरवमुक्तं तत्रत्यं प्रदेशे इति पदं प्रतीकत्वेनोपादाय प्रदेशसम्बन्धार्थमित्युक्तम्। कर्णशष्कुलीप्रदेशे नानन्तशब्दोत्पत्तिः, परन्तु भेरीदेशे जातस्य शब्दस्य कर्णशष्कुल्या सह सम्बन्धाभावाद् भेरीदेशे जातशब्दाच्छब्दान्तरं ततोऽपि शब्दान्तरमिति कर्णशष्कुलीपर्यन्तमनन्तशब्दोत्पत्तयो वीचीतरङ्गन्यायेन कल्पन्ते तत्र गौरवमिति ज्ञेयः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

अथानुमानपरिच्छेदः २

अथानुमानं निरूप्यते। अनुमितिकरणमनुमानम्। अनुमितिश्च व्याप्तिज्ञानत्वेन[1] व्याप्तिज्ञानजन्या। व्याप्तिज्ञानानुव्यवसायादेस्तत्त्वेन तज्जन्यत्वाभावान्नानुमितित्वम्।

(प्रत्यक्ष निरूपण के) अनन्तर अनुमान प्रमाण का निरूपण किया जाता है। अनुमिति प्रामा के करण को अनुमान कहते हैं। व्याप्ति ज्ञानत्वरूप से व्याप्तिज्ञान जिसका जनक हुआ हो इसी प्रकार ज्ञान को अनुमिति कहते हैं। व्याप्ति ज्ञान के अनुव्यवसायादि व्याप्तिज्ञानत्वेन व्याप्ति ज्ञान से जन्य नहीं है, इसलिए अनुमान के लक्षण को व्याप्ति ज्ञान के अनुव्यवसायादि में अतिव्याप्ति नहीं है।

एवं सर्ववादिसंमतं ज्येष्ठं प्रत्यक्षप्रमाणं प्रथमं निरूप्य बहुवादिसम्मतत्वात्तदनन्तरमनुमाननिरूपणं प्रतिजानीते–**अथेति**।[2] अनुमीयतेऽनेनेत्यनुमानमनुमितिकरणमिति व्युत्पन्नमनुमानपदं लक्षणमव्युत्पन्नं लक्ष्यमित्याशयेनानुमानं लक्षयति–**अनुमितीति**। अनुमानलक्षणघटकानुमितेर्लक्षणमाह–**अनुमितिश्चेति**। व्याप्तिज्ञानत्वेन न तु विषयत्वादिना। व्याप्तिश्च वक्ष्यमाणा तज्ज्ञानं च व्यभिचारज्ञानविरोधिज्ञानमिति पर्यवस्यति। नन्वत्र व्याप्तिपदं व्यभिचारज्ञानविरोधिपरं न तु

---

१. अनुमीयते–अनुमितिप्रमा उत्पाद्यते अनेन तद्–व्याप्तिज्ञानमनुमानम्, (अनुमानशब्दप्रवृत्तिनिमित्तम्) अर्थात् व्याप्तिज्ञानमनुमितिप्रमाकरणमिति व्याप्तिज्ञाने प्रयुज्यमानस्य अनुमानपदस्य करणव्युत्पत्त्याऽऽश्रयणे अनुमानलक्षणत्वं व्युत्पत्त्यनाश्रयणे केवलसङ्केतमात्राश्रयणे लक्ष्यपरत्वमिति भावः।

२. व्याप्तिज्ञानत्वेनेति। धूमो वह्निव्याप्य इत्याद्यात्मकव्याप्तिप्रकारकज्ञानत्वेनेत्यर्थो विवक्षितः। अन्यथा–व्याप्तिज्ञानत्वेन व्याप्तिज्ञानस्य अनुमिति प्रति करणत्वस्वीकारे तु व्याप्तिरिति ज्ञानादपि पर्वतो वह्निमानित्यनुमित्यापत्तिः। व्याप्तिप्रकारकज्ञानत्वविवक्षणे तु धूमो वह्निव्याप्य इत्यस्यैव व्याप्तिप्रकारकज्ञानत्वं व्याप्तिरिति ज्ञानस्य तु व्याप्तित्वप्रकारकज्ञानत्वमिति नापत्तिः काचिदिति। वह्निव्याप्यधूमवन्तं पर्वतं जानामीत्यनुव्यवसायस्यापि व्याप्तिज्ञानजन्यत्वं, तथाऽपि अनुव्यवसायनिष्ठजन्यतानिरूपितजनकत्वं व्याप्तिज्ञानस्य विषयत्वेन भवति न व्याप्तिज्ञानत्वेनेति। एवं व्याप्तिज्ञानजन्यस्मृतिशाब्दज्ञानव्याप्तिज्ञानध्वंसादिष्वपि बोध्यम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुमितिकरणं च व्याप्तिज्ञानं तत्संस्कारोऽवान्तरव्यापारः, न तु तृतीयलिङ्गपरामर्शोऽनुमितौ करणम्।

तस्यानुमितिहेतुत्वासिद्ध्या तत्करणत्वस्य दूरनिरस्तत्वात्।

अनुमिति का करण व्याप्तिज्ञान है, व्याप्ति ज्ञान से जो व्याप्ति विषयक संस्कार उत्पन्न होता है, वही व्याप्ति ज्ञान और अनुमिति के मध्यवर्त्ती व्यापार। तृतीयलिङ्गपरामर्श अनुमिति का करण नहीं है। क्योंकि उसमें तो अनुमिति का करणत्व भी सिद्ध नहीं होने से करणत्व की सिद्धि तो दूर ही निरस्त है।

ग्रन्थकृदभिमतव्याप्तिपरं, तेन तज्जनके[1] अत्यन्ताभावगर्भसाध्याभाववदवृत्तित्वादिरूप-व्याप्तिज्ञाने[2] ऽन्योन्याभावगर्भसाध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यादिरूप-व्याप्तिज्ञाने च[3] कारणतावच्छेदकसत्त्वादनुमितिर्भवति इदानीं तु न स्यादिति चेन्न। अत्यन्ताभावादिगर्भव्याप्तिज्ञानस्यापि व्यभिचारज्ञानविरोधिज्ञान एव पर्यवसानात्, वस्तुतो व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वस्य वक्ष्यमाणत्वाच्च। तादृशावच्छेदक-विवक्षायाः फलमावेदयति–**व्याप्तिज्ञानेति। तत्त्वेन**–व्याप्तिज्ञानत्वेन। आदिपदं तज्जन्यस्मृतिशाब्दज्ञानादिसंग्रहार्थम्। अनुव्यवसायस्मृतिशाब्दज्ञानादिषु विषयत्वस्व-समानविषयानुभवत्वपदार्थज्ञानत्वादिना हेतुत्वात्तत्त्वेनाहेतुत्वमित्यर्थः।

ननु व्याप्तिज्ञानस्य किमनुमितिजनकत्वमात्रमुत तत्करणत्वमित्यपेक्षायामाह **अनुमितिकरणं चेति**। एतेन व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञान-मनुमितिस्तत्करणमनुमानं तच्च लिङ्गपरामर्श इति प्रत्युक्तम्, व्याप्तिज्ञानस्यैव तत्करणत्वसम्भवे तदतिरिक्तपरामर्शाङ्गीकारस्यानौचित्यात्। नाप्यनुमितौ लिङ्गं

अत्रेदं तत्त्वम्–अयं घट इत्याकारकज्ञाने विषयो घटः सोऽपि विषयत्वेन ज्ञानजनको भवति यथा तथैवोक्तानुव्यवसायादीनि ज्ञानानि व्याप्तिज्ञानजन्यानि तेषु उक्तानुमिति-लक्षणस्यातिव्याप्तिः स्यादतो व्याप्तिज्ञानत्वेनेति लक्षणे निवेशितमिति।

१. तज्जनके–अनुमितिजनके। अत्यन्ताभावो गर्भे मध्ये यस्य तच्च साध्या-भाववदवृत्तित्वादिरूपव्याप्तिज्ञानं च तस्मिन्निति विग्रहः। इदं पूर्वपक्षव्याप्तिलक्षणेषु प्रथमव्याप्तिलक्षणम्।

२. इदञ्च पूर्वपक्षव्याप्तिलक्षणेषु तृतीयं लक्षणम्।

३. कारणता व्याप्तिज्ञाने तदवच्छेदकं व्याप्तिज्ञानत्वं तस्य पञ्चत्वेऽपि लक्षणेषु सत्त्वाद् अनुमितित्वं भवतीत्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

करणमयोग्यलिङ्गकानुमितौ परामर्शस्य व्यापारत्वासम्भवेन तत्करणत्वासम्भवतया व्यभिचारात्। तस्मादनुमितिकरणत्वाद् व्याप्तिज्ञानमेवानुमानशब्दाभिधेयं, न तु लिङ्गतत्परामर्शाविति भावः। ननु व्याप्तिज्ञानस्य करणत्वे तद्व्यापारो वक्तव्यः, व्यापारवदसाधारणकारणस्य करणत्वादित्यपेक्षायामाह–**तत्संस्कार इति**। व्याप्तिज्ञानसंस्कार इत्यर्थः। ननु महानसादौ धूमादिज्ञानं प्रथमम्, पक्षे ततो द्वितीयम्, ततो व्याप्तिं स्मृत्वा पक्षे धूमादिपरामर्शात्मकं तृतीयम्, ततो वह्न्याद्यनुमितिरिति तृतीयलिङ्गपरामर्शात्मकं ज्ञानमनुमितिकरणमिति वदन्ति नैयायिकाः। अतो भवद्भिरपि तथैव किमिति नाभ्युपगम्यते इत्याशङ्क्याह–**न तु तृतीयेति**। व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः।[1] व्याप्यस्य पक्षवृत्तित्वं पक्षधर्मता। तथा च वह्निव्याप्यधूमवानयमित्यादिज्ञानमुक्तलक्षणपरामर्शात्मकं, तत्तु नानुमितिकरणमित्यर्थः। तत्र हेतुमाह–**तस्यानुमितीति**। पक्षधर्मताज्ञानद्वारोद्बुद्धे संस्कारे व्याप्तिज्ञानस्यान्वयव्यतिरेकाभ्यामनुमितिजनकत्वाभ्युपगमस्यावश्यकतया[2] तद्रहितस्य परामर्शस्य तद्धेतुत्वासिद्धया तत्करणत्वस्य दूरनिरस्तत्वमित्यर्थः। उपलक्षणमिदम्। अनुमितिकरणं लिङ्गम्, तत्परामर्शोऽवान्तरव्यापार इति वैशेषिका मन्यन्ते। तन्न साधु, विनष्टस्यानागतस्य च लिङ्गस्य तदानीमभावेन ततोऽनुमित्यनापत्तेरित्यपि द्रष्टव्यम्।

---

१. इयं सिद्धान्तलक्षणव्याप्तिः। पर्वतो वह्निमान् धूमाद् इत्यत्र लक्षणसमन्वयः। यथा लक्षणघटकोऽभावो घटाभावः, स च प्रतियोगिनो घटस्यासमानाधिकरणोऽथ च हेतोर्धूमस्याधिकरणं पर्वतस्तत्समानाधिकरणश्च तादृशाभावीया प्रतियोगिता घटे प्रतियोगितावच्छेदकं घटत्वम् अनवच्छेदकं वह्नित्वं तदवच्छिन्नो वह्निस्तेन वह्निना समं तस्य हेतोर्धूमस्य सामानाधिकरणं पर्वतादाविति।

२. संस्कारे उद्बुद्धे सति व्याप्तिज्ञानसत्त्वेऽनुमितिस्तदभावेऽनुमित्यभाव इत्यन्वयव्यतिरेकाभ्यां व्याप्तिज्ञानस्यावश्यकतया तद्रहितस्य–अन्वयव्यतिरेकरहितस्य–परामर्शस्य अनुमितिहेतुत्वासिद्धया, तत्करणत्वस्य—अनुमितिकरणत्वस्य दूरनिरस्तत्वात्। कारकविशेषः करणं कारकसामान्यत्वरूपहेतुत्वासिद्धया तद्विशेषरूपकरणत्वस्य अत्यन्तमसम्भावितत्वादित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न च संस्कारजन्यत्वेनानुमितेः स्मृतित्वापत्तिः, स्मृतिप्रागभावस्य संस्कारमात्रजन्यत्वस्य वा स्मृतित्वप्रयोजकतया[1] संस्कारध्वंससाधारण-संस्कारजन्यत्वस्य तदप्रयोजकत्वात्।

न च यत्र व्याप्तिस्मरणादनुमितिस्तत्र कथं संस्कारो हेतुरिति वाच्यम्। व्याप्तिस्मृतिस्थलेऽपि तत्संस्कारस्यैवानुमितिहेतुत्वात्[2]। न हि स्मृतेः संस्कारनाशकत्वनियमः[3], स्मृतिधारादर्शनात्। न चानुद्बुद्धसंस्कारादप्यनुमित्यापत्तिः, तदुद्बोधस्यापि सहकारित्वात्।

अनुमिति को संस्कारजन्य मानने पर उसमें स्मृतित्व की आपत्ति होने लगेगी, ऐसा कहना उचित नहीं है। क्योंकि स्मृति प्रागभाव या संस्कार मात्र जन्यत्व स्मृतित्व का प्रयोजक है। संस्कारध्वंस अथवा साधारण संस्कारजन्यत्व स्मृतित्व का प्रयोजक नहीं है।

शङ्का—जहाँ पर व्याप्ति के स्मरण से अनुमिति जाती है, वहाँ संस्कार को स्मृति का कारण कैसे कहा जा सकता?

समाधान—ऐसा कहना अनुचित है, क्योंकि व्याप्तिस्मरण स्थल में भी संस्कार को ही अनुमिति का कारण (लाघव होने के नाते और अनुभव के आधार पर) माना गया है। स्मृति से संस्कार नष्ट हो जाते हैं—यह नियम नहीं है, क्योंकि (व्यानादि स्थलों में) धारावाहिक स्मृति अनुभवसिद्ध है। अनुद्बुद्ध संस्कार से भी अनुमिति की प्राप्ति नहीं हो सकती, क्योंकि उद्बोध को भी सहकारी कारण माना गया है।

ननु संस्कारजन्यं ज्ञानं हि स्मृतिरिति स्मृतिलक्षणं तस्य चानुमितावप्यनुगमात् तस्यापि स्मृतित्वापत्तिरित्याशङ्क्य परिहरति—**न चेति**। तत्र हेतुमाह—**स्मृतीति**। नन्वेवं तर्हि तत्तत्प्रागभावजन्यत्वरूपप्रयोजकस्य सर्वत्र सुलभत्वात् तत्र तत्र प्रयोजकान्तराभ्युपगमोऽनर्थकः स्यादित्यरुचेः पक्षान्तरमाह—**संस्कारमात्रेति**।

ननु व्याप्तिस्मरणादनुमितिस्थले संस्कारजन्यत्वं व्यभिचरितं व्याप्तिस्मृत्या

---

१. तथा च स्मृतिप्रागभावजन्यं ज्ञानं स्मृतिरिति संस्कारमात्रजन्यं ज्ञानं स्मृतिरिति वा स्मृतिलक्षणे सति संस्कारध्वंससाधारणसंस्कारजन्यानुमितौ न स्मृतित्वापत्तिरिति।

२. व्याप्तिस्मृतिजन्यानुमितिस्थलेऽपि व्याप्तिसंस्कारस्यैव अनुमितिहेतुत्वं लाघवादनुभवानुरोधाच्चेति भावः।

३. योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिविशेषगुणनाश्यत्वम् इति तार्किकाः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं च अयं धूमवानिति पक्षधर्मताज्ञानेन, धूमो वह्निव्याप्य इत्यनुभवाहितसंस्कारोद्बोधे च सति, वह्निमानित्यनुमितिर्भवति, न तु मध्ये व्याप्तिस्मरणं तज्जन्यवह्निव्याप्यधूमवानित्यादिविशेषणविशिष्टं ज्ञानं वा हेतुत्वेन कल्पनीयम्, गौरवात् मानाभावाच्च ।

इस प्रकार 'यह पर्वत धूम वाला है' ऐसे पक्षधर्मता ज्ञान से धूम वह्नि का व्याप्य है, इस अनुभव से पूर्व का संस्कार जग जाता है, फिर 'वह्नि वाला पर्वत है' ऐसी अनुमिति होती है। न कि बीच में व्याप्ति का स्मरण अथवा तज्जन्य वह्निव्याप्य धूमवाला पर्वत है इस प्रकार विशेषण–विशिष्ट ज्ञान को अनुमिति के करण रूप से कल्पना करनी चाहिए, क्योंकि ऐसा मानने में गौरव है तथा कोई प्रमाण भी नहीं है।

संस्कारनाशादित्याशङ्क्य परिहरति—**न चेति**। व्याप्तिस्मृतिजन्यानुमितिस्थलेऽपि संस्कारनाशानभ्युपगमेन व्यभिचाराभावादित्याह–**व्याप्तिस्मृतीति**। स्मृतिधारादर्शनात्स्मृतेः संस्कारनाशकत्वनियमो नास्तीत्याह–**न हीति**। ननु संस्कारस्यैवानुमितिहेतुकत्वे अनुदबुद्धादपि[1] तस्मादनुमितिप्रसङ्ग इत्याशङ्क्य परिहरति–**न चेति**। तदुद्बोधस्य पक्षधर्म्मताज्ञानजन्यस्य संस्कारोद्बोधस्य।

फलितमाह—**एवञ्चेति**। व्याप्तिज्ञानस्य करणत्वे व्याप्तिज्ञानसंस्कारस्य तदव्यापारत्वे पक्षधर्म्मताज्ञानजन्यसंस्कारोद्बोधस्य सहकारित्वे च सिद्धे सति।

तथा च संस्कारात् स्मृत्युत्पत्तौ संस्कारस्य नाशोऽवश्यम्भावीति। तन्न। संस्कारनाशाभ्युपगमे स्मृतिधारास्थले द्वितीयस्मृतिव्यक्तेरुत्पत्तिः अकारणिका स्यात्। न च एकसंस्कारव्यक्तिनाशेऽपि संस्कारव्यक्त्यन्तरात्स्मृत्युत्पत्तिरिति वाच्यम्, संस्कारानन्त्यकल्पने गौरवात्प्रमाणाभावाच्च। ननु संस्कारव्यक्त्यानन्त्यं मास्तु परमेकेन संस्कारेण उद्बोधकसहकृतेन या स्मृतिव्यक्तिरुत्पादिता सैव स्वयं विनश्यती संस्कारमरणमुत्पाद्य विनश्येद् उत्पन्नश्च संस्कारोऽन्यां स्मृतिमिति धारायाः सामञ्जस्यमस्तिवति चेन्न। एतादृशकल्पनाऽपेक्षयाऽपि येनानुभवेन यः संस्कारो जनितः, तेन च संस्कारेण उद्बोधकसहकारिणा स्मृतिजनने जनितया स्मृत्या स्वजनकसंस्कारस्य नाशमकुर्वत्या तस्यैव संस्कारस्य दृढं करणकल्पनायां महल्लाघवम्। तथा चाऽनुभवोऽप्यत्रानुगुणः, यया पूर्वद्युः श्रुतः शास्त्रार्थोऽद्य स्मृतो दृढीभूत इति तमेव शास्त्रार्थं दृढीभूतमादर्शयति। अन्यथा श्रुतशास्त्रार्थसंस्कारस्य स्मृतिजननानन्तरं विनाशे तथा च स्मृत्या संस्कारजनने दृढत्वं कथ स्यात्। किञ्चैवं संस्कारेण स्मृत्युत्पत्तिः स्मृत्युत्तरं जायमानेन तेनैव स्मृतिनाशः, इति संस्कारस्यैव स्मृतिजनकत्वविनाशकत्वे तस्यैव पुनः स्मृतेरुत्पन्नस्य स्मृतिजन्यत्वनाश्यत्वे, इत्यादिबहुविरुद्धपदार्थकल्पनमापद्येत, तस्मान्न स्मृतेः संस्कारनाश्यत्वमिति पक्षः श्रेयान्।

१. अनुदबोधादपि इति पाठः—गपुस्तके। अग्रेऽपि तदुद्बोधस्य स्थाने तदुद्बुद्धस्य इति पाठश्च।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तच्च व्याप्तिज्ञानं वह्निविषयकज्ञानांश एव करणम्, न तु पर्वतविषयकज्ञानांश इति पर्वतो वह्निमानिति ज्ञानस्य वह्न्यंश एवानुमितित्वं न पर्वतांशे, तदंशे प्रत्यक्षत्वस्योपपादितत्वात् ॥ १ ॥

व्याप्तिश्च अशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरण्यरूपा। सा च व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते। तच्च सहचारदर्शनं भूयो दर्शनं सकृद्दर्शनं वेति विशेषो नादरणीयः। सहचारदर्शनस्यैव प्रयोजकत्वात् ॥ २ ॥

'पर्वतो वह्निमान्' इस अनुमिति ज्ञान के वह्नि विषयक ज्ञान में ही व्याप्ति ज्ञान को करण माना गया, न कि पर्वत विषयक ज्ञानांश में भी। इसलिए 'पर्वतो वह्निमान्' यह ज्ञान वह्नि अंश में अनुमिति है पर्वतादि अंश में नहीं। क्योंकि उस (पर्वत) अंश में प्रत्यक्षत्व का उपपादन पहले (प्रत्यक्ष परिच्छेद में) ही कर दिया गया है ॥ १ ॥

व्याप्ति का लक्षण—

सम्पूर्ण साधनों (हेतुओं) के आश्रय के आश्रित जो साध्य, ऐसे साध्य के सामानाधिकरण्य को ही व्याप्ति कहते हैं। उस व्याप्ति का ग्रहण व्यभिचार के अदर्शन और सहचार दर्शन से होता है। वह सहचार दर्शन चाहे बहुवार हुआ हो या एकवार इसमें कोई विशेष आग्रह नहीं है। केवल सहचार दर्शन ही व्याप्ति ज्ञान का नियामक है ॥ २ ॥

पर्वतो वह्निमानित्येकमेव ज्ञानमनुमित्यात्मकमिति येऽभिमन्यन्ते तान्निराकर्तुमाह—**तच्चेति**। सन्निकृष्टपक्षकानुमितिस्थले ज्ञानद्वयस्योपपादितत्वादित्याह—**पर्वत इति**। पर्वतं पश्यामि वह्निमनुमिनोमीत्यनुभवबलाज्ज्ञानद्वयस्यावश्यकतया जातित्वोपाधित्वपरिभाषायाश्चाप्रामाणिकत्वाद् ज्ञानस्यांशभेदेन परोक्षत्वापरोक्षत्वयोरुपपादितत्वादित्यर्थः।

नन्वनुमितिकरणव्याप्तिज्ञाने [1]का व्याप्तिरित्यपेक्षायां व्याप्तिस्वरूपमाह—**व्याप्तिश्चेति**। अशेष च तत्साधनं च तस्याश्रयस्तदाश्रितं यत्साध्य तेन समं हेतोः सामानाधिकरण्यं रूपं यस्याः सा [2]साधनतावच्छेदकावच्छिन्नसाधनाश्रयाश्रितसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यरूपेति यावत्। एवं च यत्किञ्चिद्व-

---

१. ज्ञाने स्वीकृते का व्याप्तिरिति पाठः—गपुस्तके।

२. वह्निमान् धूमाद् इत्यत्र साधनं धूमः साधनता धूमनिष्ठा तदवच्छेकं धूमत्वं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तच्चानुमानमन्वयिरूपमेकमेव। न तु केवलान्वयि। सर्वस्यापि धर्मस्यास्मन्मते ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेन अत्यन्ताभावाप्रतियोगिसाध्यकत्वरूपकेवलान्वयित्वस्यासिद्धेः।

वह अनुमान भी अन्वयीरूप एक ही है, केवलान्वयी नहीं है, क्योंकि हमारे (वेदान्त के) मत में सभी धर्म ब्रह्मनिष्ठ अत्यन्ताभाव के प्रतियोगी हैं, इसलिए अत्यन्ताभाव का अप्रतियोगी साध्य वाला केवलान्वयी पदार्थ कहीं भी सिद्ध नहीं है।

ह्नयादिसाधनाश्रयाश्रितं यत्किंचिद्धूमादिसाध्यसामानाधिकरण्यमादाय पर्वतो धूमवान् वह्नेरित्याद्यसद्धेतौ नातिप्रसङ्गः। नन्वेवंभूता व्याप्तिः केन गृह्यते? न तावत्तर्केण, व्याप्यारोपेण व्यापकारोपरूपस्य तस्य व्याप्त्यधीनत्वात्। नापि सहचारदर्शनेन, सकृद्दर्शने भूयोदर्शने च तस्मिन् क्वचिद्व्यभिचारोपलम्भादित्याशङ्क्याह—**सा चेति**। तच्च सकृद्दर्शनं भूयोदर्शनं वा इत्यपेक्षायामाह—**तच्चेति**। गृहीतसहचारस्य व्याप्तिग्रहदर्शनादगृहीतसहचारस्य व्याप्तिग्रहादर्शनाच्चेत्यन्वयव्यतिरेकाभ्यां सहचारदर्शनस्य हेतुत्वसिद्धया लाघवात् तस्यैव प्रयोजकत्वं, न तु तद्विशेषस्येत्याह—**सहचारेति**।

एवं व्याप्तिज्ञानस्यानुमितिकरणत्वेनानुमानत्वं प्रसाध्येदानीमनुमानत्रैविध्यमपि नैयायिकादिवदस्मन्मते नास्तीत्याशयेनाह—**तच्चानुमानमिति**। न तु केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्त्रिविधमित्यर्थः। **अन्वयिरूपम्**—अन्वयमुखव्याप्तिज्ञानरूपम्। ननु परोक्षभेदानां जागरूकत्वे कथमनुमानस्यैकरूपत्वमित्याशङ्क्याद्यभेदं निराचष्टे—**न त्विति**। [1]तद्धि अत्यन्ताभावाप्रतियोगिसाध्यकम्।

तदवच्छिन्नाः पर्वतीयचत्वरीयादिधूमव्यक्तयः साधनरूपाः तदाश्रयाः पर्वतादयः, तानेवाश्रिता याः साध्यव्यक्तयः—ताश्चापि साध्यतावच्छेदकं यद्वह्नित्वं तदवच्छिन्ना एव—तासां धूमत्वावच्छिन्नधूमव्यक्तीनां वह्नित्वावच्छिन्नवह्निव्यक्तीनां यत् समानाधिकरण्यं—सामानाधिकरणे पर्वतादौ वृत्तित्वं 'यत्र यत्र धूमस्तत्र तत्र वह्निः' इत्यादिरूपं—तदेव रूपं यस्या व्याप्तेः सा तथा। धूमवान्वह्नेरित्यादौ यथा कथंचित् महानसीयवह्निव्यक्त्या महानसीयधूमव्यक्तिसाधनेऽपि नातिप्रसङ्गः। यद्यपि तत्र महानसीयधूमवह्न्योः सामानाधिकरण्यं दृष्टं तथाऽप्ययोगोलके व्यभिचारात् साधनतावच्छेदकावच्छिन्नेन वह्निना सामानाधिकरण्यं नास्तीति भावः।

१. तद्धीति। केवलान्वय्यनुमानं हि अत्यन्ताभावस्य प्रतियोगि साध्यं यस्य तद् अत्यन्ताभावाप्रतियोगिसाध्यकम्। यथा वाच्यं ज्ञेयत्वादित्यादि। नैयायिकमते वाच्यत्वज्ञेयत्वयोः कुत्रापि विरहाभावेन लक्षणसमन्वयः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाप्यनुमानस्य व्यतिरेकिरूपत्वम्[1]। साध्याभावे साधनाभावनिरूपितव्याप्तिज्ञानस्य साधनेन साध्यानुमितावनुपयोगात्। कथं तर्हि धूमादावन्वयव्याप्तिमविदुषोऽपि [2]व्यतिरेकव्याप्तिज्ञानादनुमितिः? अर्थापत्तिप्रमाणादिति वक्ष्यामः।

उसी प्रकार अनुमान का केवल व्यतिरेकित्व रूप भी नहीं है, क्योंकि साध्याभाव में रहने वाली साधनाभाव की व्याप्ति का ज्ञान साधन से साध्य अनुमिति में अनुपयुक्त हो है। यदि कहो कि धूम में वह्नि की अन्वयव्याप्ति न जानने वाले को व्यतिरेकव्याप्तिज्ञान से अनुमिति कैसे करायी जाय? वहाँ अर्थापत्ति प्रमाण से काम चल जायेगा यह हम (अर्थापत्ति परिच्छेद में) कहेंगे।

न चास्मन्मते ब्रह्मातिरिक्तं किञ्चिदप्यत्यन्ताभावाप्रतियोगि 'नेह नानास्ति किंचन' कं० २–१० इत्यादिश्रुत्या सर्वस्यापि ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वावधारणादिति तथाभूतकेवलान्वयित्वस्यासिद्धेरित्याह—**सर्वस्यापीति**।

एवं प्रथमभेदं निराकृत्य केवलव्यतिरेकिरूपं द्वितीयभेदं निराचष्टे—**नाप्यनु-**

---

१. व्यतिरेकव्याप्तिज्ञानजन्यानुमितिकारणत्वमनुमानस्य व्यतिरेकत्वम्। साध्याभावव्यापकीभूताभावप्रतियोगित्वं व्यतिरेकव्याप्तिः। अन्वयव्याप्तौ तु धूमसत्त्वे वह्निसत्त्वमिति व्याप्येन धूमेन व्यापकस्य वह्नेरारोपो भवति, अभावयोस्तु तद्विपरीतः कार्यकारणभावः, यथा यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभाव इति। तथा च साध्यस्य वह्नेः अभावेन साधनस्याभावः साध्यते, तस्य कुत्रोपयोगः? साधनस्य धूमस्य प्रत्यक्षसिद्धत्वात्तव अनुमानोपयोगाभावात्। पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वाद् इत्यत्रान्वयदृष्टान्ताभावाद् यत्र गन्धवत् तत्र पृथिवीतरभिन्नम् इति साधनाभावेन साध्याभावसाधनपुरःसरं पृथिव्यामितरभेदः साध्यते। तस्या व्यतिरेकव्याप्त्याः साध्यस्यानुमितिप्रमायामनुपयोग एव, अन्यव्याप्तिज्ञानस्यापि अन्यलिङ्गकानुमितिहेतुत्वेऽतिप्रसङ्गात्। तथा हि, साध्यभावनिष्ठा या साधनभावनिरूपिता व्याप्तिः, यथा गन्धाभावव्याप्य, इतरभेदाभाव इति, तथा चेत् पृथिव्यां गन्धवत्त्वं साध्यते ततोऽन्यगतेन अभावगतेन–व्याप्तिज्ञानेन अन्यस्यां–पृथिव्यां गन्धवत्त्वं साध्यत इत्यापन्नम्। तथा च कृतकत्वमनित्यत्वव्याप्यम् इति कृतकत्वनिष्ठानित्यत्वनिरूपितव्याप्तिज्ञानेन धूमाद् वह्न्यनुमित्यापत्तिः स्यात्। भवति हि धूमो वह्निव्याप्य इत्यस्मादेव व्याप्तिज्ञानाद् वह्न्यनुमितिरिति, न तु कृतकत्वनिष्ठानित्यत्वनिरूपितव्याप्तिज्ञानेनेति दिक्।

२. व्यतिरेकव्याप्तिज्ञानादनुमितिर्जायते। यथा वह्न्यभावव्याप्यो धूमाभाव इति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

अत एवानुमानस्य नान्वयव्यतिरेकिरूपत्वं व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वात् ॥ ३ ॥

इसलिए अनुमान का अन्वयव्यतिरेकरूपता भी स्वीकार नहीं किया गया, क्योंकि व्यतिरेकव्याप्तिज्ञान को अनुमिति में कारण नहीं माना गया है ॥ ३ ॥

मानस्येति। व्यतिरेकिरूपत्वं—केवलव्यतिरेकिरूपत्वम्। साधनेन हि साध्यमनुमीयते, तत्र च साध्यसाधनयोर्व्याप्तिज्ञानमुपयुज्यते, न तु साध्यभावसाधनाभावयोरित्याह **साध्याभावे इति**। तथा च पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वाद् यदितरेभ्यो न भिद्यते न तद्गन्धवद् यथा जलादीत्याद्युदाहरणानि त्वर्थापत्तेर्गन्धवत्त्वस्येतरभेदोपपादकत्वादिति भावः। नन्वन्वयव्याप्तिज्ञानरहितस्य व्यतिरेकव्याप्तिज्ञानादनुमितिर्भवति, भवन्मते सा कथमुपपद्यते इति शङ्कते—**कथं तर्हीति**। तस्यार्थापत्तिप्रमाणाद् वह्न्यादिज्ञानं, न त्वनुमानादतो नोक्तदोष इत्याह—**अर्थापत्तीति**। वक्ष्यमाणरीत्या अर्थापत्तिप्रमाणस्यावश्यकतया व्यतिरेक्यनुमानस्य तदन्तर्भावसम्भवे तत्पृथक्त्वस्याभ्युपगमो न युक्त इति भावः।

तृतीयभेदं निराकरोति—**अत एवेति**। यतो व्यतिरेकाव्याप्तिज्ञानस्य नानुमितिजनकत्वमत एवेत्यर्थः। अन्वयव्यतिरेकिरूपे त्वन्वयव्याप्तिज्ञानस्यैवानुमितिजनकत्वे व्यतिरेकव्याप्तिज्ञानस्य तज्जनकत्वाभ्युपगमस्य वैयर्थ्यादित्याह—**व्यतिरेकेति**। अत्र केचित् [1]स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वं साध्यस्य

व्यतिरेकमात्रव्याप्तिज्ञानवतः पुरुषस्यापि पर्वतेऽविच्छिन्नमूलधूमदर्शनेन धूमस्य विद्यमानतया वह्न्याभावव्याप्यस्य धूमाभावस्य च अविद्यमानतया व्यापकस्य वह्न्यभावस्याप्यभावः, अर्थाद् 'वह्निमान् पर्वत' इत्याकाराऽनुमितिरुत्पद्यते। व्यतिरेकव्याप्त्यस्वीकारे कथमुत्पत्तिरस्या अनुमितेरित्याक्षेप्तुरभिप्रायः। अथापत्तिप्रमाणादिति समाधातुर्ग्रन्थकारस्यायमाशयः। एतादृशस्थले वह्निमनुमिनोमीत्यनुव्यवसायाभावान्नास्माभिरनुमितिः स्वीक्रियते, किन्तु वह्निं कल्पयामीत्यनुव्यवसायबलादर्थापत्तिरेवेति धर्मराजाध्वरीन्द्रः। विवरणकारानुयायी रामकृष्णस्तदात्मजोऽपि पित्रा खण्डितं व्यतिरेक्यनुमानं पुनरुज्जीवयति शिखामण्यामिति द्रष्टव्यम्। अनेन शिवदत्तेन मूलकारग्रन्थसमर्थनं कृतमिति संक्षेपः।

१. अत्र केचिदित्यस्य (७१) पृष्ठस्थेन वदन्तीत्यनेन दूरव्यवहितेन संबन्धः। केचित् शिखामणिकाराः स्ववृत्तिरित्यादेरयमर्थः वृत्तिशब्देनात्र आधेयता ग्राह्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केवलान्वयित्वम् । तत्साधकत्वं[1] केवलान्वयिलिङ्गलक्षणं [2]प्रमेयत्वादेश्च स्वसमानाधिकरणपारमार्थिकत्वावच्छिन्नात्यन्ताभावप्रतियोगित्वेऽपि स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वात्केवलान्वयित्वम् । न च [3]श्रुतिविरोधः शङ्क्यः, तस्या अपि पारमार्थिकत्वावच्छिन्नद्वैताभावपरत्वात् । तदुक्तं विवरणे—'आगमेन च द्वैतस्य तत्त्वांशबाधात्' इति । न च लक्षणे स्ववृत्तिविरोधीति व्यर्थं, तस्याव्याप्यवृत्तिकस्यापि सयोगात्यन्ताभावादिसंग्रहार्थत्वात् । न च ब्रह्मणः [4]स्वप्रकाशत्वेन तत्र स्वरूपेणापि प्रमेयत्वाभावात्कथं केवलान्वयित्वमिति वाच्यम्, ब्रह्मणोऽपि वृत्तिलक्षणप्रमाविषयत्वात् । न चैतावता स्वप्रकाशत्वविरोधः, अनुपहितस्यैव तथात्वात् । न चैवमपि नाभिधेयत्वं केवलान्वयि, ब्रह्मणोऽनभिधेयत्वादिति वाच्यम् । ब्रह्मणो लक्ष्यतया वाच्यत्वाभावेऽपि पदजन्यज्ञानविषयत्वात्, वाच्यत्वस्यापि ग्रन्थकृता वक्ष्यमाणत्वाच्च । न चैवं प्रमेयत्वादिविरोधिवृत्तिमदत्यन्ताभावस्याप्रसिद्धत्वात्तत्र लक्षणाव्याप्तिः, स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावप्रतियोगिनो घटादयः प्रसिद्धास्तदन्यत्वस्य प्रमेयत्वादावपि सत्त्वात् । एवं धूमादावन्वय-

---

स्वशब्देन घटादयो ग्राह्याः, न प्रमेयत्वादीनि, प्रमेयत्वादिवृत्तिविरोधिवृत्तिमदत्यन्ताभावस्याप्रसिद्धत्वात् । तथा च घटादिनिष्ठा या आधेयता तद्विरोध्याधेयतावान् यो घटशून्यदेशस्थो घटात्यन्ताभावस्तत्प्रतियोगित्वं घटादौ अप्रतियोगित्वं प्रमेयत्वादाविति लक्षणसमन्वयः ।

१. तस्य—केवलान्वयिसाध्यस्य—साधकं तत्साधकं तस्य भावस्तत्साधकत्वम् । केवलान्वयिसाध्यविषयानुमितिजनकत्वं केवलान्वयिलिङ्गस्य लक्षणम् ।

२. प्रमेयत्वादेश्च केवलान्वयित्वमन्वयः । यद्यप्यत्र अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति लक्षणस्य प्रमेयत्वाधिकरणे प्रमेये घटे प्रमेयः पारमार्थिको न इत्याकारकस्यात्यन्ताभावस्य प्रतियोग्येव प्रमेयो घट इत्यव्याप्तिः, तथाऽपि स्ववृत्तिविरोधिवृत्तीत्यादेरेव केवलान्वयिलक्षणत्वेन नाव्याप्तिरिति भावः ।

३. 'नेह नानास्ति' इत्यादिश्रुतिः ।

४. इतराप्रकाश्यत्वे सति प्रकाशमानत्वं स्वप्रकाशत्वम्, अपराधीनप्रकाशवत्त्वमित्यर्थः । तत्र—ब्रह्मणि । 'स्वरूपेणापि—प्रमेयत्वेनापि । कथं केवलान्वयित्वं प्रमेयत्वादीनामित्यर्थः । न कथमपि संभवतीत्याक्षेपार्थः किं शब्दः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याप्तिमविदुषोऽपि [1]व्यतिरेकव्याप्तिज्ञानाद्वह्निज्ञानमित्यविवादम् । तच्चानुमितिरेव वह्निमनुमिनोमीत्यनुव्यवसायात् । न च क्लृप्तकारणव्याप्तिज्ञानस्याभावात् कथमनुमितिरित्युक्तमिति वाच्यम्, व्यतिरेकव्याप्तिज्ञानस्य सत्त्वात् । न चैतदनुमित्यकरणमिति वाच्यम्, स्वव्यभिचारधीविरोधिधीविषयव्याप्तिज्ञानत्वेन व्याप्तिज्ञानस्यानुमितिहेतुत्वात्, अस्य च व्यतिरेकव्याप्तिज्ञानसाधारणत्वात्[2] ।

[3]नन्वनुमानस्य व्यतिरेकितयाऽपि प्रामाण्याभ्युपगमे तत्रैवार्थापत्तेरन्तर्भावापत्तौ सा पृथक्प्रमाणमिति राद्धान्तो भज्येतेति चेत्तर्ह्यनुमानस्य प्रामाण्ये संशयाद्युत्तरप्रत्यक्षस्थले चक्षुरादेः प्रामाण्यं न स्यात्, तत्रानुमितिसामग्रीमत्त्वेनानुमितेरेवोत्पत्तेः । तथा शाब्दस्थलेऽपि शब्दो न प्रमाणं स्यात्, एते पदार्थास्तात्पर्यविषयपरस्परसंसर्गवन्त आकाङ्क्षादिमत्पदकदम्बस्मारितत्वादित्यनुमानेनैव क्लृप्तप्रमाणाभावेन तात्पर्यविषयसंसर्गप्रतीतेः सम्भवात् । यदि स्थाणुं साक्षात्करोमि शब्दादमुमर्थं जानामीत्यनुव्यवसायात्प्रत्यक्षशब्दयोः पृथक् प्रामाण्यम्, तदा व्यतिरेकव्याप्तिज्ञानादिघटितायामनुमितिसामग्र्यां सत्यामपि वह्निज्ञानानन्तरं धूमेन वह्निं कल्पयामीति यदाऽनुव्यवसायः, तदा धूमस्यार्थापत्तिविधया प्रामाण्यमिति । तुल्यम् ।

यद्वा, [4]निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते, इति व्यतिरेकिण्यप्यन्वयव्याप्तिज्ञानमेवानुमितिहेतुः । न चैवं सत्यन्वयिव्यतिरेकिणोर्भेदो न

---

१. यत्र यत्र धूमस्तत्र तत्र वह्निरित्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति, यथा जलह्रद इयं व्यतिरेकव्याप्तिः । यस्य पुंसोऽन्वयव्याप्त्यज्ञानं तस्य व्यतिरेकव्याप्त्याऽपि पर्वते धूमदर्शनानन्तरं प्रमा जायते, सा यथार्था प्रत्यक्षशब्दोपमानार्थापत्त्यनुपलब्धजन्या अतोऽनुमितिरेव । अनुमिनोमीत्यनुव्यवसायेनाप्यस्या अनुमितित्वमुररीकार्यमिति भावः ।

२. व्यतिरेकव्याप्तिज्ञानमपि अनुमितिकरणमित्यर्थः ।

३. व्यतिरेक्यनुमानस्वीकारे अर्थापत्तेः पृथक् प्रमाणाभ्युपगमो व्यर्थश्चेद् अनुमानेनैव प्रत्यक्षादिप्रमोत्पत्तेः सम्भवेन तेषां पृथक्करणानर्थक्यं स्यादिति प्रतिबन्ध्याशङ्कते—नन्विति ।

४. साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः । निरुपाधिः—उपाधिशून्यः, यत्र वह्न्यभावस्तत्र धूमाभाव इत्याकारको यो व्यतिरेकयोः वह्न्यभावधूमाभावयोः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यादिति वाच्यम्, व्यतिरेकसहचारमात्रज्ञानजन्यान्वयव्याप्तिधीर्यत्रानुमितिहेतुः स व्यतिरेकी, यत्रान्वयसहचारमात्रज्ञानजन्यान्वयव्याप्तिधीरनुमितिहेतुः सोऽन्वयव्यतिरेकीति विभागोपपत्तेः। अस्मिंश्च पक्षे यदा अन्वयसहचारेणैवान्वयव्याप्तिस्फुरण, तदा धूमस्य केवलान्वयितया गमकत्वम्। यदा व्यतिरेकसहचारेणैवान्वयव्याप्तिस्फुरणम्, तदा केवलव्यतिरेकितया। यदाऽन्वयव्यतिरेकसहचारेणान्वयव्याप्तिस्फुरणं, तदाऽन्वयव्यतिरेकितया। यदा व्यतिरेकसहचारेण व्यतिरेकव्याप्तेरेव ज्ञानं तदाऽर्थापत्तिविधया धूमस्य प्रामाण्यम्। न च व्यतिरेक्यनुमानस्य पृथक्प्रमाणत्वेऽपसिद्धान्तः मूलग्रन्थेषु[1] शुक्तिरूप्यमिथ्यात्वादौ तत्र तत्र व्यतिरेक्यनुमानस्यापि प्रमाणत्वेनोपन्यासात्। तस्मत्त्रिविधं वानुमानमिति युक्तमिति[2]—वदन्ति। तत्रेदं वक्तव्यम्—न तावदौपनिषदमतेऽनुमानस्य केवलान्वयित्वं सम्भवति, सर्वस्य प्रपञ्चस्य ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वाभिधानात्। ब्रह्मणि प्रपञ्चात्यन्ताभावो व्यावहारिक इति पक्षे स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावप्रतियोगित्वं प्रमेयत्वादेरायाति, न तु तदप्रतियोगित्वम्[3]।

सहचारः स निरुपाधिव्यतिरेकसहचारस्तेन। धूमवान् वह्नेरित्यादौ धूमाभाववद्ह्रदभावयोर्यः सहचारः स तु उपाधिव्यभिचारितासम्बन्धेन वह्निसंयोगाभावाद्युपाधिविशिष्टः। साध्यव्यापकत्वे सति साधनाव्यापकत्वरूपलक्षणस्य व्यापकव्यापकत्वे सति व्याप्याव्यापकत्वमित्यर्थकत्वम्। तथा च यत्र वह्नयभावो जलह्रदे तत्र वह्निसंयोगभावरूपस्य उपाधेः सत्त्वाद् व्यापकवह्नयभावव्यापकत्वेन साध्यव्यापकत्वम्। यत्र धूमाभावस्तत्र वह्निसंयोगाभावाभावो यथाऽयोगोलके इति साधनाव्यापकत्वम्। व्यापकाभावाद् व्याप्याभावः व्यापकोपाधेरयोगोलकेऽभावाद् व्याप्यस्य वह्नयभावस्य अभावः। वह्नयभावाभावो वह्निरूपः। एवं चायोगोलके वह्नयभावो नास्ति धूमाभावोऽस्ति, इति व्यभिचारोन्नायकतया व्यतिरेकसहचार उपाधिव्यभिचारितासम्बन्धेन उपाधिमानित्यर्थः।

१. शुक्तिरूप्यमिथ्यादृश्यत्वाद् यन्नैवं तन्नैवं यथा ब्रह्म इति विवरणादौ।

२. वदन्तीत्यस्य (६८) पृष्ठस्थेव अत्र केचिदित्यनेन दूरव्यवहितेन सम्बन्धः।

३. अतो न केवलान्वयित्वमिति शेषः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

[1]नन्वेवं तर्हि निषेधस्य बाध्यत्वेन पारमार्थिकसत्त्वाविरोधित्वा[2]दर्थान्तरमिति चेद्, न। स्वाप्नार्थस्य स्वाप्ननिषेधेन बाध्येनापि बाधदर्शनात्। न च निषेधस्य बाध्यत्वं पारमार्थिकसत्त्वाविरोधित्वे तन्त्रम्, किं तु निषेध्यापेक्षया न्यूनसत्ताकत्वम्। प्रकृते च तुल्यसत्ताकत्वाद्विरोधित्वमविरुद्धम्। तत्र हि निषेधस्य निषेधे प्रतियोगिसत्त्वमायाति यत्र निषेधस्य निषेधबुद्ध्या प्रतियोगिसत्त्वं व्यवस्थाप्यते निषेधमात्रं तु निषिध्यते, यथा रजते नेदं रजतमिति प्रतीत्यनन्तरमिदं नारजतमिति ज्ञानेन रजतं व्यवस्थाप्यते निषेधमात्रं तु निषिध्यते। यत्र तु प्रतियोगिनिषेधयोरुभयोरपि निषेधस्तत्र न प्रतियोगिसत्त्वम्; यथा ध्वंससमये प्रागभावप्रतियोगिनोरुभयोर्निषेधः। तथा च प्रकृतेऽपि निषेधस्य बाध्यत्वेऽपि प्रपञ्चस्य तात्त्विकत्वं निषेधबाधकेन प्रतियोगिनः प्रपञ्चस्य तन्निषेधस्य च बाधनात्, उभयोरपि निषेध्यतावच्छेदकस्य दृश्यत्वादेस्तुल्यत्वात्। न चातात्त्विकनिषेधबोधकत्वाच्छ्रुतेरप्रामाण्यं शङ्क्यं, ब्रह्मभिन्नस्यातात्त्विकत्वं बोधयतः शास्त्रस्याप्रामाण्यायोगात्। एतन्निषेधप्रतियोगित्वं च स्वरूपेणैव, न तु सद्विलक्षणस्वरूपानुपमर्दितपारमार्थिकत्वाकारेण, स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वस्य प्रपञ्चे शुक्तिरजतादौ चाभ्युपगमात्। रजतभ्रमानन्तरमधिष्ठानसाक्षात्कारे सति रजतस्य रजतं नास्ति नासीद् न भविष्यतीति स्वरूपेणैव 'नेह नाना' क०२–१० इति श्रुत्या च प्रपञ्चस्य स्वरूपेणैव निषेधप्रतीतेः। न च तत्र लौकिकपारमार्थिकरजतमेव स्वरूपेण निषेधप्रतियोगीति वाच्यम्, भ्रमबाधयोर्वैयधिकरण्यापत्तेः, अप्रसक्तप्रतिषेधापत्तेश्च। न चैवं विवरणाचार्य्यवाक्यविरोध इति वाच्यम्, तस्य पक्षान्तरपरत्वात् अन्यथाऽबाध्यत्वरूपपारमार्थिकत्वस्य बाध्यत्वरूपमिथ्यात्वनिरूप्यत्वेनान्योन्याश्रयापातात्।

किञ्च नात्र रजतमिति प्रतीतौ, यथा रजतस्य स्वरूपेण पारमार्थिकत्वेन च निषेधो विषयस्तथा 'नेह नानास्ति किञ्चन' क० २–१० इत्यत्रापि प्रपञ्चस्य स्वरूपेण पारमार्थिकत्वेन च निषेधो विषयः। भिन्नविभक्त्यन्तोपस्थापिते धर्मिणि प्रतियोगिनि

१. एषा शङ्का तत्परिहारश्चेति सर्वं द्वितीयमिथ्यात्वनिरूपणेऽद्वैतसिद्धाववसेयम्।

२. अर्थान्तरम्—अनभिप्रेतपदार्थप्रतिपादनम्। घटः सन् इत्यादिप्रत्यक्षं नेह नानेत्यादिश्रुत्या प्रबाध्य घटादीनां सत्यत्वाभावरूपं मिथ्यात्वं सिसाधयिषितम्, स चेन्निषेधोऽपि बाध्यस्तर्हि न तेन घटादीनां पारमार्थिकसत्त्वं बाधयितुं शक्यते, तच्चानभिप्रेतं वेदान्तिनस्तवेत्यर्थान्तरम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च तत्रः संसर्गाभावबोधकत्वनियमस्य व्युत्पत्तिसिद्धत्वात् । अस्तु वा पारमार्थिकत्वाकारेणैव निषेधस्तथाऽपि प्रमेयत्वादेर्ब्रह्मरूपधर्मिन्यूनसत्ताकत्वे केवलान्वयित्वम् ? तत्त्वे च [1]समसत्ताकत्वावश्यंभावात् कथं बाध्यत्वम् ? तस्माद्ब्रह्मातिरिक्तं सर्वं मिथ्येतिवादिनः केषांचिद्धर्मिणां केवलान्वयित्वकथनं केवलसाहसविजृम्भितम् ।

एतेन ब्रह्मणि अभिधेयत्वस्थापनमपि निरस्तम् । 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि' के०१-४' 'अविज्ञातं विजानताम्' के० २-१-१ 'प्रतिबोधविदितं मतम्' के० २-३ इत्यादिश्रुत्या ब्रह्मणि वाच्यत्वादेर्निषिद्धत्वात् । न च ग्रन्थकृता तत्र वाच्यत्वं वक्ष्यमाणमिति भ्रमितव्यम्, लक्षणां विना शक्त्याऽपि महावाक्येनाखण्डार्थो बोधयितुं शक्यते इत्येतत्परोत्तरग्रन्थस्य ब्रह्मणि वाच्यत्वमस्तीत्येतत्कथनपरत्वाभावात् । यदपि व्यतिरेक्यनुमानोपपादनं तदप्यसङ्गतम् । [2]अर्थापत्तिवादिनां तदावश्यकत्वे तद्वादिनामर्थापत्तेरावश्यकत्वापत्तेः ।

यत्तु प्रत्यक्षशब्दयोर्यथा पृथक् प्रामाण्यं तथाऽर्थापत्तेरपीत्यादि, तदपि न । व्यतिरेकव्याप्तेरेवार्थापत्तिप्रमाणत्वेन द्वयोः सामग्रीभेदाभावेन वैषम्यात् । तथा च व्यतिरेकव्याप्तिज्ञाने यत्र वह्न्याद्यज्ञानं तत्र वह्निं कल्पयामि इत्याकारकानुव्यवसायोपलम्भात् तत्करणमर्थापत्तिरेव न त्वनुमानं तस्यानुमित्यहेतुत्वात् ।

यत्तु व्यतिरेकसहचारमात्रज्ञानजन्यान्वयव्याप्तिधीर्यत्रानुमितिहेतुः स व्यतिरेकीत्यादि, तदपि न । अन्वयसहचारदर्शनस्यान्वयव्याप्तिज्ञानजनकतया व्यतिरेकसहचारदर्शनस्य व्यतिरेकव्याप्तिज्ञानजनकतायाः सर्वलोकानुभवसिद्धतया तद्विरुद्धकार्यकारणभाववर्णनानौचित्यात् । तथा च नास्त्यर्थापत्तिव्यतिरिक्तं व्यतिरेक्यनुमानम्[3] । एतेन तस्यान्वयव्यतिरेकिरूपत्वमपि प्रत्युक्तम् । तस्मादनुमानमन्वयिरूपमेवेति सुष्ठूक्तं मूलकृद्भिः । अन्यथाऽपसिद्धान्तपातः, साम्प्रदायिकग्रन्थेषु केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेक्यनुमानानां क्वाप्यनुपन्यासात् । क्वचित्प्रयोगस्तु परमतानुसारेण द्रष्टव्य इत्यास्तां तावत् ।

---

१. तत्त्वे च—केवलान्वयित्वे च, प्रमेयत्वादेः ब्रह्मसत्तासमानसत्ताकत्वावश्यम्भावाद् बाध्यत्वायोग इत्याक्षेपः ।

२. अर्थापत्तिवादिनां पूर्वोत्तरमीमांसकानां तस्या व्यतिरेकव्याप्त्या आवश्यकत्वे । तद्वादिनाम्—व्यतिरेक्यनुमानवादिनाम् अर्थापत्तेरप्यावश्यकत्वापत्तेः ।

३. व्यतिरेकिनिराकरणेन तस्य-अनुमानस्य ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तच्चानुमानं स्वार्थपरार्थभेदेन द्विविधम्। तत्र स्वार्थं तूक्तमेव, परार्थं तु न्यायसाध्यम्। न्यायो नामावयवसमुदायः। [1]अवयवाश्च त्रय एव प्रसिद्धाः—प्रतिज्ञाहेतूदाहरणरूपाः, उदाहरणोपनयनिगमनरूपा वा, [2]न तु पञ्चावयवरूपाः। अवयवत्रयेणैव व्याप्तिपक्षधर्मतयोरुपदर्शनसम्भवे-नाधिकावयवद्वयस्य व्यर्थत्वात् ॥ ४ ॥

अनुमान का भेद—

वह अनुमान भी स्वार्थ और परार्थ भेद से दो प्रकार का है। उनमें स्वार्थानु-मान (पूर्व पंक्तिओं में) कह चुके हैं, और परार्थानुमान न्यायसाध्य है। अवयव-समुदाय को न्याय कहते हैं। अनुमान के तीन अवयव ही प्रसिद्ध हैं—प्रतिज्ञा, हेतु और उदाहरण रूप अथवा उदाहरण, उपनय और निगमन रूप। वेदान्तसिद्धान्त में नैयायिकों की तरह पञ्च अवयव नहीं माना गया है। क्योंकि तीन अवयव से ही व्याप्तिपक्षधर्मता का प्रदर्शन सम्भव हो जाने से फिर उनसे अधिक दो अवयवों की कल्पना व्यर्थ है ॥ ४ ॥

यथोक्तानुमानस्य द्वैविध्यमाह —**तच्चेति**। **तत्र** द्विविधे। **स्वार्थं**—स्वविवादगोचरार्थसाधकम्। **उक्तमेव** —व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते इत्युक्तया निरुक्तव्याप्तेर्ज्ञानमेव। **परार्थन्तु**[3]—परविवादविषयार्थसाधकम्। **न्यायसाध्यं**—न्यायप्रयोज्यम्। न्यायशब्दार्थमाह— **न्यायो नामेति**। वक्ष्य-माणावयवघटितवाक्यम् अवयवसमुदायः। तथा चानुमानप्रयोजकवाक्यार्थज्ञानजनक-

---

१. अनुमितिचरमकारणपक्षधर्मताज्ञानप्रयोजकशाब्दज्ञानजनकवाक्यत्वम् अवय-वत्वम्। वह्निमानित्याकारिकाऽनुमितेश्चरमकारणं यद् धूमवानयम् इत्याकारकं पक्ष-धर्मताज्ञानं, तस्य प्रतिज्ञाहेतूदाहरणाः अवयवास्त्रय इति पक्षे – परम्परया साक्षाद्वा जनकानि यानि—वह्निसम्बन्ध्यभिन्नः पर्वतः, धूमसम्बन्ध्यभिन्नः धूमव्यापकवह्नि-सम्बन्ध्यभिन्नः पर्वतः—इत्याकारकाणि शब्दज्ञानानि, तज्जनकत्वे सति वाक्यत्वं प्रतिज्ञाऽऽद्यवयवेषु इति लक्षणसमन्वयः। एवमुदाहरणादिपक्षेऽपि ज्ञेयम्।

२. किमुपनयादेः व्याप्तिप्रदर्शनं प्रयोजनम्? उत पक्षधर्मताप्रदर्शनम्? आहो-स्विद् व्याप्तिविशिष्टपक्षधर्मताज्ञानप्रदर्शनम्? नान्त्यः, लिङ्गपरामर्शकारणत्वस्य निराकृतत्वेन व्याप्तिविशिष्टपक्षधर्मताप्रतिपादनस्य व्यर्थत्वाद्। नाद्यद्वितीयौ, तयोर-वयवत्रयेणैव सम्पत्तेरित्यभिसन्धायाह—न त्विति।

३. खगपुस्तकयोः तु शब्दो न दृश्यते, मूलानुरोधादावश्यकः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवमनुमाने निरूपिते तस्माद् ब्रह्मभिन्ननिखिलप्रपञ्चस्य मिथ्यात्वसिद्धिः। तथा हि, ब्रह्मभिन्नं सर्वं मिथ्या, ब्रह्मभिन्नत्वाद्यदेवं तदेवं यथा शुक्तिरूप्यम्। न च दृष्टान्तासिद्धिः, तस्य साधितत्वात्। न चाप्रयोजकत्वं शुक्तिरूप्यरज्जुसर्पादीनां मिथ्यात्वे ब्रह्मभिन्नत्वस्यैव लाघवेन प्रयोजकत्वात्॥ ५॥

इस प्रकार अनुमान का निरूपण हो जाने पर इस अनुमानरूप प्रमाण से ब्रह्मातिरिक्त सम्पूर्ण प्रपञ्च में मिथ्यात्व की सिद्धि हो जाती है। उसका आकार कह रहे हैं—'ब्रह्मभिन्न सम्पूर्ण प्रपञ्च मिथ्या है, ब्रह्मभिन्न होने के कारण, जो ब्रह्म से भिन्न है, वह मिथ्या है, जैसे कि शुक्ति रजत। इसमें दृष्टान्तासिद्धि दोष भी नहीं दे सकते, क्योंकि शुक्ति-रजत में मिथ्यात्व पूर्व में (प्रत्यक्ष परिच्छेद में) सिद्ध कर दिया गया है। ब्रह्मभिन्नत्वरूप हेतु साध्य की सिद्धि में प्रयोजक नहीं है, यह भी नहीं कह सकते, क्योंकि शुक्ति-रजत रज्जु-सर्प में से लाघव होने के कारण ब्रह्मभिन्नत्व ही मिथ्यात्व प्रयोजक है॥ ५॥

वाक्यत्वं न्यायत्वं, तादृशन्यायजन्यप्रयोज्यं व्याप्तिज्ञानं परार्थानुमानमित्यर्थः। अवयवाश्च कतीत्यपेक्षायामाह—**अवयवाश्चेति**। साध्यतावच्छेदकावच्छिन्नसाध्यविषयताविलक्षणविषयताकबोधाजनकत्वे सति प्रकृतपक्षे प्रकृतसाध्यबोधजनकमहावाक्यैकदेशत्वं प्रतिज्ञाऽवयवत्वम्, यथा पर्वतो वह्निमानित्यादि। साध्यतावच्छेदकावच्छिन्नसाध्यान्वितस्वार्थकतादृशैकदेशत्वं हेत्ववयवत्वम्, यथा धूमादित्यादि। साधनवत्ताप्रयुक्तसाध्यवत्तानुभावकोक्तावयवत्वमुदाहरणावयवत्वं, यथा यो यो धूमवान् स सोऽग्निमान् यथा महानस इत्यादि। प्रकृतोदाहरणोपदर्शितव्याप्तिविशिष्टपक्षबोधजनकन्यायैकदेशत्वमुपनयावयवत्वं, यथा वह्निव्याप्यधूमवांश्चायम्, तथा चायमिति वा। व्याप्तिविशिष्टपक्षधर्महेतुज्ञाप्यसाध्यविशिष्टपक्षबोधकन्यायैकदेशत्वं, तादृशसाध्यबोधकन्यायैकदेशत्वं वा निगमनावयवत्वं यथा तस्मादग्निमानित्यादि। ननु प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपाः पञ्चावयवा इति वदतां नैयायिकानां पक्षमनादृत्याष्टवरमीमांसकानां पक्षाभ्युपगमे को हेतुरित्यत आह—**अवयवत्रयेणैवेति**। तथा च प्रथमपक्षे उपनयनिगमनकृत्यं हेतुप्रतिज्ञाभ्यां द्वितीयपक्षे हेतुप्रतिज्ञाकृत्यं ताभ्यां कर्तुं शक्यम्। अनुमित्युपयोगिज्ञानं च सर्वावयवकृत्यमिति भावः।

निरूपितानुमानस्य प्रकृते उपयोगमाह—**एवमिति**। **तस्माद्**—अनुमानात्। कीदृशं तदनुमानमित्यपेक्षायामाह—**तथा हीति**। पूर्वोक्तपक्षद्वये प्रथम-

---

१. साध्याभाववद्वृत्तिर्हेतुः व्यभिचारी, तेन हेत्वाभासेन अनुमितिर्नोत्पद्यते।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

मिथ्यात्वं[1] च स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वम्। अभिमतपदं वस्तुतः स्वाश्रयाप्रसिद्ध्या असंभववारणाय। याव-

---

पक्षोऽस्मत्संमत इति द्योतयितुं प्रतिज्ञाद्वयवयवत्रयात्मकं वाक्यमाह **ब्रह्मेति।** शुक्तिरूप्यादौ सिद्धसाधनवारणाय—**सर्वमिति।** ब्रह्मणि बाधनिरासाय **ब्रह्माभिन्नमिति।** रज्जुसर्पादौ साध्यसिद्धावपि न सिद्धसाधनम्[2] अनित्ये वाङ्मनसे इत्यत्र अंशतस्सिद्धसाधनस्य परैरप्यङ्गीकृतत्वात्। नन्वसिद्धोऽयं दृष्टान्तः, तन्मिथ्यात्वे प्रमाणाभावात्। अनुमानान्तरस्य तत्र प्रमाणत्वेऽनवस्थापातादित्याशङ्क्य परिहरति—**न चेति। तस्य—दृष्टान्तस्य। साधितत्वात्**—प्रत्यक्षपरिच्छेदे साधितत्वात्। नन्विदमनुमानप्रयोजकं सत्यत्वेऽपि ब्रह्माभिन्नत्वोपपत्तेरित्याशङ्क्य परिहरति—**न चेति।** शुक्तिरजतादीनां मिथ्यात्वे नाविद्यातिरिक्तदोषजन्यत्वं प्रयोजकम् अपि तु ब्रह्माभिन्नत्वं, लाघवात्। तथा च लाघवरूपानुकूलतर्कसत्त्वान्नाप्रयोजकत्वमिति भावः।

ननु शुक्तिरूप्यादौ किं लक्षणं मिथ्यात्वं प्रत्यक्षसिद्धं यदनुमानेन प्रपञ्चे साध्यते? इत्यपेक्षायां मिथ्यात्वलक्षणमाह—**मिथ्यात्वं चेति।** स्वाश्रयत्वेनाभिमते यावति

यथा धूमवान् वह्नेरित्यत्र वह्निरूपहेतुना नानुमितिः। हेतोः साध्याभाववद्वृत्तित्वरूपव्यभिचारशङ्काऽपि अनुमितिः प्रतिबद्ध्यते, यथा धूमोऽस्तु वह्निर्माऽस्त्विति। अनुकूलतर्केण व्यभिचारशङ्कानिवृत्तौ तु प्रतिबन्धापनये पुनर्जायतेऽनुमितिः, यथा यद्ययं निर्वह्निः स्यान्निर्धूमः स्याद् धूमस्य वह्निव्याप्यत्वात्। अस्ति चात्र धूमश्चेद्वह्निनाऽपि भाव्यमिति। तथा प्रकृते ब्रह्माभिन्नत्वमस्तु मिथ्यात्वं माऽस्त्विति व्यभिचारशङ्कया अनुमित्यनुत्पाद इत्याशङ्कामपाकरोत्यनुकूलतर्कप्रदर्शनेन न चेत्यादिना। प्रकृते च ब्रह्माभिन्नत्वमस्तु मिथ्यात्वं माऽस्त्विति व्यभिचारशङ्का तन्निरासस्तु टीकायां स्पष्टः।

१. घटादीनां मिथ्यात्वसिद्धिप्रकार इत्थम्—घटादीनां कपालादिदेशादन्यत्र समवायेन स्थितिनाङ्गीक्रियते कैरपि वादिभिः। ते चेत्कपालादावपि न सन्तीति प्रमाणेनापाद्यतेऽथ च भासमानाः तत एव मिथ्याभूतास्ते सिद्ध्येरन्। यथाहुः 'यदसद् भासमानं तन्मिथ्या स्वप्नगजादिवत्', इति। मिथ्यात्वे चानुमानप्रमाणमुपन्यस्तं तस्य च न प्रत्यक्षेण बाधः शङ्कनीयः, चन्द्रप्रादेशिकत्वग्राहकप्रत्यक्षवद् आगमैर्बाधात्। आगमास्तु नेह नानाऽस्ति किञ्चनेत्याद्याः अनुसन्धेया इति दिक्।

२. न सिद्धसाधनं, पक्षतावच्छेदकनानात्वाभावात्। पक्षतावच्छेदकनानात्वे एव तदभ्युपगमात्। अत एव, अनित्ये० इत्यादिपाठः गपुस्तके उपलभ्यते स च टिप्पणीस्थटीकायां गत इति लभ्यते, मूलपुस्तके तदभावान्न निवेशितोऽत्र।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वदमर्थान्तरवारणाय । तदुक्तम्—

सर्वेषामेव भावानां[1] स्वाश्रयत्वेन सम्मते ।
प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता ॥ इति ॥ ६ ॥

मिथ्यात्व का लक्षण—

अपने आश्रय के रूप से अभिमत जितने भी अधिकरण हैं उनमें रहने वाले अत्यन्ताभाव का प्रतियोगित्व ही मिथ्यात्व है। वस्तुतः आश्रय प्रसिद्ध न होने से असम्भव दोष निवारण के लिए लक्षण में अभिमत पद दिया गया है। और अर्थान्तर के निषेध करने के लिए यावत् पद दिया गया है। इस विषय में श्रीचित्सुखाचार्य भी कहते हैं—

"सभी पदार्थों का आश्रय रूप से जो अभिमत हो उसी में उनका अत्यन्ताभाव रहे तो उस अत्यन्ताभाव की प्रतियोगिता को ही मिथ्यात्व कहते हैं ॥ ६ ॥

स्थितोऽप्यन्ताभावस्तत्प्रतियोगित्वम् । ननु स्वाश्रययावन्निष्ठात्यन्ताभावप्रतियोगित्वमित्येतावदेवास्त्वित्याशङ्क्याह—**अभिमतेति** । यावति स्वाश्रये स्वात्यन्ताभावासम्भवस्तद्वारणाय तदावश्यकम् । तथा च वस्तुतोऽस्वाश्रयेऽपि शुक्त्यादौ स्वाश्रयत्वेनाभिमते वर्तमानो योऽत्यन्ताभावस्तत्प्रतियोगित्वं शुक्तिरूप्यादेरस्तीति तत्सार्थक्यमिति भावः । ननु एतावतैव निर्वाहे यावत् पदं व्यर्थमित्यत आह—**यावदिति** । तथा च यावत्पदाभावे कपिसंयोगाश्रयत्वेनाभिमते वृक्षे मूलावच्छेदेन वर्तमानो यस्तदत्यन्ताभावस्तत्प्रतियोगित्वं शाखावच्छेदेन स्थितस्य कपिसंयोगस्यास्तीति समानाधिकरण्यरूपार्थान्तरसिद्धिस्तद्वारणाय तदावश्यकम् । तद्दाने तु स्वाश्रयत्वेनाभिमते यावति शाखादौ तदत्यन्ताभावासत्त्वान्न दोष इत्यर्थः । अस्मन्मते 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' (तै० २।१) इत्यादिश्रुत्या आकाशादेरपि जन्यत्वावगमात्तस्यापि स्वकारणाश्रितत्वावश्यम्भावाद् न तत्राव्याप्तिः । स्वोक्तलक्षणे चित्सुखाचार्यसम्मतिमाह—**तदुक्तमिति** ।

---

१. भावत्वेन स्वीकृतानां घटादीनाम् आश्रयत्वेनाभिमते कपालादौ विद्यमानस्य घटो नेत्याद्याकारकस्याभावस्य प्रतियोगित्वं घटादेर्मिथ्यात्वमित्यर्थः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्वा[1] अयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी पटत्वात् पटान्तरवदित्याद्यनुमानं मिथ्यात्वे प्रमाणम्। तदुक्तम्—

अंशिनः स्वांशमात्यन्ताभावस्य प्रतियोगिनः।
अंशित्वादितरांशीव दिगेषैव गुणादिषु॥ इति॥ ७॥

अथवा 'यह पट' एतत्तन्तुनिष्ठ अत्यन्ताभाव का प्रतियोगी है, क्योंकि उसमें पटत्व है, दूसरे पट की तरह, यह अनुमान भी मिथ्यात्व में प्रमाण है। इस विषय में भी श्रीचित्सुखाचार्य ने कहा है—"अवयविसमूह अपने अवयवनिष्ठ अत्यन्ताभाव का प्रतियोगी है, क्योंकि वे अवयवी हैं, जैसे कि इतर अवयवी। यही प्रक्रिया गुणादियों के मिथ्यात्व अनुमान में भी समझ लेनी चाहिए॥ ७॥

एवं प्राचीनोक्तमनुमानप्रयोगमुपपाद्य नवीनोक्तमनुमानप्रयोगमाह – **यद्वेति**। तादात्म्यसम्बन्धेनैकावच्छेदेनेत्यपि द्रष्टव्यम्। तथा च पूर्ववन्नार्थान्तरता। एवं व्यधिकरणधर्म्मानवच्छिन्नप्रतियोगिताकत्वमत्यन्ताभावविशेषणं देयं तेन तमादाय नार्थान्तरम्। तथा एतद्दोषवारणाय एतत्कालीनत्वमिति तद्विशेषणं देयम्। न चैतत्तन्तुषु पटसमवाय इति प्रत्यक्षबाध इति वाच्यम्। तस्य प्रत्यक्षस्य भ्रमप्रमासाधारणतया चन्द्रप्रादेशिकत्वप्रत्ययवदप्रामाण्यशङ्काऽस्कन्दितत्वेन बाधितत्वात्। अत्रापि चित्सुखाचार्यसम्मतिमाह—**तदुक्तमिति**। **दिगेषैव**–एष एव मार्गः। रूपं रूपिनिष्ठात्यन्ताभावप्रतियोगि, गुणत्वात् स्पर्शवदित्येवं क्रियादिष्वप्यूहनीयम्।

---

१. पटमात्रं पक्षीकृत्य एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वेऽर्थान्तरता स्यात्, पटान्तरस्य एतत्तन्तुनिष्ठत्वाभावादिति हेतोः अयमिति पक्षविशेषणम्। तन्तुनिष्ठात्यन्ताभावप्रतियोगीत्युक्ते एतत्पटस्यापि तन्त्वन्तरनिष्ठात्यन्ताभावप्रतियोगित्वेन पुनरर्थान्तरतेति एतदिति साध्यविशेषणम्। तन्तुः पटो नेत्यन्योन्याभावेन सिद्धसाधनवारणायात्यन्तपदम्। तार्किकाणामेषा प्रणाली दृष्टान्ते साध्यहेत्वोर्व्यापकव्याप्यभावौ गृहीतौ चेत् सन्दिग्धसाध्ये पक्षे हेतुं दृष्ट्वा साध्यमनुमेयम्। व्याप्यारोपेण व्यापकारोपस्तर्कं इति तेषामभिमानः। तेन च धूमादग्निमत्त्वमनुमिते। तेषामेव प्रक्रियया पठान्तरे दृष्टान्ते पटत्वरूपहेतोः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वरूपस्य साध्यस्य च व्याप्यव्यापकभावेन प्रतिबद्धयोरुपलब्धौ पक्षे चास्मिन्पटे साध्यसंदेहेऽपि पठत्वरूपस्य हेतोर्विद्यमानत्वादनुमानेन तत्सिद्धौ को विरोधस्तार्किकाणां घटादिमिथ्यात्वे इति भावः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न च घटादेर्मिथ्यात्वे सन् घट इति प्रत्यक्षेण बाधः। अधिष्ठानब्रह्मसत्तायास्तत्र विषयतया घटादेः सत्यत्वासिद्धेः। न च नीरूपस्य ब्रह्मणः कथं चाक्षुषादिज्ञानविषयतेति वाच्यम्। नीरूपस्यापि रूपादेः प्रत्यक्षविषयत्वात्। न च नीरूपस्य द्रव्यस्य चक्षुराद्ययोग्यत्वमिति नियमः। मन्मते ब्रह्मणो द्रव्यत्वासिद्धेः। गुणाश्रयत्वं वा द्रव्यत्वमिति [1]तेऽभिमतम्। न हि निर्गुणस्य ब्रह्मणो गुणाश्रयता नापि समवायिकारणता, समवायासिद्धेः। अस्तु वा द्रव्यत्वं ब्रह्मणः, तथाऽपि नीरूपस्य कालस्यव चाक्षुषादिज्ञानविषयत्वेऽपि न विरोधः ॥ ८ ॥

ब्रह्म से भिन्न घटादि सभी पदार्थों में मिथ्यात्वानुमान 'सन् घटः' (घट विद्यमान है) इस प्रत्यक्ष से बाधित है। यह कहना उचित नहीं, क्योंकि वहाँ पर अधिष्ठान ब्रह्म की सत्ता ही विषय के रूप से प्रतीत होने के कारण घटादि में सत्यता सिद्ध नहीं है। यह भी नहीं कह सकते कि रूपरहित ब्रह्म में चाक्षुष ज्ञानविषयता कैसे रहेगी, क्योंकि रूपरहीत रूपादि चाक्षुष प्रत्यक्ष के विषय होते ही हैं। यह नियम भी लागू नहीं किया जा सकता कि रूपरहित द्रव्य का चाक्षुष प्रत्यक्ष नहीं हो सकता, क्योंकि मेरे मत (वेदान्त-सिद्धान्त) में ब्रह्म में द्रव्यत्व सिद्ध नहीं है। गुणों के आश्रय अथवा समवायि कारण को द्रव्य कहते हैं, यह आप (नैयायिकों) को अभीष्ट है। निर्गुण ब्रह्म को गुणों का आश्रय अथवा समवायिकारण नहीं कह सकते, क्योंकि समवाय स्वयं ही असिद्ध है। (अब प्रौढन्याय से कहते हैं) अथवा मान लेते हैं कि ब्रह्म में द्रव्यत्व है—फिर भी नीरूप काल की तरह नीरूप ब्रह्म में भी चाक्षुषज्ञानविषयता रहने में कोई विरोध नहीं है॥ ८ ॥

ननूक्तं मिथ्यात्वानुमानं सन्घट इत्यादि प्रत्यक्षबाधितमित्याशङ्क्य परिहरति—**न चेति**। ननु रूपादिहीनस्य ब्रह्मणश्चाक्षुषादिज्ञानविषयत्वमनुपपन्नमित्याशङ्क्य निषेधयति—**न च नीरूपस्येति**। नीरूपस्य प्रत्यक्षविषयत्वं नास्तीति नियमस्य व्यभिचारमाह—**नीरूपस्यापीति**। विशेषनियममाशङ्क्य परिहरति—**न चेति**। नियमशरीरस्योक्तरूपत्वेऽपि नास्त्यस्माकं क्षतिरित्याह—**मन्मत इति**। ननु कथं ब्रह्मणो द्रव्यत्वं नास्तीति चेत्तत्र तल्लक्षणद्वयाननुगमादित्याह—**गुणेति**। **निर्गुणस्य**—'साक्षी चेता केवलो निर्गुणश्च' (श्वे० ६।११) इत्यादिश्रुत्या निर्गुणत्वेन

---

१. तार्किकस्य तव। २. भाव इति विशेषणमिति पाठः गपुस्तके।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्वा, त्रिविधं सत्त्वम्—पारमार्थिकं व्यावहारिकं प्रातिभासिकं च। पारमार्थिकं सत्त्वं ब्रह्मणः व्यावहारिकं सत्त्वमाकाशादेः, प्रातिभासिकं सत्त्वं शुक्तिरजतादेः। तथा च घटः सन्निति प्रत्यक्षस्य व्यावहारिकसत्त्वविषयत्वेन प्रामाण्यम्। अस्मिन्पक्षे च घटादेर्ब्रह्मणि निषेधो न स्वरूपेण, किन्तु पारमार्थिकत्वेनैवेति न विरोधः। अस्मिन्पक्षे च मिथ्यात्वलक्षणे पारमार्थिकत्वावच्छिन्नप्रतियोगिताकत्वमत्यन्ताभावविशेषणं द्रष्टव्यम्। तस्मादुपपन्नं मिथ्यात्वानुमानमिति ॥ ९ ॥

इत्यनुमानपरिच्छेदः समाप्तः ॥ २ ॥

—:०:—

अथवा (वेदान्त-सिद्धान्त में) तीन प्रकार की सत्ता मानी गयी है—(१) पारमार्थिक, (२) व्यावहारिक और (३) प्रातिभासिक। इनमें पारमार्थिक सत्ता ब्रह्म की है, व्यावहारिक सत्ता आकाशादि प्रपञ्च की है और प्रातिभासिक सत्ता शुक्ति-रजतादि की है। जहाँ घट विद्यमान है (घटः सन्) ऐसा प्रत्यक्ष होता है वहाँ पर घट की व्यावहारिक सत्ता को विषय करने के कारण यह प्रत्यक्ष प्रमाण है। इस पक्ष में ब्रह्म में घटादि का जो निषेध किया जाता है वह स्वरूप से नहीं है, परन्तु पारमार्थिक रूप से, इसलिए कोई विरोध नहीं है। इस दशा में मिथ्यात्व के लक्षण में पारमार्थिकत्व से अवच्छिन्न प्रतियोगिताकत्व अत्यन्ताभाव का विशेषण समझना चाहिए। अतएव मिथ्यात्व का अनुमान उपपन्न हुआ है ॥ ९ ॥

अनुमान परिच्छेद का भाषा अनुवाद समाप्त हुआ ॥ २ ॥

—:०:—

बोधितस्य। अस्तु यथा कथंचिद् ब्रह्मणोऽपि द्रव्यत्वं तथाऽपि न दोष इत्यभ्युपेत्याप्याह—**अस्तु चेति**। अस्मिन्काले घटो नास्तीति प्रतीतिबलात्कालस्येन्द्रियवेद्यत्वं यथा स्वीकृतमन्वरमीमांसकैस्तथा तदनन्यथासिद्धप्रतीतिबलाद् ब्रह्मणश्चाक्षुषत्वमस्माभिरप्यङ्गीक्रियते। तथा च ब्रह्मव्यतिरिक्तचाक्षुषनाशमेव महत्त्वे सत्युद्भूतरूपवत्त्वं प्रयोजकमिति भावः।

नन्वेवं तर्ह्याकाशे बलाकेति प्रतीतिबलादाकाशस्यापि चाक्षुषता स्यादित्यरुचेराह—**यद्वेति**। पारमार्थिकत्वव्यावहारिकत्वप्रातिभासिकत्वभेदात्त्रिविधम्। विषयभेदादविरोध इत्याह—**तथा चेति**। सत्त्वत्रैविध्ये सतीत्यर्थः। ननु अस्मिन्पक्षे निषेधप्रतियोगिनोः सामानाधिकरण्यं सिद्धयति, न तु घटादिर्मिथ्यात्वमित्या-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथोपमानपरिच्छेदः ३

[1]अथोपमानं निरूप्यते। तत्र सादृश्यप्रमाकरणमुपमानम्। तथा हि; नगरेषु दृष्टगोपिण्डस्य पुरुषस्य वनंगतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीतिः, अयं पिण्डो गोसदृश इति। तदनन्तरं भवति निश्चयः, अनेन सदृशी मदीया गौरिति। तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणं गोनिष्ठगवयसादृश्यज्ञानं फलम्।

अब उपमान का निरूपण किया जा रहा है। सादृश्य-विषयक प्रमा के करण को उपमान कहते हैं। वह इस प्रकार है—'नगरों में जिस पुरुष ने गोपिण्ड का दर्शन किया, अनन्तर वह जङ्गल में गया और वहाँ पर गवयपिण्ड के साथ इन्द्रिय-सन्निकर्ष होने से 'यह पिण्ड गौ के सदृश है' ऐसी प्रतीति हुई। उसके बाद 'इसके सदृश मेरी गौ है' ऐसा निश्चय हुआ। यहाँ पर अन्वय-व्यतिरेक से गवय में रहने वाला गौ के सादृश्य का ज्ञान करण है तथा गौ में रहने वाला गवय के सादृश्य का ज्ञान (उपमिति रूप) फल है।

शङ्कयाह—**अस्मिन्निति। स्वरूपेण**—व्यावहारिकत्वेन रूपेण। तथा चेतत्पक्षे मिथ्यात्वलक्षणे इदं विशेषणं देयमित्याह—**अस्मिन्निति।** मिथ्यात्वानुमानोपपादनमुपसंहरति—**तस्मादिति।**

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्त-
वंशावतंसरामकुमारसुनुधनपतिसूरिसुतशिवदत्तविरचितायां
परिभाषाऽर्थदीपिकायामनुमानपरिच्छेदः समाप्तः ॥२॥

—: ० :—

अथ क्रमप्राप्तमुपमाननिरूपणं प्रतिजानीते—**अथेति।** अनुमाननिरूपणानन्तरमित्यर्थः। **तत्रेति।** अनुमाननिरूपणानन्तरनिरूपणविषयीभूतोपमाने सतीत्यर्थः। **अत्राप्युपमीयतेऽनेनेत्युपमानमितिव्युत्पन्न उपमानशब्दो लक्षणम्, अव्युत्पन्नस्तु लक्ष्यमित्याशयेनाह—सादृश्येति।** सादृश्यप्रमाया—उपमितिप्रमायाः करणसाधारण-

---

१. प्रत्यक्षमेवैकं प्रमाणमिति चार्वाकाः, अनुमानमपीति वैशेषिकाः, आगमेन सह त्रीणीति साङ्ख्याः, उपमानेन सह चत्वारीति नैयायिकाः, अर्थापत्त्या सह पञ्चेति

Nagarjun Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कारणमुपमानमित्यर्थः । ननूपमानस्य प्रत्यक्षाद्यन्तर्भावान्न पृथक्प्रमाणतेति साङ्ख्यादि-भिरुक्तत्वात्कथमुपमानस्य सादृश्यज्ञानकरणतेत्याशङ्क्याह—तथा हीति । यथोपमा-नस्य सादृश्यप्रमाकरणत्वं तथा प्रदर्श्यते इत्यर्थः । गोसदृशः—गोभिन्नत्वे सति गोगतभूयोधर्मवान् । तत्र—निश्चयद्वयमध्ये । अयं पिण्डो गोसदृश इति गोनिरूपितगव-यपिण्डनिष्ठसादृश्यज्ञानं करणम् । अनेन सदृशी मदीया गौरिति गवयपिण्डनिरूपित-गोनिष्ठसादृश्यज्ञानं फलम् । प्रथमज्ञाने जाते सति द्वितीयज्ञानस्योपदर्शनात्तद्विना तदभावादित्यन्वयव्यतिरेकाभ्यां प्रथमज्ञानस्योपमानत्वं द्वितीयज्ञानस्योपमितित्व-मित्यर्थः ।

प्राभाकराः, अनुपलब्ध्या सह षडिति भाट्टवेदान्तिनौ, सम्भवैतिह्याभ्यामष्टाविति पौराणिकाः, चेष्टया सह नवेत्यालङ्कारिकाः, इति सन्ति तत्तत्तीर्थकराणां विप्रति-पत्तयः । तत्र साङ्ख्यान्तानां मतनिरासपूर्वकं स्वसिद्धान्तं प्रतिजानीते—अथेति ।

अत्र सादृश्यज्ञानमेव प्रमाणं सादृश्यप्रमैव च प्रमितिरिति भवति पिपठिषूणां प्रातिकूल्यमिति किञ्चिद्विचारयामः । ग्रामे दृष्टगुः पुरुषः कदाचिद्वनं गतः गवयेनेन्द्रिय-सन्निकर्षे जाते प्रत्येति अयं पशुः गोसदृश इति । पश्चादुपमिनोति—अनेन सदृशी मदीया गौरिति । तत्र द्वितीयं ज्ञानमुपमितिप्रमेति व्यपदिश्यते, तदुत्पादकं प्रथमं सादृश्यज्ञानम् 'अयं पशुः गोसदृश' इति तत्तु उपमानं प्रमाणमिति । (उपमितिप्रमा सादृश्यप्रमेति पर्यायान्तरम्) इयं सादृश्यप्रमा नेन्द्रियादिजन्या, अतस्तस्याः प्रत्यक्षा-दितोऽतिरिक्तत्वमेव । एवञ्च तस्याः करणं सादृश्यज्ञानमपि पृथक् प्रमाणमिति सिद्धम् । उपमितिश्च सादृश्यज्ञानत्वेन सादृश्यज्ञानजन्येति न उपमितिजन्यानुव्यव-सायादावतिव्याप्तिरित्यनुसन्धेयम् । उपमितिकरणत्वं च सादृश्यज्ञाने असाधारण-कारणत्वेन विवक्षितं न तु व्यापारवत्त्वघटितमिति बोध्यम् । गवयनिष्ठसादृश्यज्ञान-स्योपमितौ जनयितव्यायां व्यापाराभावात् इत्येके ।

विश्वनाथस्तु—

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् ।
सादृश्यधीर्गवादीनां या स्यात्सा करणं मतम् ॥

गोसदृशो गवयपदवाच्य इति श्रुत्वा वनं गतस्य दृष्टे गवयपिण्डे तत्र गोसादृश्य-दर्शनं जातं तदुपमितिकरणम् । तदनन्तरं गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थ-स्मरणं जायते तदेव व्यापारः । तदनन्तरं गवयो गवयपदवाच्य इति ज्ञानं यज्जायते तदुपमितिः, न त्वयं गवयपदवाच्य इति, गवयान्तरे शक्तिग्रहाभावप्रसङ्गादिति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न चेदं प्रत्यक्षेण संभवति, गोपिण्डस्य तदेन्द्रियासन्निकर्षात्। नाप्यनुमानेन, [1]गवयनिष्ठगोसादृश्यस्यातल्लिङ्गत्वात्।

उक्त समय गोपिण्ड के सहित इन्द्रियसन्निकर्ष न रहने के कारण यह (उपमिति ज्ञान) प्रत्यक्ष प्रमाण के द्वारा सम्भव नहीं है। न कि अनुमान से भी इस प्रकार का ज्ञान हो सकेगा, क्योंकि गवय में रहने वाला गो-सादृश्य उक्त उपमिति का लिङ्ग नहीं हो सकता।

न चास्य प्रत्यक्षेण गतार्थतेत्याह—न चेति। इदं—गवयप्रतियोगिकगोनिष्ठसादृश्यज्ञानम्। तदा—गवयपिण्डेनेन्द्रियसन्निकर्षसमये। तथा चेन्द्रियासन्निकृष्टगोपिण्डनिष्ठसादृश्यज्ञानं न प्रत्यक्षप्रमाणफलमित्यर्थः। एतेन यत्तु[2] गवयस्य चक्षुःसन्निकृष्टस्य गोसादृश्यज्ञानं तत्प्रत्यक्षमेव, अत एव स्मर्यमाणायां गवि गवयसादृश्यज्ञानं प्रत्यक्षम्, न ह्यन्यद्गवि सादृश्यमन्यच्च गवये भूयोऽवयवसामान्ययोगो जात्यन्तरवर्ती जात्यन्त-

---

जगाद। परञ्च दृष्टगोपिण्डस्य गवयो गोसदृशो भवतीत्यश्रुताप्तवाक्यस्यापि वनं गतस्य गवयेनेन्द्रियसंयोगानन्तरं भवति प्रतीतिः अयं पिण्डो गोसदृश इति, अनेन सदृशी मदीया गौरिति चोपमितिः। तथा चातिदेशवाक्यार्थस्मरणरूपा मध्ये व्यापारकल्पना निष्प्रयोजना। गवयान्तरे शक्तिग्रहोऽपि सादृश्यविशिष्टलिङ्गाद्वा भविष्यतीति न मध्ये व्यापारापेक्षति। तथा च विश्वनाथमते अनुभवापलापोऽपि दृश्यते। अनुभवस्तु अयं पिण्डो गोसदृश इत्येव भवति, न तु गवयो गवयपदवाच्य इति। यथा गोगवयगजाजादिषु पुरःस्थितेषु कोऽपि पृच्छेद् गवयपदवाच्यः क इति, तत्र गवयो गवयपदवाच्य इति ब्रुवन्प्रतिवक्ता उन्मत्तवदुपेक्षतैव, अयं गवयपदवाच्य इत्येव तत्र प्रतिवक्तव्यं भवति। तथैव गोनिष्ठसादृश्यज्ञानोत्तरमपि अयं गवय इति, अयं मदीयगोसदृश इति वा प्रमा उत्पद्यत इति संक्षेपः।

१. गवयेति। दृष्टान्ते साध्यहेत्वोः सहचारदर्शनेन व्याप्तिग्रहे सति पक्षे हेतुदर्शनेन साध्यविषयाऽनुमितिरुत्पद्यतेऽनुमानेन। परञ्चात्र साध्यहेत्वोः साहचर्यमेव नास्तीत्यनुमानानवकाशः। सादृश्यं हि प्रतियोग्यनुयोगिसापेक्षो धर्मविशेषः। ततो गवयनिष्ठगोसादृश्यं गवये तद् गवि नास्ति, गोनिष्ठं गवयसादृश्यं गवि वर्तते तद् गवये नास्तीति साहचर्याभावादेव गवयनिष्ठगोसादृश्यस्य तल्लिङ्गत्वाभावान्नानुमानावकाश इति भावः। अनुमानप्रकारस्तु टीकायां द्रष्टव्यः।

२. यत्त्विति। ईश्वरकृष्णीयपञ्चमकारिकायाः साङ्ख्यतत्त्वकौमुद्यां वाचस्पत्युक्तिरियम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

नापि मदीया गौरेतद्गवयसदृशी, एतन्निष्ठसादृश्यप्रतियोगित्वाद्, यो यद्गतसादृश्यप्रतियोगी, स तत्सदृशः, यथा मैत्रनिष्ठसादृश्यप्रतियोगी चैत्रः मैत्रसदृश इत्यनुमानात्तत्संभव इति वाच्यम्। एवंविधानुमानावतारेऽप्यनेन सदृशी मदीया गौरिति प्रतीतेरनुभवसिद्धत्वात्। उपमिनोमीत्यनुव्यवसायाच्च। तस्मादुपमानं मानान्तरम्।

इत्युपमानपरिच्छेदः ॥ ३ ॥

—: ० :—

मेरी गौ इस गवय के समान है, इस गवय में रहने वाले सादृश्य का प्रतियोगी होने से 'जो जिसमें रहने वाले सादृश्य का प्रतियोगी होता है, वह उसके सदृश होता है। जैसे कि मैत्रनिष्ठ सादृश्य का प्रतियोगी चैत्र मैत्र के सदृश है। इस अनुमान से भी पूर्वोक्त उपमिति ज्ञान का होना सम्भव नहीं, क्योंकि-इस प्रकार अनुमान के प्रयोग के बिना भी 'इसके समान मेरी गौ है' ऐसी प्रतीति अनुभवसिद्ध है। 'मैं उपमान कर रहा हूँ' इस प्रकार अनुव्यवसाय होता है, (न कि अनुमान कर रहा हूँ' इस प्रकार)। अतएव उपमान (प्रत्यक्ष और अनुमान से) भिन्न प्रमाण सिद्ध हुआ ॥ ० ॥

उपमान परिच्छेद का भाषा अनुवाद समाप्त हुआ ॥ ३ ॥

रसादृश्यमुच्यते सामान्ययोगश्चैकः स चेदगवये प्रत्यक्षो गव्यपि तथेति नोपमानस्य प्रमाणान्तरत्वमस्तीति[1] प्रयुक्तम्, प्रोक्तविधया सादृश्यैकत्वेऽपि प्रतियोगिधर्मिभेदेन भेदाभ्युपगमादिन्द्रियसन्निकृष्टगवयनिष्ठसादृश्यज्ञानस्य प्रत्यक्षत्वेऽपि तदसन्निकृष्टगोनिष्ठस्य तस्य प्रत्यक्षत्वासम्भवात्। नाप्यनुमानेनास्य गतार्थतेत्याह—**नापीति**। न हि मदीया गौरेतन्निरूपितसादृश्यवती गोनिरूपितसादृश्यवत्त्वादस्येत्यनुमातुं शक्यं, गोनिरूपितगवयनिष्ठसादृश्यस्य गव्यवर्तमानत्वेन पक्षावृत्तितया तल्लिङ्गत्वाभावादित्याह—**गवयनिष्ठेति**।

अनुमानान्तरेण तत्सम्भवमाशङ्क्य परिहरति—**नापीति**। **तत्सम्भवः**—गवयनिरूपितगोनिष्ठसादृश्यप्रमासम्भवः। अस्त्वेवं यथाकथंचिदनुमानोत्थानं तथाऽपि गोनिष्ठं सादृश्यं नानुमानप्रमेयं तथा भूतानुमानानुत्थानेऽपि निरुक्तज्ञानस्य सर्वानुमानसिद्धत्वादनुमानस्यान्वयव्यतिरेकाभ्यां तत्करणतासिद्धेः। अन्यथा यत्र यत्रानुमानावतरणसम्भवस्तस्य तस्यानुमानप्रमेयत्वे प्रत्यक्षसिद्धस्य घटादेरपि तत्प्रमेयतया

---

१. इति तत्प्रत्युक्तमिति। अत्र यत्तु इत्यनुरोधात् तच्छब्दवता पाठेन भाव्यम्। अथवा अध्याहार्यं तत् पदम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथागमपरिच्छेदः ४

[1]अथागमो निरूप्यते। यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्। वाक्यजन्यज्ञाने च आकाङ्क्षा-योग्यताऽऽसत्तयस्तात्पर्यज्ञानं चेति चत्वारि कारणानि ॥ १ ॥

अब आगम (शाब्द) प्रमाण का निरूपण किया जाता है। जिस वाक्य के तात्पर्यविषयीभूत-पदार्थद्वय के सम्बन्ध अन्य प्रमाणों से बाधित नहीं होता हो वह वाक्य प्रमाण कहा जाता है। वाक्यजन्य-ज्ञान में आकाङ्क्षा, योग्यता, आसत्ति और तात्पर्यज्ञान, ये चार कारण माने जाते हैं। १ ॥

तत्सिषाधयिषया सर्वत्रायं घटः कम्बुग्रीवादिमत्त्वाद् घटान्तरवदित्येवमादिनाऽनुमान-सम्भवात्प्रत्यक्षप्रमाणस्याप्यनुमानेऽन्तर्भावः स्यादित्याशयेनाह–**एवंविधेति**। अनुव्य-वसायादपि सादृश्यज्ञानमुपमानफलमित्याह–**उपमिनोमीत्यनुव्यवसायाच्चेति**। एतेन योऽप्ययं गोसदृशस्य गवयशब्दो वाचक इति प्रत्ययः सोऽप्यनुमानमेव। यो हि शब्दो यत्र वृद्धैः प्रयुज्यते सोऽसि वृत्त्यन्तरे तस्य वाचको यथा गोशब्दो गोत्वस्य, प्रयुज्यते चैष गवयशब्दो गोसदृश इति तस्यैव वाचक इति प्रत्युक्तम्। अत एव न तज्ज्ञानमागमस्यापि फलं गवयसदृशी मदीया गौरिति वाक्यमश्रुतवतोऽपि तथाभूत-ज्ञानोत्पत्तिदर्शनात्तस्मादुपमानं न प्रत्यक्षाद्यन्तर्गतमित्युपसंहरति–**तस्मादिति**।

इति श्रीपरमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तात्रेय-तंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तकृतायां वेदान्तपरिभाषाऽर्थदीपिकायामुपमानपरिच्छेदः समाप्तः ॥ ३ ॥

क्रमप्राप्तमागमनिरूपणं प्रतिजानीते—**अथेति**। उपमाननिरूपणानन्तरं शब्दो निरूप्यत इत्यर्थः। तत्रागमप्रमाणं लक्षयति—**यस्येति**। मानान्तराबाधिततात्पर्यगोचरीभूतपदार्थसंसर्गबोधकवाक्यं शब्दप्रमाणमित्यर्थः। शब्दसमानार्थके प्रमाणान्तरेऽतिव्याप्तिवारणायोक्तं—**वाक्यस्येति**। वह्निना सिञ्चेदिति

---

१. अत्र आगमप्रमाप्रमाणविषयमधिकृत्य पिपठिपूणामुपकाराय किञ्चिद्विचारयामः। केचनान्तेवासिनः 'वत्तसम्बधान' इत्यादिवाक्यश्रवणं यज्जातं तदेव शब्दं ज्ञानमिति,

Nagarjun Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाक्यस्य प्रमाणतानिरासायोक्तं—**मानान्तरेण न बाध्यते इति**। स प्रजापतिरात्मनो वामुदखिदत्यादावव्याप्तिवारणाय—तात्पर्यविषयीभूतेत्युक्तम्। **मानान्तरेण** इत्यस्य सजातीयप्रमाणान्तरेणेत्यर्थः। साजात्यं च व्यावहारिकतत्त्ववेदकत्वेन बोध्यम्, तेन पारमार्थिकतत्त्ववेदकैः 'नेह नानास्ति किंचन' (क० २–१) इति वेदान्तैः घटानयनादिसंसर्गस्य यागस्वर्गादिसाध्यसाधनभावस्य[1] च बाधेऽपि न क्षतिः। एतेनानुमानात्पृथक्शब्दमनङ्गीकुर्वन्तो वैशेषिकाः पराकृता वेदितव्याः। ते हि लौकिकानि गामानयेत्यादीनि, वैदिकानि 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादीनि तात्पर्यविषयपदार्थसंसर्गप्रमापूर्वकाणि योग्यतासत्तिमत्पदकदम्बकत्वात्पटमानयेत्यादिवदित्याद्यनुमानेनैव शब्दार्थसिद्धेः शब्दो न पृथक् प्रमाणमिति वदन्ति। कथमागमोऽनुमानात्पृथक् प्रमाणमित्याशङ्क्य योग्यतादिसहकारिजनितज्ञानस्यानुमानफलत्वाभावात्तथाभूतज्ञानजनकं वाक्यं पृथक् प्रमाणमवश्यमभ्युपेयमित्याशयेनाह **वाक्यजन्यज्ञाने चेति**। तथा चासत्यपि व्याप्तिज्ञाने विद्यमानेष्वाकाङ्क्षादिषु संसर्गज्ञानोपलम्भान्नागमस्यानुमानेऽन्तर्भावः कल्पनेनानुमानप्रमाणेनैव निर्वाहे पृथक् प्रमाणं न कल्पनीयमिति यद्याग्रहस्तर्हि मनसैव कल्पनेन प्रत्यक्षप्रमाणेन निर्वाहादनुमानमप्यतिरिक्तं प्रमाणं नाभ्युपेयम्। यद्यनुमिनोमीत्यनुव्यवसायबलादभ्युपेयते, तर्हि शब्दादमुमर्थं जानामीत्यनुव्यवसायबलादागमोऽवश्यमभ्युपगन्तव्य इति भावः। तात्पर्यज्ञानस्य बहुवादिभिरनङ्गीकारात्पृथगुपादानम्।

तथा श्रुतं वाक्यमेव शब्दप्रमाणमिति चावगच्छन्ति। परन्तु तदुभयमपि भ्रम एव। तस्य श्रवणस्य श्रोत्रजस्य प्रत्यक्षप्रमात्वात् तत्करणमपि श्रोत्रमेव तत्तु प्रत्यक्षप्रमाणमेवेति। शाब्दी प्रमा तु मानान्तराबाधिततात्पर्यविषयीभूतस्य संसर्गस्य या प्रमा सैव। तथा च वाक्यश्रवणानन्तरम् अमन्तवत्सरूपप्रातिपदिकस्य आख्यातान्तवधेश्च 'वत्सकर्मकवन्यनक्रियाबोधकत्वम्' इत्येवंरूपा वाक्यार्थवाक्ययोः बोध्यबोधकभावरूपा या सा शाब्दी प्रमा। तस्याः करणमपि उक्तसंसर्गबोधकवाक्यज्ञानमेव। तस्मिन् ज्ञाने च आकाङ्क्षा-योग्यता-आसत्तयः तात्पर्यज्ञानञ्चेति चत्वारि सहकारिकारणानीति। तथा च वाक्यज्ञानस्यैव प्रमाणत्वेऽपि प्रकारविषया वाक्ये प्रमाणत्वव्यवहार इति ध्येयम्।

१. यागादेः स्वर्गादेश्च यः साध्यसाधनभावः संसर्गः, तस्य च 'नेह नानास्ति किंचन' इत्यादिश्रुत्या बाधेऽपि न क्षतिः—नाव्याप्तिः। तस्य पारमार्थिकतत्त्ववेदिकायाः व्यावहारिकतत्त्ववेदकैः ज्योतिष्टोमादिवाक्यैः साजात्याभावादित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा[1]। क्रियाश्रवणे कारकस्य कारकश्रवणे क्रियायाः करणश्रवणे इतिकर्तव्यतायाश्च जिज्ञासाविषयत्वात्[2]। अजिज्ञासोरपि[3] वाक्यार्थबोधाद् योग्यत्वमुपात्तम्। [4]तदवच्छेदकं च क्रियात्वकारकत्वादिकमिति नातिव्याप्तिः गौरश्व इत्यादौ। [5]अभेदान्वये च समानविभक्तिकप्रतिपाद्यत्वं तदवच्छेदकमिति तत्त्वमस्यादिवाक्येषु नाव्याप्तिः॥ २॥

उनमें पदार्थों की परस्पर जिज्ञासा में विषय बनने की योग्यता का नाम आकाङ्क्षा है। क्योंकि क्रिया का श्रवण होने पर कारक की, कारक के सुनने पर क्रिया की और करण को सुनने पर इतिकर्त्तव्यता की जिज्ञासा होती है। जिज्ञासारहित पुरुष को भी वाक्यार्थबोध के लिए योग्यत्व पद दिया गया है। उस योग्यता के अवच्छेदक क्रियात्व कारकत्व आदि है। इसलिए गौ, अश्व, पुरुष इत्यादि पदसमूह में आकाङ्क्षा के लक्षण की अतिव्याप्ति नहीं है। ('नीलो घटः' 'तत्त्वमसि' इत्यादि) अभेदान्वय-प्रतिपादक वाक्य में समान विभक्ति वाले पदों का प्रतिपाद्यत्व ही उक्त योग्यता का अवच्छेदक है। इसलिए तत्त्वमसि इत्यादि महावाक्य में भी समान-विभक्तिक पद प्रतिपाद्यत्वरूप योग्यतावच्छेदक के उपस्थित रहने से अव्याप्ति नहीं है॥ २॥

क्रमेणाकाङ्क्षादिस्वरूपमाह—**तत्रेति**। आकाङ्क्षादिषु चतुर्षु कारणेषु मध्ये। कुत एतदित्याशङ्क्य क्रियादिश्रवणे कारकादेर्जिज्ञासाविषयत्वोपलम्भात्पदार्थानां

---

१. गामानयेत्यत्र लक्षणसमन्वयः, आनयेति श्रवणे कर्मणो जिज्ञासाविषयत्वं गामित्युक्ते क्रियायाः, तथा च परस्परस्य कर्मणः क्रियायाश्च या जिज्ञासा श्रोतुः, तद्विषयत्वं कर्मक्रिययोश्चेति।

२. तत्र लक्षणसमन्वय इति शेषः।

३. ननु गामानयेति श्रुतवतां सर्वेषान्न जिज्ञासा भवति, तथा च येषां जिज्ञासा नास्ति तेषां जिज्ञासाविषयत्वमपि पदार्थानां नास्तीत्यव्याप्तिरिति चेन्न। तान् प्रत्यपि तद्योग्यत्वं वर्तते, अतो नाव्याप्तिरिति योग्यत्वपदप्रयोजनेन प्रथयति।

४. अव्याप्ति योग्यत्वपददानेन निरस्य योग्यतावच्छेदकत्वविवक्षया अतिव्याप्तिं निरस्यति—तदवच्छेदकं चेति। क्रियात्वादेरवच्छेदकत्वविवक्षणेन गौरश्वः पुरुषो हस्तीत्यादौ कारकत्वाभावान्नाकाङ्क्षा। कारकत्वं च क्रियाजनकत्वं करोतीति कारक इति व्युत्पत्त्या कारकस्य कर्तरि ण्वुलवत्त्वात्, तथा च गौरश्वः इत्यादौ शवादिपदानां क्रियाजनकत्वाभावेन कारकत्वाभावाद् आकाङ्क्षाविरह इति।

५. ननु गौरश्व इत्यादिषु अतिव्याप्तिनिरासार्थमवच्छेदकस्य क्रियात्वादेर्विवक्षायां

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

एतादृशाकाङ्क्षाऽभिप्रायेणैव बलाबलाधिकरणे 'सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इत्यत्र वैश्वदेवयागस्यामिक्षाऽन्वितत्वेन न वाजिनाकाङ्क्षेत्यादिव्यवहारः ॥ ३ ॥

(परिभाषाकारोक्त आकाङ्क्षा के लक्षण—जैसा ही मीमांसकों को भी इष्ट है। इसलिए) आकाङ्क्षा के इस प्रकार लक्षण के अभिप्राय से ही (मीमांसा-दर्शन के) बलाबलाधिकरण में 'वह आमिक्षा विश्वदेव देवता सम्बन्धी है और वाजिन द्रव्य वाजी देवता सम्बन्धी है' यहाँ पर वैश्वदेव याग का अन्वय आमिक्षा के साथ हो जाने से उसे वाजिन द्रव्य की आकाङ्क्षा नहीं रह जाती। अतएव वैश्वदेव याग में वाजिन का अन्वय नहीं होता है—इत्यादि व्यवहार देखा गया है ॥ ३ ।

परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षास्वरूपमित्याह क्रियेति। आनयेति क्रियायाः श्रवणे घटमिति कारकस्य जिज्ञासाविषयत्वम्, घटमिति कारकस्य श्रवणे आनयेति क्रियायाः, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति स्वर्गकरणश्रवणे समिधो यजति इडो यजतीत्यादीतिकर्तव्यतायास्तच्छ्रवणे करणस्य चेत्यर्थः। ननु लाघवादावश्यकत्वाच्च विषयत्वपर्यन्तमेवाऽऽकाङ्क्षालक्षणमस्तु किं योग्यत्वोपादानेनेति चेत्तत्राह—**अजिज्ञासोरपीति**। तथा च जिज्ञासारहितस्य वाक्यजन्यज्ञाने पदार्थानां परस्परजिज्ञासाविषयत्वाभावेऽपि तद्योग्यत्वसत्त्वान्नाव्याप्तिरित्यर्थः। ननु अत्र सास्तीत्याकाङ्क्षाग्राहकं तदवच्छेदकं किमित्याकाङ्क्षायामाह—**तदिति**। तथा च गौरश्व इत्यादौ क्रियात्वादेस्तदवच्छेदकस्याभावादाकाङ्क्षाऽसत्त्वान्नातिव्याप्तिरित्यर्थः। ननु तत्सहितेषु नीलमुत्पलं तत्त्वमसीत्यादिवाक्येष्वाकाङ्क्षावच्छेदकरहित्यादव्याप्तिरित्याशङ्क्याह—**अभेदान्वय इति**। अभेदेनान्वयो यत्र तत्त्वमस्यादिवाक्येऽवच्छेद्ययोग्यत्वलक्षणाकाङ्क्षाया अनुगतत्वादवच्छेदकाऽननुगमो न दोषावह इति मन्तव्यम्।

नन्वन्वयबोधाभाव एवाकाङ्क्षा किं न स्यात्तस्याः प्रागभावात्मकतया शाब्दज्ञानकारणत्वेन कल्पत्वादित्याशङ्क्य[1] वंविधाकाङ्क्षाऽभिप्रायेणैव मीमांसकैः श्रुति-

---

सोऽयं देवदत्तः तत्त्वमसीत्यादिवाक्येषु क्रियात्वादेरभावात्पुनरप्यव्याप्तिरिति चेन्न। तत्र समानविभक्तिकपदप्रतिपाद्यत्वरूपस्यावच्छेदकस्य सत्त्वात्। न च तथात्वे गौरश्व इत्यादावपि प्रथमाविभक्त्यन्तपदप्रतिपाद्यत्वसत्त्वात् पुनरतिव्याप्तिरिति शङ्क्यम्, गवाश्वादेरभेदस्य प्रत्यक्षबाधितत्वेन तदभेदे योग्यताऽभावाद् इत्याद्यनुसन्धेयम्।

१. एवं विधेति। पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वरूपाया आकाङ्क्षाया अभिप्रायेण, न तु अन्वयबोधाभावरूपाया आकाङ्क्षाया इत्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिङ्गादिबलाबलाधिकरण आकाङ्क्षाया व्यवहृतत्वान्नैवमित्याह–**एतादृशेति**। तथा च तृतीयाध्यायतृतीयपादस्थजैमिनिसूत्र 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति। अत्र श्रुत्यादीनामेकविषयत्वसमवायेन विरोधे सति कस्य प्राबल्यं कस्य दौर्बल्यमिति चिन्त्यते। तत्र निरपेक्षो रवः श्रुतिः, यथा व्रीहीनवहन्तीत्यत्र क्रियाफलभागित्वं कर्मत्व बोधयन्ती द्वितीया श्रुतिर्निरपेक्षैव व्रीहीणामवघातशेषत्वं प्रतिपादयति। अर्थविशेषप्रकाशनसामर्थ्यं लिङ्गम्, यथा बर्हिर्देवसदनं दामीत्यस्य मन्त्रस्य लवनार्थप्रकाशकतया बर्हिर्लवने विनियोगः। परस्पराकाङ्क्षावशात्क्वचिदेकस्मिन्नर्थे पर्यवसितानि पदानि वाक्यम्, यथा 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये[1] जुष्टं निर्वपामि' इत्यत्र लिङ्गेन निर्वापे विनियुज्यमानस्य समवेतार्थभागस्यैकवाक्यबलेन देवस्य त्वेत्यादिभागस्य विनियोगः। लब्धवाक्यभावानां पदानां कार्यान्तरापेक्षया वाक्यान्तरेण सम्बन्धे आकाङ्क्षापर्य्यवसन्नं प्रकरणम्, यथा समिधो यजतीत्यादेर्दर्शपूर्णमासकथनम्भावाकाङ्क्षायां पठनाच्छेषत्वम्। क्रमः स्थानमनेकस्यान्यतस्य सन्निधिविशेषाम्नातम्, यथा दध्निरसीत्यत्राग्नेयाग्नीषोमीयोपांशुयागाः क्रमेण ब्राह्मणे विहिता मन्त्रभागेऽपि क्रमेण मन्त्रत्रयं पठितं तत्राग्नेयाग्नीषोमीययोर्लिङ्गेनैव द्वयोर्विनियोगसिद्धिः। [2]दध्निरसीत्यत्र तु न लिङ्गादिविनियोजकमस्ति, किन्तु यस्मिन्प्रदेशे ब्राह्मणे उपांशुयागविधानं तस्मिन्नेव प्रदेशे मन्त्रेऽप्यस्य पाठ इति क्रमादुपांशुयागानुमन्त्रणेऽस्य विनियोगः। योगबलं समाख्या। यथा हौत्रम् औद्गात्रमित्यादियोगबलेन हौत्रादिसमाख्यानि कर्माणि होत्रादिभिरनुष्ठेयानि। प्रकृते श्रुतिवाक्यविरोधे वाक्यदौर्बल्योदाहरणं 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इति। तत्र वाजिनस्य किं विश्वेदेवाङ्गत्वं किं वा वाजिसञ्ज्ञकदेवताऽङ्गत्वमिति संशये वाजमन्नमामिक्षा तदेषामस्तीति व्युत्पत्त्या वाजिपदस्य विश्वेदेवपरत्वाद् वाजिभ्यो वाजिनमिति वाक्याद्वाजिनस्य विश्वेदेवदे-

---

१. हस्ताभ्यामित्यन्तो याजुषमन्त्रः, अग्नये जुष्टं निर्वपामीति ब्राह्मणवाक्यम्। अनयोर्मन्त्रब्राह्मणयोः परस्पराकाङ्क्षावशाद् एकस्मिन्निर्वापरूपेऽर्थे पर्यवसितपदवत्त्वं वाक्यत्वम्। तथा च वाक्यप्रमाणेन देवस्य त्वेत्यादेर्मन्त्रस्य निर्वापे विनियोगः।

२. दध्निर्नामासीति पाठान्तरम्। न तल्लिङ्गादीत्यपि पाठः खपुस्तके। दध्नि-र्घृतकमायुधमिति माधवः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु तत्रापि वाजिनस्य जिज्ञासाऽविषयत्वेऽपि तद्योग्यत्वमस्त्येव। प्रदेयद्रव्यत्वस्य यागनिरूपितजिज्ञासाविषयतावच्छेदकत्वादिति चेद्, न। स्वसमानजातीयपदार्थान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वस्यैव तद्-वच्छेदकत्वेन वाजिनद्रव्यस्य स्वसमानजातीयामिक्षाद्रव्यान्वयबोधासह-कृतत्वेन तादृशावच्छेदकाभावात् आमिक्षायां तु नैवं वाजिनाऽन्वयस्य तदाऽनुपस्थितत्वात् ॥ ४ ॥

शङ्का—यहाँ पर वाजिन को वैश्वदेव याग की जिज्ञासा विषयत्व न होने पर भी जिज्ञासा विषयत्व की योग्यता तो है ही, क्योंकि यागनिरूपित जिज्ञासा-विषयता का अवच्छेदक प्रदेय द्रव्यत्व वाजिन में भी है।

समाधान—हम (केवल प्रदेय द्रव्य को उक्त योग्यता का अवच्छेदक नहीं मानते हैं, परन्तु) स्वसमान जातीय पदार्थ के अन्वयबोधाभाव से सहकृत प्रदेय द्रव्यत्व को पूर्वोक्त योग्यता का अवच्छेदक मानते हैं। वाजिन में यह बात है नहीं, क्योंकि वाजिनद्रव्य का (जिस समय अन्वय करना चाहते है, उस समय) वाजिन के समान जातीय द्रव्य आमिक्षा का विश्वेदेवा के साथ अन्वयबोध हो जाने के कारण स्वसमान जातीय पदार्थ अन्वयबोधाभावरूप विशेषण नहीं है वैश्वदेव याग के समय आमिक्षा के समान जातीय वाजिन द्रव्य का अन्वय उपस्थित नहीं होने से आमिक्षा में उक्त प्रकार की बात ही नहीं ॥ ४ ॥

वताऽङ्गत्वमवगम्यते, न चामिक्षया वाजिनबाधः, किन्तु तया सह विकल्पः समुच्चयो वेति प्राप्ते सिद्धान्तः—न तावद्वाजिनस्य विश्वेदेवाङ्गत्वं वैश्वदेवीति तद्धितश्रुत्याऽऽ-मिक्षया तेषां सम्बन्धस्यौचित्यादस्या इति सर्वनामार्थे तद्धितस्य स्मृतत्वात्सर्वनाम्नश्च सन्निहितविशेष्यसमर्पकत्वादामिक्षायाः श्रुतत्वेन तद्धितवाच्यत्वात्। एवं च न विकल्पसमुच्चयौ कल्प्यौ, विश्वेदेवसम्बन्धवत्यामिक्षया वाजिनाकाङ्क्षाभावादिति।

ननु भवदभिमतस्याकाङ्क्षालक्षणस्य वाजिनेऽपि सत्त्वात्कथमुक्ततन्नैराकाङ्क्ष्य-व्यवहारो भवदुक्ताकाङ्क्षासम्भवादित्याशयेन शङ्कते—नन्विति तत्रापि—सा वैश्वदेव्यामिक्षेत्यादावपि। यागनिरूपितजिज्ञासाविषयत्वावच्छेदकस्य प्रदेयद्रव्य-त्वस्य सत्त्वादित्याह—प्रदेयेति। प्रदेयद्रव्यत्वस्य तदवच्छेदकत्वे जनितान्वयबोधादपि वाक्यात्पुनरन्वयबोधापत्तेः स्वसमानजातीयेत्यादिविशेषणविशिष्टस्य तस्य तत्त्वाङ्गी-काराद्वाजिने तदसत्त्वादुक्तलक्षणासङ्गमान्नोक्तदोष इत्याशयेन परिहरति—नेति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उदाहरणान्तरेष्वपि दुर्बलत्वप्रयोजक आकाङ्क्षाविरह एव द्रष्टव्यः॥५॥

इसी प्रकार अन्य उदाहरणों में भी श्रुति लिङ्ग आदि की एक साथ उपस्थिति होने पर दुर्बलत्व का प्रयोजक आकाङ्क्षा का विरह ही समझना चाहिए ॥ ५ ॥

समभिव्याहृतपदेन स्मारितो यः स्वसमानजातीयः स्वसदृशः पदार्थस्तदन्वयबोधविरहेण सहकृतं यत्प्रदेयद्रव्यत्वं तस्यैव तदवच्छेदकत्वेन यागनिरूपितजिज्ञासाविषयत्वावच्छेदकत्वेन वाजिनद्रव्यस्य स्वसदृशामिक्षापदार्थान्वयबोधसहकृतत्वेन तद्विरहसहकृतप्रदेयद्रव्यत्वरूपावच्छेदकाभावादित्यर्थः । नन्वस्तु वाजिनपदार्थेनैवान्वयबोधः, तथा चामिक्षायामेव तादृशावच्छेदकाभावः किं न स्यादित्याशङ्क्याह—**आमिक्षायां त्विति** । प्रथमश्रुतामिक्षान्वयबोधकाले वाजिनान्वयबोधस्योत्थानाभावादिति हेतुमाह—**वाजिनेति** ।

यथा श्रुतिवाक्यविरोधे वाक्यदौर्बल्यप्रयोजक आकाङ्क्षाविरहस्तथोदाहरणान्तरेष्वपि स एवेत्यतिदिशति—**उदाहरणान्तरेष्वपीति** । तत्र श्रुतिलिङ्गविरोधे लिङ्गदौर्बल्यं यथा ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति श्रूयते, तत्र संशयः—किं कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे इत्यसावृगैन्द्री तेनेन्द्रमन्त्रेणेन्द्र उपस्थेयः? उत गार्हपत्यः? इति, भो इन्द्र कदाचिदपि घातको न भवसि किं त्वाहुतिदत्तवते यजमानाय प्रीयसे इति इन्द्रप्रकाशनसामर्थ्यात्लिङ्गादिन्द्र उपस्थेय इति प्राप्ते सिद्धान्तः—गार्हपत्यमिति प्रत्यक्षश्रुत्या गार्हपत्योपस्थाने विनियुक्तस्य मन्त्रस्य पुनर्विनियोगाकाङ्क्षाया अनुदयाद्विनियोजकं लिङ्गं न प्राप्नोति येनेन्द्रोपस्थाने विनियुज्येतेति । लिङ्गवाक्ययोर्विरोधे वाक्यदौर्बल्यं, यथा दर्शपूर्णमासयोः श्रूयते—'स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेधः सुमनस्यमान' इति । भोः पुरोडाश तव समीचीनं स्थानं करोमि तच्च स्थानं घृतस्य धारया सुष्ठु सेवितुं योग्यं कल्पयामि भो व्रीहिसारभूत त्वं समाहितमनस्कस्तस्मिन्समीचीने स्थाने उपविश तत्र स्थिरो भवेत्यर्थः । तत्रायं सर्वोऽपि मन्त्रः स्थानकरणे पुरोडाशस्थापने च विनियुज्यते किं वाऽद्वैद्वयमुभयत्र व्यवस्थितमिति संशये सति मन्त्रद्वयाभावात्सर्वोऽप्ययं मन्त्रः स्थानकरणस्य पुरोडाशस्थापनस्य चाङ्गम्, तत्र सर्वेणानेन मात्रेण स्थानं कर्तव्यमिति विनियोजिका श्रुतिः कल्पनीया, तथा सर्वेण मन्त्रेण पुरोडाशः स्थापनीय इत्यपि कल्पनीया, सदनाङ्गत्ववत्प्रतिष्ठापनाङ्गत्वस्यापि तद्वाक्यबोधितत्वादिति प्राप्ते राद्धान्तः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्वोत्तरार्द्धयोः परस्परान्वयेन सम्पन्नस्यैकवाक्यस्योत्तरार्द्धस्य सदनकरणे शक्तिमकल्पयित्वा सर्वमन्त्रस्य सदने विनियोक्तुमनर्हत्वात् पूर्वार्द्धस्य स्थापने शक्तिमकल्पयित्वा स्थापने सर्वमन्त्रस्य विनियोक्तुमनर्हत्वाच्च लिङ्गकल्पनव्यवधाने श्रुतिं प्रति वाक्यं विप्रकृष्यते, प्रत्यक्षं तु लिङ्गद्वयं सन्निकृष्यते, तथा च लिङ्गेन, वाक्यबाधादर्द्धद्वयमुभयत्र व्यवस्थितमिति । अत्राप्याकाङ्क्षाविरह एव वाक्यस्य दौर्बल्यप्रयोजक इति । वाक्यप्रकरणयोर्विरोधे प्रकरणदौर्बल्यम्, यथा सूक्तवाक्ये श्रूयते—'अग्नीषोमाविदं हविरजुषेतामवीवृधेतामहोज्यायोक्राताम्' 'इन्द्राग्नी इदं हविरजुषेतामवीवृधेतामहोज्यायोक्राताम्' इत्यादिदेवतावाचकाग्नीषोमादिपदं पौर्णमास्यादिकाले यथादैवतं विभज्य प्रयुज्यते । तत्र संशयः—देवतापदैकवाक्यतापन्नं हविरजुषेतामित्यादीनि यानि पदानि तानि किं ततो विच्छिद्यान्यत्रापि प्रकरणाविशेषात्प्रयोक्तव्यानि ? उत तत्तद्देवतापदेनैकवाक्यतया तद्वदेव व्यवस्थितानीति । तत्र यत्त्विदं हविरित्यादिकमवशिष्टं पदजातं तदग्नीषोममन्त्रगतमप्यमावास्यायामग्नीषोमपदपरित्यागेन पठनीयम् । तथा इन्द्राग्नीमन्त्रगतमपि पौर्णमास्यामिन्द्राग्नीपदपरित्यागेन पठनीयम् । तथा सत्येषां मन्त्रभागानां सर्वशेषत्वबोधको दर्शपूर्णमासपाठोऽनुगृह्यते इति प्राप्ते सिद्धान्तः—अग्नीषोममन्त्रशेषस्येन्द्राग्नीपदाम्वयाश्रवणात्प्रकरणेन प्रथमं तदन्वयरूपं वाक्यं कल्पनीयम्, तेन च वाक्येनेन्द्राग्नीप्रकाशनसामर्थ्यरूपं लिङ्गं कल्प्यते, तेन चानेन मन्त्रभागेनेन्द्राग्नीविषया क्रियाऽनुष्ठेयेति विनियोजिका श्रुतिः कल्प्यते, ततः प्रकरणविनियोगयोर्मध्ये त्रिभिर्व्यवधानं भवति, अग्नीषोमपदान्वयरूपं वाक्यं श्रूयमाणत्वाल्लिङ्गश्रुतिभ्यामेव व्यवधीयते, तस्माद्वाक्येन प्रकरणस्य बाधितत्वात्तच्छेषस्तत्रैव व्यवतिष्ठते । अत्रापि विच्छिद्यान्यत्राप्रयोगे आकाङ्क्षाविरह एव कारणम् । स्थानप्रकरणयोर्विरोधे स्थानदौर्बल्यं यथा राजसूये बहवः पशुविष्टिसोमयागाः सर्वे फलवन्तः समप्रधानाः, तत्राभिषेचनीयो नाम सोमयागः तत्सन्निधौ विदेवनादयः समाम्नाताः 'अक्षैर्दीव्यति' 'राजन्यं जिनाति' 'शौनःशेपमाख्यापयति' इति । जिनाति जयति । बह्वृचब्राह्मणे समाम्नातं शुनःशेपविषयमाख्यानं शौनःशेपम् । तत्र संशयः—ते विदेवनादयः किं सर्वस्य राजसूयस्याङ्गम् ? उत अभिषेचनीयस्यैवेति । तत्र सन्निधिवशाद्विदेवनादयोऽभिषेचनीयाङ्गमिति प्राप्ते राद्धान्तः—राजसूयस्य कथं भावाकाङ्क्षायामनुवृत्तायां[1] विहिता विदेवनादयः प्रकरणेन राजसूयशेषाः राजसूयश्च बहुयागात्मक इति तत्रत्यसर्वयागशेषभूतं विदेवनादिकम्[2] । न चाभिषेचनी-

१. क पुस्तके अनुवृत्तायामिति नास्ति । २. विदेवनादिकमिति कखपुस्तकयोर्नास्ति ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

[1]योग्यता च तात्पर्यविषयीभूतसंसर्गाबाधः। वह्निना सिञ्चतीत्यादौ तादृशसंसर्गबाधान्न योग्यता। 'स प्रजापतिरात्मनो वपामुदखिदत्' इत्यादावपि तात्पर्यविषयीभूतपशुप्राशस्त्याबाधाद् योग्यता। तत्त्वमस्यादिवाक्येष्वपि वाच्याभेदबाधेऽपि लक्ष्यस्वरूपाभेदबाधाभावाद् योग्यता॥६॥

तात्पर्यविषयीभूत सम्बन्ध का बाध न होना ही योग्यता है। 'अग्नि से सींचता है' इत्यादि वाक्य में तात्पर्यविषयीभूत संसर्ग न रहने से (अर्थात् सिञ्चन के कारणता सम्बन्ध न रहने से) योग्यता नहीं है। 'उस प्रजापति ने अपनी वपा (भेद) को खरोंच कर निकाला' इत्यादि वाक्य में तात्पर्यविषयीभूत पशुयाग की प्रशंसारूप अर्थ का बाध किसी भी प्रमाण से न होने से योग्यता विद्यमान है। इसी प्रकार 'तत्त्वमसि' इत्यादि महावाक्य में भी दोनों पदों के वाच्यार्थ का अभेद बाधित होने पर भी तात्पर्यविषयीभूत शुद्ध चैतन्यरूप लक्ष्यस्वरूप के अभेद का बाध न होने से योग्यता विद्यमान है॥ ६॥

यस्य काचिदाकाङ्क्षा विदेवनादिष्वस्ति ज्योतिष्टोमविकृतित्वेनातिदिष्टैः प्राकृताङ्गैरेव तदाकाङ्क्षानिवृत्तेरिति। स्थानसमाख्ययोर्विरोधे समाख्यादौर्बल्यम्। यथा पौरोडाशिकसमाख्याते दर्शपूर्णमासकाण्डे सान्नाय्यपात्रशुन्धनं समाख्यातम्। तत्र शुन्धध्वं दैव्याय कर्मणे देवयज्यायै इति मन्त्र उदाहरणम्। स किं पुरोडाशपात्राङ्गमुत सान्नाय्यपात्राङ्गम्? उत संशये पौरोडाशिकमिति समाख्याते काण्डे पठितत्वात्समाख्यया पुरोडाशकाण्डाङ्गानामुलूखलजुह्वादीनामपि शोधनेऽङ्गमिति प्राप्ते सिद्धान्तः—पौरोडाशिकमिति समाख्यायां प्रकृतिः पुरोडाशमभिधत्ते तद्धितप्रत्ययश्च काण्डम्। न चैतावता कृत्स्नपुरोडाशपात्राणां सन्निधिरत्र प्रत्यक्षोऽस्ति, किं त्वर्थात्प्रकल्प्यस्तस्मात्काण्डसमाख्यया सन्निधिं परिकल्प्य तत्सन्निध्यन्यथानुपपत्त्या परस्पराकाङ्क्षारूपकृत्स्नपात्रप्रकरणं कल्पयित्वा वाक्यलिङ्गश्रुतीः परिकल्प्य तया श्रुत्या विनियोग इति समाख्यायां विप्रकर्षः। सान्नाय्यपात्राणां शोधनमन्त्र-

---

१. तात्पर्यविषयः संसर्गो योग्यता इत्यर्थः। यथा वत्सं बध्नातीत्यत्र वत्सकर्मकं बन्धनमेव योग्यता। वह्निना सिञ्चतीत्यत्र तादृशसंसर्गस्य वह्निकरणकप्रेक्षस्य बाधान्न योग्यता। स प्रजापतिरित्यादौ वपायागः प्रशस्त इति प्राशस्त्यमेव तात्पर्यविषयसंसर्गः, अतः योग्यता वर्तते। योग्यताऽपीयं ज्ञायमानैव हेतुर्न स्वरूपसतीत्यवधेयम्। तज्ज्ञानं चापि संशयनिश्चयसाधारणं हेतुः, ततश्च तत्संशयनिश्चययोरपि शाब्दज्ञानस्योपपत्तिरिति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आसत्तिश्चाव्यवधानेन पदजन्यपदार्थोपस्थितिः। मानान्तरोपस्थापितपदार्थस्यान्वयबोधाभावात्पदजन्येति। अत एवाश्रुतपदार्थस्थले तत्तत्पदाध्याहारः द्वारमित्यादौ 'पिधेहि' इति। अत एव 'इषेत्वा' इत्यादिमन्त्रे 'छिनद्मि' इति पदाध्याहारः। अत एव विकृतिषु 'सूर्याय जुष्टं निर्वपामि' इति पदप्रयोगः ॥ ७ ॥

व्यवधानरहित रूप से तत्तत् पदजन्य पदार्थों की उपस्थिति को आसत्ति कहते हैं। (प्रत्यक्षादि) प्रमाणान्तर से उपस्थापित पदार्थ का वाक्यार्थबोध में अन्वय नहीं होता, इसलिए 'पदजन्य' कहा गया है। अतएव जहाँ पर साकाङ्क्षपद का श्रवण नहीं हुआ, ऐसे स्थल पर तत् तत् पद का अध्याहार किया जाता है। जैसे 'द्वारम्' इत्यादि में 'पिधेहि' पद का अध्याहार किया जाता है। इसलिए 'इषे त्वा' इत्यादि मन्त्र में 'छिनद्मि' पद का अध्याहार किया जाता है। इसलिए विकृति यागों में 'मैं सूर्यदेव को उद्देश्य कर तत्सम्बन्धी हवि का निर्वाप करता हूँ' ऐसे पद का प्रयोग किया जाता है ॥ ७ ॥

सन्निधिस्तु प्रत्यक्षः, इध्मबर्हिः—सम्पादनस्य मुष्टिनिर्वापस्य चान्तराले सान्नाय्यपात्राणां देश उक्तः, मन्त्रश्चेध्मबर्हिर्निर्वापविषयो मन्त्रानुवाकयोर्मध्यमेऽनुवाके पठ्यते। तेन च प्रत्यक्षसन्निधिना प्रकरणादीनां चतुर्णामेव कल्पनात् सन्निधिः सन्निरुध्यते, तस्मात्क्रमेण समाख्यां बाधित्वा सान्नाय्यपात्रशोधनाङ्गमेव मन्त्रः[२]। स्थानं सन्निधिः क्रम इत्यनर्थान्तरमिति।

योग्यतां लक्षयति—**योग्यतेति**। एतावल्लक्षणाऽभिघातफलमाह—**वह्नि-नेति**। तथाऽप्यस्तु संसर्गाबोधो योग्यतेत्याशङ्क्याह—**स प्रजापतिरिति**। एवं च साम्प्रदायिकतत्त्वमस्यादिवाक्यार्थोऽप्युपपन्न इत्याह—**तत्त्वमस्यादीति**।

क्रमप्राप्तामासत्तिं लक्षयति—**आसत्तिश्चेति**। पदजन्येत्यस्य प्रयोजनमाह—

---

१. अव्यवधानविशिष्टा या पदजन्यपदार्थोपस्थितिः सा आसत्तिः। यथा चान्नाव्यवधानस्योपस्थितावेवान्वयः, अव्यवधानविशिष्टं यत्पदं तज्जन्या पदार्थोपस्थितिरासत्तिरित्यर्थस्वीकारे तु चन्द्रं भुङ्क्ष्व ओदनं पश्य इत्यत्र चन्द्रभुङ्क्ष्वपदयोः अव्यवधानसत्त्वेनातिव्याप्तिप्रसङ्गः। पश्य देवदत्त इत्यत्र प्रत्यक्षप्रमाणलभ्यस्यापि घटस्य वाच्यार्थबोधे नोपयोगः, पदजन्योपस्थित्यभावात्। यदि तत्र प्रत्यक्षं दृश्यमानस्य घटस्य अङ्गुल्या निर्देशपूर्वकं पश्य देवदत्त इति वाक्यमुच्चरितं तदा तत्र 'घटम्' इति द्वितीयान्तघटपदाध्याहारो द्वितीयान्तेदंपदाध्याहारो वा भवतीति पदजन्योपस्थितिरेवासत्तिरिति।

२. मन्त्रः शोधनाङ्गमेव इति योजना।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पदार्थश्च द्विविधः—शक्यो लक्ष्यश्चेति। तत्र शक्तिर्नाम पदानामर्थेषु मुख्या वृत्तिः, यथा घटपदस्य पृथुबुध्नोदराद्याकृतिविशिष्टे वस्तुविशेषे वृत्तिः। सा च शक्तिः पदार्थान्तरम्। सिद्धान्ते कारणेषु कार्य्यानुकूलशक्तिमात्रस्य पदार्थान्तरत्वात् ॥ ८ ॥

पदार्थ दो प्रकार के हैं—शक्य और लक्ष्य। उनमें पदों की अपने-अपने अर्थों में रहने वाली मुख्य वृत्ति को शक्ति कहते हैं। जैसे कि घट पद की बड़ा वर्तुल उदरवाले आकृति से विशिष्ट वस्तुविशेष में शक्ति है। वह शक्ति पदार्थान्तर है (इच्छादि रूप नहीं है), क्योंकि (वेदान्त-सिद्धान्त में) कारणों में कार्य-उत्पत्ति के अनुकूल सभी शक्तियों को पृथक् पदार्थ माना है ॥ ८ ॥

मानान्तरेति। यतो मानान्तरोपस्थापितपदार्थस्यान्वयबोधो नास्त्यत एवाश्रुतपदार्थस्थलेऽन्वयबोधयोग्यपदार्थोपस्थापकपदाध्याहारः सङ्गच्छते इत्याह—**अत एवेति**। अत एव वेदेऽपि तादृशपदाध्याहार इत्याह—**अत एवेति**। द्वितीयाध्याये चिन्तितं समेषु वाक्यभेदः। यत्र कर्मसमवेतार्थप्रकाशकं निर्वपामीत्यादिपदमस्ति तत्र सुगमं परिमाणम्। यत्र तु समवेतार्थपदाभावेन लौकिकविनियोगाभावे वाचनिको विनियोगः स्वरूपतो गम्यते, यथा 'इषे त्वोर्ज्जे त्वेति' तत्र संशयः—किं प्राग्दृष्टार्थमन्त्रावघेरेकमन्त्रत्वमुत यावदेव मिथः संबन्धमिषे त्वेति तावदेकं यजुरन्यच्च यजुरन्तरमिति इषे त्वोर्ज्जे त्वेत्यत्र सोऽयं पदसमुदाय एको मन्त्रः तस्यादृष्टार्थत्वेनैकस्यैवादृष्टस्य कल्पने लाघवात्। न चोरुप्रयस्वेत्यादिमन्त्रवदनुष्ठेयार्थस्मारकता सम्भवति, क्रियापदाभावेन तदर्थप्रतीत्यभावादिति प्राप्ते राद्धान्तः—इषे त्वोर्जे त्वेत्यादौ यजुर्भेदः 'इषे त्वा' इति छिनत्ति, 'ऊर्ज्जे त्वा' इत्यनुमार्ष्टीति पलाशशाखायाः छेदनमार्ज्जनयोर्विनियोगात्तत्तस्तदनुसारेण छिनद्मि अनुमार्ज्मीत्यर्थभेद इति। **अत एव**—मानान्तरेत्याद्युक्तयोरेव। नवमाध्यायप्रथमे पादे स्थितं गुणशब्दस्तथेति चेदिति 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि' इति मन्त्रे सवित्रश्विपूषशब्दानां विकृतिषूहाभाव उक्तस्तत्राग्निशब्दोऽपि किमसमवेतवचनो नोहितव्य उत समवेतवचन ऊहितव्य इति संशये देवताऽन्तरवाचिसवित्रादिशब्दवदग्निशब्दस्यापि निर्वापस्तावकत्वेन पाठान्नोहनीय इति प्राप्ते राद्धान्तः, सवित्रादिशब्दानां कर्म्मण्यसम-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

वेतार्थत्वेनाग्निशब्दस्य चाग्नेये कर्म्मणि समवेतार्थत्वेन दृष्टान्तवैषम्यादूहनीय इति। ननु निर्वापात्पूर्वं हविषो जुष्टत्वाभावात्तद्योगादग्निशब्दोऽपि न स्यादिति चेन्न। जुष्टं यथा भवति तथा निर्वपामीति क्रियाविशेषणत्वेन भविष्यज्जोषणपरत्वे सति समवेतार्थत्वात्। तस्मात्सौर्ययागे सूर्याय जुष्टं निर्वपामीत्येवमूहनीयमिति।

[1]पदजन्यपदार्थोपस्थितिरित्युक्तम्। तत्र पदार्थः कतिविध इत्यपेक्षायामाह — **पदार्थश्चेति**। पदनिष्ठशक्तिविषयः शक्यः पदवृत्तिलक्षणाविषयो लक्ष्यः। वृत्तेर्द्वैविध्यात्पदार्थद्वैविध्यम्। गौण्या वृत्तेः लक्षितलक्षणायामन्तर्भावस्य वक्ष्यमाणत्वात् [2]केवललक्षणायाश्च गौण्यन्तर्भावाच्छक्यो लक्ष्यश्चेति विभाग इति भावः। तयोः शक्तिलक्षणानिरूपणायत्तनिरूपणत्वाच्छक्यस्वरूपावगमार्थमादौ शक्तिं निरूपयति— **तत्रेति**। तयोः —शक्यलक्ष्ययोः। शक्यविशेषणीभूता शक्तिरित्यर्थः। **अर्थेषु वृत्तिः**—अर्थविषयणी वृत्तिः। पदानां कार्य्यान्वितेष्वेवार्थेषु वृत्तिं वदतां प्राभाकराणां निराकरिष्यमाणत्वादाह—**अर्थेष्विति**। लक्षणायामतिव्याप्तिवारणायाह— **मुख्येति**। उदाहरति—**यथेति**। पृथु विपुलं च तद् बृहनं च वर्तुलं च यदुदरं तदादिर्यस्य ग्रीवादेस्तदाकृतिविशिष्ट इत्यर्थः। शक्तिः सङ्केतः। स च परमेश्वरेच्छा अनेन पदेनायमर्थो बोद्धव्य इत्येवंरूपा, न तु पदार्थान्तरं मानाभावादिति नैयायिकास्तान्निराचष्टे—**सा चेति**। येषां मते शक्तिमात्रस्य पदार्थान्तरता तेषां मते पदनिष्ठा शक्तिः पदार्थान्तरमिति किमु वक्तव्यमित्याह—**सिद्धान्त इति**। तथा च शक्तेः पदार्थान्तरत्वे दाहादिलक्षणकार्यानुपपत्तिरेव प्रमाणं प्रतिबन्धभावस्य स्वभावतया न हेतुत्वम्। दाहादिकार्यं वह्निनिष्ठास्वानुकूलशक्तिपूर्वकं कार्य्यत्वाद्घटवदिति भावः। उपलक्षणमेतत्। 'परास्य शक्तिर्विविधैव श्रूयते' 'शक्तयः सर्वभावानामचिन्त्या ज्ञानगोचरा' इत्यादिश्रुतिस्मृतिवचनान्यपि पृथक्शक्तिसद्भावे मानमित्यर्थः।

---

१. अव्यवधानेन पदजन्यपदार्थोपस्थितिः आसत्तिरित्यत्रोक्तम्। आसत्तिलक्षणघटकः पदार्थः कतिविध इत्यपेक्षा।

२. लक्ष्यः गौण्या वृत्तेः, लक्षितलक्षणायामन्तर्भावस्य वक्ष्यमाणत्वाद् वृत्तेर्द्वैविध्यम्। केवल० इत्यादिपाठः खगपुस्तकयोः। कपुस्तके वक्ष्यमाणत्वाद् वृत्तेर्द्वैविध्यं केवल० इत्यादिपाठश्च। परन्तु 'वृत्तेर्द्वैविध्यात्पदार्थद्वैविध्यम्' इति पाठष्टीकायां लक्ष्यश्चेदस्माभिः कल्पितस्यैव श्लिष्टतरः प्रतिभाति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सा च तत्तत्पदजन्यपदार्थज्ञानरूपकार्य्यानुमेया। तादृशशक्ति-विषयत्वं शक्यत्वम्। तच्च[1] जातेरेव न व्यक्तेः। व्यक्तीनामानन्त्येन गुरुत्वात्। कथं तर्हि गवादिपदाद् व्यक्तिभानमिति चेत्, [2]जातेर्व्यक्ति-समानसंवित्संवेद्यत्वादिति ब्रूमः।

वह शक्ति तत्तद् पद से उत्पन्न विशेष पदार्थज्ञान रूप कार्य से अनुमेय मानी गई है। ऐसी शक्ति के विषयीभूत पदार्थों को ही शक्य कहते हैं। उस शक्ति का विषय जाति ही है, व्यक्ति नहीं। क्योंकि अनन्त व्यक्ति को शक्ति का विषय मानने पर गौरव है। यदि प्रश्न हो कि व्यक्ति में शक्ति न मानने पर गाय अर्थ का गौ पद से कैसे भान होगा? उत्तर दे रहे हैं—जाति और व्यक्ति में एकज्ञानविषयत्व हम मानते हैं।

ननु सन्तु कारणेषु कार्यानुमेयाः शक्तयः प्रकृते केन कार्य्येण पदनिष्ठा शक्तिरनुमीयत इत्यपेक्षायामाह—**सा चेति**। पदार्थज्ञानं पदनिष्ठस्वानुकूलशक्ति-पूर्वकं पदजन्यपदार्थज्ञानरूपकार्यत्वादित्येवमनुमेयेत्यर्थः। एवं शक्तिं निरूप्य शक्यं लक्षयति—**तादृशेति**। उक्तलक्षणशक्तिविषयत्वम्। तच्च शक्यं जातेर्व्य-क्तेर्वा इत्यपेक्षायामाह—**तच्चेति**। जातिरत्रानुगतो धर्मः परंजातिशब्देन व्यवहि-यमाणस्तेन जातित्वोपाधित्वपरिभाषायाः सर्वप्रमाणागोचरत्वोक्तिविरोधो न शङ्क्यः, तत्र हेतुमाह—**व्यक्तीनामीति**। नन्वनुगतधर्मस्य शक्यत्वाभ्युपगमे गामानय, पशुमालभेदित्यादौ गवादिपदाद्व्यक्तिभानं न स्यादित्याशङ्क्ते—**कथमिति**। यद्यपि जातिरेव शक्या तथाऽपि धर्ममंतद्वतोस्तादात्म्यादेकसंवित्तिसंवेद्यत्वाद्व्यक्तिसमान-संवित्तिसंवेद्यजातिभानसमये व्यक्तिभानमविरुद्धमित्याह—**जातेरिति**।

---

१. **जातेरेवेति**। ननु पूर्वग्रन्थे जातेः खण्डनं कृतमत्र शक्यत्वं जातेर्व्यवस्थाप्यत इति पूर्वापरविरोध इति चेन्न। नास्माभिर्जातिः खण्डिता किन्तु तस्याः पदार्थान्तरत्वं तथैव तस्या लक्षणादिकं च खण्डितम्, सकलघटव्यक्तिषु अनुगतघटत्वरूपधर्मस्तु स्वीकृत एवेति न पूर्वापरविरोध इति। तथा चात्र सर्वत्र वा जातिपदेनानुगतो धर्म एव ग्राह्य इति ध्येयम्।

२. **व्यक्तिसमानेति**। व्यक्तेः समाना संविद् व्यक्तिसमानसंविद् तथा संवेद्या व्यक्तिसमानसंवित्संवेद्या तस्या भावस्तस्मात्। यथा संविद्व्यक्त्या घटवृत्तिघटत्वं गृह्यते, तथैव घटस्यापि ग्रहणं भवति। वेदान्तमते 'तदनन्यत्वमारम्भणशब्दादिभ्य' इति न्यायेन गुणगुणिनोरवयवावयविनो जातिव्यक्त्योर्वा अभेदाभ्युपगमान्न सामग्र-न्तरस्यावश्यकतेति तात्पर्यम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

[1]यद्वा, गवादिपदानां व्यक्तौ शक्तिः स्वरूपसती न तु ज्ञाता हेतुः। जातिशक्तिमत्त्वज्ञाने सति व्यक्तिशक्तिमत्त्वज्ञानं विना व्यक्तिधीविलम्बाभावाच्च।

अत एव न्यायमतेऽप्यन्वये शक्तिः स्वरूपसतीति सिद्धान्तः। ज्ञायमानशक्तिविषयत्वमेव वाच्यत्वमिति जातिरेव वाच्या।

अथवा गवादि पदों की व्यक्ति में शक्ति स्वरूपतः विद्यमान होकर ही (शाब्द बोध का) कारण होता है, जो ज्ञात होकर नहीं और जाति में ज्ञात होकर (शाब्द बोध में) कारण है। (जाति अंश के समान ही) व्यक्ति के अंश में शक्तिज्ञान को (शाब्दबोध का) कारण स्वीकार करने पर गौरव होगा और भी जाति में शक्तिमत्ता का ज्ञान हो जाने पर व्यक्ति में शक्तिमत्ता ज्ञान के विना व्यक्ति के बोध में विलम्ब होता नहीं। (फिर दोनों में शक्तिज्ञान को कारण मानने की क्या आवश्यकता है।)

अतएव न्यायमत में भी सम्बन्ध-अंश में स्वरूपतः शक्ति (शाब्दबोध का कारण) मानी गई है। सभी शक्ति का विषय वाच्य नहीं होता। अतः जाति ही शक्यार्थ है, व्यक्ति नहीं।

ननु पदाद्वयक्तिसंविदेव दुर्लभा तत्प्रयोजकशक्तेरभावादित्यरुचेराह—**यद्वेति। स्वरूपसती**—स्वरूपेणैव वर्तमाना। व्यक्तिबोधकगवादिपदनिष्ठसामर्थ्यस्वरूप-**जातौ तु ज्ञाता। न [2]व्यक्त्यंशे शक्तिज्ञानमपि कारणं गौरवात्।** मस्त्येवेत्यर्थः। व्यावर्त्यमाह—**ज्ञातेति।** गवादिपदाद्वयक्तिभानार्थं गवादिपदानां व्यक्तौ शक्तिरस्तीति ज्ञानं नापेक्षितमित्यर्थः। एतदेव स्पष्टयति—**जाताविति।** गवादिपदानां जातौ शक्तिरिति ज्ञाता जातिमानहेतुरित्यर्थः। व्यक्तिभाने शक्तिः कारणं न तु तज्ज्ञानमपीत्याह—**नेति।** तत्र हेतुमाह—**गौरवादिति।** उभयत्र शक्तिज्ञानस्य कारणत्वकल्पने गौरवात्। नन्वावश्यकत्वाद् गौरवं न दोषावहमित्याशङ्क्याह—**जातीति।**

यतः शक्तिज्ञानं विनैव यस्य ज्ञानं तज्ज्ञानार्थं शक्तिज्ञानकल्पनमनुचितम्,

---

१. पूर्वग्रन्थे व्यक्तिशक्तिर्निराकृता। तथा च प्रयोजकशक्त्यभावाद् व्यक्तिसंविद अभाव एव युक्त इत्यतः पक्षान्तरानुसरणं—यद्वेति।

२. घचपुस्तकयोः न च इति पाठः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

[1]अथवा व्यक्तेर्लक्षणयाऽवगमः। यथा नीलो घट इत्यत्र नील-शब्दस्य नीलगुणविशिष्टे लक्षणा, तथा[2] जातिवाचकस्य तद्विशिष्टे लक्षणा। तदुक्तम्—'अनन्यलभ्यो हि शब्दार्थः' इति। एवं शक्यो निरूपितः ॥ ९ ॥

अथवा व्यक्ति का लक्षणा से बोध हो जायेगा। जैसे कि 'नीला घड़ा है' यहां पर नील शब्द नीलगुण विशिष्ट द्रव्य में लक्षणा की जाति है, वैसे ही जातिवाचक शब्द की जातिविशिष्ट में लक्षणा कर दी जायेगी। इस बात को ही कहा है—शक्ति-वृत्ति से अवगत अर्थ ही शब्दार्थ कहलाता है। इस प्रकार शक्यार्थ का निरूपण किया गया है ॥ ९ ॥

अत एव नैयायिकैर्गवादिपदार्थस्य पदार्थान्तरान्वये शक्तिः स्वरूपसती स्वीकृतेत्याह—**अत एवेति**। नन्वेवं तर्हि व्यक्तिरपि शक्या, शक्तिविषयत्वं शक्यत्वमित्युक्तत्वाद् व्यक्तौ च शक्तेः स्वीकारात्तथा च जातेर्व्यक्तेश्च शक्यत्वे गौरवमित्याशङ्क्यास्मिन्पक्षे ज्ञायमानशक्तिविषयत्वं शक्यत्वं न[3] तु शक्तिविषयत्वमतो नोक्तदोष इत्याह—**ज्ञायमानेति**।

ननु व्यक्तेरशक्यत्वे तत्र शक्तिकल्पनमपि वृथा तज्ज्ञानस्य लक्षणयैव सम्भवादन्वयस्य च वाक्यगम्यत्वेन पदशक्त्यविषयत्वादित्यरुचेः पक्षान्तरमाह—**अथवेति**। तथा च गवादिपदस्य जातौ शक्तिः, तद्विशिष्टव्यक्तौ लक्षणेति भावः।

---

१. ननु पदस्य व्यक्तावपि स्वरूपसती शक्तिः स्वीकृता एव। पूर्वग्रन्थे तु व्यक्तेरपि शक्यत्वापत्तौ ज्ञायमानेति विशेषणं दत्तम्, तथाऽपि शक्तिद्वयकल्पनागौरवं गले पतितम्। न च एकस्मात्पदादुभयप्रतीत्यन्यथाऽनुपपत्त्या शक्तिद्वयकल्पना आवश्यकीति प्रमाणमुखगौरवं न दोषावहमिति वाच्यम्, गङ्गायां घोष इत्यत्र तीरार्थप्रतीतेः गङ्गापदस्य तीरेऽपि शक्तिकल्पनापत्तेः। तथैवान्वयेऽपि पदस्य स्वरूपसत्त्वयाः शक्तेः कल्पने गौरवम्। अन्वयस्य वाक्यगम्यत्वेन तत्र पदस्य सामर्थ्याभावोऽपि। तथा च व्यक्त्यन्वययोर्लक्षणयैवोपस्थितौ महल्लाघवमित्यरुचेराह—अथवेति। अस्मिन्मते शक्तिविषयत्वं शक्यत्वमिति लक्षणे ज्ञायमानपदाप्रवेशादपि लाघवमिति दिक्।

२. जातिवाचकस्येति। घटत्ववाचकस्य घटपदस्य तद्विशिष्टे—घटत्वविशिष्टघटे लक्षणा।

३. शक्यत्वम् इति खघपुस्तकयोर्नास्ति आवश्यकञ्च तत्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ लक्ष्यपदार्थो निरूप्यते । तत्र लक्षणाविषयो लक्ष्यः ।

लक्षणा च द्विविधा—केवललक्षणा लक्षितलक्षणा चेति । तत्र शक्यसाक्षात्सम्बन्धः केवललक्षणा, यथा गङ्गायां घोष इत्यत्र प्रवाह-साक्षात्सम्बन्धिनि तीरे गङ्गापदस्य केवललक्षणा । यत्र शक्यपरम्परा-सम्बन्धेनार्थान्तरप्रतीतिस्तत्र लक्षितलक्षणा, यथा [1]द्विरेफपदस्य रेफद्वये शक्तस्य भ्रमरपदघटितपरम्परासम्बन्धेन मधुकरे वृत्तिः । [2]गौण्यपि लक्षितलक्षणैव । यथा सिंहो माणवक इत्यत्र सिंहशब्दवाच्य-सम्बन्धिक्रौर्य्यादिसम्बन्धेन माणवकस्य प्रतीतिः ॥ १० ॥

लक्ष्य व लक्षणा का निरूपण—

अब लक्ष्य पदार्थ का निरूपण किया जाता है। उसमें लक्षणावृत्ति के विषय को लक्ष्य कहते हैं। लक्षणा भी दो प्रकार की होती है—(१) केवल लक्षणा (२) लक्षित लक्षणा । उनमें शक्य के सहित साक्षात् सम्बन्ध से केवल लक्षणा कहते हैं, जिस प्रकार 'गङ्गा में घोष है' यहाँ पर गङ्गा पद के साक्षात् सम्बन्धी तीर में गङ्गा पद की केवल लक्षणा । जहाँ पर शक्य के सहित परम्परा सम्बन्ध से दूसरे अर्थ की प्रतीति होती हो, उसे लक्षित लक्षणा कहते हैं। जिस प्रकार भ्रमर पद में दो रेफ अर्थ में शक्ति है, उसकी भ्रमर पद में लक्षणा है, क्योंकि भ्रमर पद में विद्यमान रेफद्वय भ्रमरपदघटित परम्परा सम्बन्ध से मधुकर में द्विरेफ की वृत्ति को लक्षित लक्षणा कहते हैं । गौणी वृत्ति भी लक्षित लक्षणा ही है, जैसे कि 'यह बालक सिंह है' यहाँ पर सिंह शब्द का वाच्यार्थ सिंह पशु से सम्बन्धी शूरता क्रूरता के सम्बन्ध से माणवक की प्रतीति होती है ॥ १० ॥

केवलस्य शक्तिगम्यत्वं विशिष्टस्य लक्षणागम्यत्वं क्व दृष्टमित्यपेक्षायामाह—**यथेति** । अत्र मीमांसकसम्मतिमाह—**तदुक्तमिति** । अनन्यलभ्यो लक्षणादिना लभ्यो यो न भवति स शब्दार्थः शब्दशक्तिगम्य इत्यर्थः । शक्यनिरूपणमुपसंहरति-**एवमिति** ।

---

१. द्विरेफेति । द्वौ रेफौ यस्मिन् तद् द्विरेफपदम्, तथा च द्विरेफपदस्य रेफद्वय-वत्सु भ्रमर–रन्ध्र–राज्यादिपदेषु अविशिष्टा लक्षणेति कथं द्विरेफपदान्मधुकरस्यैव लक्षणयोपस्थितिरिति कश्चिद् ब्रूयात् तं प्रति ब्रूयात् सिद्धपदान्तरसमवधानरूपा-दप्रकरणादिति ।

२. ननु शक्यस्य सादृश्यरूपः सम्बन्धो गुणः, गुणाधीना लक्षणा गौणी, यथा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकारान्तरेण लक्षणा त्रिविधा—जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति। तत्र शक्यमनन्तर्भाव्यं यत्रार्थान्तरप्रतीतिस्तत्र जहल्लक्षणा, [1]यथा विषं भुङ्क्ष्वेत्यत्र स्वार्थं[2] विहाय शत्रुगृहे भोजननिवृत्तिर्लक्ष्यते।

प्रकारान्तर से लक्षणा तीन प्रकार की है—१. जहल्लक्षणा, २. अजहल्लक्षणा और ३. जहदजहल्लक्षणा। उनमें जहाँ पर शक्यार्थ का अन्तर्भाव न करके अर्थान्तर की प्रतीति होती हो उसे जहल्लक्षणा कहते हैं। जैसे कि 'विष खा' यहाँ पर शक्यार्थ विषभक्षण का परित्याग कर शत्रुगृह में भोजन निवृत्ति के अर्थ में यह वाक्य लक्षित हो रहा है।

लक्ष्यस्य[3] शक्यनिरूपणायत्तनिरूपणत्वात्तन्निरूपणानन्तरं लक्ष्यपदार्थनिरूपणं प्रतिजानीते—**अथेति।** **तत्र**—शक्यनिरूपणानन्तरनिरूपणाविषयीभूते लक्ष्ये सति। तथाभूतनिरूपणविषयीभूतो लक्ष्यो लक्षणाविषय इति वा।

लक्ष्यज्ञानस्य लक्षणाज्ञानाधीनत्वात्तां निरूपयति—**लक्षणेति।** **तत्र**—केवललक्षणालक्षितलक्षणयोर्मध्ये। उदाहरणमाह—**यथेति।** यथा गङ्गायां घोष इत्यस्मिन् वाक्ये गङ्गापदवाच्यप्रवाहेण साक्षात्सम्बन्धवति तीरे गङ्गापदस्य केवललक्षणावृत्तिः। लक्षितलक्षणां लक्षयति—**यत्रेति।** यथा द्विरेफपदस्य शक्यरेफद्वयघटितभ्रमरपदद्वारा तदर्थे वृत्तिरित्यर्थः। ननु पदार्थश्च द्विविध इत्युक्त्वा वृत्तिद्वैविध्यनिरूपणमयुक्तं गौण्या वृत्तेर्विद्यमानतया वृत्तेस्त्रैविध्येन पदार्थस्य त्रैविध्यादित्याशङ्क्य गौण्या वृत्तेर्लक्षितलक्षणाऽन्तर्भावान्नोक्तदोष इत्याशयेनाह—**गौण्यपीति।** तल्लक्षणं गौण्यां योजयति—**सिंह इति।**

प्रकारान्तरेण लक्षणं विभजते—**प्रकारान्तरेणेति।** **तत्र**—तिसृषु लक्षणासु

सिंहशब्दवाच्यः केसरादिमान्पशुविशेषः तत्सम्बन्धि क्रौर्यादिगुणरूपं तस्य माणवकवर्तित्वात् सिंहशब्दाद् गौण्या माणवकस्य प्रतीतिः। तथा च लक्षितलक्षणालक्षणं गौण्यामतिव्याप्तिमिति चेन्न। तस्या अपि लक्ष्यत्वादित्याह—गौण्यपीति।

१. विषं भुङ्क्ष्वेति वाक्याद् अत्र भोजनं मा कुरु इत्यर्थो जहल्लक्षणया तथा, च वाक्यवृत्तिर्लक्षणेषा।

२. स्वार्थमिति। स्वस्य विषं भुङ्क्ष्वेति वाक्यस्य—अर्थं शक्यार्थमित्यर्थः।

३. शक्यसम्बन्धो लक्षणा, लक्षणाविषयो लक्ष्य इति लक्ष्यस्य लक्षणानिरूपणाधीननिरूपणत्वाल्लक्षणायाश्च शक्यनिरूपणाधीननिरूपणत्वमित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

यत्र शक्यार्थमन्तर्भाव्यैवार्थान्तरप्रतीतिस्तत्राजहल्लक्षणा, यथा शुक्लो घट इत्यत्र हि शुक्लशब्दः [1]स्वार्थं शुक्लगुणमन्तर्भाव्यैव तद्वति द्रव्ये लक्षणया वर्तते।

यत्र हि विशिष्टवाचकः शब्दः एकदेशं विहाय एकदेशे वर्तते तत्र जहदजहल्लक्षणा, यथा सोऽयं देवदत्त इति। अत्र हि पदद्वयवाच्ययोर्विशिष्टयोरैक्यानुपपत्त्या पदद्वयस्य विशेष्यमात्रपरत्वम्[2]। यथा वा तत्त्वमसीत्यादौ तत्पदवाच्यस्य सर्वज्ञत्वादिविशिष्टस्य त्वंपदवाच्येनान्तःकरणविशिष्टेनैक्यायोगादैक्यसिद्ध्यर्थं स्वरूपे लक्षणेति साम्प्रदायिकाः॥ ११॥

जहाँ पर शक्यार्थ को अन्तर्भाव करके ही अर्थान्तर की प्रतीति होती हो, उसे अजहल्लक्षणा कहते हैं। जैसे कि 'शुक्ल घट' इस वाक्य में शुक्ल पद के शक्यार्थ शुक्ल गुण का अन्तर्भाव करके ही शुक्लगुण-विशिष्ट द्रव्य में लक्षणावृत्ति से शुक्ल शब्द का प्रयोग होता है।

जहाँ पर विशिष्ट वाचक शब्द विशिष्टार्थ के एकदेश को परित्याग करके अपर देश का बोधक हो, वहाँ जहदजहल्लक्षणा मानी गई है। जैसे कि 'सोऽयम् देवदत्तः' (यह वही देवदत्त है)। यहाँ पर 'सः' पदवाच्य उस देश-काल-विशिष्ट और अयं-पद-वाच्य इस देश-काल-विशिष्ट देवदत्त अर्थ होता है, इन दोनों की एकता सम्भव न होने के कारण दोनों को विशेष्य देवदत्त मात्र का बोधक मानने से ऐक्य हो जाता है। इसी प्रकार 'तत्त्वमसि' इत्यादि महावाक्य में तत्पद का वाच्य सर्वज्ञत्वादि विशिष्ट चैतन्य की एकता सम्भव न होने से उस एकता की सिद्धि के लिए स्वरूप में लक्षणा कर दी जाती है। ऐसा साम्प्रदायिकों का कहना है॥ ११॥

मध्ये। यत्र—यस्मिन् पदे वाक्ये वा शक्यार्थमनन्तर्भाव्यार्थान्तरस्य भानं तत्र जहल्लक्षणा, शक्यसम्बन्धिमात्रविषया वृत्तिरित्यर्थः। यद्यपि गङ्गायां घोषः प्रतिवसतीत्यत्र गङ्गापदे शक्यार्थप्रवाहरूपमनन्तर्भाव्यं तीररूपस्यार्थान्तरस्य प्रतीतिरस्त्यतो गङ्गापदं जहल्लक्षणोदाहरणं तथाऽपि तस्य सर्वरुदाहृतत्वात्सिद्धवत्कृत्वा वाक्यमुदाहरति—**यथेति। अत्र**—अस्मिन् वाक्ये। अजहल्लक्षणां लक्षयति—**यत्रेति।** शक्यार्थविशिष्टविषया वृत्तिरजहल्लक्षणेत्यर्थः। उदाहरति—**यथेति।**

तृतीयां लक्षयति—**यत्र हीति।** शक्यैकदेशमात्रवृत्तिरित्यर्थः। उदाहरण-

---

१. स्वस्य -शुक्लपदस्य—अर्थं—शक्यार्थमित्यर्थः।

२. जहदजहल्लक्षणया इति शेषः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वयन्तु ब्रूमः—सोऽयं देवदत्तः, तत्त्वमसीत्यादौ विशिष्टवाचकपदानामेकदेशपरत्वेऽपि न लक्षणा, शक्त्युपस्थितयोर्विशिष्टयोरभेदान्वयानुपपत्तौ[1] विशेष्ययोः शक्त्युपस्थितयोरेवाभेदान्वयाऽविरोधात्। यथा घटोऽनित्य इत्यत्र घटपदवाच्यैकदेशघटत्वस्यायोग्यत्वेऽपि योग्यघटव्यक्त्या सहानित्यत्वान्वयः। यत्र पदार्थैकदेशस्य विशेषणतयोपस्थितिः, तत्रैव स्वातन्त्र्येणोपस्थितये लक्षणाऽभ्युपगमः। यथा घटो नित्य इत्यत्र घटपदाद्घटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या तादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा।

हमारे मत में 'सोऽयं देवदत्तः' 'तत्त्वमसि' इत्यादि स्थल में विशिष्ट वाचक पदों को एकदेशपरक मानने पर भी लक्षणा नहीं है, क्योंकि शक्ति वृत्ति से उपस्थित विशिष्ट अर्थ का अभेद न होने पर भी शक्ति वृत्ति से उपस्थित विशेष्य भागों के अभेदान्वय में कोई विरोध नहीं है। जैसे कि 'घट अनित्य है' यहाँ पर घट-पदवाच्य घटत्व-विशिष्ट घट के एकदेशघटत्व के साथ अनित्यत्व का सम्बन्ध अयोग्य होने पर भी सम्बन्ध के योग्य घट व्यक्ति के साथ अनित्यत्व का अन्वय होना सम्भव ही है। जहाँ पदार्थ का एकदेश विशेषण रूप से उपस्थित हुआ हो, वहीं स्वतन्त्र रूप से उपस्थिति के लिए लक्षणा मानी गई है। यथा 'घट नित्य है' यहाँ पर घट पद से घटत्व अर्थ की शक्ति वृत्ति से उपस्थिति होने पर भी स्वतन्त्र-रूप से उपस्थिति नहीं है। अतएव स्वतन्त्र रूप से उपस्थिति के लिए घटपद की घटत्व अर्थ में लक्षणा मानी गई है।

माह—**यथेति**। तत्त्वमसीत्यादिकमपि जहदजहल्लक्षणोदाहरणं साम्प्रदायिकैराश्रितमित्याह—**यथा वेति**।

वयं तु लक्षणां विनैवैक्यसिद्धयर्थमेवं ब्रूम इत्याह—**वयं त्विति**। ननु लक्षणाभृते एकदेशपरत्वं कुत इत्यत आह—**शक्तीति**। नन्विदं क्व दृष्टमित्यपेक्षायामाह—**यथेति**। स्वतन्त्रस्यैवान्वययोग्यत्वाद्यत्र पदार्थैकदेशस्य शक्त्यैव स्वातन्त्र्येणोपस्थितिः, न तत्र लक्षणा। यत्र तु तस्य शक्त्या विशेषणतयोपस्थितिस्तत्र तस्य स्वातन्त्र्योपस्थितये लक्षणा स्वीक्रियते इत्याह—**यत्रेति**।

---

१. अपि इति शेषः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

एवमेव तत्त्वमसीत्यादिवाक्येऽपि न लक्षणा। शक्त्या स्वातन्त्र्येणोपस्थितयोस्तत्त्वंपदार्थयोरभेदान्वये बाधकाभावात्। अन्यथा गेहे घटो घटे रूपं घटमानयेत्यादौ घटत्वगेहत्वादेरभिमतान्वयबोधायोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वं लक्षणयैव स्यात्। तस्मात्तत्त्वमसीत्यादिवाक्येषु आचार्याणां लक्षणोक्तिरभ्युपगमवादेन बोध्या ॥१२॥

जहदजहल्लक्षणोदाहरणं तु—काकेभ्यो दधि रक्ष्यतामित्याद्येव। तत्र शक्यकाकपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेण काकेऽकाकेऽपि काकशब्दस्य प्रवृत्तेः।

इसी प्रकार 'तत्त्वमसि' इत्यादि महावाक्य में भी लक्षणा मानने की आवश्यकता नहीं है, क्योंकि शक्तिवृत्ति के द्वारा स्वतन्त्र रूप से उपस्थित तत्, त्वं पदार्थों के अभेदान्वय में कोई बाधक नहीं है। अन्यथा 'गेहे घटः, घटे रूप, घटमानय' इत्यादि स्थल में भी घटत्व गेहत्वादि में अभीष्ट अन्वय बोध के अयोग्य होने से वहाँ पर भी घटादि पद की विशेष्य मात्र में लक्षणा करनी होगी। इसलिए तत्त्वमस्यादि वाक्य में आचार्यों ने अभ्युपगमवाद के आधार पर लक्षणा मानी है॥ १२ ॥

जहदजहल्लक्षणा का उदाहरण तो 'काकेभ्य दधि रक्ष्यताम्' इत्यादि है। यहाँ पर काक पद का शक्यार्थ काकत्वविशिष्ट काक अर्थ का परित्याग पूर्वक अशक्य दधि-उपघातकत्व को लेकर काक तथा दधि-घातक अन्य प्राणी में भी काक शब्द की प्रवृत्ति हो जाति है।

उक्तमर्थं प्रकृते योजयति—**एवमिति**। विपक्षे बाधकमाह—**अन्यथेति**। तर्हि तत्त्वमस्यादिवाक्ये किमित्याचार्यैर्लक्षणा स्वीकृतेत्याशङ्क्याह—**तत्त्वमसीति**। तर्हि जहदजहल्लक्षणोदाहरणाभावात्किं नैवाभ्युपेयेत्याशङ्क्याह—**जहदजहल्लक्षणेति**। छत्रिणो यान्तीत्यादिकमादिपदार्थः। ननु शक्यैकदेशमात्रावृत्तित्वं ह्येतल्लक्षणं तच्चात्र नायाति, श्वादेः काकैकदेशत्वाभावादित्याशङ्क्याह—मन्मते नेदमेतल्लक्षणं किन्तु[1] शक्याशक्यगोचरवृत्तित्वं तच्चोक्तोदाहरणेऽस्तीत्याह—**शक्येति**।

---

१. अंशविशेषपरित्यागेन अंशविशेषप्रत्यायकत्वं जहदजहल्लक्षणात्वमिति साम्प्रदायिकसंमतं लक्षणम्। तस्य काकेभ्यो दधि रक्ष्यतामित्यत्राव्याप्तिः, अतः स्वम-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लक्षणाबीजं तु[1] तात्पर्य्यानुपपत्तिरेव न त्वन्वयानुपपत्तिः काकेभ्यो दधि रक्ष्यतामित्यत्रान्वयानुपपत्तेरभावात्। गङ्गायां घोष इत्यादौ तात्पर्य्यानुपपत्तेरपि सम्भवात्॥ १३॥

लक्षणा च न पदमात्रवृत्तिः, किन्तु वाक्यवृत्तिरपि। यथा गम्भीरायां नद्यां घोष इत्यत्र गम्भीरायां नद्यामिति पदद्वयसमुदायस्य तीरे लक्षणा।

तात्पर्य की अनुपपत्ति ही लक्षणा-बीज है, न कि अन्वय की अनुपपत्ति, क्योंकि 'काकेभ्य दधि रक्षताम्' यहाँ पर अन्वयानुपपत्ति का अभाव है। 'गङ्गा में घोष है' यहाँ पर तात्पर्यानुपपत्ति भी है, अतएव तात्पर्यानुपपत्ति को ही लक्षणाबीज मानना चाहिए॥ १३॥

लक्षणा केवल पदमात्रवृत्ति नहीं है, किन्तु वाक्यवृत्ति भी है। यथा 'गम्भीरायां नद्यां घोषः' यहाँ पर 'गम्भीरायां नद्यां' इस पदसमुदाय रूप (वाक्य) की तीर अर्थ में लक्षणा की जाती है।

अन्ये तु लक्षणां विना वाच्येकदेशमात्रपरता पदानां न सम्भवति, गेहे घट इत्यादावपि आधाराधेयभावेनान्वितयोर्गेहघटयोस्तदवच्छेदकत्वेन गेहत्वघटत्वयोरन्वयात्। तत्त्वमस्यादिवाक्येऽपि साक्षादवच्छेदकत्वेन वाऽन्वयस्यावश्यकतयाऽखण्डार्थत्वासिद्धिरित्याहुः।

सम्प्रति लक्षणाबीजमाह—**लक्षणेति**। नन्वन्वयानुपपत्तेस्तद्बीजत्वाभावे कथं गङ्गायां घोष इत्यत्र लक्षणेत्याशङ्क्याह—**गङ्गायामिति**।

यथा शक्तिः पदमात्रवृत्तिस्तथा वृत्तित्वाल्लक्षणाऽपीति नैयायिकास्तान्निराचष्टे—**लक्षणा चेति**। उक्तानुमाने[2] शक्तित्वमुपाधिः, तथा च गम्भीरायां नद्यां घोष

तेनास्या लक्षणमाह—शक्येति। शक्याशक्ययोः साधारण्येन प्रत्यायकत्वं तत्त्वम्। तथा च काकशब्दः काकत्वेन रूपेण शक्यमर्थं त्यक्त्वा अशक्यमर्थमुपघातकत्वेन प्रतिपादयन्नपि श्वादिसाधारण्येन काकमपि प्रतिपादयतीति भवति शक्याशक्यप्रतिपादकत्वाद् जहदजहल्लक्षणालक्षणसमन्वय इति।

१. मुख्यार्थान्वयबाधो लक्षणाबीजमित्यालङ्कारिकाः, तान्निराकरोति—तात्पर्येति।

२. लक्षणा पदमात्रवृत्तिर्वृत्तित्वात् शक्तिवद् इत्यनुमाने शक्तित्वमुपाधिः। तथा हि, दृष्टान्ते शक्तौ साध्यमस्ति शक्तित्वमप्यस्तीति साध्यव्यापकत्वम्, साधनं वृत्तित्वं लक्षणायामपि, तत्र शक्तित्वं नास्तीति साधनाव्यापकत्वमपीति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

[1]ननु वाक्यार्थस्याशक्यतया कथं शक्यसम्बन्धरूपा लक्षणा ?। उच्यते। शक्त्या[2] यत्पदसम्बन्धेन ज्ञाप्यते तत्सम्बन्धो लक्षणा, शक्ति-ज्ञाप्यश्च यथा पदार्थस्तथा वाक्यार्थोऽपीति न काचिदनुपपत्तिः। एवमर्थवादवाक्यानां प्रशंसारूपाणां प्राशस्त्ये लक्षणा। सोऽरोदीदित्यादिनिन्दार्थवाक्यानां निन्दितत्वे लक्षणा।

जब वाक्यार्थ शक्य ही नहीं है तो शक्यसम्बन्ध रूप लक्षणा वाक्य में कैसे आयेगी ? उत्तर दे रहे है—शक्ति से पद-सम्बन्ध द्वारा जो अर्थ ज्ञापित होता हो उसके सम्बन्ध को लक्षणा कहते हैं। शक्ति-वृत्ति का ज्ञाप्य जिस प्रकार पदार्थ है उसी प्रकार वाक्यार्थ भी हैं। इसी प्रकार मानने पर कोई अनुपपत्ति नहीं है। इसी प्रकार प्रशंसा रूप अर्थवाद वाक्य की प्राशस्त्य में लक्षणा को जाती है। एवं 'सोऽरोदीत्' ऐसे निन्दार्थक वाक्यों की निन्दा अर्थ में लक्षणा की जाती है।

इत्यादौ नद्यादिपदमात्रे लक्षणायां विनिगमकाभावेन समुदाये एव लक्षणायास्त्वयाऽप्यवश्यमङ्गीकार्य्यत्वात्पदमात्रवृत्तित्वे वृत्तित्वं न नियामकम्, अपि तु शक्तित्वे सति वृत्तित्वं[3] गुरुभूतमपीत्याशयेनाह—**यथेति**।

ननु पदस्यैव शक्तत्वेन तदर्थस्य शक्यतया तत्सम्बन्धिन एव लक्ष्यत्वात्कथं वाक्यवृत्तिलक्षणाविषयत्वं वाक्यार्थसम्बन्धिन इत्याशङ्कते—**नन्विति**। शक्य शब्देनेह पदनिष्ठशक्तिज्ञाप्यो विवक्षितः, स च पदार्थद्वारा वाच्यार्थोऽपीति तत्सम्बन्धिन्यपि लक्षणा न विरुध्यत इत्याह—**उच्यते इति**। पदेन स्वनिष्ठशक्त्या-यज्ज्ञाप्यते तत्सम्बन्धो लक्षणा। तथा चेदं लक्षणमुभयसाधारणत्वादावश्यकमित्याह—**शक्तिज्ञाप्यश्चेति**। यथा लोके तथा वेदेऽपि बोध्यमित्याह—

---

१. ननु वाक्ये लक्षणाऽङ्गीकारे शक्यसम्बन्धो लक्षणेति सिद्धान्तहानिप्रसङ्गः, वाक्यार्थस्याशक्यत्वादिति शङ्कते—नन्विति।

२. पदसम्बन्धेन—(पदसम्बद्धया पदवृत्तितयेत्यर्थः) शक्त्या यद्वस्तु ज्ञाप्यते तत्सम्बन्धो लक्षणा। तथा च शक्त्या साक्षाज्ज्ञाप्यस्तु पदार्थ एव परन्तु तज्ज्ञानद्वारा वाक्यार्थोऽपि ज्ञाप्यत एवेति परम्परया ज्ञाप्यस्तु वाक्यार्थोऽपि भवति, अतः पदार्थस्येव वाक्यार्थस्याऽपि शक्तिज्ञाप्यत्वरूपशक्यत्वात् तत्सम्बन्धरूपा लक्षणा सम्भवत्येवेति न काचिदनुपपत्तिः।

३. तथा च यत्र शक्तित्वे सति वृत्तित्वं तत्र पदमात्रवृत्तित्वमिति व्याप्यव्यापकभावे सति तत्त्वं शक्तावेवेति। लक्षणाया पदभिन्नवृत्तित्वमपि सिद्धम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अर्थवादगतपदानां प्राशस्त्यादिलक्षणाऽभ्युपगमे एकेन पदेन लक्षणया तदुपस्थितिसम्भवे पदान्तरवैयर्थ्यं स्यात्। एवं च विध्यपेक्षितप्राशस्त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य[1] पदस्थानीयत्वेन विधिवाक्येन एकवाक्यत्वं भवतीत्यर्थवादानां पदैकवाक्यता।

क्व तर्हि वाक्यैकवाक्यता?। यत्र प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकाङ्क्षावशेन महावाक्यार्थबोधकत्वम्[2]। यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादि वाक्यानां 'समिधो यजति' इत्यादि वाक्यानां च परस्परापेक्षिताङ्गाङ्गिबोधकवाक्यतयैकवाक्यता। तदुक्तं भट्टपादैः—

अर्थवाद वाक्य में पड़े हुए पदों की निन्दा अथवा प्रशंसा अर्थ में लक्षणा मानने पर एक ही पद में लक्षणा करने से निन्दा और प्रशंसा अर्थ की उपस्थिति सम्भव हो जाती है, फिर अन्य पद व्यर्थ हो जायेंगे। इसी प्रकार विधि वाक्य में अपेक्षित प्रशंसा रूप पदार्थ की प्रतीति कराने वाले होने से अर्थवाद वाक्य में विद्यमान पदसमुदाय को पदरूप होने से विधिवाक्य के साथ एकवाक्यता हो जाती है। अतएव अर्थवाद वाक्य को पदैकता कहा गया है।

तो फिर वाक्यैकवाक्यता कहाँ पर है? जहाँ पर भिन्न-भिन्न संसर्ग के प्रतिपादक प्रत्येक वाक्यों में आकांक्षा के कारण से महावाक्य के अर्थ की बोधकता हो, वहाँ पर ही वाक्यैकवाक्यता कही जाती है। जैसे कि 'स्वर्गकाम' पुरुष दर्शपौर्णमास यज्ञ के द्वारा स्वर्ग की भावना करे इत्यादि एवं 'समिध' याग के द्वारा भावना करे इत्यादि वाक्यों के द्वारा परस्पर अपेक्षित अङ्गाङ्गी बोधक वाक्य रूप से एक वाक्यता हो जाती है। भट्टपाद ने भी कहा है—

एवमिति। 'वायुर्वै क्षेपिष्ठा देवता' इत्यादीनामर्थवादवाक्यानाम्। ननु तत्र पदानां लक्षणा कुतो न स्यादित्यत आह—**अर्थवादेति**। तथा चार्थवादवाक्यस्य विधिनैकवाक्यत्वे पदैकवाक्यत्वव्यवहारस्तेनैव फलित इत्याह—**एवञ्चेति**।

नन्वर्थवादपदसमुदायस्य पदस्थानीयत्वे तस्य विधिवाक्येनैकवाक्यता यदि पदैकवाक्यता तर्हि क्व वाक्यैकवाक्यतेति प्रसङ्गात्पृच्छति—**क्वेति**। अर्थवाद-

---

१. प्रशस्त इत्येकेन पदेन यावदपेक्षितोऽर्थो बोध्यते तावदेव 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूता गमयति' अस्यार्थवादस्याप्यर्थ इति पदसमूहस्याप्यस्य पदस्थानीयत्वमिति।

२. अर्थवादवाक्यानामिति घचपुस्तकयोः पाठः, स तु युक्तः। अर्थवादपदानामिति गपुस्तके पाठः स त्वयुक्त एवेति। ३. तत्र इति शेषः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ॥ इति ॥ १४ ॥

एवं द्विविधोऽपि पदार्थो निरूपितः ।

[1]तदुपस्थितिश्चासत्तिः । सा च शाब्दबोधे हेतुः, तदैवान्वय-व्यतिरेकदर्शनात् । एवं महावाक्यार्थबोधेऽवान्तरवाक्यार्थबोधो हेतुः, तथैवान्वयाद्यवधारणात् ॥ १५ ॥

'अपना अर्थ का बोध कराकर चरितार्थ हुए वाक्यों की अङ्गाङ्गी भाव की अपेक्षा से पुनः मिलकर एकवाक्यता हो जाती है ।' इस प्रकार शक्य और लक्ष्य भेद से दो प्रकार के पदार्थ निरूपण किया गया ॥ १४ ॥

आसत्ति का निरूपण—

पदजन्य पदार्थ की (अव्यवधान से) उपस्थिति को आसत्ति कहते हैं । यह भी शाब्दबोध में कारण है, क्योंकि शाब्दबोध के साथ इनका अन्वय-व्यतिरेक जैसा ही देखा गया है । इसी प्रकार महावाक्य के अर्थ बोध में अवान्तर वाक्यों का अर्थबोध हेतु माना गया है, क्योंकि वहाँ पर भी उक्त रूप से ही अन्वय-व्यतिरेक देखा जाता है ॥ १५ ॥

वाक्यानां स्वार्थे तात्पर्याभावेन प्राशस्त्यावबोधकतया स्वार्थावबोधकवाक्यत्वाभावाद्वाक्यैकवाक्यतायोग्यत्वेऽपि वाक्यार्थावबोधक्योर्वाक्ययोर्यत्रैकवाक्यत्वं तत्र वाक्यैकवाक्यत्वमित्याह—**यत्रेति** । तदुदाहरणमाह—**यथेति** । एकवाक्यता-प्रयोजकमाह—**परस्परेति** । दर्शपूर्णमासाभ्यामित्यादिवाक्यानामङ्गाङ्गिबोधकत्वं समिधो यजति इडा यजतीत्यादिवाक्यानामङ्गावबोधकत्वं तदवबोधकत्वादाकाङ्क्षाविषयत्वं तत्त्वादेकवाक्यतेत्यर्थः । स्वोक्तेऽर्थे भट्टपादाचार्यवाक्यं संवादयति—**तदुक्तमिति** । प्रथमं स्वार्थबोधे पर्य्यवसानं प्राप्तानां वाक्यानामङ्गाङ्गिभावाद्यपेक्षया पुनर्मिलित्वा वाक्यैकवाक्यत्वं सम्पद्यत इत्यर्थः । पदार्थनिरूपणमुपसंहरति—**एवमिति** ।

क्रमप्राप्तामासत्तिं लक्षयति—**तदिति** । पदजन्यपदार्थस्मृतिरित्यर्थः । ननु

---

१. आसत्तिश्च—अव्यवधानेन पदजन्यपदार्थोपस्थितिरित्युक्तं तल्लक्षणघटकस्य पदार्थस्य शक्यलक्ष्यद्वैविध्येन निरूपणं कृतम् । तादृशद्विविधपदार्थोपस्थितिरासत्तिरित्यर्थः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रमप्राप्तं तात्पर्यं निरूप्यते। तत्र तत्प्रतीतीच्छयोच्चरितत्वं न तात्पर्यम्। अर्थज्ञानशून्येन पुरुषेणोच्चरिताद्वेदादर्थप्रत्ययाभावप्रसङ्गात्। अयमध्यापकोऽव्युत्पन्न इति विशेषदर्शनेन तत्र तात्पर्यभ्रमस्याप्यभावात्। न चेश्वरीयतात्पर्यज्ञानात् तत्र शाब्दबोध इति वाच्यम्। ईश्वरानङ्गीकर्तुरपि तद्वाक्यार्थप्रतिपत्तिदर्शनात्।

तात्पर्य का निरूपण—

क्रम से प्राप्त तात्पर्य का निरूपण करते हैं। 'जिस वस्तु की प्रतीति की इच्छा से जिस शब्द का उच्चारण किया जाय उस शब्द का उसी अर्थ के बोधन में तात्पर्य माना जाता है।' यह लक्षण ठीक नहीं है। क्योंकि इस प्रकार मानने पर अर्थज्ञानशून्य पुरुष द्वारा उच्चारण किये गये वेदवाक्य से अर्थबोध न हो सकेगा, 'यह अध्यापक व्युत्पन्न नहीं है' इस प्रकार विशेष देख लेने से तात्पर्य भ्रम भी वहाँ पर नहीं कह सकते। यदि कहो कि ईश्वरीय ज्ञान से वहाँ शाब्दबोध हो जायेगा, तो ऐसा कहना भी उचित नहीं, क्योंकि ईश्वर न मानने वाले को भी वाक्यार्थ बोध होता देखा गया है।

शाब्दबोधे उक्तासत्तिर्हेतुरुत तज्ज्ञानमित्यपेक्षायां सैव हेतुर्न तज्ज्ञानमित्याह—**सा चेति**। अत्र किम्प्रमाणमित्यत आह—**तथैवेति**। परस्परान्वययोग्यपदार्थोपस्थितिसत्वे शाब्दबोधो भवति, तदभावे नेत्यन्वयव्यतिरेकदर्शनात्। यद्वा, माऽस्त्वासत्तिः शाब्दबोधे हेतुः, का क्षतिरित्याशङ्क्याह—**सा चेति**। अत्र मानमाह—**तथैवेति**। यथा शाब्दबोधे आकाङ्क्षादिकं कारणमेवमाकाङ्क्षादिना जातोऽवान्तरवाक्यार्थबोधो महावाक्यार्थज्ञाने कारणमित्याह—**एवमिति**। यतोऽवान्तरवाक्यार्थबोधसत्त्वे महावाक्यार्थबोधो भवति, तदभावे शाब्दबोधो नेत्यन्वयव्यतिरेकावधार्येते, अतः स हेतुरित्याह—**तथैवेति**।

क्रमप्राप्तं तात्पर्यनिरूपणं प्रतिजानीते—**क्रमेति**। **तत्र**—निरूपणविषयीभूततात्पर्ये सति। मौनिश्लोकेऽव्याप्तिदोषं सिद्धवत्कृत्याव्याप्तेरुदाहरणान्तरमाह—**अर्थेति**। ननु तस्यार्थज्ञानरहितत्वेऽप्यनेन तदर्थप्रतीतीच्छया एतद्वेदवाक्यमुच्चारितमिति तदीयतात्पर्यभ्रमात्तदर्थज्ञानं भविष्यतीत्याशङ्क्याह—**अयमिति**। **विशेषदर्शनेन**—भ्रमविरोध्यध्यापकनिष्ठाव्युत्पत्तिज्ञानेन। ननु माऽस्तु तद्,

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

उच्यते। तत्प्रतीतिजननयोग्यत्वं तात्पर्यम्। गेहे घट इति वाक्यं गेहघटसंसर्गप्रतीतिजननयोग्यं, न तु पटसंसर्गप्रतीतिजननयोग्यमिति तद्वाक्यं घटसंसर्गपरं न तु पटसंसर्गपरमित्युच्यते।

ननु 'सैन्धवमानय' इत्यादिवाक्यं यदा लवणानयनप्रतीतीच्छया प्रयुक्तं तदाऽश्वसंसर्गप्रतीतिजनने स्वरूपयोग्यतासत्त्वाल्लवणपरत्वज्ञानदशायामप्यश्वादिसंसर्गज्ञानापत्तिरिति चेत्। न। तदितरप्रतीतीच्छयाऽनुच्चरितत्वस्यापि तात्पर्यं प्रति विशेषणत्वात्। तथा च यद्वाक्यं यत्प्रतीतिजननस्वरूपयोग्यत्वे सति यदन्यप्रतीतीच्छया नोच्चरितं तद्वाक्यं तत्संसर्गपरमित्युच्यते।

विवक्षित अर्थ कह रहे हैं—तत्-प्रतीति-जनन योग्यता को तात्पर्य कहते हैं। 'घर में घट है' यह वाक्य घर और घट के (आधाराधेय भाव) सम्बन्ध बोधन में योग्य है न कि घर और पट के सम्बन्ध बोधन में। इसलिए 'घर में घट है' यह वाक्य घटसंसर्गपरक है, पटसंसर्गपरक नहीं है।

शङ्का—'सैन्धवमानय' इत्यादि वाक्य जब नमक लाने अर्थ की प्रतीति की इच्छा से प्रयुक्त होता है, तब भी घोड़े अर्थ के संसर्ग-प्रतीति-जनन में स्वरूप योग्यता उसमें है ही। सुतरां लवणपरत्व ज्ञान की दशा में भी अश्वादि संसर्ग का बोध होने लगेगा।

समाधान—विवक्षित अर्थ से अतिरिक्त अर्थप्रतीति की इच्छा से अनुच्चरितत्व भी तदर्थप्रतीतिजनन-योग्यतारूप तात्पर्य का विशेषण माना गया है, इससे जो वाक्य जिस अर्थप्रतीति की स्वरूपयोग्यता रखता हो और उससे भिन्न अर्थबोध की इच्छा से उच्चारण नहीं किया गया हो, तो वह वाक्य उस अर्थ के संसर्गपरक माना जायेगा॥ ५६॥

तात्पर्यज्ञानादेव वाक्यार्थबोधे ईश्वरीयतात्पर्यज्ञानात्स भविष्यति तस्य साक्षात्प्रेरकत्वाभावेऽपि। प्रेरकतामात्रेणोच्चारयितृत्वसम्भवादित्याशङ्क्य परिहरति-**न चेति**। ईश्वरानङ्गीकर्तुरपि साङ्ख्यमीमांसकादेर्वैदिकवाक्यार्थप्रत्ययोपलब्धेरित्याह-**ईश्वरेति**।

तर्हि कीदृशं तात्पर्यं भवतां विवक्षितमित्यपेक्षायामाह—**उच्यत इति**। पदार्थसंसर्गानुभवजननयोग्यत्वमित्यर्थः। अत एव यद् यत्संसर्गप्रतीतिजननयोग्यं वाक्यं प्रयुज्यते तत् तत्परमेव व्यवह्रियत इत्याह—**गेहे घट इति**।

उक्ततात्पर्यलक्षणस्यानेकार्थपदप्रयोगेऽतिव्याप्तिं शङ्कते—**नन्विति**। श्वेतो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुकादिवाक्येऽव्युत्पन्नोच्चरितवेदवाक्यादौ च तत्प्रतीतीच्छाया एवाभावेन तदन्यप्रतीतीच्छयोच्चरितत्वाभावेन लक्षणसत्त्वान्नाव्याप्तिः। न चोभयप्रतीतीच्छयोच्चरितेऽव्याप्तिः। [1]तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वस्य विवक्षितत्वात् ॥ १६ ॥

शुकादि वाक्य तथा अव्युत्पन्न पुरुष से उच्चरित वेदवाक्यादि में विवक्षित अर्थबोध की इच्छा का ही अभाव होने से तद्भिन्न प्रतीति की इच्छा से उच्चारितत्व का अभाव है ही। अतएव शुकादि वाक्य में एवं अव्युत्पन्न पुरुषोच्चरित वेदवाक्य में तात्पर्य के पूर्वोक्त लक्षण के विद्यमान होने से अव्याप्ति नहीं है। यदि कहो कि—जहाँ पर उभय अर्थबोध की इच्छा से उच्चारण किया गया है, वहाँ अव्याप्ति हो जायेगी, ऐसा उचित नहीं, विवक्षित अर्थ से भिन्न अर्थ मात्र बोध की इच्छा से उच्चरित नहीं होना चाहिए, यह कथन अभिप्रेत है।

गच्छतीत्यादिवाक्यमादिपदार्थः। विशेषणप्रदानेन दोषोद्धारान्नेत्याह—**नेति**। विशेषणप्रदाने फलितं तात्पर्यलक्षणमाह—**तथा चेति**। एवं च सैन्धवमानयेति वाक्यमश्वप्रतीतिजननयोग्यमपि भोजनप्रकरणे प्रयुक्तत्वाल्लवणान्यप्रतीतीच्छयाऽनुच्चरितत्वेन नाश्वसंसर्गज्ञानजनकमिति भावः।

पूर्वोक्ताव्याप्तिदोषग्रस्तत्वमप्यस्य लक्षणस्य नास्तीत्याह—**शुकादीति**। ननूभयप्रतीतीच्छयोच्चरिते लवणान्यप्रतीतीच्छयाऽनुच्चरितत्वाभावाव्याप्तिरित्याशङ्क्य परिहरति—**न चेति**। उभयप्रतीतीच्छयोच्चरितत्वेन तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वस्य सत्त्वादित्याह—**तदन्यमात्रेति**। तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वमुभयप्रतीतीच्छयोच्चरितत्वमेवेति भावः। न चैवमेकप्रतीतीच्छयोच्चरितेऽव्याप्तिरिति वाच्यम्। तदन्ययावत्प्रतीतीच्छयानुच्चरितत्वमित्यर्थस्य तदानीं विवक्षितत्वात्।

---

१. तथा च तत्प्रतीतिजननयोग्यत्वे सति तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वं तात्पर्यस्य लक्षणम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

[1]उक्तप्रतीतिमात्रजननयोग्यतायाश्चावच्छेदिका शक्तिः, अस्माकं तु मते सर्वत्र कारणतायाः शक्तेरेवावच्छेदकत्वान्न कोऽपि दोषः। एवं तात्पर्यस्य तत्प्रतीतिजनकत्वरूपस्य शाब्दज्ञानजनकत्वे सिद्धे चतुर्थ-वर्णके[2] तात्पर्यस्य शाब्दज्ञानहेतुत्वनिराकरणवाक्यं तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्यनिराकरणपरम्, अन्यथा तात्पर्यनिश्चयफलकवेदान्त-विचारवैयर्थ्यप्रसङ्गात्।

उक्त प्रतीति मात्र जनन योग्यता की अवच्छेदिका शक्ति है, क्योंकि हमारे मत में कारणता की अवच्छेदिका शक्ति को ही सर्वत्र माना गया है, इसलिए कोई दोष नहीं है। इसी प्रकार तत्प्रतीतिजनकत्वरूप तात्पर्य को शाब्दबोध का जनकत्व सिद्ध हो जाने पर विवरण ग्रन्थ के चतुर्थ वर्णक में 'तात्पर्य शाब्दज्ञान का हेतु नहीं है' इस प्रकार तात्पर्य में शाब्दज्ञानजनकत्व का निषेधक वाक्य तत्प्रतीतीच्छया उच्चरितत्व रूप तात्पर्य का ही निराकरण कर रहा है। अन्यथा तात्पर्य का निश्चय ही जिसका फल है—इस प्रकार वेदान्त विचार व्यर्थ हो जायेगा।

ननूक्तप्रतीतिप्रजननयोग्यतायाः किमवच्छेदकम्?। तत्प्रतीतीच्छयोच्चरित्वमिति चेद्, न। अव्युत्पन्नोच्चरितवेदवाक्यादावव्याप्तेरित्याशङ्क्याह—**उक्तेति**। न च शक्तिकल्पने गौरवं शङ्क्यं सर्वत्र तस्या एवास्मिन्मते क्लृप्तत्वादित्याह—**अस्माकं त्विति**। तथा च यथा वह्न्यादिनिष्ठदाहादिजनकतावच्छेदिका शक्तिरेव तथा तात्पर्यनिष्ठशाब्दजनकतावच्छेदिका शक्तिरेवेति न कोऽपि विरोध इत्यर्थः। ननु तात्पर्यस्य शाब्दज्ञानहेतुत्वे तन्निरासपरविवरणवाक्यविरोध इत्याशङ्क्योक्तरीत्या तात्पर्यज्ञानस्य शाब्दज्ञानहेतुत्वसिद्धौ तद्वाक्यमन्यथा व्याख्येयमित्याह—**एवमिति**। विपक्षे बाधकमाह—**अन्यथेति**।

---

१. शाब्दबोधरूपकार्ये आकाङ्क्षादिवद् योग्यताया अपि कारणत्वे निर्णीते कारणतावच्छेदकविधया योग्यत्वादुपस्थितत्वाच्च तत्प्रतीतीच्छयोच्चरितत्वस्य स्वीकर्तव्यत्वे घट्टकुट्टीप्रभातन्यायापात इत्याशङ्कां हृदि निधायोत्तरयति—उक्तेति। तादृशयोग्यतायाश्चावच्छेदिका शक्तिरिति। तथा च करणेषु कार्यानुकूलशक्तेरतिरिक्तायाः स्वीकारेण सर्वं भव्यम्।

२. चतुर्थवर्णकेति। 'तत्तु समन्वयाद्' इति सूत्रस्य शङ्कराचार्यकृतभाष्योपरि या पद्मपादाचार्यव्याख्या तदुपरि यद्विवरणं तत्रेत्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केचित्तु शाब्दज्ञानत्वावच्छेदेन न तात्पर्यज्ञानं हेतुरित्येवं परं चतुर्थ-वर्णकवाक्यम्। तात्पर्यसंशयविपर्ययोत्तरशाब्दज्ञानविशेषे च तात्पर्यज्ञानं हेतुरेव। इदं वाक्यमेतत्परम् ? उतान्यपरमिति संशये तद्विपर्यये च तदुत्तर-वाक्यार्थविशेषनिश्चयस्य तात्पर्यनिश्चय विनाऽनुपपत्तेरित्याहुः ॥ १७ ॥

तच्च तात्पर्यं वेदे मीमांसापरिशोधितन्यायादेवावधार्यते, लोके तु प्रकरणादिना। तत्र लौकिकवाक्यानां मानान्तरावगतार्थानुवादकत्वम्। वेदे तु वाक्यार्थस्यापूर्वतया नानुवादकत्वम्। तत्र लोके वेदे च कार्य-पराणामिव[1] सिद्धार्थानामपि प्रामाण्यम्, पुत्रस्ते जात इत्यादिषु सिद्धार्थेऽपि पदानां सामर्थ्यावधारणात्। अत एव वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यम्। यथा चैतत्तथा विषयपरिच्छेदे वक्ष्यते ॥ १८ ॥

कुछ दार्शनिकों ने चतुर्थ वर्णक के विवरण वाक्य का अर्थ किया है कि सभी शाब्दज्ञान के प्रति तात्पर्यज्ञान कारण नहीं है, परन्तु तात्पर्यसंशय-विपर्यय के बाद होने वाले शाब्दबोध विशेष में ही तात्पर्य ज्ञान कारण है। यह वाक्य इस अर्थ का प्रतिपादक है या इससे भिन्न अर्थ का प्रतिपादक है, इस प्रकार संशय या विपर्यय होने पर उसके उत्तरवाक्यार्थ विशेष का निश्चय तात्पर्य निश्चय के विना नहीं हो सकता ॥ १७ ॥

उस तात्पर्य का निश्चय वेद में मीमांसा (पूजित विचार द्वारा) परिशोधित न्याय से ही किया जाता है और लोक में प्रकरण आदि के द्वारा किया जाता है। उनमें लौकिक वाक्य तो प्रमाणान्तर से जाने हुए अर्थ का अनुवाद करता है, परन्तु वेद में वाक्यार्थ का अपूर्व होने से (प्रमाणान्तर से अवगत अर्थ का) अनुवादक नहीं कह सकते। लोक एवं वेद में कार्यपरक वाक्य की तरह ही सिद्ध अर्थ के बोधक वाक्यों में भी प्रामाण्य माना गया है, क्योंकि 'तुम्हारा पुत्र हुआ है' इत्यादि वाक्यों में स्थित पदों का सिद्ध अर्थ में भी सामर्थ्य का भी निश्चय होता है। अतः वेदान्तवाक्यों का ब्रह्म में प्रामाण्य है, इस बात का विस्तृत विचार विषय परिच्छेद में किया जायेगा।१८।

तद्वाक्यस्यास्मदुक्ततात्पर्यनिराकरणपरत्वे अभेदरत्नकृन्मतमाह—**केचित्त्विति**। शाब्दज्ञानमात्रं प्रति न हेतुरित्यर्थः। शाब्दज्ञानविशेषं प्रति तु हेतुरेवेत्याह—**तात्पर्येति**। तादृशशब्दज्ञानं प्रति तस्य हेतुत्वमन्वयव्यतिरेकसिद्धमित्याह—**इदमिति**। केचित्पदेनास्मिन्मते स्वस्यानभिमतिः सूचिता। तदबीजं तु शाब्दज्ञाने तात्पर्यज्ञान-जन्यतावच्छेदकशाब्दज्ञानत्वे लाघवं तात्पर्यसंशयविपर्ययोत्तरशाब्दज्ञानत्वे गौरवम्।

तादृशतात्पर्याधारणं किं वेदे लोके वा एकमेव उत पृथक् ? इत्यपेक्षाया-

---

१. प्राभाकरादयः कार्यपराणामेव 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इत्यादिन्यायेन प्रामाण्यं ब्रुवते तान् सदृष्टान्तं ब्रूते—सिद्धार्थानामपि प्रामाण्यमिति।

Nagarjun Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र वेदानां नित्यसर्वज्ञपरमेश्वरप्रणीतत्वेन प्रामाण्यमिति नैयायिकाः। वेदानां नित्यत्वेन निरस्तसमस्तपुंदूषणतया प्रामाण्यमित्यध्वरमीमांसकाः। अस्माकं तु मते वेदो न नित्य उत्पत्तिमत्त्वात्। उत्पत्तिमत्त्वं च 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृ-२-४-१०) इत्यादिश्रुतेः।

उनमें नित्य सर्वज्ञ परमेश्वर के द्वारा प्रणीत होने के नाते वेद में प्रामाण्य है, ऐसा नैयायिकों का मत है। पूर्वमीमांसक कहते हैं कि वेद नित्य होने से समस्त पुरुषदोष से रहित है, इसलिए प्रामाणिक है। हमारे (वेदान्त के) मत में वेद नित्य नहीं है, क्योंकि उसकी उत्पत्ति सुनी जाती है। उत्पत्ति के बारे में श्रुति भगवती कहती है कि—'इस विभु परमात्मा के निःश्वास ऋग्वेद, यजुर्वेद, सामवेद इत्यादि (निःश्वास की तरह अनायास ऋग्वेदादि उत्पन्न हुआ है)।

माह—**तच्चेति। मीमांसा**—पूजितविचारः, पूर्वोत्तरभेदेन द्विविधः। आदिपदेनोपपदादिकं ग्राह्यम्। लोकवेदयोर्विशेषान्तरमप्याह—**तत्रेति**। लोकवेदयोर्मध्ये। **वाक्यार्थस्यापूर्वतया**—मानान्तरानवगमतया तद्वाक्यानां नानुवादकत्वम्। अथ लोकवेदयोः साम्यांशमाह—**तत्रेति**। लोके वेदे चेति तत्र पदविवरणम्। गामानय पशुमालभेतेत्यादिकानां कार्यपराणां कार्यान्विते स्वार्थे शक्तानां यथा प्रामाण्यं तथा सिद्धवस्तुपराणामपि प्रामाण्यं, न तु प्राभाकराणामिव कार्यपराणामेवेत्यर्थः। तत्र हेतुमाह—**पुत्र इति**। अन्यथा वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यं न स्यादित्याह—**अत एवेति**। यत एव सिद्धार्थानां वाक्यानां प्रामाण्यमत एवेत्यर्थः। नन्वस्तु कार्यपराणामेव प्रामाण्यं वेदान्तानामपि प्रतिपत्तिविधिपरत्वेन तद्ब्रह्मविष्यति, तस्मात्किमर्थं क्लिष्टकल्पनया सिद्धार्थे पदानां सामर्थ्यमास्थीयत इत्याशङ्क्याह—**यथा चैतदिति**। सिद्धार्थे पदानां सामर्थ्यावधारणाद् यथा कार्यसंस्पर्शमन्तरेण ब्रह्मणि वेदान्तानां प्रामाण्यं तथेत्यर्थः।

स्वाभिमतवेदप्रामाण्यं दर्शयितुं नैयायिकमीमांसकयोर्मते दर्शयति—**तत्रेति**। लोकवेदयोर्मध्ये। कर्तृदोषादप्रामाण्यप्रसक्तिमाशङ्क्योक्तं—**सर्वज्ञेति**। सर्वज्ञत्वं मन्वादीनामप्यस्त्यत उक्तं—**नित्येति**। प्रणीतत्वाभिधानेन स्वमताद्वैलक्षण्यं बोधितम्, स्वमते वेदस्योत्पत्तिमत्त्वेऽपि वेदः कल्पान्तरीयानुपूर्वीविजातीयानुपूर्वीक ईश्वरप्रणीत इत्यनङ्गीकारात्। **नित्यत्वेनेति**। वेदानामनित्यत्वाभ्युपगमे पुंप्रणीतत्वावश्यंभावात्तस्येश्वरस्वेऽपि भक्तपक्षपातादिसम्भवाद् बौद्धप्रणीतागमवद्वेदेऽपि दोषप्रसङ्गात्तस्य नित्यत्वेन निरस्तसमस्तपुंदूषणतया प्रामाण्यमित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नापि वेदानां त्रिक्षणावस्थायित्वम्। य एव वेदो देवदत्तेनाधीतः, स एव वेदो मयाऽधीत इत्यादिप्रत्यभिज्ञाविरोधात्। अत एव गकारादिवर्णानामपि न क्षणिकत्वं, सोऽयं गकार इति प्रत्यभिज्ञाविरोधात्।

तथा च वर्णपदवाक्यसमुदायस्य वेदस्य वियदादिवत् सृष्टिकालीनोत्पत्तिमत्त्वं प्रलयकालीनध्वंसप्रतियोगित्वं च। न तु मध्ये वर्णानामुत्पत्तिविनाशौ, अनन्तगकारकल्पने गौरवात्। अनुच्चरणदशायां वर्णानामनभिव्यक्तिस्तदुच्चारणरूपव्यञ्जकाभावान्न विरुध्यते। अन्धकारस्थले घटानुपलम्भवत्।

नैयायिकों की भाँति वेदों का तीन क्षण स्थायित्व भी हमें मान्य नहीं है, क्योंकि 'जिस वेद को देवदत्त ने पढ़ा उसी को मैंने भी पढ़ा', इस प्रत्यभिज्ञा के साथ विरोध होता है। इसलिए गकारादि वर्णों में भी क्षणिकत्व नहीं है, क्योंकि 'यह वही गकार है' इस प्रत्यभिज्ञा के साथ यहाँ भी विरोध होता है।

इसी प्रकार वर्ण-पद-वाक्य-समूहात्मक वेद आकाशादि के समान सृष्टिकालीन उत्पत्ति वाला एवं प्रलयकालीन ध्वंश वाला है, न कि बीच में वर्णों की उत्पत्ति तथा विनाश होता है, क्योंकि ऐसा मानने पर अनन्त गकार कल्पना में गौरव होगा। अनुच्चारण दशा में वर्णों की अनभिव्यक्ति का कारण तो उच्चारण रूप अभिव्यञ्जक का अभाव ही है, अतः परस्पर में विरोध नहीं है। जैसे कि अन्धकार स्थल में घट की अनुपलब्धि का कारण प्रकाश का अभाव है, वैसे ही अनुच्चारण दशा में वर्णों की अनभिव्यक्ति का कारण उच्चारण रूप व्यञ्जक का अभाव है।

स्वमतमाह—**अस्माकं त्विति**। तुशब्द उक्तपक्षाभ्यां वैलक्षण्योद्योतनार्थः। तत्त्वं चानित्यत्वेऽपि प्रलयकालपर्यन्तावस्थायित्वे सति पुंदोषविनिर्मुक्तत्वम्, तच्च श्रुतिसिद्धमतो न स्वरूपासिद्धो हेतुरित्याह—**उत्पत्तिमत्त्वं चेति**। 'ऋचः सामानि जज्ञिरे तस्मात्' इत्यादिश्रुतिरादिपदार्थः। वेदो न नित्य इत्युक्तेः नैयायिकाभिमतत्रिक्षणावस्थायित्वं वेदानां किं तवाप्यनुमतमित्यपेक्षायां यथा मीमांसकाभिमतं तेषां नित्यत्वं यथाऽस्मदननुमतं तथा तदभिमतं तथात्वमपीत्याह—**नापीति**। वर्णसमुदायगर्भस्य वेदस्य स्वरूपतः क्षणिकत्वमपाकृत्य वर्णद्वाराऽपि तन्निराकरोति—**अत एवेति**। यतः प्रत्यभिज्ञाविरोधाद्वेदानामक्षणिकत्वमत एव सोऽयमित्यादिप्रत्यभिज्ञाविरोधाद्वर्णानां न क्षणिकत्वमित्यर्थः।

नन्वेवं तर्हि कथं वेदानामुत्पत्तिमत्त्वं ततश्चानित्यत्वमित्याशङ्क्याह—**तथा चेति**। वेदानां स्वरूपतो वर्णद्वारा च क्षणिकत्वाभावे सति। नन्वेवं तर्हि सर्वदा

Nagarjun Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्पन्नो गकार इत्यादिः प्रत्ययः सोऽयं गकार इति प्रत्यभिज्ञाविरोधादप्रमाणम्, वर्णाभिव्यक्तिजनकध्वनिगतोत्पत्तिनिरूपितपरम्परासम्बन्धविषयत्वेन प्रमाणं वा। तस्मान्न वेदानां क्षणिकत्वम्॥ १९॥

ननु क्षणिकत्वाभावेऽपि वियदादिप्रपञ्चवदुत्पत्तिमत्त्वेन परमेश्वरकर्तृकतया पौरुषेयत्वादपौरुषेयत्वं च वेदानामिति तव सिद्धान्तो भज्येतेति चेत्। न[1]। न हि तावत्पुरुषेणोच्चार्यमाणत्वं पौरुषेयत्वम्। गुरुमतेऽपि अध्यापकपरम्परया पौरुषेयत्वापत्तेः। नापि पुरुषाधीनोत्पत्तिकत्वं पौरुषेयत्वम्। नैयायिकाभिमतपौरुषेयत्वानुमानेऽस्मदादिना सिद्धसाधनत्वापत्तेः। किन्तु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वम्।

'उत्पन्नो गकारः' इत्यादि प्रतीति तो 'सोऽयम् गकारः' इत्यादि प्रत्यभिज्ञा के साथ विरोध होने के कारण अप्रामाणिक है अथवा वर्णों की अभिव्यक्ति का जनक ध्वनिगत उत्पत्ति ही परम्परा सम्बन्ध से वर्ण में रहने के कारण 'उत्पन्नो गकारः' यह प्रतीति भी प्रामाणिक समझ लेनी चाहिए। इसलिए वेद में क्षणिकत्व नहीं है॥ १९॥

शङ्का—वेदों में क्षणिकत्व के अभाव होने पर भी आकाश आदि प्रपञ्च के समान उत्पत्ति मान लेने पर परमेश्वर-कर्तृत्व आ जाने से पौरुषेयत्व तो आ ही गया। सुतरां वेदों के अपौरुषेयत्व सिद्धान्त आप (वेदान्ती) का नष्ट हो जायेगा।

समाधान—यह ठीक नहीं है। पुरुष के द्वारा उच्चारण मात्र से पौरुषेयत्व सिद्ध नहीं होता, ऐसा मानने पर प्रभाकर के मत में भी अध्यापक परम्परा से वेद में पौरुषेयत्व आ जायेगा, पुरुष के अधीन उत्पत्ति भी पौरुषेयत्व का कारण नहीं है, क्योंकि नैयायिक अभिमत पौरुषेयत्व के अनुमान में हम सिद्धसाधनता दोष दे देंगे, किन्तु सजातीय उच्चारण की अपेक्षा न करके उच्चारण विषयत्व ही पौरुषेयत्व का प्रयोजक है।

वर्णानामभिव्यक्तिः कुतो नेत्याशङ्क्याह—**अनुच्चारणेति**। ननूत्पन्नो गकारो नष्टो गकार इति प्रत्ययान्मध्ये उत्पत्त्यादिकं कथं नास्तीयत इत्याशङ्क्य परिहरति—**उत्पन्न इति। वर्णेति**। श्यामो घटो नष्टः रक्तो घट उत्पन्न इति प्रतीतिवदुत्पत्तिविनाशवद्ध्वनिसम्बन्धादुक्तप्रत्ययः परम्परासम्बन्धविषयत्वात्प्रमाणं वेत्यर्थः। उपसंहरति—**तस्मादिति**।

अथापसिद्धान्तं मीमांसकः शङ्कते—**नन्विति**। अस्माक मते वेदानामु-

---

१. न इति पदं गपुस्तके नास्ति, टीकाऽनुरोधादप्यावश्यकं भाति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा च सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकं वेदं विरचितवान्, न तु तद्विजातीयं वेदमिति न सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वं वेदानाम्। भारतादीनां तु सजातीयोच्चारणमनपेक्ष्यैवोच्चारणमिति तेषां पौरुषेयत्वम्। एवं पौरुषेयापौरुषेयभेदेनागमो द्विधा निरूपितः ॥ २० ॥

इति वेदान्तपरिभाषायामागमपरिच्छेदः ॥ ४ ॥

इस प्रकार पौरुषेयत्व का अर्थ कर देने पर सृष्टि के प्रारम्भ में परमेश्वर ने पूर्वसृष्टिसिद्ध वेदों के आनुपूर्वी के समान ही अनुक्रम वाले वेद को बनाया, न कि उससे विजातीय वेद को। अतः सजातीय उच्चारण की उपेक्षा न करके उच्चारण विषयत्वरूप पौरुषेयत्व वेदों में नहीं है। महाभारतादि में तो सजातीय उच्चारण की अपेक्षा किये विना हो उच्चारण किया गया है, इसीसे उनमें पौरुषेयत्व है। इस प्रकार पौरुषेय तथा अपौरुषेय के भेद से आगम दो प्रकार का बताया गया है ॥ २० ॥

वेदान्तपरिभाषा के आगम परिच्छेद का हिन्दी अनुवाद समाप्त हुआ।

त्पत्तिमत्त्वेऽपि पौरुषेयत्वाभावान्नापसिद्धान्त इत्याशयेनाह—**नेति**। किंविधं पौरुषेयत्वमभिप्रेत्यास्मन्मते तदापाद्यते। किं पुरुषेणोच्चार्यमाणत्वम्? किं वा पुरुषाधीनोत्पत्तिकत्वम्? इति विकल्प्याद्यं निराकरोति—**न हीति**। मौनिश्लोकादेरपौरुषेयत्वापत्तिरपि बोध्या। द्वितीयं प्रत्याह—**नापीति**। वेदाः पौरुषेयाः वाक्यत्वाद्भारतादिवदिति नैयायिकाभिमतपौरुषेयत्वानुमानेनाऽस्मदाद्यभ्युपेतपौरुषेयत्वसाधनादस्मदादिना सिद्धसाधनतापत्तेरित्याह—**नैयायिकेति**। तर्हि किंविधं पौरुषेयत्वं यदभावाद्भवतां मत उत्पत्तिमतां वेदानामपौरुषेयत्वं सिध्यतीत्याशङ्क्य परिहरति—**किं त्विति**। सजातीयोच्चारणस्यानपेक्षा यस्य तद् यथा, तथाविधोच्चारणस्य विषयत्वमित्यर्थः।

तथा च—उक्तविधे पौरुषेयत्वे सति। **इति**—उक्तहेतोः, नोक्तपौरुषेयत्वं वेदस्येत्यर्थः। अस्ति च पौरुषेयेष्वेतल्लक्षणमित्याह—**भारतादीनां त्विति**।

इति श्रीमत्परमहंसपरिव्राजकाचार्य्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुघनपतिसूरिसुतशिवदत्तविरचितायां वेदान्तपरिभाषाऽर्थदीपिकायामागमपरिच्छेदः समाप्तः ॥ ४ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथार्थापत्तिपरिच्छेदः ॥ ५ ॥

इदानीमर्थापत्तिर्निरूप्यते ।[1] तत्रोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः । तत्रोपपाद्यज्ञानं करणम् । उपपादकज्ञानं फलम्[2] । येन विना यदनुपपन्नं तत्तत्रोपपाद्यम्, यस्याभावे यस्यानुपपत्तिस्तत्रोपपादकम् । यथा रात्रिभोजनेन विना दिवाऽभुञ्जानस्य पीनत्वमनुपपन्नमिति तादृशपीनत्वमुपपाद्यम् । यथा वा रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकम् ।

सम्प्रति अर्थापत्ति प्रमाण का निरूपण किया जा रहा है । उपपाद्य (कार्य) के ज्ञान से उपपादक (कारण) की कल्पना (ज्ञान) करना अर्थापत्ति प्रमा है । उसमें उपपाद्य का ज्ञान करण है और उपपादक का ज्ञान फल है । जिसके विना जो वस्तु अनुपपन्न हो उसे वहाँ पर उपपाद्य कहा जाता है और जिसके अभाव में जिसकी अनुपपत्ति होती हो उसे उपपादक कहा जाता है । जैसे कि दिन में न खाने वाले की स्थूलता रात्रि-भोजन के विना उपपन्न नहीं हो सकती । इसलिए दिवाऽभुञ्जान व्यक्ति का पीनत्व (स्थूलता) उपपाद्य है और रात्रि-भोजन के अभाव में दिन में खाने वाले की स्थूलता सिद्ध नहीं हो सकती । इसलिए रात्रि-भोजन पीनत्व का उपपादक है ।

अथागमनिरूपणानन्तरमर्थापत्तिनिरूपणं प्रतिजानीते—**इदानीमिति** । **तत्र**—अर्थापत्तेरागमनिरूपणानन्तरं निरूपणविषयत्वे सति । प्रमाकरणस्य प्रमाणत्वात्प्रमारूपार्थापत्तेर्लक्षणमाह—**उपपाद्येति** । उपपादकज्ञानं करणमुपपाद्यज्ञानं फलमिति भ्रमव्यावृत्त्यर्थमाह—**तत्रेति** । तयोर्ज्ञानद्वयोर्मध्ये । उपपादकाभावव्यापकाभावप्रतियोगित्वमुपपाद्यत्वमित्युपपाद्यलक्षणमाह—**येनेति** । **तत्रेति** । तेनेत्यर्थः । उपपाद्याभावव्याप्याभावप्रतियोगित्वमु[3]पपादकलक्षणमाह—**यस्येति** । **तत्रेति** । तस्येत्यर्थः । उपपाद्योदाहरणमाह—**यथेति** । उपपादकोदाहरणमाह—**यथा वेति** ।

---

१. अर्थापत्तिप्रमाकरणमर्थापत्तिप्रमाणम्, तथा च प्रमाणलक्षणघटकस्य प्रमापदस्यानिरूपणे प्रमाणस्य निरूपणमेव न भवतीति प्रमायाः प्रथमं निरूपणं-तत्रेति ।

२. फलम् अर्थापत्तिप्रमेत्यर्थः ।

३. मित्युपपादकेति गपुस्तके पाठः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रात्रिभोजनकल्पनारूपायां प्रमितावर्थस्यापत्तिः[1] कल्पनेति षष्ठीसमासेन अर्थापत्तिशब्दो वर्तते, कल्पनाकरणपीनत्वादिज्ञाने त्वर्थस्यापत्तिः[2] कल्पना यस्मादिति बहुव्रीहिसमासेन वर्तते इति फलकरणयोरुभयोस्तत्पदप्रयोगः ॥ १ ॥

[3]सा चार्थापत्तिर्द्विविधा—दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति। तत्र दृष्टार्थापत्तिर्यथा—इदं रजतमिति पुरोवर्तिनि प्रतिपन्नस्य रजतस्य नेदं रजतमिति तत्रैव निषिध्यमानत्वं सत्यत्वेऽनुपपन्नमिति रजतस्य[4] सद्भिन्नत्वं सत्यत्वात्यन्ताभाववत्त्वं वा मिथ्यात्वं कल्पयतीति।

रात्रि-भोजन कल्पना रूप प्रमा में अर्थापत्ति शब्द की प्रवृत्ति 'अर्थ की आपत्ति' (कल्पना) इस प्रकार षष्ठी समास करके होती है। एवं कल्पना के करण पीनत्वरूप अर्थ में अर्थापत्ति शब्द का 'अर्थस्य आपत्तिः यस्मात्' इस प्रकार बहुव्रीहि संमास करके प्रयोग किया जाता है। इस प्रकार प्रमा और उसके करण दोनों अर्थ में अर्थापत्ति पद का प्रयोग किया जाता है ॥ १ ॥

अर्थापत्ति का भेद—

वह अर्थापत्ति दो प्रकार की है—१. दृष्टार्थापत्ति और २. श्रुतार्थापत्ति। इनमें 'इदं रजतम्' यह दृष्टार्थापत्ति का दृष्टान्त है—जैसे कि उस पुरोवर्त्ति देश में अवगत रजत का निषेध विषयत्व उस रजत के सत्य होने पर सिद्ध नहीं हो सकता। इसलिए उस रजत में सद्भिन्नत्व अथवा सत्यत्व का अत्यन्ताभाववत्त्वरूप मिथ्यात्व की कल्पना कराता है।

प्रमितावर्थापत्तिशब्दप्रवृत्तिनिमित्तमाह—**रात्रिभोजनेति**। तत्करणे तन्निमित्तमाह—**कल्पनेति**।

एवं लक्षणलक्षितां तां विभजते—**सा चेति**। अर्थापत्तिनिरूपणस्य प्रपञ्च-

---

१. अर्थस्य—रात्रिभोजनरूपस्य उपपादकज्ञानस्य आपत्तिः—कल्पना, तथा च रात्रिभोजनकल्पनमेवार्थापत्तिप्रमेत्यर्थः।

२. अर्थस्य—रात्रिभोजनरूपस्योपपादकज्ञानस्य कल्पना यस्माद्—दिवाभोजनाभावविशिष्टपीनत्वज्ञानात् तदर्थापत्तिप्रमाणम्।

३. सेति। प्रमारूपार्थापत्तिरित्यर्थः।

४. सद्भिन्नत्वमिति। नेदं रजतमित्याप्तवाक्यश्रवणानन्तरं जातो रजतत्वासद्भावबोधः, स तत्र रजतत्वसत्त्वेऽनुपपद्यमानः सन्प्रत्यक्षावगतस्य रजतस्य सद्भिन्नत्वं कल्पयतीति तात्पर्यम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रुतार्थापत्तिर्यथा[1]—यत्र श्रूयमाणवाक्यस्य स्वार्थानुपपत्तिमुखेनार्थान्तरकल्पनम्। यथा 'तरति शोकमात्मवित्' इत्यत्र श्रुतस्य शोकशब्दवाच्यबन्धजातस्य ज्ञाननिवर्त्यत्वस्यान्यथाऽनुपपत्त्या बन्धस्य मिथ्यात्वं कल्प्यते॥

यथा वा जीवी देवदत्तो गृहे नेति वाक्यश्रवणानन्तरं जीविनो गृहासत्त्वं बहिः सत्त्वं कल्पयति॥ २॥

श्रुतार्थापत्तिश्च द्विविधा—अभिधानानुपपत्तिरभिहितानुपपत्तिश्च।

श्रुतार्थापत्ति का दृष्टान्त है—जहाँ पर श्रूयमाण वाक्य के अपने अर्थ की अनुपपत्ति द्वारा अर्थान्तर की कल्पना हो, उसी प्रकार अर्थान्तर की कल्पना को ही श्रुतार्थापत्ति प्रमा कहते हैं। जैसे कि 'तरति शोकमात्मवित्' यहाँ पर सुना गया शोक शब्द का वाच्यार्थ ज्ञान से निवृत्ति के योग्य—यावत् बन्धन के मिथ्यात्व के विना ज्ञाननिवर्त्यत्व सिद्ध नहीं हो सकता। सुतरां ज्ञाननिवर्त्यत्व की अन्यथा अनुपपत्ति से उक्त शोकरूप बन्ध में मिथ्यात्व की कल्पना की जाती है।

अथवा 'जीवित देवदत्त घर में नहीं है' इस वाक्य के श्रवण के पश्चात् जीवित देवदत्त के घर में असत्त्व बाहर सत्त्व की कल्पना कराता है॥ २॥

श्रुतार्थापत्ति का भेद—

श्रुतार्थापत्ति भी दो प्रकार की है—(१) अभिधानानुपपत्ति और (२) अभिहितानुपपत्ति।

मिथ्यात्वादिसिद्धयर्थत्वात्तदनुरूपमुदाहरणं वक्तव्यमित्याशयेनाह—**दृष्टार्थापत्तिर्यथेति। प्रतिपन्नस्य**—प्रतीतस्य। **तत्रैव**—पुरोवर्तिन्येव। **सत्यत्वे** रजतस्येति सम्बध्यते। अनुपपन्नमिति हेतोः निषिध्यमानत्वं रजतस्य मिथ्यात्वं कल्पयति। किं तदित्यत आह—**सद्भिन्नत्वमिति।**

मीमांसकमतानुसारेणाह—**यथा वेति। तत्र**—द्वयोर्मध्ये। पदाध्याहारमतमनुसृत्याह—**यथेति।** वेदिकोदाहरणमाह—**यथा वेति।** चतुर्थाध्यायस्थे 'सः स्वर्गः स्यात् सर्वान्प्रत्यवशिष्टत्वात्' इति सूत्रे स्वर्गकामपदाध्याहारस्य दर्शितत्वादिति भावः।

---

१. अत्र यथाशब्दश्च शब्दार्थकः, श्रुतार्थापत्तिश्च इत्यर्थः। तथा च यत्रेत्यादि श्रुतार्थापत्तेर्लक्षणम्, तरति शोकमित्यादिकं च लक्ष्यमित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र, 'यत्र वाक्यैकदेशश्रवणेऽन्वयाभिधानानुपपत्त्याऽन्वयाभिधानोपयोगि पदान्तरं कल्प्यते तत्राभिधानानुपपत्तिः। यथा द्वारमित्यत्र 'पिधेहि' इत्यध्याहारः' यथा वा 'विश्वजिता यजेत' इत्यत्र 'स्वर्गकाम' इति पदाध्याहारः।

ननु द्वारमित्यादावन्वयाभिधानात्पूर्वमिदमन्वयाभिधानं पिधानोपस्थापकपदं विनाऽनुपपन्नमिति कथं ज्ञानमिति चेत्। न। अभिधानपदेन करणव्युत्पत्त्या तात्पर्यस्य विवक्षितत्वात्। तथा च द्वारकर्मकपिधानक्रियासंसर्गपरत्वं पिधानोपस्थापकपदं विनाऽनुपपन्नमिति ज्ञानं तत्रापि सम्भाव्यते॥ ३॥

उनमें जहाँ पर वाक्य के एकदेश का श्रवण होने पर उसके अन्वयाभिधान की अनुपपत्ति से अन्वयाभिधान के उपयोगी पदान्तर की कल्पना की जाती हो वहाँ पर अभिधानानुपपत्ति रूप प्रमा कही जाती है। जिस प्रकार, 'द्वार' पद के श्रवण के बाद 'पिधेहि' (बन्द करो) पद का अध्याहार किया जाता है। अथवा जिस प्रकार 'विश्वजित् नामक याग के द्वारा इष्ट की भावना करें' (इस वाक्य श्रवण के बाद) 'स्वर्ग की कामना करने वाला' ऐसे पद का अध्याहार किया जाता है।

शङ्का—'द्वारम्' इतने मात्र श्रवण करने पर इसका अन्वयाभिधान से पूर्व इस अन्वय का अभिधान पिधान अर्थ का उपस्थापक पिधान पद के विना अनुपपन्न ही रहा है, ऐसा ज्ञान कैसे हो सकता?

समाधान—अभिधान पद से (अभिधीयतेऽनेन इस प्रकार) करण व्युत्पत्ति का तात्पर्य अर्थ ही विवक्षित है। इसलिए द्वारकर्मक पिधान क्रिया के संसर्गपरत्व रूप तात्पर्य अर्थ पिधान अर्थ के उपस्थापक 'पिधेहि' पद के विना असिद्ध है—ऐसा ज्ञान वहाँ पर सम्भव हो जाता है॥ ३॥

ननु द्वारकर्मकपिधानमित्यन्वयाभिधानात्प्राक् पिधानोपस्थापकं पदं विना द्वारमित्यन्वयाभिधानं नोपपद्यत इति कथं ज्ञानमिति **शङ्कते**—**नन्विति**। अत्र भावव्युत्पत्तिर्नाभिप्रेतेति परिहरति—**नेति**। अभिधीयतेऽनेनेति करणव्युत्पत्त्याऽभिधानपदेन तात्पर्यस्य विवक्षितत्वात्। तात्पर्यस्य विवक्षितत्वे सतीदं समाधानं फलितमित्याह—**तथा चेति**। द्वारकर्मकक्रियासंसर्गावबोधनतात्पर्येणानेन द्वारमित्युच्चरितमिति ज्ञातवतोऽन्वयाभिधानात्पूर्वावस्थायामपि तथा ज्ञानं संभाव्यत इत्यर्थः।

---

१. तत्र तयोर्द्विविधयोः श्रुतार्थापत्त्योः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अभिहितानुपपत्तिस्तु यत्र वाक्यावगतोऽर्थोऽनुपपन्नत्वेन ज्ञातः सन्नर्थान्तरं कल्पयति, तत्र द्रष्टव्या। यथा 'स्वर्गकामो ज्योतिष्टोमेन यजेत' इत्यत्र स्वर्गसाधनत्वस्य[1] क्षणिकज्योतिष्टोमयागगततयाऽवगतस्यानुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यते।

न चेयमर्थापत्तिरनुमानेऽन्तर्भवितुमर्हति। अन्वयव्याप्त्यज्ञानेनान्वयिन्यनन्तर्भावात्। व्यतिरेकिणश्चानुमानत्वं प्रागेव निरस्तम्। अत एवार्थापत्तिस्थलेऽनुमिनोमीति नानुव्यवसायः, किं तु अनेनेदं कल्पयामीति।

जहाँ पर वाक्य से अवगत अर्थ अनुपपन्न होने के कारण ज्ञात होता हुआ भी अर्थान्तर की कल्पना कराता है, वहाँ अभिहिता अनुपपत्ति रूप अर्थापत्ति समझनी चाहिए। जिस प्रकार 'स्वर्ग चाहने वाला ज्योतिष्टोम याग करे' यहाँ पर क्षणिक ज्योतिष्टोम याग में स्वर्गसाधनत्व अवगत हो रहा है। इसलिए (याग के क्षणिक होने से) उसमें अवगत भी स्वर्गसाधनता अनुपपन्न होकर मध्यवर्ती अपूर्व की कल्पना कराता है।

यह अर्थापत्ति प्रमाण अनुमान में अन्तर्भाव नहीं हो सकता। अन्वयव्याप्ति के अज्ञान से अन्वयी में तो अन्तर्भाव कर नहीं सकते और व्यतिरेकी में अनुमानत्व का हम पहले अनुमान परिच्छेद में ही खण्डन कर चुके हैं। अतएव अर्थापत्ति स्थल पर अनुमिनोमि ऐसा अनुव्यवसाय नहीं होता, किन्तु इससे इसकी कल्पना करता हूँ—इस प्रकार अनुव्यवसाय होता है।

द्वितीया क्व दृष्टेत्यपेक्षायामाह—**अभिहितेति**। तत्रापि कुत्रेत्यत आह—**यथा स्वर्गकाम इति**।

नैयायिकमतमाशङ्क्य परिहरति—**न चेति**। अर्थापत्तेरन्वयिन्यन्तर्भावः किं वा व्यतिरेकिणीति विकल्प्याद्यं प्रत्याह—**अन्वयेति**। द्वितीयं निराचष्टे—**व्यतिरेकिण इति**। अनुमिनोमीत्यनुव्यवसायाभावोऽपि व्यतिरेकिणोऽनुमानत्वेऽनुपपन्न इत्याह—**अत एवेति**। यतो व्यतिरेकिणोऽनुमानता नास्त्यत एव। कीदृशस्तस्यानुव्यवसाय इत्याशङ्क्याह—**किं त्विति**। तथा चार्थापत्तेरावश्यकत्वान्न गौरवमाशङ्कनीयमिति भावः।

---

१. स्वस्य क्षणिकतया साक्षाद् यागगतस्यानुप० इति पाठः खगपुस्तकयोः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नन्वर्थापत्तिस्थले—इदमनेन विनाऽनुपपन्नमिति ज्ञानं करणमित्युक्तं, तत्र किमिदं तेन विनाऽनुपपन्नत्वम् ? । तदभावव्यापकाभावप्रतियोगित्वमिति ब्रूमः । एवमर्थापत्तेर्मानान्तरत्वसिद्धौ व्यतिरेकि नानुमानान्तरम्, पृथिवीतरेभ्यो भिद्यते इत्यादौ गन्धवत्त्वमितरभेदं विनाऽनुपपन्नमित्यादिज्ञानस्य करणत्वात् । अत एवानुव्यवसायः पृथिव्यामितरभेदं कल्पयामीति ॥ ४ ॥

इति वेदान्तपरिभाषायामर्थापत्तिपरिच्छेदः ॥ ५ ॥

अर्थापत्ति स्थल में इसके विना यह अनुपपन्न है, ऐसे ज्ञान को करण आपसे कहा गया है । वहाँ पर यह स्पष्ट रूप से बताना चाहिए कि किस चीज के विना क्या अनुपपन्न है ? साध्याभाव का व्यापकीभूत जो अभाव उसके प्रतियोगित्व आ जाने से व्याप्तिज्ञान ही तो हुआ, ऐसा हम कहेंगे । इस प्रकार अर्थापत्ति स्वतन्त्र प्रमाण है, ऐसा सिद्ध हो जाने पर व्यतिरेक अनुमान को भिन्न रूप से स्वीकार नहीं किया जा सकता । 'पृथ्वी इतरभेद वाली है' इत्यादि स्थल पर पृथिवी में गन्धवत्व इतरभेद के विना उपपन्न है नहीं, इसी ज्ञान को इतरभेद कल्पना का कारण मानते हैं । अतएव पृथिवी में इतरभेद की कल्पना '(मैं) करता हूँ' ऐसा अनुव्यवसाय होता है ॥ ४ ॥

वेदान्तपरिभाषा में अर्थापत्ति परिच्छेद का हिन्दी अनुवाद समाप्त हुआ ।

नन्विदमनेन विनाऽनुपपन्नमिति ज्ञानं व्यतिरेकव्याप्तिज्ञानमेव ? उतान्यत् ? आद्ये, तस्यानुमितिं प्रति कलृप्तकरणत्वेनानुमानत्वापत्तिः । न द्वितीयः, तस्य निरूपयितुमशक्यत्वादित्याशयेनाशङ्कते—नन्विति । अस्तु वा व्यतिरेकव्याप्तिज्ञानमेतत् तथाऽपि[1] तस्य तथाविधानुव्यवसायबलादर्थापत्तिकरणत्वमविरुद्धम्, तस्यानुमितिकरणत्वं दूषितं चेत्याशयेनाह—तदभावेति । एवमर्थापत्तेरावश्यकत्वाद्व्यतिरेकिणोऽनुमानत्वं न कल्पनीयमित्याह—एवमिति । तर्हि तदुदाहरणेषु का गतिरित्याशङ्क्य हेतुमाह—पृथिवीति । पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वाद्यन्नैवं तन्नैवं यथा जलमित्यादौ । अत्राप्यर्थापत्तित्वसाधकोऽनुव्यवसाय इत्याह—अत एवेति ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तकृतायां वेदान्तपरिभाषाऽर्थदीपिकायामर्थापत्तिपरिच्छेदः ॥ ५ ॥

---

१. तस्य व्यतिरेकव्याप्तिज्ञानस्य ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथानुपलब्धिपरिच्छेदः ॥ ६ ॥

इदानीं षष्ठं प्रमाणं निरूप्यते।[1] ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपं प्रमाणम्। अनुमानजन्यातीन्द्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणाय अजन्यान्तं पदम्। अदृष्टादौ साधारणकारणेऽतिव्याप्तिवारणाय असाधारणेति पदम्। अभावस्मृत्यसाधारणहेतुसंस्कारेऽतिव्याप्तिवारणाय अनुभवेति विशेषणम्।

सम्प्रति (अनुपलब्धिरूप) षष्ठ प्रमाण का निरूपण किया जा रहा है। ज्ञानरूप करण से अनुत्पन्न जो अभाव का अनुभव, उसके असाधारण कारण को अनुपलब्धिरूप प्रमाण कहते हैं। अनुमान से जन्य अतीन्द्रिय वस्तु के अभावानुभव के कारण अनुमानादि है, उसमें अतिव्याप्ति वारण के लिए उक्त लक्षण में ज्ञानकरणाजन्य विशेषण दिया है। अदृष्टादि साधारण कारण में अतिव्याप्ति वारण करने के लिए लक्षण में असाधारण ऐसा पद दिया है। अभाव स्मृति के असाधारण कारण संस्कार में अतिव्याप्ति वारण के लिए अनुभव ऐसा विशेषण दिया गया।

अथ क्रमप्राप्तानुपलब्धिप्रमाणनिरूपणं प्रतिजानीते—**इदानीमिति**। तल्लक्षणमाह—**ज्ञानेति**। **अजन्यान्तं**—ज्ञानकरणाजन्येतिपदम्। भावानुभवकरणे

---

१. ज्ञानरूपाणि यानि करणानि—व्याप्तिज्ञान–सादृश्यज्ञान–तात्पर्यवच्छब्दज्ञानोपपाद्यज्ञानानि तेभ्योऽजन्यो योऽभावानुभवः, तस्य असाधारणं कारणम् अनुपलब्धिरूपं प्रमाणमित्यर्थः।

ननु ज्ञानरूपकरणेभ्योऽजन्योऽपि चक्षुरादिजन्यो योऽभावानुभवः तस्यासाधारणं कारणं चक्षुरादिकमेवास्तु, किमनुपलब्ध्या? येनेन्द्रियेण या व्यक्तिर्गृह्यते तेनैवेन्द्रियेण तद्गता जातिस्तदभावश्च गृह्यत इति न्यायात्, ततश्चार्थान्तरं स्यादिति कश्चिद् ब्रूयात्, स प्रतिवक्तव्यः—घटतदभावानुभवयोर्वैजात्यमनुभूयते न वा? नाद्यः, प्रत्यक्षानुमितिप्रभयोरपि अनुभवत्वसाम्येन भेदाभावस्य तुल्यत्वात्। आद्येऽनुभववैजात्ये प्रमाणवैजात्यस्यावश्यकत्वादभावज्ञानं (अनुपलब्धिः) प्रमाणान्तरमेव। येनेन्द्रियेणेति न्यायस्त्वन्याय एव, नीरूपस्य निस्पर्शस्य निर्गन्धस्य नीरसस्य निःशब्दस्य चाभावस्य ऐन्द्रियत्वायोगात्। इन्द्रियान्वयव्यतिरेकयोस्त्वधिकरणज्ञानाद्युपक्षीणत्वेनान्यथासिद्धेरिति मूले एव वक्ष्यते इति दिक्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न चातीन्द्रियाभावानुमितिस्थलेऽप्यनुपलब्ध्यैवाभावो गृह्यतां विशेषाभावादिति वाच्यम्। धर्माधर्माद्यनुपलब्धिसत्त्वेऽपि तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावग्राहकत्वात् ॥ १ ॥

ननु केयं योग्यानुपलब्धिः ?। किं योग्यस्य प्रतियोगिनोऽनुपलब्धिरुत योग्याधिकरणे प्रतियोग्यनुपलब्धिः ?। नाद्यः, स्तम्भे पिशाचादिभेदस्याप्रत्यक्षत्वापत्तेः। नान्त्यः, आत्मनि धर्माधर्माद्यभावस्यापि

अतीन्द्रिय वस्तु के अभाव की अनुमिति स्थल पर भी अनुपलब्धि प्रमाण से ही अभाव का ज्ञान क्यों नहीं मानते हैं? (क्योंकि चाहे प्रत्यक्ष के योग्य वस्तु का अभाव हो) दोनों में अभाव तो समान ही है। ऐसा नहीं कह सकते, क्योंकि धर्माधर्मादि की उपलब्धि न होने पर भी धर्मादि के अभाव का निश्चय न होने से योग्य अनुपलब्धि ही अभाव का ग्राहक माना जाता है ॥ १ ॥

शङ्का—यह योग्यानुपलब्धि क्या चीज है? क्या योग्य का अर्थात् योग्य प्रतियोगी की अनुपलब्धि को ही योग्यानुपलब्धि कहते हैं अथवा योग्याधिकरण में प्रतियोगी की अनुपलब्धि है? (इस प्रकार षष्ठी एवं सप्तमी तत्पुरुष समास की सम्भावना होती है। प्रथम पक्ष में खम्भे में पिशाचादि के भेद का प्रत्यक्ष न हो सकेगा। द्वितीय पक्ष में आत्मा में धर्माधर्मादि के अभाव का भी प्रत्यक्ष होने लगेगा।

चक्षुरादावतिव्याप्तिवारणाय **अभावपदम्**[1] (इत्यभिप्रेत्य) असाधारणपदव्यावर्त्यमाह—**अदृष्टादाविति**। ननु ज्ञानपदं विहायानुभवपदप्रक्षेपे किंफलमित्याशङ्क्याह—**अभावेति**।

अजन्यान्तस्य वैयर्थ्यमाशङ्क्य परिहरति—**न चेति**। अभावग्राहकयोग्यानुपलब्धेरभावानुमितिस्थलेऽभावादित्याह—**धर्मेति**।

षष्ठीसप्तमीसमासयोः सम्भवादुभयत्र च दोषसद्भावाच्छङ्कते—**नन्विति**। कर्मधारयसमासमाश्रित्य परिहरति—**योग्येति**। अनुपलब्धियोग्यत्वं किमित्यपेक्षायामाह—**अनुपलब्धेरिति**। यद्यत्र घटः स्यादिति तर्कितेन प्रतियोगिसत्त्वेन तदुपलभ्येतेति प्रसञ्जितः घटोपलम्भलक्षणः प्रतियोगी यस्यानुपलम्भस्य तस्य भावस्तत्त्वमित्यभिप्रेत्यैतदर्थमाह—**यस्येति**।

---

१. इत्यभिप्रेत्येति पाठः सर्वेषु पुस्तकेषु दृश्यते, प्रयोजनं तु नाकलयामः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रत्यक्षतापत्तेरिति चेत्। न। योग्या चासावनुपलब्धिश्चेति कर्मधारयाश्रयणात्। अनुपलब्धेर्योग्यता च—तर्कितप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वम्। यस्याभावो गृह्यते तस्य यः प्रतियोगी तस्य सत्त्वेनाधिकरणे तर्कितेन प्रसञ्जनयोग्यमापादनयोग्यं यत्प्रतियोग्युपलब्धिस्वरूपं यस्यानुपलम्भस्य तदनुपलब्धेर्योग्यत्वमित्यर्थः।

तथा हि, स्फीतालोकवति भूतले यदि घटः स्यात्तदा घटोपलम्भः स्यादित्यापादनसम्भवात्तादृशभूतले घटाभावोऽनुपलब्धिगम्यः। अन्धकारे तु तादृशापादनासम्भवान्नानुपलब्धिगम्यता। अत एव स्तम्भे पिशाचसत्त्वे स्तम्भवत्प्रत्यक्षतापत्त्या तदभावोऽनुपलब्धिगम्यः। आत्मनि धर्मादिसत्त्वेऽप्यस्यातीन्द्रियतया निरुक्तोपलम्भापादनाऽसम्भवाद् न धर्माद्यभावस्यानुपलब्धिगम्यत्वम्॥ २॥

समाधान—ऐसा कहना उचित नहीं है। क्योंकि यहाँ पर योग्यानुपलब्धि पद में योग्य जो अनुपलब्धि इस प्रकार कर्मधारय समास माना है। तर्कित प्रतियोगी सत्त्व से प्राप्त हुआ प्रतियोगिकत्व ही अनुपलब्धि की योग्यता है। इसी को अनुपलब्धि में योग्यता कहते हैं। जिसके अभाव का ग्रहण किया जाय उसका जो प्रतियोगी उसके अधिकरण में तर्कित सत्त्व से कल्पना के योग्य अपादान योग्य जो प्रतियोगी के उपलब्धि का स्वरूप है जिस उपलम्भ का, यही अनुपलब्धि में योग्यता है।

जिस प्रकार स्पष्ट आलोक वाले भूतल में यदि घट होता तो घट का उपलब्ध (ज्ञान) होता। ऐसा कथन सम्भव हो जाने से ऐसे भूतल में घट का जो अभाव वह अनुपलब्धि प्रमाणगम्य माना गया है। किन्तु अन्धकार में ऐसा आपादन (कथन) सम्भव न होने से उस अन्धकार में घटाभाव को अनुपलब्धि प्रमाणगम्य नहीं माना जा सकता। स्तम्भ में पिशाच रहने पर स्तम्भ की तरह उसका भी प्रत्यक्ष होता, इसप्रकार आपादन सम्भव होने से स्तम्भ में पिशाच का भेद भी अनुपलब्धि प्रमाण से गम्य है। आत्मा में धर्माधर्मादि के रहते हुए भी यदि धर्मादि होते तो उनका उपलम्भ होता है ऐसा कथन सम्भव नहीं है, क्योंकि वह अतीन्द्रिय है। इसलिए आत्मा में धर्मादि के अभाव का अनुपलब्धि प्रमाण से गम्य माना नहीं जा सकता॥ २॥

अथोदाहरणप्रत्युदाहरणाभ्यामुक्तं स्फुटयति **तथा हीति। स्फीतः**—विशालः। पक्षद्वयोक्तदोषाभावमाह—**अत एवेति**। यत एवंभूतयोग्यानुपलब्धिसमाश्रयणमत एवेत्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननूक्तरीत्याऽधिकरणेन्द्रियसन्निकर्षस्थले अभावस्यानुपलब्धिगम्यत्वमनुमतं तत्र कल्पनेन्द्रियमेवाभावाकारवृत्तावपि करणम्, इन्द्रियान्वयव्यतिरेकानुविधानादिति चेत्। न। तत्प्रतियोग्यनुपलब्धेरपि अभावग्रहे हेतुत्वेन कल्पनत्वेन करणत्वमात्रस्य कल्पनात्। इन्द्रियस्य चाभावेन समं सन्निकर्षाभावेनाभावग्रहाहेतुत्वात्। इन्द्रियान्वयव्यतिरेकयोरधिकरणज्ञानाद्युपक्षीणत्वेनान्यथासिद्धेः ॥ ३ ॥

शङ्का—उक्त रीति से अधिकरण के साथ इन्द्रिय-सन्निकर्ष स्थल पर अभाव में अनुपलब्धि प्रमाणगम्यत्व का समर्थन किया गया, अतएव वहाँ पर प्रत्यक्ष-करणरूप से सिद्ध इन्द्रियों को भी अभावाकार वृत्ति में करणरूप से मान लिया गया, क्योंकि इन्द्रियों के अन्वय एवं व्यतिरेक का अनुविधान आपको भी स्वीकार्य है।

समाधान—अभाव के प्रतियोगी को अनुपलब्धि को भी अभाव ज्ञान में कारण माना गया है, इसलिए अनुपलब्धि में अभाव को कारण रूप से उभयवादी मानने से कृत ही है। केवल करणत्व की ही कल्पना करनी है, (कारणत्व की नहीं)। इन्द्रियों का अभाव के साथ सन्निकर्ष न होने से अभाव ज्ञान के प्रति इन्द्रिय को कारण नहीं माना जा सकता क्योंकि इन्द्रियों का अन्वय-व्यतिरेक अभाव के अधिकरण बोधन में ही उपक्षीण हो जाने से (अभाव अनुभव के लिए इन्द्रियाँ अन्यथासिद्ध हैं) ॥ ३ ॥

नैयायिकः शङ्कते—**नन्विति**। **तत्र**—तादृशस्थले। कल्पनसम्भवेऽपूर्वकल्पनमन्याय्यं गौरवादित्यर्थः। इन्द्रियसत्त्वेऽभावज्ञानं तदभावे तदभाव इत्यन्वयव्यतिरेकयोरनुविधानात्—अनुरोधात्। नास्ति मम गौरवं प्रत्युत तवैव महद्गौरवमित्याशयेन समाधत्ते—**नेति**। संयुक्तविशेषणतासंबन्धस्यानङ्गीकारात्प्रमाणशून्यत्वाच्चेत्यभिप्रेत्याह—**इन्द्रियस्येति**। ननु सन्निकर्षाभावप्रत्युक्तहेतुत्वाभावोऽसिद्ध इन्द्रियान्वयव्यतिरेकबलेन तस्य कल्प्यत्वादित्याशङ्क्याह **इन्द्रियेति**। **अन्यथासिद्धेः** सन्निकर्षादिनैव[1] सार्थक्यात्। आदिपदेन प्रतियोगिज्ञानसंग्रहः। [2]अभावग्रहाहेतुत्वेऽयं हेतुः।

---

१. सन्निकर्षादिनैवेति पाठः मुद्रितपुस्तकेषु दृश्यते। परन्तु सन्निकर्षादिनैव इति विश्लिष्टे पाठे सत्येवमर्थः सम्पत्स्यते। 'सन्निकर्षादिनैव' इत्यस्य अभावेन समं नास्तीत्यर्थः। 'सार्थक्याद्' इत्यस्य इन्द्रियान्वयव्यतिरेकयोरधिकरणेन सह सन्निकर्षादपि सार्थक्यादित्यर्थः।

२. अभावेन समं सन्निकर्षाभावोऽयं हेतुरिति पाठः गपुस्तके।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु भूतले घटा नेत्याद्यभावानुभवस्थले भूतलांशे प्रत्यक्षत्वमुभयसिद्धमिति तत्र वृत्तिनिर्गमनस्यावश्यकत्वेन भूतलावच्छिन्नचैतन्यवत्तन्निष्ठघटाभावावच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया घटाभावस्य प्रत्यक्षतैव सिद्धान्तेऽपीति चेत्। सत्यम्। अभावप्रतीतेः प्रत्यक्षत्वेऽपि तत्करणस्यानुपलब्धेर्मानान्तरत्वात्। न हि फलीभूतज्ञानस्य प्रत्यक्षत्वे तत्करणस्य प्रत्यक्षप्रमाणतानियतत्वमस्ति, दशमस्त्वमसीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वेऽपि तत्करणस्य वाक्यस्य प्रत्यक्षप्रमाणभिन्नप्रमाणत्वाभ्युपगमात्।

'भूतल में घट नहीं है' इत्यादि अभाव के अनुभव स्थल पर भूतलांश में प्रत्यक्षत्व उभयवादी (नैयायिक एवं वेदान्त) सिद्ध है। अतएव वहाँ पर अन्तःकरण वृत्ति का बाहर निकलना भी आवश्यक होने से भूतल से अवच्छिन्न चैतन्य का जिस प्रकार प्रमाता के साथ अभेद होने के कारण प्रत्यक्ष होता है, उसी प्रकार भूतल में रहने वाले घटाभाव से अवच्छिन्न चैतन्य का भी प्रमाता के साथ अभेद है ही। इसलिए वेदान्त सिद्धान्त में भी घटाभाव में प्रत्यक्षत्व ही मानना चाहिए। ठीक है, ऐसे स्थल पर अभाव की प्रतीति को प्रत्यक्ष मानने पर भी उसका कारण अनुपलब्धि प्रमाण प्रत्यक्ष से भिन्न ही है। ऐसा कोई भी नियम है नहीं कि—फलीभूत ज्ञान का प्रत्यक्षत्व होने पर उसके करण में भी प्रत्यक्षप्रमाणता ही हो, क्योंकि 'तुम दशम हो' इत्यादि वाक्य से जन्य दशम पुरुष का ज्ञान प्रत्यक्ष होने पर भी उसका करण वाक्य प्रमाण प्रत्यक्ष प्रमाण से भिन्न माना गया है। (उसी प्रकार यहाँ पर भी समझना चाहिए।)

ननु भवत्सिद्धान्तेऽप्यभावप्रमायाः प्रत्यक्षतैव समायात्यतः कथं तत्करणमनुपलब्धिरिति शङ्कते—**नन्विति**। आदिपदेन स्तम्भे पिशाचो नेत्यादिसंग्रहः। **तत्र**—तादृशे स्थले। **तन्निष्ठः** भूतलनिष्ठः। अर्द्धाङ्गीकारेण परिहरति—**सत्यमिति**। यद्यप्यभावस्य प्रत्यक्षत्वयोग्यत्वाभावाच्छब्दजन्यस्वनिष्ठधर्मादिज्ञानवन्नाभावज्ञानस्य प्रत्यक्षत्वम्, प्रत्यक्षलक्षणे योग्यत्वस्यापि विषयविशेषणत्वेनोक्तत्वात्। तथाऽप्यभाव[1]प्रत्यक्षाप्रत्यक्षत्वयोर्न तद्योग्यायोग्यत्वे तन्त्रे, किं तु प्रतियोग्यनुपलब्धियोग्यायोग्यत्वे। तथा चानुपदमेवास्यार्थस्य स्पष्टीकृतत्वादभाव[2]प्रत्यक्षत्वे

---

१. अभावज्ञानप्रत्यक्षेत्यादिः पाठः गपुस्तके।

२. अत्रापि अभावज्ञानप्रत्यक्षेत्यादिः पाठः मपुस्तके।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

फलवैजात्यं विना कथं प्रमाणभेद इति चेत्। न। वृत्तिवैजात्य-मात्रेण प्रमाणवैजात्योपपत्तेः। तथा च घटाद्यभावाकारवृत्तिर्नेन्द्रियजन्या, इन्द्रियस्य विषयेणासन्निकर्षात्। किन्तु घटानुपलब्धिरूपमानान्तरजन्या, इति भवत्यनुपलब्धेर्मानान्तरत्वम् ॥ ४ ॥

नन्वनुपलब्धिरूपमानान्तरपक्षेऽप्यभावप्रतीतेः प्रत्यक्षत्वे घटवति घटाभावभ्रमस्यापि प्रत्यक्षत्वापत्तौ तत्राप्यनिर्वचनीयघटाभावोऽभ्युप-गम्येत। न चेष्टापत्तिः, तस्य मायोपादानकत्वेऽभावत्वानुपपत्तेः,

फल में भिन्नजातीयता के विना प्रमाण में भेद (विजातीयता) कैसे सम्भव हो सकता ? यह कथन उचित नहीं है, क्योंकि वृत्ति के विजातीयता मात्र से ही प्रमाणों में विजातीयता सिद्ध हो जाती है। इसी प्रकार घटादि का अभाव। कारण वृति इन्द्रियजन्य नहीं है, क्योंकि इन्द्रियों का घटाभावरूप विषय के साथ सन्निकर्ष है ही नहीं। किन्तु घट को अनुपलब्धिरूप प्रमाणान्तर से जन्य घटाकारवृत्ति माननी चाहिए अतएव अनुपलब्धि (प्रत्यक्षादि से) भिन्न प्रमाण है यह सिद्ध हुआ ॥४॥

शङ्का—अनुपलब्धि रूप प्रमाण को अतिरिक्त प्रमाण मानने वालों के पक्ष में भी अभाव प्रतीति को प्रत्यक्ष मानने पर 'घटवद् भूतलम्' में घटाभावरूप भ्रम को भी मानना पड़ेगा, फलस्वरूप वहाँ पर भी अनिर्वचनीय घटाभाव मानना चाहिए। यहाँ पर अनिर्वचनीय घटाभाव मानना चाहिए। यहाँ पर अनिर्वचनीय घटाभाव को स्वीकार करना इष्ट नहीं है, क्योंकि उसका उपादान कारण माया को मानने

नाभ्युपेत्यवाद आश्रयणीयः। ननु तस्याः प्रत्यक्षत्वे कथं तत्करणस्य मानान्तर-त्वमिति तत्राह—**न हीति**।

ननु प्रमाणभेदस्य फलभेदायत्तत्वात्कथं तं विना तस्य सिद्धिरित्याशङ्क्ते—**फलेति**। प्रत्यक्षत्वेन फलस्य साजात्येऽपि भूतलाकारवृत्तेरिन्द्रियजन्यत्वादभावा-कारवृत्तेस्तदजन्यत्वाद् वृत्तिवैजात्यमात्रेण तदुपपत्तेर्मैवमित्याह—**नेति**। फलित-माह—**तथा चेति**।

वृत्तिवैजात्यमात्रेण प्रमाणवैजात्ये अभावभ्रमे दोषमाशङ्क्ते—**नन्विति**। तत्रानिर्वचनीयघटाभावो नाभ्युपगम्यतेऽतो नोक्तदोष इत्याह—**नेति**। नन्वेवं

---

१. अभावप्रतीतेः प्रत्यक्षत्वे तत्करणस्य प्रमाणस्यापि प्रत्यक्षप्रमाणतोचितेति दृष्टवलेन शङ्क्ते—नन्विति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मायोपादानकत्वाभावे मायायाः सकलकार्योपादानत्वानुपपत्तिरिति चेत्। न। घटवति घटाभावभ्रमो न तत्कालोत्पन्नघटाभावविषयकः, किन्तु भूतलरूपादौ विद्यमानो लौकिको घटाभावो भूतले आरोप्यत इत्यन्यथाख्यातिरेव। आरोप्यसन्निकर्षस्थले सर्वत्रान्यथाख्यातेरेव व्यवस्थापनात्॥ ५॥

[1]अस्तु वा प्रतियोगिमति तदभावभ्रमस्थले तदभावस्यानिर्वचनीयत्वम्, तथाऽपि तदुपादानं मायैव। न ह्युपादानोपादेययोरत्यन्तसा-

पर (माया भावरूप होने के कारण) उसमें अभावत्व की सिद्धि नहीं हो सकेगी। उसे माया-उपादान वाला नहीं मानने पर माया में सकल कार्य के प्रति उपादानत्व अनुपपन्न होने लगेगा।

समाधान यह ठीक नहीं है। 'घटवद् भूतलम्' में घटाभाव-रूप भ्रम का प्रत्यक्ष तत्काल उत्पन्न अनिर्वनीय घटाभाव को विषय नहीं करता है, किन्तु भूतल के रूप में जो लौकिक घटाभाव विद्यमान है, उसीका भूतल में आरोप होता है, इसलिए ऐसे स्थल पर अन्यथाख्यातिवाद ही माना जाता है। आरोप्य के सन्निकर्ष स्थल पर सर्वत्र अन्यथाख्यातिवाद मानकर ही व्यवस्था दी गई है॥ ५॥

अथवा प्रतियोगी वाले स्थल (घटवति भूतले) में उसके अभाव का भ्रम होने पर उस अभाव में हम अनिर्वचनीयत्व मानते हैं, फिर भी उसका उपादान कारण माया ही है। यदि कहो कि उपादान (माया) और उसके कार्य (अभाव) में अत्यन्त सादृश्य होना चाहिए, तो यह कोई नियम नहीं कि उपादान तथा उसके

तर्हि कथं घटाभावभ्रमस्य प्रत्यक्षत्वमित्याशङ्क्ते—**किं त्विति**। तद्विषयस्य सन्निहितत्वेन तत्सम्भवान्मैवमित्याह—**भूतलेति आदिपदेन** क्रियादिसंग्रहः। अपसिद्धान्तमाशङ्क्याह—**आरोप्येति**।

ननु घटाधिकरणभूतलरूपादिनिष्ठघटाभावादेरिन्द्रियासन्निकृष्टत्वात्कथं तद्गतोऽभावोऽत्रारोप्यत इत्याशङ्क्यानिर्वचनीयत्वमङ्गीकृत्य समाधत्ते—**अस्तु वेति**।

---

१. आरोप्यस्य सन्निकृष्टत्वेऽन्यथाख्यातिरसन्निष्टत्वेऽनिर्वचनख्यातिरिति ख्यातिद्वयापेक्षयाऽऽवश्यकत्वेनान्यथाख्यातिरेवैका स्वीकर्तव्या लाघवादित्यरुचेराह—अस्तु वेति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साजात्यम्, तन्तुपटयोरपि तन्तुत्वपटत्वादिना वैजात्यात्। यत्किञ्चित्साजात्यस्य मायाया अनिर्वचनीयत्वस्य घटाभावस्य च मिथ्यात्वधर्मस्य विद्यमानत्वात्। अन्यथा व्यावहारिकघटाद्यभावं प्रति कथं मायोपादानमिति कुतो नाशङ्केथाः ?। न च विजातीययोरप्युपादानोपादेयभावे ब्रह्मैव जगदुपादानं स्यादिति वाच्यम्। प्रपञ्चविभ्रमाधिष्ठानत्वरूपेण तस्येष्टत्वात्। परिणामित्वरूपस्योपादानत्वस्य निरवयवे ब्रह्मण्यनुपपत्तेः। तथा च प्रपञ्चस्य परिणाम्युपादानं माया न ब्रह्म इति सिद्धान्त इत्यलमतिप्रसङ्गेन ॥ ६ ॥

कार्य में अत्यन्त साजात्य हो। क्योंकि तन्तु और पट में भी तन्तुत्व घटत्वादि के रूप से विजातीयता दीखती है। यत्किञ्चित् साजात्य माने तो, माया का और उसके कार्य अनिर्वचनीय घटाभाव में भी मिथ्यात्व धर्म विद्यमान है ही, अन्यथा व्यावहारिक घटाद्यभाव के प्रति माया उपादान कारण कैसे हो सकेगी? इस प्रकार शङ्का आपने क्यों नहीं की?

शङ्का—कार्य एवं कारण में विजातीयत्व रहने पर भी दोनों में उपादान-उपादेय भाव मानने से ब्रह्म को ही जगत् का उपादान कारण मान लेना चाहिए।

समाधान—यह कथन उचित नहीं है, क्योंकि प्रपञ्चभ्रम के प्रति अधिष्ठान रूप से ब्रह्म को उपादान कारण (वेदान्तप्रक्रिया में) माना गया है। परिणामिस्वरूप उपादानत्व निरवयव ब्रह्म में सम्भव नहीं है। अतएव प्रपञ्च का परिणामी उपादान कारण माया है, ब्रह्म नहीं ऐसा (वेदान्त का) सिद्धान्त है। अब प्रसंग को अधिक विस्तार करने की कोई आवश्यकता है नहीं ॥ ६ ॥

प्रोक्तदूषणमुद्धरति—**न हीति**। ननु तयोः सर्वकारेण साजात्याभावेऽपि यत्किञ्चित्साजात्यमवश्यमभ्युपेयम्, अन्यथोपादानोपादेयत्वव्याघातादित्याशङ्क्याह—**यत्किञ्चिदिति**। **अन्यथा**—अभावस्य मायोपादानासम्भवे। नन्वेवं ब्रह्मण एव जगदुपादानत्वसम्भवात्किमर्थं माया कल्प्यते इत्याशङ्क्य परिहरति—**न चेति**। किं ब्रह्मणो जगदुपादानत्वमनिष्टमापाद्यते? किं वा मायावैयर्थ्यमिति विकल्प्याद्यं प्रत्याह—**परिणामित्वरूपस्येति**। **तथा च**—निरवयवे ब्रह्मणि परिणामस्यानुपपन्नत्वे।

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

स चाभावश्चतुर्विधः—प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति। तत्र मृत्पिण्डादौ कारणे कार्यस्य घटादेरुत्पत्तेः पूर्वं योऽभावः स प्रागभावः, स च भविष्यतीति प्रतीतिविषयः। तत्रैव घटस्य मुद्गरपातानन्तरं योऽभावः स प्रध्वंसाभावः। ध्वंसस्यापि स्वाधिकरणकपालनाशे नाश एव। न चैवं घटोन्मज्जनापत्तिः, घटध्वंसध्वंसस्यापि घटप्रतियोगिकध्वंसत्वात्। अन्यथा प्रागभावध्वंसात्मकघटस्य विनाशे प्रागभावोन्मज्जनापत्तिः।

वह अभाव चार प्रकार का है—प्रागभाव प्रध्वंसाभाव, अत्यन्ताभाव तथा अन्योन्याभाव। उनमें से मृत्पिण्डादिरूप कारण में घटादि कार्यों का उत्पत्ति से पूर्व जो अभाव है उसे प्रागभाव कहते हैं। 'वह कार्य होगा' (भविष्यति) इस प्रतीति का विषय प्रागभाव हुआ करता है। उस (घटरूप) मृत्पिण्ड में डण्डा मारने के बाद घट का जो अभाव हो जाता है, उसे घट का प्रध्वंसाभाव कहते हैं। ध्वंस का भी अपना अधिकरण कपाल के नाश से नाश होता ही है। यदि कहा जाय कि घटध्वंस का ध्वंस होने पर तो पुनः घट की उत्पत्ति का प्रसङ्ग प्राप्त होगा, तो ऐसा कहना समीचीन नहीं है, क्योंकि घटध्वंस के ध्वंस का भी प्रतियोगी घट को ही माना गया है। अन्यथा प्रागभाव के ध्वंसात्मक घट के नष्ट हो जाने से पुनः घटप्रागभाव का उत्पत्तिप्रसङ्ग आ जायगा।

प्रापङ्क्तिकं समाप्यानुपलब्धिप्रमाणविषयभावं विभजते—**स चेति। तत्र**—तेषु। कार्यसमवायिकालान्यावृत्तित्वे सति कार्योत्पत्तिपूर्वकालीनत्वं प्रागभावलक्षणमभिप्रेत्याह—**मृत्पिण्डेति**। तद्विषयकप्रत्ययस्वरूपमाह—**स चेति**। प्रागभावः। घटो भविष्यतीति प्रत्ययः घटप्रागभावं विषयीकरोति। द्वितीयं लक्षयति—**तत्रैवेति। तत्र**—मृत्पिण्डादौ। कार्यसमवायिकालान्यावृत्तिप्रतियोग्यजनको ध्वंसाभावः। स च विनष्ट इति प्रत्ययगोचर इत्यपि ज्ञेयम्। तस्यान्तवत्त्वं तार्किकमतनिरासायाह—**ध्वंसस्यापीति**। नाशकाभावमाशङ्क्याह—**स्वेति**। ननु प्रागभावध्वंसानाधारकालस्य प्रतियोगिकालतानियमाद् घटोन्मज्जनप्रसङ्ग इत्याशङ्क्य परिहरति—**न चेति**। तत्र हेतुमाह—**घटध्वंसेति**। घटध्वंसकालस्य घटकालत्वाभाववत्तत्प्रतियोगिकध्वंसकालस्यापि तथात्वादित्यर्थः। ननु ध्वंसजनकस्य तत्प्रतियोगित्वनियमात्कथमजनकस्य घटस्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

[1]न चैवमपि यत्र ध्वंसाधिकरणं नित्यं तत्र कथं ध्वंसनाश इति वाच्यम्। तादृशाधिकरणं यदि चैतन्यव्यतिरिक्तं तदा तस्य नित्यत्वमसिद्धम्, ब्रह्मव्यतिरिक्तस्य सर्वस्य ब्रह्मज्ञाननिवर्त्यताया वक्ष्यमाणत्वात्। यदि च ध्वंसाधिकरणं चैतन्यं तदाऽसिद्धिः, आरोपितप्रतियोगिकध्वंसस्याधिष्ठाने प्रतीयमानस्याधिष्ठानमात्रत्वात्। तदुक्तम्—

अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः। इति। एवं शुक्तिरूप्यविनाशोऽपीदमवच्छिन्नं चैतन्यमेव ॥ ७ ॥

इसी प्रकार मानने पर भी जहाँ ध्वंस का अधिकरण नित्य है वहाँ पर ध्वंस का नाश कैसे होगा? ऐसा नहीं कह सकते, यदि ध्वंस का अधिकरण चैतन्य से भिन्न है तो उसका नित्यत्व सिद्ध नहीं है, क्योंकि ब्रह्म से भिन्न सभी वस्तुओं को ब्रह्मज्ञान से बाधित हो जाने वाला माना गया है। यदि ध्वंस अधिकरण चैतन्य को ही माना जाय, तो चैतन्य से भिन्न ध्वंस में नित्यत्व की सिद्धि नहीं हो सकेगी, क्योंकि आरोपित है प्रतियोगी जिसका ऐसे ध्वंस का अधिष्ठान में भान होने पर अधिष्ठानमात्र-स्वरूप माना गया है। पूर्वाचार्यों ने भी कहा है—कल्पित वस्तु के विनाश हो जाने पर अधिष्ठान मात्र ही अवशेष रहता है। इस प्रकार शुक्तिरजत का विनाश भी इदं से अवच्छिन्न चैतन्यरूप ही है ॥ ७ ॥

तत्प्रतियोगित्वमित्याशङ्क्य घटध्वंसेऽपि नष्टो घट इति प्रतीतिसद्भावाद् घटध्वंसध्वंसस्यापि घटजन्यत्वोपचारात्तत्प्रतियोगिकत्वमास्थेयमन्यथाऽतिप्रसङ्ग इत्याह—**अन्यथेति**। उक्तानङ्गीकारेण घटोन्मज्जनापत्तौ।

ननु सर्वस्यापि ध्वंसस्यानित्यत्वमुत यस्य कस्यचित्? । नाद्यः, नित्याधिकरणस्य[2] नाशासिद्धया तद्वृत्तिध्वंसस्यानित्यत्वासिद्धेः। न द्वितीयः, नित्याधिकरणकध्वंससामान्यात्सर्वस्यापि नित्यत्वाश्रयणौचित्यादित्याशङ्क्य परिहति—न चेति। तन्नित्याधिकरणमाकाशादि किं वा चैतन्यमिति विकल्प्याद्यं प्रत्याह—तादृशेति। द्वितीयेऽपि

---

१. इदानीं घटो नष्टः, अन्तरिक्षे घटो नष्ट इत्यादौ कालाकाशादीनां ध्वंसाधिकरणत्वं प्रतीयते तयोश्च नित्यत्वमिष्यते नैयायिकादिभिरित्याशङ्क्य निषेधयति-न चैवमित्यादिना।

२. नित्यस्याधिकरणस्येत्यर्थः।

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

यत्राधिकरणे यस्य कालत्रयेऽप्यभावः सोऽत्यन्ताभावः, यथा वायौ रूपात्यन्ताभावः। सोऽपि घटादिवद् ध्वंसप्रतियोग्येव। इदमिदं नेति प्रतीतिविषयोऽन्योन्याभावः। अयमेव विभागो भेदः पृथक्त्वं चेति व्यवह्रियते। भेदातिरिक्तविभागादौ प्रमाणाभावात्। अयं चान्योन्याभावोऽधिकरणस्य सादित्वे सादिः, यथा घटे पटभेदः। अधिकरणस्यानादित्वेऽनादिरेव, यथा जीवे ब्रह्मभेदः, ब्रह्मणि वा जीवभेदः। द्विविधोऽपि भेदो ध्वंसप्रतियोग्येव, अविद्याया निवृत्तौ तत्परतन्त्राणां निवृत्त्यवश्यम्भावात्।

जिस अधिकरण में जिस वस्तु का तीनों काल में अभाव हो, ऐसे अभाव को अत्यन्ताभाव कहते हैं, जैसे वायु में रूप का अत्यन्ताभाव है (अर्थात् तीनों काल में है नहीं)। यह (अत्यन्ताभाव) भी घटादि की तरह ध्वंस का प्रतियोगी ही है। 'यह यह नहीं है' (घट पट नहीं है) इस प्रकार प्रतीति का विषय अन्योन्याभाव है। इसी को ही विभाग भेद, पृथक्त्व इत्यादि शब्दों से कहा है। भेद से अतिरिक्त विभागादि को मानने में कोई प्रमाण नहीं है। यह अन्योन्याभाव भी अधिकरण के सादि होने पर सादि है, जैसे कि घट में घट का भेद सादि है। अधिकरण के अनादि होने पर अनादि भी है जैसे जीव में ब्रह्म का भेद अथवा ब्रह्म में जीव का भेद अनादि है। दोनों प्रकार के भेद ध्वंस का प्रतियोगी ही है, अनन्त नहीं है। क्योंकि अविद्या की निवृत्ति होने पर उसके अधीन भेदों की भी निवृत्ति होनी अवश्यम्भावी है।

किमनारोपितं वस्तु प्रतियोगि किं वाऽऽरोपितम्। नाद्यः, 'नेह नानास्ति किञ्चन' (क० २–१०) इत्यादिश्रुत्या प्रतीयमाननिषेधाभिधानेन सर्वस्यानारोपितत्वाभावाभिधानात्। द्वितीये तादृशध्वंसस्याधिकरणमात्रत्वान्न तवेष्टसिद्धिरित्याशयेनाह—**यदीति। असिद्धिः**—ध्वंसस्य चैतन्यातिरेकेण नित्यत्वासिद्धिः। तत्र सुरेश्वराचार्यसंमतिमाह—**तदुक्तमिति।** उक्तन्यायं शुक्तिरूप्यनाशेऽतिदिशति—**एवमिति।** तथा चाधिष्ठानचैतन्यातिरिक्तध्वंसाभ्युपगमे प्रमाणाभावाद् गौरवाच्च तदसिद्धया सुतरां तन्नित्यत्वासिद्धिरिति भावः।

तृतीयं लक्षयति—**यत्रेति।** असन्दिग्धमुदाहरणमाह—**यथेति।** तार्किकमतनिरासायाह—**सोऽपीति। अत्रेदं नेति प्रत्ययविषयः**[1] इति बोध्यम। चतुर्थं लक्षयति—

---

१. अत्रेदं नेति प्रत्ययविषयोऽत्यन्ताभावोऽपि ध्वंसप्रतियोगीत्यर्थः। 'इति बोध्यम्' इति पाठो गपुस्तके प्रमादतो भ्रष्टः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुनरपि भेदो द्विविधः—सोपाधिको निरुपाधिकश्चेति। तत्रोपाधिसत्ताव्याप्यसत्ताकत्वं सोपाधिकत्वं, तच्छून्यत्वं निरुपाधिकत्वम्। तत्राद्यो यथा—एकस्यैवाकाशस्य घटाद्युपाधिभेदेन भेदः। यथा वा एकस्यैव सूर्यस्य जलभाजनभेदेन भेदः। तथा च एकस्यैव ब्रह्मणोऽन्तःकरणभेदाद्भेदः। निरुपाधिकभेदा यथा घटे पटभेदः। न च ब्रह्मण्यपि प्रपञ्चभेदाभ्युपगमेऽद्वैतविरोधः। तात्त्विकभेददेरनभ्युपगमेन वियदादिवदद्वैताव्याघातकत्वात्। प्रपञ्चस्याद्वैते ब्रह्मणि कल्पितत्वाङ्गीकारात्। तदुक्तं सुरेश्वराचार्यैः—

अक्षमा भवतः केयं साधकत्वप्रकल्पने।
किन्न पश्यसि संसारं तत्रैवाज्ञानकल्पितम्॥ इति॥ ८॥

फिर भी भेद (अन्योन्याभाव) दो प्रकार के हैं—सोपाधिक और निरुपाधिक। उनमें उपाधि की सत्ता से व्याप्य सत्ता वाले को सोपाधिक भेद कहते हैं, उससे भिन्न को निरुपाधिक कहते हैं। उनमें प्रथम का दृष्टान्त दे रहे हैं जिस प्रकार एक ही आकाश का घटादिरूप उपाधि के भेद से घटाकाश मठाकाश का भेद माना गया है। अथवा जैसे एक ही सूर्य के घटादि जलपात्र के भेद से भेद माना गया है। उसी प्रकार एक ही ब्रह्म का अन्तःकरण के भेद से भेद माना गया है। 'घट में पट का भेद' यह निरुपाधिक भेद है। यदि कहो कि ब्रह्म में प्रपञ्च का भेद मान लेने से अद्वैत-सिद्धान्त का विरोध हो जायगा। यह कहना ठीक नहीं है, क्योंकि तात्त्विकभेद न मानने से जिस प्रकार आकाशादि के होते हुए भी अद्वैत में किसी भी प्रकार की आँच नहीं आती, उसी प्रकार ही अतात्त्विकभेद के होते हुए भी अद्वैत का व्याघात नहीं होता। अद्वैत ब्रह्म में प्रपञ्च को कल्पित माना गया है। इसलिए सुरेश्वराचार्य ने भी कहा है—ब्रह्म में (मुमुक्षुत्वादि) साधकत्व की कल्पना में आपको असहिष्णुता होने का कारण क्या है? क्या उसी में अज्ञान से कल्पित सम्पूर्ण संसार को नहीं देखते?॥ ८॥

इदमिति। तादात्म्यससर्गावच्छिन्नप्रतियोगिताक इत्यर्थः। विभागपृथक्त्वयोः पदार्थान्तरत्वनिरासायाह—अयमिति। एतस्य सादित्वमनादित्वं च व्यवस्थयाह—अयं चेति। ब्रह्मवन्निवृत्त्यभावमाशङ्क्याह—द्विविधोऽपीति। अनादित्वेऽप्यविद्यकत्वादित्याह—अविद्येति।

प्रकारान्तरेणान्योन्याभावं विभजते—पुनरिति। उपाधिसत्ताया व्याप्या

Nagarjun Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत एव विवरणेऽविद्यानुमाने प्रागभावव्यतिरिक्तविशेषणम्, तत्त्वप्रदीपिकायामविद्यालक्षणे भावत्वविशेषणं च सङ्गच्छते। एवं चतुर्विधाभावानां योग्यानुपलब्ध्या प्रतीतिः। तत्रानुपलब्धिर्मानान्तरम्॥९॥

इसलिए ही विवरण ग्रन्थ में अविद्या के अनुमान करने के समय अविद्या के अवयव में प्रागभावभिन्नत्व विशेषण तथा तत्त्वप्रदीपिका (चित्सुखी) में अविद्या के लक्षण में भावत्व देना भी संगत हो जाता है। इस प्रकार चार प्रकार के अभाव की प्रतीति योग्यानुपलब्धि प्रमाण से होती है। इसलिए उक्त अभावों की प्रतीति में अनुपलब्धि प्रमाण को पृथक् प्रमाण माना गया है॥ ९॥

सत्ता यस्य भेदस्य तस्य भावस्तत्त्वम्। यत्र यत्राकाशादिभेदसत्ता तत्र घटाद्युपाधिसत्तेति भेदोपाधिसत्तयोर्व्याप्यव्यापकभावः। ननु ब्रह्मणो जडत्वव्यावृत्तये तत्र प्रपञ्चप्रतियोगिको भेदोऽभ्युपेयस्तथात्वे चाद्वैतविरोध इत्याशङ्क्याह—**न चेति**। यथा वियदादिकमतात्त्विकत्वान्नाद्वैतविघातक तद्वद्भेदोऽपीत्याह—**तात्त्विकेति**। ननु वियदादिप्रपञ्चस्यैव तात्त्विकत्वेन तथात्वं कथमित्यत आह—**प्रपञ्चस्येति**। प्रपञ्चस्य ब्रह्मणि कल्पितत्वाङ्गीकारे वार्तिककारसम्मतिमाह—**तदुक्तमिति**।

नन्वभावस्य चातुर्विध्यवर्णनं सिद्धान्तानुरोधि, नृसिंहाश्रमैरद्वैतदीपिकायां तस्य निराकृतत्वादित्याशङ्क्य, प्राचीनैर्व्यवहृतत्वात्तत्प्रतिपादनं न सर्वथा सिद्धान्तविरुद्धमित्याशयेनाह—**अत एवेति**। यतोऽभावस्य चातुर्विध्यमत एवेत्यर्थः। तथा चानुमानं 'विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं भवितुमर्हति, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत्' इति। वस्तुपूर्वकमित्युक्तावात्मवस्तुपूर्वकतायाऽर्थान्तरत्वं तदर्थं वस्त्वन्तरेति। चक्षुरादिव्यावृत्त्यर्थं स्वदेशगतेति। अदृष्टादिव्यावर्त्तनाय स्वनिवर्त्येति। उत्तरज्ञाननिवर्त्यपूर्वज्ञानव्यावृत्त्यर्थं स्वविषयावरणेति। प्रागभावव्यावृत्त्यर्थं स्वप्रागभावेति। **तत्त्वप्रदीपिकायां**—चित्सुखाचार्यकृतायाम्। **अविद्यालक्षणे**—अनादिभावरूपत्वे सति ज्ञाननिवर्त्यत्वमविद्यात्वमित्येवंरूपे। उपसंहरति—**एवमिति**। ननु किमनुपलब्धेरभावप्रमायां करणान्तरानुपपत्त्यामान्तरत्वमास्थीयते, अनुभवबलाद्वा?। नाद्यः, कल्पितप्रमाणभावस्येन्द्रियस्यैव तत्करणत्वसम्भवात्। न चेन्द्रियाभावयोः सम्बन्धानिरूपणम्, संयुक्तविशेषणतासम्बन्धस्यैव सत्त्वात्। न चात्र प्रमाणाभावः। भूतले घटाभाव

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्याधाराधेयभावसम्बन्धप्रतीतेः[1]। घटाभावज्ञानं सम्बन्धविषयक विशिष्टज्ञानत्वाद्दण्डीपुरुष इति ज्ञानवदित्यनुमानाच्च। अन्यथाऽभावस्य निरधिकरणत्वापत्तौ ध्वंसस्य स्वाधिकरणकपालनाशेनेत्यादिवर्णनम्, अधिकरणस्य सादित्व इत्यादिना भेदस्य द्वैविध्यनिरूपणं च विरुध्येत। स सम्बन्धः स्वरूपसम्बन्धोऽन्यो[2] वेत्यन्यदेतत्। न च [3]द्वितीयः, निर्घटभूतले पश्यामीति विपरीतानुव्यवसायात्। अन्यथा पर्वतं पश्यामि वह्निमनुमिनोमीतिवद् भूतलाभावयोर्विलक्षणानुव्यवसायापत्तिः। किं च प्रत्यक्षप्रमायां प्रत्यक्षप्रमाणं करणमित्युत्सर्गः, स च बलवता बाधकेनापोद्यते। प्रकृते चाभावज्ञानं प्रत्यक्षमेवेत्युभयसिद्धम्। तत्र प्रत्यक्षप्रमाणमिन्द्रियमेव करणम्। बाधकाभावादिन्द्रियाभावयोः सम्बन्धस्य च साधितत्वात्। ततश्च कथमनुपलब्धिर्मानान्तरमिति चेत्, उच्यते। न तावदिन्द्रिय तत्करणं सम्बन्धानिरूपणात्। न च संयोगादिः, तस्यासम्भवात्। न च संयुक्तविशेषणता, तत्र प्रमाणाभावात्। उक्तप्रतीतेरनुमानस्य चाधाराधेयभावसम्बन्धसाधकतया इन्द्रियाभावसम्बन्धासाधकत्वात्। न चोक्तमूलविरोधः, तादृशसम्बन्धाभावकथनस्याधाराधेयभावसम्बन्धकथनपरेण ग्रन्थेन विरोधाभावात्। नाप्यनुव्यवसायविरोधः, फलीभूतं ज्ञानं प्रत्यक्षमित्युक्तत्वात्। यदपि किञ्चेत्यादि, तदपि न। सन्निकर्षाभावस्य प्रबलतरबाधकस्य सत्त्वात्। किं च किमभावस्य विशेषणता-मात्रं सन्निकर्षः? इन्द्रियसन्निकृष्टाधिकरणविशेषणता वा? किं वा यत्राधिकरणे प्रतियोगिसत्त्वमनुपलब्धिविरोधि स्यात्तद्विशेषणता? नाद्यः, भित्त्यादिव्यवहितभूतलादिवृत्तिघटाद्यभावेऽपि विशेषणतामात्रस्य विद्यमानत्वेन प्रत्यक्षताऽऽपत्तेः। न द्वितीयः, परमते कर्णवलयावच्छिन्ननभस एव श्रोत्रेन्द्रियत्वात्तस्यैव स्वग्राह्यशब्दाभावाधिकरणत्वात्तेन स्वस्यासन्निकर्षादधिकरणेन्द्रियसन्निकर्षाभावेन शब्दाभावस्याप्रत्यक्षत्वप्रसङ्गात्। तृतीयेऽपि, अनुपलब्धिविरोधित्वमुपलभ्यमानत्वम्। तस्य किं यदा कदाचिद्भावोऽपेक्षितः? उत नियमेन?। आद्ये व्यवहितेऽप्यभावाधिकरणे कदाचिदुपलम्भसम्भवात्प्रतियोगिनस्तद्व्यवधानसमयेऽप्य-

१. प्रमाणत्वादिति शेषः।

२. संयुक्तविशेषणतासम्बन्धः

३. अनुभवाद्वेति कल्पः विपरीतानुव्यवसायान्न चेत्यर्थः। निर्घटपदोल्लेख्यघटाभावस्य भूतलविशेषणत्वेन प्रतीतेः प्रत्यक्षतयैवानुव्यवसायो नानुपलब्ध्येत्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

[1]एवमुक्तानां प्रमाणानां प्रामाण्यं स्वत एवोत्पद्यते ज्ञायते च। तथा हि स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनुकूलं तद्वति तत्प्रकारकज्ञानत्वं प्रामाण्यम्। तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं न त्वधिकं गुणमपेक्षते, प्रमामात्रेऽनुगतगुणाभावात्। नापि प्रत्यक्षप्रमायां भूयोऽवयवेन्द्रिय-

स्वतः प्रामाण्यवाद—

इस प्रकार कहे गये प्रमाओं का प्रामाण्य (यथार्थता) स्वतः ही उत्पन्न होता है और जाना भी जाता है। वह इस प्रकार है—स्मृति तथा अनुभव उभय साधारण संवादी प्रवृत्ति के अनुकूल तद्विशिष्ट में तत्प्रकारक ज्ञानत्व को प्रामाण्य कहते हैं। वह प्रामाण्य ज्ञान-सामान्य की सामग्री से प्रयोज्य है, अधिक गुण की अपेक्षा नहीं रखता, क्योंकि हर प्रमा में अनुगत अव्यभिचारी एक गुण नहीं है। उसी प्रकार प्रत्यक्ष प्रकाश में भी भूयोऽवयव—इन्द्रिय—सन्निकर्ष रूप गुण नहीं है क्योंकि रूपादि-प्रत्यक्ष में और आत्मा के प्रत्यक्ष में उस (भूयोऽवयवेन्द्रियसन्निकर्षरूप गुण) का

भावः प्रत्यक्षः स्यात्। न द्वितीयः, श्रोत्रदेशे भूतलादौ वा शब्दस्य घटादेर्वा सत्त्वेऽपि सम्मग्रयभावादिनाऽनुपलम्भसम्भवेन नियमेन तदुपलम्भायोगात्तत्र तदभावस्याप्रत्यक्षतापत्तेरित्यत्र विस्तरः।

एवमुक्तानां प्रमाणानां कीदृशं प्रामाण्यमित्यपेक्षायामाह—**एवमिति**। ननु

---

१. वेदान्तनये प्रत्यक्षादीनि प्रमाणानि षट्, तैश्च षोढा प्रमा जन्यन्ते, जाताश्च ताः प्रमा यथार्था अयथार्था वेति प्रामाण्यग्राहकेषु सन्ति विप्रतिपत्तयः। तथा हि—

प्रमात्वं न स्यतो ग्राह्यं संशयानुपपत्तितः।

इति संशयानुपपत्तिहेतुना प्रामाण्यपरतस्त्ववादिनो नैयायिका अनुमानेन प्रामाण्यं प्रतिजानन्ति। यथा—इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वाद् व्यतिरेकेणाप्रमावद् इति। घटोऽयमिति ज्ञानानन्तरं घटमहं जानामीत्यनुव्यवसायस्य घटज्ञाननिष्ठप्रामाण्यविषयकतया स्वविषयकानुव्यवसायसामग्येवोक्तज्ञानस्य प्रामाण्यप्रख्यप्रख्यापिकेति केचित्। संविदः स्वप्रकाशत्वेन संविज्जनकसामग्येव संविन्निष्ठप्रामाण्यग्राहिकेति गुरवः। तत्तज्ज्ञानजन्यज्ञाततालिङ्गकानुमितिसामग्री तज्ज्ञाननिष्ठप्रामाण्यनिश्चायिका। घटो ज्ञात

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्निकर्षः[1]। रूपादिप्रत्यक्षे आत्मप्रत्यक्षे च तदभावात्, सत्यपि तस्मिन् पीतः शङ्ख इति प्रत्ययस्य भ्रमत्वाच्च।

अभाव है। और शङ्ख के साथ भूयोऽवयव–इन्द्रिय–सन्निकर्ष रहते हुए भी 'पीत शङ्ख' यह प्रतीति भ्रमरूप है।

परतस्त्वप्रामाण्यवादिनि तार्किके जाग्रति कथमेवं वक्तुं शक्यमित्यत आह—**तथा हीति**। इच्छावृत्तिप्रामाण्यातिप्रसङ्गवारणाय—**ज्ञानत्वमिति**। भ्रमे तन्निरासाय—**तद्वतीति**। स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनुकूल प्रामाण्यम्। तद्वति तत्प्रकारज्ञानत्वमित्यर्थः। नन्वेवम्भूते प्रामाण्ये किं स्वतस्त्वम्? न तावत्स्वोत्पाद्यत्वमात्माश्रयादित्यत आह—**तच्चेति**। ज्ञानजनकसामान्यसामग्र्यतिरिक्तकारणप्रयोज्यत्वं परतस्त्वं नैयायिकाद्यभिमतं निषेधति—**न त्विति**। प्रमाणमात्रेऽनुगतगुणसत्त्वे प्रमाणाभावादित्याह—**प्रमामात्र इति**। ननु प्रमामात्र इत्युक्तमयुक्तं प्रत्यक्षप्रमायां गुणस्य सत्त्वादित्याशङ्क्यानिरासायाह—**नापीति**। उक्तगुणस्यानुगतत्वादित्याह—**रूपादीति**। व्यतिरेकव्यभिचारमुक्त्वाऽन्वयव्यभिचारमाह—**सत्यपीति**।

इति प्रतीतिसिद्धो घटसमवेत उक्तज्ञानजन्यः प्राकट्यापरपर्यायः पदार्थविशेषो ज्ञाततेति भाट्टाः। अनुमितिस्तु–इयं ज्ञातता, घटत्ववति घटत्वप्रकारकज्ञानजन्या, घटत्ववति घटत्वप्रकारकज्ञाततात्वाद् इत्येवंप्रकारिकेति। सर्वेषां मतनिरासपूर्वकं स्वसिद्धान्तं दर्शयति–एवमित्यादिना। प्रमाणानामित्यस्य–प्रमीयते तद् प्रमाणमिति भावप्रत्ययान्तत्वात् प्रमाणमित्यर्थः। प्रमाणस्य भावः प्रामाण्यम्। तथा च मूलःस्थस्य प्रमाणानामित्यस्य प्रमाणामिति; प्रामाण्यमित्यस्य प्रमात्वमित्यर्थौ ज्ञयौ। प्रामाण्यस्य उत्पत्तौ स्वतस्त्वं यथा–दोषाभावसहकृतज्ञानसामान्यसामग्रीजन्यत्वम्। ज्ञप्तौ स्वतस्त्व यथा–'दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम्' इति मूल एव वक्ष्यते इति दिक्।

१. गुण इति शेषः। भूयोभिरवयवैः सहेन्द्रियसन्निकर्षरूपो गुणः प्रत्यक्षत्वावच्छिन्नप्रमाणां न सम्भवति। रूपस्यात्मनश्चावयवाभावेन तयोः प्रत्यक्षज्ञानेऽव्याप्तेः, पीतः शङ्ख इत्यत्रातिव्याप्तेश्चेत्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

'अत एव न सल्लिङ्गपरामर्शादिकमप्यनुमित्यादिप्रमायां गुणः, असल्लिङ्गपरामर्शादिस्थलेऽपि विषयाबाधेन अनुमित्यादेः प्रमात्वात्। न चैवमप्रमाऽपि प्रमा स्यात्, ज्ञानसामान्यसामग्र्या अविशेषादिति वाच्यम्। दोषाभावस्यापि हेतुत्वाङ्गीकारात्। न चैवं परतस्त्वमिति वाच्यम्। आगन्तुकभावकारणापेक्षायामेव परतस्त्वात्॥ १०॥

अतएव (अन्वय-व्यतिरेक रूप व्यभिचार होने से ही) सल्लिङ्गपरामर्शादि को भी अनुमित्यादि प्रमानिष्ठ प्रमात्व का प्रयोजक गुण नहीं कह सकते, क्योंकि सल्लिङ्ग-परामर्शादि के अभाव स्थल में भी विषय का बाध न होने पर अनुमित्यादि में प्रमात्व देखा गया है। यदि कहो कि ऐसा मानने पर अप्रमा भी प्रमा हो जायगी, क्योंकि ज्ञानसामान्य की सामग्री वहाँ भी समान रूप से विद्यमान है। तो यह कथन उचित नहीं है, क्योंकि दोषाभाव को भी प्रमात्व का प्रयोजक माना गया है। इस प्रकार प्रमा में परतः प्रामाण्य आ जायगा ऐसी शङ्का भी करना ठीक नहीं, क्योंकि आगन्तुक भाव कारण की अपेक्षा होने पर ही परतः प्रामाण्य की आपत्ति होती है॥ १०॥

अत एव —अन्वयव्यतिरेकव्यभिचारादेव। **आदिपदं** योग्यतादिसङ्ग्रहार्थम्। सत्यपि सल्लिङ्गपरामर्शे गन्धप्रागभावावच्छेदेन गन्धानुमितेरप्रमात्वादन्वय-व्यभिचारं मनसि निधाय व्यतिरेकव्यभिचारं दर्शयति—**असल्लिङ्गेति**। ननु भ्रमस्यापि तादृशसामग्रीप्रयोज्यत्वाविशेषाद् भ्रमप्रमाव्यवस्थापकं किमित्याशङ्का-निरासायाह—**न चेति**। प्रतिबन्धकताभावस्य कार्यमात्रं प्रति हेतुत्वेन कल्पततया दोषाभावस्यापि तथात्वेनाङ्गीकारात्। न चायं गुणत्वेन हेतुः, प्रमाणाभावादि-त्यर्थः। अपसिद्धान्तापत्तिमाशङ्क्य निरासायाह—**न चेति**। अदृष्टादिसापेक्षत्वाद्—**आगन्तुकेति**। दोषाभावसापेक्षत्वादाह—**भावेति**। तथा चागन्तुकभावकार-

---

१. अन्वयव्यतिरेकव्यभिचाराभ्यामेव। उत्पत्तिक्षणावच्छिन्नघटादौ गन्धव्याप्य-पृथिवीत्ववानयमिति सल्लिङ्गपरामर्शे सत्यपि गन्धवानयमित्यनुमितेरप्रमात्वादन्वय-व्यभिचारः। वह्निमान् प्रमेयत्वादित्यादावसल्लिङ्गपरामर्शस्थले विषयस्य वह्नेरबाधेन व्यतिरेकव्यभिचारादित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ज्ञायते च प्रामाण्यं स्वतः। स्वतोग्राह्यत्वं च दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम्। स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं[1] साक्षिज्ञानं तेनापि वृत्तिज्ञाने गृह्यमाणे तद्गतं प्रामाण्यं गृह्यते। न चैवं प्रामाण्यसंशयानुपपत्तिः, तत्र संशयानुरोधेन दोषस्यापि सत्त्वेन दोषाभावघटितस्वाश्रयग्राहकाभावेन तत्र प्रामाण्यस्यैवाग्रहात्।

प्रमात्व स्वतः ही जाना जाता है। स्वतोग्राह्यत्व का अर्थ है कि —'दोषाभाव होते हुए प्रमात्व के आश्रय प्रमा की ग्राहक सामग्रियों से प्रमात्व का भी ग्रहण होता हो। स्वाश्रय शब्द का अर्थ है वृत्तिज्ञान और उसका ग्राहक साक्षीज्ञान, उसी के द्वारा वृत्तिज्ञान के ग्रहण होने पर तद्गत प्रामाण्य का भी (उसीसे) ग्रहण हो जाता है।

इस प्रकार प्रमात्व को स्वतोग्राह्य मानने पर संशय की अनुपपत्ति होने लगेगी, ऐसी शङ्का नहीं करनी चाहिए, क्योंकि वहाँ पर संशय के अनुरोध से दोष को भी मानना पड़ेगा और दोषाभावघटित स्वाश्रय ग्राहक सामग्री का अभाव होने से उस ज्ञान में प्रमात्व का ग्रहण नहीं हो सकता।

णानपेक्षज्ञानसामान्यसामग्रीप्रयोज्यत्वं स्वतस्त्वमित्यङ्गीकारेण तादृशकारणसहकृतज्ञान[2] सामान्यसामग्रीप्रयोज्यत्वरूपपरतस्त्वापातो नास्तीति भावः।

एवं प्रामाण्यस्योत्पत्तौ स्वतस्त्वमभिधाय तस्य ज्ञप्तौ तदावेदयति—ज्ञायते चेति। तद्वति तत्प्रकारकज्ञानत्वलक्षणप्रामाण्यमुत्पन्नं सज्ज्ञायते च स्वत इत्यर्थः। ज्ञायत इत्यस्य गृह्यत इत्यर्थमभिप्रेत्याह—स्वतो ग्राह्यत्वं चेति। परतस्त्ववादिनाऽनुमानादिकं तद्ग्राहकमङ्गीकृतमतस्तद्वारणाय यावदिति स्वाश्रयग्राहकविशेषणम् यावत्स्वाश्रयग्राहकसामग्रीजन्यग्रहणगोचरत्वं तेनाङ्गीक्रियते इत्यर्थः। दोषवशादप्रामाण्यनिश्चये संशये च सत्यव्याप्तिवारणाय—दोषाभावे सतीति। तथा च दोषवशात्तादृशसामग्र्या तद्ग्रहेऽपि न दोष इति भावः। स्वाश्रयेत्याद्युपादयति—स्वाश्रय इति। तेनापि न त्वनुमानेनैव। सत्यन्तपदकृत्यमाशङ्क्य दर्शयति—न चेति।

---

१. साक्षिज्ञानमिति प्रमातृचैतन्यमित्यर्थः। तेनापि—प्रमातृचैतन्येनापीत्यर्थः। तेनापीत्यपिशब्दादनुमानेनापि गृह्यते इति सूचितम्।

२. ज्ञानत्वप्रयोजकप्रयो० इति पाठः खपुस्तके।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्वा—यावत्स्वाश्रयग्राहकग्राह्यत्वयोग्यत्वं स्वतस्त्वम्। संशयस्थले प्रामाण्यस्योक्तयोग्यतासत्त्वेऽपि दोषवशेनाग्रहाद् न संशयानुपपत्तिः॥ ११॥

अप्रामाण्यं तु न ज्ञानसामान्यसामग्रीप्रयोज्यम्, प्रमायामप्यप्रामाण्यापत्तेः। किन्तु दोषप्रयोज्यम्। नाप्याप्रामाण्यं यावत्स्वाश्रयग्राहकग्राह्यम्[2]। [3]अप्रामाण्यघटकतदभाववत्त्वादेर्वृत्तिज्ञानाऽनुपनीतत्वेन

अथवा यावत् प्रमात्व के आश्रय वृत्ति ज्ञान है, उनके ग्राहक से ग्राह्यत्व की योग्यता को ज्ञानगत स्वतःप्रामाण्य कहते हैं। संशय स्थल पर प्रमात्व में पूर्वोक्त योग्यता के होते हुए भी, दोष के कारण ग्रहण न होने से संशय की अनुपपत्ति नहीं होती है। (अर्थात् संशय हो जाता है)॥ ११॥

अप्रामाण्य (अप्रमात्व) ज्ञानसामान्य सामग्री का कार्य वही है, क्योंकि इस प्रकार मानने पर प्रमा में भी अप्रमात्वापत्ति हो जायगी। परन्तु वह (अप्रमात्व) दोषप्रयोज्य है। इस प्रकार अप्रमात्व भी यावत् स्वाश्रय ग्राहक सामग्री से ग्राह्य नहीं है। अप्रमात्व के लक्षण में 'प्रमात्वाभाववत्त्वादि' की वृत्ति ज्ञान से उपस्थिति

सत्यन्तमप्रदायापि दोषं परिहति—यद्वेति। एवमुत्पत्तिज्ञाप्त्योः प्रामाण्यस्य स्वतस्त्वमुपपाद्य तदप्रामाण्यस्य परतस्त्वं वर्णयति—**अप्रामाण्यमिति। विसंवादीति**। इयं शुक्तिरजतार्थिप्रवृत्तिः प्रामाण्यशून्या विसंवादिप्रवृत्तिजनकत्वादि-

---

१. इति उत्पत्तावप्रामाण्यस्य परतस्त्वमुक्तमिति बोध्यम्।

२. तथात्वे ज्ञप्तावप्रामाण्यस्य स्वतस्त्वं स्यादित्यर्थः।

३. अप्रामाण्येति। विसंवादिप्रवृत्त्यनुकूलं तदभाववति तत्प्रकारकज्ञानत्वमप्रामाण्यम्। तथा च अप्रामाण्येत्यादेरयमर्थः। साक्षिणा वृत्तिज्ञानोपनीतमेव वस्तु गृह्यते नानुपनीतम्। प्रातीतिकरजतादौ साक्षिणाऽविद्यावृत्त्या गृह्यमाणेऽपि तस्याप्रामाण्यं नैव गृह्यते। कथम्? अप्रामाण्यलक्षणघटकस्य तदभाववत्त्वादेः तदानीं तयैव वृत्त्या साक्षिणा ग्रहीतुमशक्यत्वात्। अन्यथा रजताभिमुखवृत्तिर्न स्यात्। किं तर्हि। विसंवादिप्रवृत्तिलिङ्गकानुमित्यैव प्रामाण्यं गृह्यती इति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साक्षिणा ग्रहीतुमशक्यत्वात्। किन्तु विसंवादिप्रवृत्त्यादिलिङ्गिकानुमित्यादिविषय इति परत एवाप्रामाण्यमुत्पद्यते ज्ञायते चेति ॥ १२ ॥

इत्यनुपलब्धिपरिच्छेदः ॥ ६ ॥

नहीं होती है। इसी से साक्षी के द्वारा उसका ग्रहण होना अशक्य है। परन्तु विफल प्रवृत्त्यादि लिङ्गक अनुमिति का विषय अप्रमात्व को माना है। अतएव अप्रमात्व परतः उत्पन्न होता है और परतः जाना भी जाता है ॥ १२ ॥

अनुपलब्धि परिच्छेद का भाषानुवाद समाप्त हुआ ॥ ६ ॥

त्यादिविसंवादिप्रवृत्त्यादिलिङ्गिकानुमितिग्राह्यम्। आदिपदेनाप्तवचनजन्यत्वादिसङ्ग्रहः। द्वितीयम् आदिपदं शाब्दज्ञानादिसङ्ग्रहार्थम्।

इति श्रीपरमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसुनुधनपतिसुरिसुतशिवदत्तकृतायां वेदान्तपरिभाषार्थदीपिकायामनुपलब्धिपरिच्छेदः समाप्तः ॥ ६ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ विषयपरिच्छेदः ७

एवं निरूपितानां प्रमाणानां प्रामाण्यं द्विविधम्—व्यावहारिकतत्त्वावेदकत्वं पारमार्थिकतत्त्वावेदकत्वं चेति। तत्र ब्रह्मस्वरूपावगाहिप्रमाणव्यतिरिक्तानां सर्वप्रमाणानामाद्यं प्रामाण्यम्, तद्विषयाणां व्यवहारदशायां बाधाभावात्। द्वितीयं तु जीवब्रह्मैक्यपराणां 'सदेव सोम्येदमग्र आसीत्' (छा० ६-२-१) इत्यादीनां 'तत्त्वमसि' (छा० ६-८-१) इत्यन्तानाम्। तद्विषयस्य जीवपरैक्यस्य कालत्रयाबाध्यत्वात्।

तच्चैक्यं तत्त्वंपदार्थज्ञानाधीनज्ञानमिति प्रथमं तत्पदार्थौ लक्षणप्रमाणाभ्यां निरूप्यते। तत्र लक्षणं द्विविधम्—स्वरूपलक्षणं तटस्थलक्षणं चेति। तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणम्[1], यथा सत्यादिकं ब्रह्मस्वरूपलक्षणम्। 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० २-१-१) 'आनन्दो ब्रह्मेति व्यजानात्' (तै० ३-६) इति श्रुतेः॥ १॥

इस प्रकार निरूपण किया गया प्रमाणों का प्रामाण्य दो प्रकार का है—(१) व्यावहारिक तत्त्व का आवेदक तथा (२) पारमार्थिक तत्त्व का आवेदकत्व। उनमें से ब्रह्मस्वरूप के बोधक प्रमाणों से भिन्न सभी प्रमाणों में प्रथम प्रामाण्य है, क्योंकि इनके विषयोंके व्यवहार दशा में बाध नहीं होता है। द्वितीय पारमार्थिक तत्त्वावेदक प्रामाण्य है—जीव एवं ब्रह्म का ऐक्य परत्व, जैसे कि 'हे सोम्य! सृष्टीसे पूर्व यह प्रपञ्च एकमात्र 'सत् ही था' इस (छान्दोग्य श्रुति) से लेकर 'वह ब्रह्म तू है' इस वाक्य तक माना गया है। क्योंकि उसके विषय जीव ब्रह्म की एकता का तीनों कालों में बाध नहीं होता।

यह जीव और ब्रह्म का एकत्व 'तत्' एवं 'त्वम्' पदों के अर्थ ज्ञान के बिना नहीं हो सकता, इसलिए पहले लक्षण और प्रमाण के द्वारा 'तत्' पदार्थ का निरूपण किया जाता है॥ १॥

अत्र प्रमेयं निरूपयितुमुपक्रमते—**एवमिति**। **प्रामाण्यं**—यथाभूतार्थज्ञानजनकत्वम्। तत्त्वं यथार्थत्वम्। तथा च तदेवात्र प्रतिपाद्यम्।

तत्प्रतिपादने पदार्थप्रतिपादनाधीनमतः पदार्थौ निरूप्यत इत्याह—**तच्चै-**

---

१. यथा सत्यं ज्ञानमनन्तं ब्रह्म इति। अत्र सत्यादिकं स्वरूपलक्षणम्। इति पाठः गपुस्तके। ख-छ-चपुस्तकेषु तु उपरिनिर्दिष्ट एव पाठः, स च समञ्जसः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु स्वस्य स्ववृत्तित्वाभावे कथं लक्षणत्वमिति चेत्। न। स्वस्यैव स्वापेक्षया धर्मिधर्मभावकल्पनया लक्ष्यलक्षणत्वसम्भवात्। तदुक्तम्—'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः, अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते' इति ॥ २ ॥

ब्रह्म का लक्षण निरूपण—

उनमें स्वरूप एवं तटस्थ के भेद से लक्षण दो प्रकार के होते हैं। उन दोनों में से स्वरूपभूत लक्षण को स्वरूप लक्षण कहते हैं, जैसे कि सत्-चित्-आनन्दादि ब्रह्म का स्वरूप लक्षण है। श्रुति भगवती ने भी कहा 'ब्रह्म सत्य ज्ञान एवं अनन्त है', 'ब्रह्मआनन्द स्वरूप है ऐसा उसे जानो।'

आपत्ति हो सकती है—स्व में स्व की वृत्ति न रहने पर (असत्, चित्, आनन्दादि) कैसे ब्रह्म का लक्षण हो सकेगा? तो यह कथन समुचित नहीं है, क्योंकि स्वरूप के साथ वस्तु अभिन्न होने पर भी एक ही वस्तु के अन्दर धर्मधर्मि-भाव कल्पना करके लक्ष्य-लक्षण व्यवहार किया जाता है। इसी को पञ्चपादिकाकार ने भी कहा है कि—'आनन्द, विषयानुभव तथा नित्यत्व ये धर्म हैं और ब्रह्म चैतन्य से अभिन्न हैं, फिर भी भिन्न के समान प्रतीत होते हैं' ॥ २ ॥

क्यमिति। इति[1] इतिहेतोः। प्रथमोपात्तत्वात्प्रत्यक्षाद्यगोचरत्वादभ्यर्हितत्वाच्चादौ तत्पदार्थो निरूप्यते इत्यर्थः। **तत्र**—लक्षणप्रमाणयोः। असाधारणधर्मो लक्षणम्। स्वरूपं सद्व्यावर्तकमिति मुख्यत्वात्स्वरूपलक्षणं लक्षयति—**तत्रेति**। तत्पदार्थलक्षणस्य प्रकृतत्वाल्लौकिकं प्रकृष्टप्रकाशश्चन्द्र इत्यनुदाहृत्य वैदिकमेतदुदाहरति—**यथेति**। **आदि**पदेन ज्ञानानन्तसङ्ग्रहः। सच्चिदनन्तात्मकमेकमेव लक्षणमिति केचित्। सत्यादिकं प्रत्येकलक्षणमित्यन्ये।

ननु असाधारणधर्मस्य लक्षणत्वात्स्वस्य च स्ववृत्तिधर्मत्वाभावात्कथं सत्यादिकं स्वरूपलक्षणमिति शङ्कते—**नन्विति**। धर्मे पारमार्थिकत्वविवक्षणे गौरवान्मैवमित्याह—**नेति**। स्वोक्ते पञ्चपादाचार्यसंमतिमाह—**तदुक्तमिति**।

---

१. इतीति। अत्र क-खपुस्तकयोरेक एवेतिशब्दो दृश्यते:; गपुस्तके द्वावितिशब्दौ वर्तते; तौ चेद्रश्यौ तयोरेकस्य प्रतीकार्थत्वं युक्तमपरस्य व्याख्यानार्थत्वमिति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तटस्थलक्षणं तु[1] यावल्लक्ष्यकालमनवस्थितत्वे सति तद्व्यावर्तकं तदेव, यथा गन्धवत्त्वं पृथिवीलक्षणम्। महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु गन्धाभावात्। प्रकृते ब्रह्मणि[2] च जगज्जन्मादिकारणत्वम्। अत्र जगत्पदेन कार्यजातं विवक्षितम्, कारणत्वं च कर्तृत्वमतोऽविद्यादौ नातिव्याप्तिः।

तटस्थ लक्षण का निरूपण—

जो लक्ष्य में यावत्कालपर्यन्त विद्यमान न रहते हुए इतरव्यावृत्तिपूर्वक बोध कराता हो, उसे तटस्थ लक्षण कहते है। जैसे कि गन्धवत्त्व पृथिवी का तटस्थ लक्षण है। क्योंकि महाप्रलयकाल में परमाणुओं में तथा उत्पत्तिकाल में घटादि (कार्य द्रव्य) में गन्ध नहीं रहता। प्रकृत स्थल पर ब्रह्म में जगज्जन्मादि कारणत्व तटस्थ लक्षण है। यहाँ पर जगत् पद से सकल कार्य विवक्षित हैं। और कारणत्व पद से कर्तृत्व विवक्षित है, इसलिए अविद्यादि में अतिव्याप्ति नहीं होती।

द्वितीयं लक्षयति—**तटस्थेति**। स्वरूपलक्षणेऽतिप्रसङ्गनिरासाय सत्यन्तम्। लक्ष्यावृत्तितादृशधर्मेऽतिव्याप्तिनिराकरणाय—**व्यावर्तकमिति**। स्पष्टप्रतिपत्त्यर्थं लौकिकमप्युदाहरति—**यथेति**। परमतेनाह—**महाप्रलय इति**। उभयमतेनाह—**उत्पत्तिकाल इति**। प्रकृतब्रह्मणस्तत्किमित्यत आह—**प्रकृते इति**। मायादेरपि जगदन्तःपातित्वादाह—**कार्येति**। कुलालादावतिव्याप्तिवारणाय—**जातमिति**। कार्यमात्रमित्यर्थः[3]। कारणत्वमपि प्रधानादिसाधारणमित्यत आह—**कारणत्वं चेति**।

---

१. लक्षणं याव० इति पाठः ख-गपुस्तकयोः। लक्षणं नाम याव० इति पाठः घ-चपुस्तकयोः।

२. घ-चपुस्तकयोः 'ब्रह्मणि' इति पदं नास्ति। ख-गपुस्तकयोः ब्रह्मणि प्रकृते चेति पाठः।

३. तथा च घटादिमात्रजनकेषु कुलालादिषु यावत्कार्यजनकत्वाभावेन नातिव्याप्तिरित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्तृत्वं च[1] तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च 'यः सर्वज्ञः—सर्ववि-द्यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते' (मु० १-१-९) इत्यादिश्रुतिर्मानम्। तादृशचिकीर्षासद्भावे 'सोऽकामयत बहुस्यां प्रजायेय' (तै० २-६) इत्यादिश्रुतिर्मानम्। तादृशकृतौ च 'तन्मनोऽकुरुत' इत्यादिवाक्यम्।

जिसके निकट उपादान को विषय करने वाला अपरोक्ष ज्ञान तद्विषयक चिकीर्षा और कृतिमत्ता है उसे कर्ता कहा जाता है (अर्थात् उसमें कर्तृत्व रहता है) ईश्वर में सम्पूर्ण जगदुपादानविषयक अपरोक्ष ज्ञान के सद्भाव में 'जो सर्वज्ञ है, सर्ववित् है, जिसका ज्ञानमय तप है उससे वह हिरण्यगर्भ नाम, रूप एवं अन्न उत्पन्न होता है' इत्यादि श्रुति प्रमाण हैं। इसी प्रकार (सम्पूर्ण विश्व विषयक) चिकीर्षा के सद्भाव में 'उसने इच्छा की कि बहुरूप होऊँ एवं प्रजा को उत्पन्न करूँ' इत्यादि श्रुति प्रमाण है। तथा उसी प्रकार (सम्पूर्ण जगद्विषयक कृति के) विषय में 'उस ब्रह्म ने मन को उत्पन्न किया' इत्यादि वाक्य प्रमाण है।

एवमपि कथं निरास इत्यत आह—**कर्तृत्वं चेति**। अत्र प्रमाणाकाङ्क्षा-यामाह—**ईश्वरस्येति**। **सर्वज्ञः**—सामान्यतः सर्वविद्विशेषतः। **ब्रह्म** कार्यं ब्रह्म हिरण्यगर्भः, **नाम** घट इत्यादि, **रूपं** शुक्लादि, **अन्नं** व्रीहियवादि। 'यः कालकालो गुणी सर्वविद्यः' इत्यादिश्रुतिरादिपदार्थः। 'यस्मादाकाशादिः स आत्मा कामितवानिच्छां कृतवान् बहुधा भवेयम्' इति। कथमेकस्य बहुधा भवनमित्यत आह—**प्रजायेयेति**। उत्पद्येय। तदैक्षत इत्याद्या श्रुतिरादिनोपादेया। [3]**तद्** ब्रह्म। स प्राणमसृजत इत्याद्या श्रुतिरादिनोपादेया।

---

१ तत्तदिति। तेषां घटपटादिकार्याणामुपादानकारणानि कपालतन्त्वादीनि तद्गोचरमपरोक्षज्ञानं—चिकीर्षा—कृति—श्चास्ति यस्य तस्य भावस्तत्त्वम्। कुलालादिषु लक्षणसमन्वयः। अस्ति कुलाले घटोपादानकपालविषयकं प्रत्यक्षज्ञानम्, घटं करिष्यामीति चिकीर्षा कपालद्वयसंयोजिका कृतिश्चेति।

२. जायते इति शेषः।

३. 'तन्मनोऽकुरुत' इत्यस्य वाक्यस्थतत्पदस्यार्थमाह टीकाकारः—तद्ब्रह्म।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

ज्ञानेच्छाकृतीनां मध्येऽन्यतमगर्भलक्षणत्रितयमिदं विवक्षितम्, अन्यथा व्यर्थविशेषणत्वापत्तेः। अत एव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः। एवं च प्रकृते लक्षणानि नैव सम्पद्यन्ते। ब्रह्मणो जगज्जन्मादिकारणत्वे च—'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' (तै० ३–१) इत्यादिश्रुतिर्मानम् ॥ ३ ॥

ज्ञान इच्छा प्रयत्न में से प्रत्येक के पृथक्-पृथक् भी लक्षण सम्भव होने के कारण तीन लक्षण यहाँ पर विवक्षित हैं अन्यथा व्यर्थ विशेषणापत्ति होगी। इसलिए जन्म, स्थिति तथा लय में से किसी एक का ही लक्षण में प्रवेश समझना चाहिए। इसी प्रकार इस प्रसङ्ग में नौ लक्षण हो जाते हैं। ब्रह्म में जगत् जन्मादि कारणत्व मानने में 'जिससे सम्पूर्ण भूत होते हैं, उत्पन्न होकर जिससे जीवित रहते हैं और प्रलय के समय जिसमें लय को प्राप्त करते हैं' इत्यादि श्रुति प्रमाण है ॥ ३ ॥

त्रितयमिति। तत्र उपादानगोचरापरोक्षज्ञानवत्त्वं तादृशचिकीर्षावत्त्वं तादृशकृतिमत्त्वमित्येवमित्यर्थः। एकमेव लक्षणं कुतो नेत्यत आह—**अन्यथेति।** लक्षणत्रितयाऽविवक्षणे इत्यर्थः। यत एकलक्षणविवक्षणे विशेषणवैयर्थ्यमतो विशेषणवैयर्थ्यादेव जन्माद्यन्यतमस्यैव लक्षणे प्रवेश इत्याह—**अत एवेति।** फलितमाह—**एवं चेति।** कार्यजातजन्मगोचरापरोक्षज्ञानवत्त्वम्, तत्स्थितिविषयतद्वत्त्वम्, तल्लयगोचरतद्वत्त्वम्, समस्तकार्यगोचरचिकीर्षाऽऽश्रयत्वम् तत्स्थितिविषयचिकीर्षावत्त्वम्, तल्लयगोचरचिकीर्षास्पदत्वम्, कार्यमात्रजन्मगोचरकृतिमत्त्वम्, तत्स्थितिविषयककृत्याश्रयत्वम्, तल्लयगोचरकृत्यास्पदत्वमित्येवंरूपाणीत्यर्थः। ब्रह्मणो जगज्जन्मादिहेतुत्वेऽपि प्रमाणाकाङ्क्षायामाह—**ब्रह्मण इति।** **प्रयन्ति**—प्रलयं गच्छन्ति सन्ति यत्प्रविशन्ति। 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यान्ति' (छा० १–९–१) इत्याद्या श्रुतिरादिनोपादेया।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्वा—निखिलजगदुपादानत्वं ब्रह्मणो लक्षणम्। उपादानत्वं च जगदध्यासाधिष्ठानत्वं वा। एतादृशमेवोपादानत्वमभिप्रेत्य 'इदं सर्वं यदयमात्मा' 'सच्च त्यच्चाभवत्' (तै० २–६) 'बहुस्यां प्रजायेय' (तै० २–६) इत्यादिश्रुतिषु ब्रह्मप्रपञ्चयोस्तादात्म्यव्यपदेशः घटः सन् घटो भाति घट इष्ट इत्यादिलौकिकव्यपदेशोऽपि सच्चिदानन्दरूपब्रह्मैक्याध्यासात्।

अथवा निखिल जगत् के प्रति उपादानत्व ब्रह्म का लक्षण है। उपादानत्व का अर्थ जगद्रूप अध्यास का अधिष्ठानत्व समझना चाहिए। अथवा जगदाकाररूप से परिणाम को प्राप्त होनेवाली माया के अधिष्ठानत्व को पूर्वोक्त उपादानत्व शब्द से समझना चाहिए। इसी प्रकार उपादानत्व के अभिप्राय से 'यह सब जो कुछ है सब आत्मा ही है'। 'वही मूर्त और अमूर्त हो गया'। 'मैं बहुत होऊँ' इत्यादि श्रुतिओं में ब्रह्म और प्रपञ्च का तादात्म्य व्यपदेश किया। 'घट है, घट प्रतीत होता है तथा घट इष्ट है' इत्यादि लौकिक व्यवहार भी सच्चिदानन्दरूप ब्रह्म के ऐक्याध्यास से ही होता है।

ननु त्रिभिरस्योपादानत्वसूचनादेकैकस्य लक्षणप्रवेशे[1] तन्न सिद्ध्यतीत्यरुच्याऽऽह—**यद्वेति**। उपादानं च यदभिन्नं कार्यमुत्पद्यते तत्[2]। तदभेदश्च पृथक्सत्ताशून्यत्वं तच्चाविद्याब्रह्मणोः समानं ब्रह्मण्यध्यस्तस्य पृथक्सत्ताशून्यत्वादित्याशयेनाह—**उपादानत्व चेति**। तथा च कल्पितविकारसम्बन्धस्य वास्तवनिर्विकारत्वाविरोधादुपादानत्वेऽपि विकारशून्यत्वं ब्रह्मण इति भावः। विपरिणममानमेवोपादानमिति यद्याग्रहस्तर्ह्यंस्तूपादानं माया, तथाऽपि स्वाधिष्ठानं ब्रह्म विना तस्यास्तयात्वाभावात्तदधिष्ठानस्याप्युच्यमानमुपादानत्वमविरुद्धमिति तथा भूतमायाऽधिष्ठानत्वेन लक्षणमस्त्वित्याशयेनाह—**जगदाकारेणेति**। न च जगतो मायापरिणामत्वे मानाभावः। 'मायां तु प्रकृतिं विद्यात्' (श्वे० ४–१०) 'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्' (भ० गी० ९–१०) जगन्मायापरिणामरूपं कार्यत्वाच्छुक्तिरूप्यवदिति प्रमाणसत्त्वात्। न च बाध्यत्वमुपाधिः,

---

१. तद् उपादानत्वं न सिद्ध्यतीत्यर्थः।

२. तदितिपदं क-खपुस्तकयोर्नास्ति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

नन्वानन्दात्मकचिदध्यासाद् घटादेरिष्टत्वव्यवहारे दुःखस्यापि तत्राध्यासात्तत्रापि इष्टत्वव्यवहारापत्तिरिति चेत्। न। आरोपे सति निमित्तानुसरणं, न तु निमित्तमस्तीत्यारोप इत्यभ्युपगमेन दुःखादौ

आपत्ति हो सकती है कि आनन्दस्वरूप चैतन्य में घटादि का अध्यास होने के कारण घटादि में इष्टत्व व्यवहार होना चाहिए, तो उसी आनन्दात्मक चैतन्य में दुःख का भी अध्यास होने से दुःख में भी 'दुःख इष्ट है' ऐसा व्यवहार होना चाहिए। यह कथन समीचीन नहीं है, क्योंकि आरोप होने पर निमित्त का अनुसरण किया जाता है। न कि निमित्त है इसलिए आरोप होना चाहिए, सुतरां 'आरोपे सति निमित्तानुसरणम्' इस नियम के आधार पर दुःखादि में सद् एवं चिदंश का अध्यास

साधनव्यापकत्वात्। यद्वा, जगज्जडोपादानकं कार्यत्वासंमतवत्। तच्चेकं[1] लाघवात्। [2]तदपि श्रुतिस्मृतिप्रामाण्यात्परिशेषादज्ञानम्। माया अविद्या अज्ञानमित्यनर्थान्तरम्। ननु श्रुतिषु जगद्ब्रह्मणोस्तादात्म्यव्यपदेशाज्जगदाकारेण विपरिणममानत्वमुपादानत्वमित्येव तल्लक्षणं कुतो नाङ्गीक्रियत इत्याशङ्क्य चेतनस्य जडाकारेण परिणामायोगात् कूटस्थनित्यत्वश्रुतिविरोधाच्चोक्तोपादानत्वाभिप्रायेणैव तासु तथा व्यपदेश इत्याह—**एतादृशमेवेति**। यदिदं सर्वं हिरण्यगर्भादिस्तम्बपर्यन्तं तदयमात्मेति यश्चौरः स स्थाणुरितिवत्तादात्म्यव्यपदेशः। **सद्**—मूर्तपृथ्यादिभूतत्रयम्। **त्यद्**—अमूर्तं वाय्वाकाशे। तद्रूपमभवदिति[3] शुक्तिः रूप्यमभवदितिवत्। बहुस्यां[4] बहुतादात्म्यवान्भवेयम्, स्वप्नद्रष्टुः स्वाप्नपदार्थतादात्म्यवदिति विवेकः। आदिपदेन 'सर्वं खल्विदं ब्रह्म' (छा० ३–१४–१) 'ऐतदात्म्यमिदं सर्वम्' (छा० ६–८७) इत्याद्याः श्रुतय उपादेयाः। एवं लौकिकोऽपि तादात्म्यव्यपदेशोऽध्यासकृत एवेत्याह—**घटः सन्निति**।

अतिप्रसङ्गं शङ्कते—**नन्विति**। घटादिष्विष्टत्वव्यवहारदर्शनादानन्दाध्यास-

---

१. तच्च उपादानञ्चेत्यर्थः।

२. तदपि उपादानमपीत्यर्थः।

३. गपुस्तके तद्रूपमभवदित्यर्थं इत्येव पाठः। अत्र शुक्तिः रूप्यमभवदितिवद् इति निदर्शनप्रदर्शनपरः पाठः श्लिष्टः।

४. अत्र क-घपुस्तकयोः बहुस्यां बहुतादात्म्यं स्वाप्न० इति पाठः। गपुस्तके—भवेयं स्वाप्न० इति पाठश्च। तयोरनुपपन्नतामालोच्यैषोऽस्माभिः कल्पितः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सच्चिदंशाध्यासेऽप्यानन्दांशाध्यासाभावात् । जगति नामरूपांशद्वयव्यवहारस्तु अविद्यापरिणामात्मकनामरूपसम्बन्धात् । तदुक्तम्—

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥ इति ॥ ४ ॥

अथ जगतो जन्मक्रमो निरूप्यते—तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतोऽपरिमितानिरूपितशक्तिविशेषविशिष्टमायासहितः सन्नामरूपात्मकनिखिलप्रपञ्चं प्रथमं बुद्धावाकलय्येदं करिष्यामीति सङ्कल्पयति 'तदैक्षत बहुस्यां प्रजायेय' (छा० ६–२–३) इति 'सोऽकामयत बहुस्यां प्रजायेय' (तै० २–६) इत्यादिहोने पर भी आनन्द अंश का अध्यास नहीं हो रहा है । जगत् में नाम एवं रूप उन दो अंश का व्यवहार अविद्या का परिणाम नाम रूप के सम्बन्ध से हो रहा है । अस्ति, भाति, प्रिय नाम तथा रूप इन पाचों में से जगत् दीखने वाले तीन (अस्ति, भाति, प्रिय) अंश ब्रह्म के हैं और शेष दो अंश जगत् के हैं ॥ ४ ॥

जगत् की उत्पत्ति वर्णन—

अनन्तर जगत् की उत्पत्ति का क्रम निरूपण किया जा रहा है—सृष्टि के प्रारम्भ काल में परमेश्वर सृज्यमान प्रपञ्च को विचित्रता के कारण प्राणियों के कर्म से सहकृत होता है । उसी परमेश्वर के अपरिमित अनिरूपित शक्तिविशेष से विशिष्ट माया भी सहायक बन जाती है । उन दोनों से सहकृत होकर परमेश्वर नाम रूपात्मक

स्तत्र वर्ण्यते तददर्शनान्न दुःखे आनन्दांशाध्यास[1] इत्याह—**नेति** । आदिपदं दुःखसाधनपरम् । **सच्चिदंशाध्यासेऽपि**—[2] तत्तादात्म्याध्यासेऽपि । एवमग्रेऽपि । एवं प्रपञ्चे नामरूपव्यवहारः किंकृत इत्यत आह—**जगतीति** । स्वोक्तेऽभियुक्तवान्यमुदाहरति—**तदुक्तमिति** ।

एवं स्वरूपतटस्थलक्षणाभ्यां तत्पदार्थं लक्षयित्वा जगदुत्पत्तिनिरूपणं प्रतिजानीते—**अथेति** । **आकलय्येदम्**—इत्थमित्यालिख्य । परमेश्वरे वैषम्यनिरा-

---

१. आनन्दाध्यास इति क-खपुस्तकयोर्नास्ति ।

२. सच्चिदंशाध्यासः तत्तादात्म्याध्यासः इति पाठः कपुस्तके । सच्चिदंशाध्यासेन तत्तादात्म्याध्यास इति पाठः खपुस्तके तयोः खपुस्तकीयः श्लिष्टः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रुतेः। तत आकाशादीनि पञ्चभूतानि अपञ्चीकृतानि [1]तन्मात्रपदप्रतिपाद्यानि उत्पद्यन्त। [2]तत्राकाशस्य शब्दो गुणः। वायोस्तु शब्दस्पर्शौ। तेजसस्तु शब्दस्पर्शरूपाणि। अपां तु शब्दस्पर्शरूपरसाः। पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः ॥ ५ ॥

सम्पूर्ण प्रपञ्च को पहले बुद्धि में आकलन करता है, फिर इसे उत्पन्न करूँगा इस प्रकार संकल्प करता है। 'उसने विचार किया कि मैं बहुरूप धारण करूँ' 'उसने कामना की कि मैं बहुत होऊँ और प्रजा उत्पन्न करूँ' इत्यादि श्रुति भी उक्त विषय में प्रमाण है। उसके बाद आकाशादि अपञ्चीकृत पञ्चमहाभूत उत्पन्न हुए जिन्हें तन्मात्रा भी कहते हैं। उनमें आकाश का गुण शब्द; वायु के शब्द और स्पर्श। तेज के शब्द, स्पर्श, रूप। जल के शब्द, स्पर्श, रूप तथा रस और पृथिवी के शब्द, स्पर्श, रूप एवं गन्ध गुण हैं ॥ ५ ॥

सार्थमुक्तं सृज्यमानेति। ननु तस्य कूटस्थत्वात्कथ तत्र सङ्कल्पादिकमित्याशङ्कानिवृत्त्यर्थमुक्तम्—**अपरिमितेत्यादि**। प्रमाणमाह—**तदिति**। 'तन्मनोऽकुरुत' इक्षत्यादिश्रुतिरादिपदादुपादेया। **ततः**—ईक्षणसङ्कल्पप्रयत्नानन्तरम्। [3]**वियदधिकरणं** मनसि निधायाह—**आकाशादीनीति**। तथा च श्रुतिः 'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवी' (तै० २–१) इति। अपञ्चीकृतभूतानामेव पुराणादिषु तन्मात्रपदप्रतिपाद्यता इत्याश-

---

१. तन्मात्रेति। शब्दतन्मात्र–स्पर्शतन्मात्र–रूपतन्मात्र–रसतन्मात्र–गन्धतन्मात्राणीत्यर्थः। इमानि सूक्ष्मभूतानि–अपञ्चीकृतपञ्चभूतानि–तन्मात्राणीत्यादिशब्दैर्व्यपदिश्यन्ते। तज्जानां श्रोत्रादीनामिन्द्रियाणां प्राणादीनां वायूनाञ्चातीन्द्रियत्वात्तत्कारणानामपि भूतानां सूक्ष्मत्वं युक्तमेव। अत एव लिङ्गशरीरस्य नाप्यक्षमिति।

२. तत्रेति। तेष्वपञ्चीकृतेष्वित्यर्थः। आकाशस्य शब्दो गुण इत्यादि। ननु तन्मात्राणां सूक्ष्मत्वेनानुपलभ्यमानत्वे किमर्थं तत्र गुणा अङ्गीक्रियन्त इति चेन्न। तज्जेषु स्थलभूतेषु गुणोपलब्धेरकारणकत्वप्रसङ्गात् तत्कारणेष्ववश्यं गुणानामङ्गीकार्यत्वादिति।

३. वियदिति। आकाशस्य नित्यत्वमाश्रितमन्यैः, ततः कुतो जन्यत्वं व्यवस्थाप्यते स्वकपोलकल्पितं ग्रन्थकृतेति शङ्कायां सूत्रकारोक्तदिशा वर्णयति ग्रन्थकार इत्याह वियदिति। 'न वियदश्रुतेः (ब्र० सू० २–३–१) इत्यधिकरणमित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न च शब्दस्याकाशमात्रगुणत्वम्, वाय्वादावपि तदुपलम्भात्। न चासौ भ्रमः, [1]बाधकाभावात्। इमानि भूतानि त्रिगुणमायाकार्याणि त्रिगुणानि। गुणास्सत्त्वरजस्तमांसि। एतैश्च सत्त्वगुणोपेतैः पञ्चभूतैर्व्यस्तैः पृथक् पृथक् क्रमेण श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि जायन्ते। एतेभ्यः पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्यो मनोबुद्ध्यहङ्कारचित्तानि जायन्ते। श्रोत्रादीनां पञ्चानां क्रमेण दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः। मनआदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युता अधिष्ठातृदेवताः।

शब्द एकमात्र आकाश का ही गुण नहीं है, क्योंकि वायु आदि में भी शब्द की उपलब्धि होती है। वायु आदि में शब्द की उपलब्धि को भ्रम कह नहीं सकते, क्योंकि इनका बाधक कोई दीखता नहीं है। ये सभी भूत त्रिगुणात्मक माया के कार्य होने के कारण त्रिगुण स्वरूप ही हैं। सत्त्व, रज एवं तम ये तीन गुण हैं। सत्त्वगुणों से युक्त उक्त अपञ्चीकृत पञ्चमहाभूतों के पृथक् पृथक् अंश से क्रमशः श्रोत्र, त्वक्, चक्षु, जिह्वा और घ्राण की उत्पत्ति होती है। इसलिए इन्हें पञ्च ज्ञानेन्द्रिय कहा जाता है। इन्हीं अपञ्चीकृत पञ्चमहाभूतों के मिले हुए सत्त्व अंश से मन, बुद्धि, चित्त एवं अहङ्कार उत्पन्न होते हैं। श्रोत्रादि पाँच ज्ञानेन्द्रियों के पाँच देवता हैं, श्रोत्र के दिशा, त्वक् के वायु, चक्षु के सूर्य, जिह्वा के वरुण और घ्राण के अश्विनीकुमार देवता माने जाते हैं। उसी तरह मन आदि अन्तःकरण चतुष्टयों में भी मन के चन्द्रमा, बुद्धि के ब्रह्मा, अहंकार के शंकर और चित्त के विष्णु अधिष्ठातृ देवता मानी जाती हैं।

येनाह—**तन्मात्रेति**। पञ्चीकृतभूतेषु शब्दादिगुणोपलब्धेरपञ्चीकृतेष्वप्यनुमानसिद्धान् तानाह—**अत्रेति**। अपञ्चीकृताकाशादिभूतेषु।

नैयायिकमतं निरस्यति—**न चेति**। पञ्चीकृतवाय्वादौ तदुपलम्भादपञ्चीकृतवाय्वादावपि तदुपलम्भ इति भावः। ननु जलादावपि गन्धोपलम्भात्कथं तस्य पृथिवीमात्रगुणत्वमिति चेन्न। तस्य पञ्चीकृतपृथिव्यंशसम्बन्धकृतत्वेन जलादेः पृथिव्यकार्यत्वेन बाधकसद्भावेन च भ्रमत्वात्। एतेषां त्रिगुणात्मकत्वेऽपि सत्त्वगुणप्रधानेभ्य एभ्यो यदुत्पद्यते तदाह—**एतैश्चेति**। **एतैः**—अपञ्चीकृतैः।

---

१. लौकिकभ्रमस्य संसारदशायां बाधावश्यम्भावेन वाय्वादिशब्दस्य बाधाभावान्न भ्रमत्वमिति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतैरेव रजोगुणोपेतैः पञ्चभूतैर्व्यस्तैर्यथाक्रमं वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि जायन्ते। तेषां च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः। रजोगुणोपेतपञ्चभूतैरेव मिलितैः पञ्च वायवः प्राणापानव्यानोदानसमानाख्या जायन्ते। तत्र प्राग्गमनवान् वायुः, प्राणः नासादिस्थानवर्ती। अर्वाग्गमनवानपानः, पाय्वादिस्थानवर्ती। विष्वग्गतिमान् व्यानः, अखिलशरीरवर्ती। ऊर्द्ध्वगमनवानुत्क्रमणवायुरुदानः, कण्ठस्थानवर्ती। अशितपीतान्नादिसमीकरणकरः समानः, नाभिस्थानवर्ती ॥ ६ ॥

इन आकाशादि अपञ्चीकृत पञ्चमहाभूतों के रजोगुणों से पृथक्-पृथक् अंश से क्रमशः वाक्, पाणि, पाद, पायु और उपस्थ ये पाँच कर्मेन्द्रियाँ उत्पन्न हुई। इनके भी पाँच अधिष्ठातृ देवता हैं—वाक् के अग्नि देवता, पाणि के इन्द्र, पाद के वामन, पायु (गुदा) के मृत्यु एवं उपस्थ के प्रजापति देवता हैं। रजोगुण-युक्त अपञ्चीकृत पञ्चमहाभूतों के मिले हुए अंश से 'प्राण' उत्पन्न हुआ। जिसके व्यापार भेद से पाँच नाम पड़ गये, हैं (१) प्राण, (२) अपान, (३) व्यान (४) समान तथा (५) उदान। इनमें सर्वदा ऊपर की ओर गति वाले वायु को प्राण कहा जाता है, वह नासिकादि स्थान में रहता है। अधोगति वाले वायु को अपान कहा गया है, वह गुदादि स्थान में रहता है। शरीर के सकल स्थान पर गतिशील वायु को व्यान कहते हैं, वह सम्पूर्ण शरीर में रहता है। ऊर्ध्वगामी होकर उत्क्रमण करने वाले वायु को उदान कहा जाता है, वह कण्ठस्थान में रहता है। खाये पीये अन्न-जलादि का समीकरण करने वाले वायु को समान कहते हैं, वह नाभिस्थान में रहता है ॥६॥

मनसः स्थानं गलान्तरं बुद्धेर्वदनम् अहङ्कारस्य हृदयं चित्तस्य नाभिरिति शारीरकोपनिषदि मनआदिगोलकान्युक्तानि। दिग्वातार्कप्रचेताश्वीति भागवतमनुसृत्याह—**श्रोत्रादीनामिति**। यद्यपि सुबालोपनिषदि घ्राणस्य पृथिवी देवतोक्ता, तथाऽपि पृथिव्यभिमानिन्या देवताया अध्वात्मना तदधिष्ठातृत्वादविरोधः।

रजःप्रधानानामेषां कार्यमाह—**एतैरेवेति**। तेषु पञ्चवायुषु प्राणं लक्षयति—**प्रागिति**। सर्वदोर्ध्वगतिमानित्यर्थः। तेनोत्क्रान्तिसमय उदानस्योर्ध्वगतिमत्त्वेऽपि नातिप्रसङ्गः। 'वायुः प्राणो भूत्वा नासिके प्राविशत्' (तै० २–४) इत्यैतरेयश्रुतिमनुसृत्याह—**नासादिति**। नाभ्यादिनासिकापर्यन्तानि स्थानान्यादिपदार्थः। अपानं लक्षयति—**अर्वागिति**। अधोगमनवान्। नाभ्यादिपायुपर्यन्त-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतानि जायन्ते। 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' (छा० ६-३-३) इति श्रुतेः 'पञ्चीकरणोपलक्षणार्थत्वात्।

पञ्चीकरण या स्थूल महाभूतों की उत्पत्ति —

तमोगुण से युक्त उन अपञ्चीकृत पञ्चमहाभूतों से पञ्चीकृत पञ्चमहाभूतों की उत्पत्ति होती है। "तेज, जल एवं क्षिति के एक-एक का त्रिवृत (मिलित भूतत्रयात्मक) करूँगा" यह श्रुति (छान्दोग्य) में त्रिवृत्तकरण पञ्चीकरण का उपलक्षण है।

स्थानान्यादिशब्दार्थः। तथा चैतरेयश्रुतिः 'मृत्युरापनो भूत्वा नाभि प्राविशत्' (ऐ० २-४) इति। व्यानं लक्षयति—**विष्वगिति**। विष्वगमनवान्सर्वतो गमनवान्। उदानलक्षणमाह—**ऊर्ध्वमिति**। प्राणेऽतिप्रसङ्गमाशङ्क्याह—**उत्क्रमणेति**। लोकान्तरयात्राकाल ऊर्ध्वगमनवानित्यर्थः। 'अथैकयोर्ध्व उदानः पुण्येन पुण्य लोकं नयति' (प्र० ३-७) इत्यादिप्रश्नोपनिषद्वाक्यमत्र प्रमाणम्। यद्वा, यत् पीताशितपानीयान्नाद्युद्गारक्रियोत्क्रमणं तद्धेतुस्तदर्थमूर्ध्वगमनवानित्यर्थः। समानं लक्षयति—**अशितेति**। अस्य सकलशरीरवर्तित्वेऽपि मुख्यस्थानमाह—**नाभीति**। प्राणादीनां लक्षणान्युक्तानि मैत्रेयोपनिषदि—'अथ योऽयमूर्ध्वमुत्क्रामति एष वाव स प्राणः योऽयमर्वाचं संक्रामति येनेतः शिरा अनुव्याप्ताः योऽयं पीतमशितमुद्गिरति योज्यं स्थविष्ठमन्नं धातुमपाने स्थापयति अणिष्ठं चाङ्गे समानयति' इति।

तमोगुणप्रधानानामेषां कार्यमाह—**तैरेवेति**। ननु त्रिवृत्करणस्य श्रुतिमूलत्वात्त्रिवृत्कृतभूतानीति वक्तव्ये पञ्चीकृतभूतानीति श्रुतिविरुद्धमित्यत आह—**तासामिति**। तेजोऽबन्नरूपाणां मध्ये एकं तेजोभूतं द्विधा विभज्य तयोरेकं पुनर्द्विधा विभज्य तयोरंशयोरबन्नयोः संयोजनम्। तथा जलं द्विधा विभज्य तयोरेकं भागं पुनर्द्विधा विभज्य तयोरंशयोस्तेजःपृथिव्योः संयोजनम्। एवं पृथिवीं द्विधा विभज्य तयोरेकं भागं पुनर्द्विधा विभज्य तयोरंशयोर्जलनभसोः संयोजनमिति 'त्रिवृतं त्रिवृतमेकैकां करवाणि' इति श्रुतेरिति। यद्यपि छान्दोग्ये त्रिवृत्करणमुक्तम्, तथाऽपि तद्वाक्यस्योक्तभूतपञ्चोत्पत्त्यनुसारित्वात्तस्याश्च पञ्चभूतोत्पत्तिपरत्वेन सूत्रकारैः सिद्धान्तितत्वात्त्रिवृत्करणस्यापि पञ्चीकरणोपलक्षणार्थत्वं न्याय्यमिति भावः।

---

१. ख-गपुस्तकयोः पञ्चीकृतोपलक्षणेति पाठः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चीकरणप्रकारश्चेत्थम्—आकाशमादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्द्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्षु[1] भूतेषु संयोजनम्। एवं वायुं द्विधा विभज्य तयोरेकं भागं पुनः [2]चतुर्द्धा विभज्य तेषां चतुर्णामंशानामाकाशादिषु संयोजनम्। एवं तेज आदीनामपि। तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकमर्द्धान्तरं चतुर्विधभूतमयमिति पृथिव्यादिषु स्वांशाधिक्यात्पृथिव्यादिव्यवहारः। तदुक्तम्—

'वैशेष्यात्तु तद्वादस्तद्वादः' (ब्र० सू० २-४-२३) इति ॥ ७ ॥

पञ्चीकरण की प्रक्रिया—

पञ्चीकरण की प्रक्रिया इस प्रकार है कि पहले आकाश के दो विभाग करके आधे भाग को सुरक्षित रक्खा और दूसरे आधे भाग का चार भाग कर वायु आदि में एक-एक भाग मिला दिया गया। उसी प्रकार वायु के भी अर्धकांश सुरक्षित रखते हुए आधे का चार भाग करके आकाशादि इतर भूतों में मिला दिया गया। इसी तरह अग्नि, जल तथा पृथिवी के भी दो-दो भाग करके एक भाग को सुरक्षित रखते हुए शेष दूसरे भागों के चार भाग करके अपने से भिन्न भूतों में एक-एक भाग मिला दिया। इस प्रकार प्रत्येक भूतों में आधे-आधे भाग अपने हैं और आधे-स्वात्मक भाग दूसरे-दूसरे भूतों के हैं। सभी में सभी भूतों के अंश आ जाने से इन्हें पञ्चीकरण कहा जाता है। पृथिव्यादि में अपने अंश की अधिकता से पृथिव्यादि का व्यवहार होता है। इसी को भगवान् वेदव्यास ने कहा है कि—'अपने-अंश की अधिकता होने के कारण पृथिवी-जल-अग्नि-वायु तथा आकाश शब्द से इन्हें कहा जाता है ॥७॥

ननु पञ्चानामपि पञ्चात्मकत्वे कथं पृथिवीयमिदं जलमित्यादि व्यपदेश इत्याशङ्क्याह—**पृथिव्यादिष्विति**। अत्र द्वितीयाव्यायान्तर्गतं भगवतो व्यासस्य

---

१. चतुर्षु भूतेष्विति। द्विधा विभक्तेषु भूतेषु एकस्मिन्नविभज्यमाने भागे अन्यांशस्य संयोजनं न तु विभक्ते इत्यूहनीयम्। तथा चैष पञ्चीकरणप्रकारः आकाशादीनि पञ्चभूतानि द्विधा विभजेत्, तेषामेकैकं भागं तदवस्थं रक्षयित्वा अपरपञ्चभागान् प्रत्येकं चतुर्धा विभजेत्, विभक्तस्याकाशार्धस्य चतुर्णांशान् आकाशव्यतिरिक्तभूतानामविभक्तार्धभागे योजयेत्। एवं वाय्वादिषु। तथा च चत्वारो वाय्वादीनामंशा यावन्मितास्तावन्मित एक आकाशांशः, तेषु मिलितेषु सत्सु पञ्चीकृत आकाश इति। एवं वाय्वादिष्वपि ज्ञेयमिति।

२. खगपुस्तकयोः पुनः शब्दो नास्ति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्वोक्तैरपञ्चीकृतैर्लिङ्गशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्यन्तं स्थायि मनोबुद्धिभ्यामुपेत ज्ञानेन्द्रियपञ्चकर्मेन्द्रियपञ्चकप्राणादिपञ्चकसंयुक्तं जायते। तदुक्तम्—

पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।
अपञ्चीकृतभूतात्थं सूक्ष्माङ्गं भोगसाधनम् ॥ १ ॥ इति।

सूक्ष्म शरीर की उत्पत्ति—

पूर्वोक्त अपञ्चीकृत पञ्चमहाभूतों से मोक्ष पर्यन्त स्थायी, परलोक यात्रा निर्वाहक मन और बुद्धि से युक्त ज्ञानेन्द्रिय-पञ्चक, कर्मेन्द्रिय-पञ्चक और प्राण-पञ्चक मिलकर सत्तरह अवयव वाला यह सूक्ष्म शरीर बनता है। इसे पूर्वाचार्यों ने भी कहा है कि—पञ्चप्राण, मन और बुद्धि एवं दश इन्द्रियों से युक्त अपञ्चीकृत पञ्च महाभूतों से उत्पन्न सूक्ष्म शरीर भोग का साधन है।

सूत्रं प्रमाणमित्याह—**तदुक्तमिति**। तुशब्दः शङ्कानिरासार्थः। विशेषस्य भावो वैशेष्यम्, तस्मात्स्वभागस्य भूयस्त्वात्तद्वादः पृथिवीयमिदं जलमित्यादिव्यपदेशः। तद्वादपदाभ्यासोऽध्यायसमाप्तिसूचनार्थः। एतेन पञ्चीकरणं सम्प्रदायाश्वसिद्धमपि नादरणीयं तन्मूलभूतश्रुतिसूत्रयोरभावात्, अन्यथा गगनपवनयोश्चाक्षुषत्वापत्तेरिति प्रत्युक्तम्। श्रुतिसूत्रयोरुपलक्षणार्थत्वादन्यथा पुराणवाक्यानां निरालम्बनापातादपञ्चीकृततेतरभूतगुणानामितरस्मिन्पञ्चीकृतेऽप्यनुपलब्धेः। तथा च यथा पञ्चीकृततेज आदावपञ्चीकृतस्वगुणानामेव भानं न त्वपञ्चीकृतस्वेतरगुणानां तथाऽऽकाशवाय्वोरपीति सर्वथा सम्प्रदायसिद्धं पञ्चीकरणमादरणीयमिति भावः।

तेषामेव गुणत्रयोपेतानां मन आदिसमुदायाश्मकं लिङ्गशरीरं कार्यमित्याह—**पूर्वोक्तैरिति**। नन्वपलभ्यमानस्थूलशरीरेणैव समस्तकार्यनिर्वाहात्किमर्थंकमेतदित्यत आह—**परलोकेति**। तस्य मोक्षेऽप्यभावाभावमाशङ्क्याह—**मोक्षेति**। आत्यन्तिकप्रलयपर्यन्तं स्थायीत्यर्थः। तेषां समुदायः शरीरमित्यादिमैत्रेयश्रुतिमूलकमभियुक्तवाक्यमत्र प्रमाणमित्याह—**तदुक्तमिति**। **सूक्ष्मान्नं**—सूक्ष्मशरीरम्। तत्र ब्रह्माण्डव्यापित्वादाद्यं परं देहमात्रव्यापित्वाद् द्वितीयमपरमित्याशयेनाह—**तत्रेति**।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तच्च द्विविधं—परमपरं च। तत्र परं हिरण्यगर्भलिङ्गशरीरम्, अपरमस्मदादिलिङ्गशरीरम्। तत्र हिरण्यगर्भलिङ्गशरीरं महत्तत्त्वम्, अस्मदादिलिङ्गशरीरमहङ्कार इत्याख्यायते।

एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्यो भूम्यन्तरिक्षस्वर्महर्जनस्तपःसत्यात्मकस्योर्ध्वलोकसप्तकस्य अतलवितलसुतलतलातलरसातलमहातलपातालाख्याधोलोकसप्तकस्य ब्रह्माण्डस्य जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणामुत्पत्तिः। तत्र जरायुजानि जरायुभ्यो जातानि, मनुष्यपश्वादिशरीराणि। अण्डजानि अण्डेभ्यो जातानि, पक्षिपन्नगादिशरीराणि। स्वेदजानि स्वेदाज्जातानि, यूकामशकादीनि। उद्भिज्जानि भूमिमुद्भिद्य जातानि, वृक्षादीनि। वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरत्वम्।

तत्र परमेश्वरस्य पञ्चतन्मात्राद्युत्पत्तौ सप्तदशावयवोपेतलिङ्गशरीरोत्पत्तौ च हिरण्यगर्भस्थूलशरीरोत्पत्तौ च साक्षात्कर्तृत्वम्। इतरनिखिल-

सूक्ष्म शरीर के भेद—

वह (सूक्ष्म शरीर) दो प्रकार का है—(१) पर और (२) अपर। उनमें हिरण्यगर्भ का लिङ्गशरीर पर है, और हम लोगों का लिङ्गशरीर अपर है। उनमें भी हिरण्यगर्भ का लिङ्गशरीर पर है और हम लोगों का लिङ्गशरीर अहङ्कार है—इस प्रकार कहा गया है।

उसमें परमेश्वर को पञ्चतन्मात्रादि की उत्पत्ति में, सप्तदश अवयव-युक्त लिङ्ग (सूक्ष्म) शरीर की उत्पत्ति में, तथा हिरण्यगर्भ के स्थूल शरीर की उत्पत्ति में साक्षात् कर्ता कहा गया है। अन्य सम्पूर्ण प्रपञ्च की उत्पत्ति में हिरण्यगर्भ के द्वारा परमेश्वर को कारण माना गया है। "अब मैं इन तीनों

सुबालश्रुतौ संन्यासविधावप्यारण्यकश्रुतौ च चतुर्दशभुवनात्मकब्रह्माण्डोत्पत्तिरभिहिता तदनुसृत्याह—**एवमिति**। 'शरीरजैः कर्मदोषैर्याति स्थावरतां नरः' इत्यादिवचनमनुसृत्याह—**वृक्षादीनामिति**।

नन्वशरीरस्य परमात्मनः शरीरसाध्यब्रह्मणादिकार्यं प्रति कथं हेतुत्वमित्याशङ्क्य तत्र परम्परयेति दर्शयति—**तत्रेति**। [1]कार्यकदम्बे। लिङ्गशरीरस्य द्वि-

---

१. कार्यैकदेशलिङ्गशरीरेतिपाठः गपुस्तके।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रपञ्चोत्पत्तौ हिरण्यगर्भादिद्वारा,—'हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा० ६–३–२) इति श्रुतेः। हिरण्यगर्भो नाम मूर्तित्रयादन्यः प्रथमो जीवः।

स वै शरीरी प्रथमः स वै पुरुष उच्यते।
आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्तत ॥ १ ॥

'हिरण्यगर्भः समवर्तताग्रे भूतस्य' (यजु० १३-४ ऋ० स० १०-१२०-१) इत्यादिश्रुतेः। एवं भूतभौतिकसृष्टिर्निरूपिता ॥ ८ ॥

इदानीं प्रलयो निरूप्यते। प्रलयो नाम त्रैलोक्यनाशः, स च चतुर्विधः-

देवताओं में इस जीवात्मा रूप से अनुप्रवेश करके नाम एवं रूप को व्यक्त करूँगा।" यह श्रुति उक्त विषय में प्रमाण है। ब्रह्मा-विष्णु महेश्वर इन तीनों मूर्त्तियों से भिन्न हिरण्यगर्भ प्रधान जीव है। श्रुति ने भी कहा है—

"वह हिरण्यगर्भ ही प्रथम शरीरी और वही प्रथम पुरुष कहा जाता है। भूतों के आदिकर्ता ब्रह्मा प्रथम उत्पन्न हुआ। हिरण्यगर्भ भूतों से पूर्व उत्पन्न हुआ है।" इस प्रकार भूत-भौतिक सृष्टि का निरूपण किया गया ॥ ८ ॥

प्रलय का निरूपण—

अब प्रलय का निरूपण किया जाता है। प्रलय शब्द का अर्थ है तीनों लोक का

धस्य 'यो ब्रह्माणं विदधाति पूर्वम्' (श्वे० ६–१८) इत्यादिश्रुतिर्हिरण्यगर्भस्य च साक्षात् ब्रह्मकार्यत्वे प्रमाणम्। आदिपदं मरीच्यादिसङ्ग्राहकम्। हिरण्यगर्भादिद्वारा परेशस्य कर्तृत्वे श्रुति प्रमाणयति—**हन्तेति। देवताः**—तेजोऽबन्नरूपाः। ननु हिरण्यगर्भस्य परेशमूर्तित्रयान्तर्गतत्वेन कथं जीवत्वमित्याशङ्क्याह—**हिरण्यगर्भ इति**। अत्र प्रमाणमाह—**स इति**। शरीरीति श्रुत्या तस्य जीवत्वावधारणान्मूर्तित्रयान्यत्वे श्रुतिः प्रमाणमिति भावः। 'ब्रह्मा देवानां प्रथमं सम्बभूव' (मु० १–१) इत्याद्या श्रुतिरादिपदादादेया। सृष्टिप्रतिपादनोपसंहारपूर्वकं प्रलयनिरूपणं प्रतिजानीते—**एवमिति**।

भूलोकेऽधोलोकानामन्तर्भावः स्वर्लोके तदुपरिष्ठानामिति त्रिलोकीपक्षे स प्रलयः नित्यादिभेदेन त्रिविधः। चतुर्दशलोकीपक्षे स नैमित्तिक इत्येव। तस्य चातुर्विध्यमभिप्रेत्याह—**स चेति**। प्रलयो नाम विनाश इति पाठः स्पष्टः।

---

१. चशब्दो नास्त्यन्येषु पुस्तकेषु। श्रुतिः लिङ्गशरीरस्य हिरण्यगर्भस्य च साक्षाद् ब्रह्मकार्यत्वे प्रमाणमित्यन्वयः।

** एतच्चिह्नमध्यगतस्य पाठस्य मूलेन सङ्गतिर्न दृश्यते। यथा कथञ्चिदस्याय-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

नित्यः प्राकृतो नैमित्तिक आत्यन्तिकश्चेति। तत्र नित्यः—प्रलयः सुषुप्तिः, तस्याः सकलकार्यप्रलयरूपत्वात्। धर्माधर्मपूर्वसंस्काराणां च तदा कारणात्मनाऽवस्थानम्। तेन सुषुप्तोत्थितस्य न सुखदुःखाद्यनुभवानुपपत्तिः। न वा स्मरणानुपपत्तिः। न च सुषुप्तावन्तःकरणस्य विनाशे तदधीनप्राणादिक्रियाऽनुपपत्तिः। वस्तुतः श्वासाद्यभावेऽपि तदुपलब्धेः पुरुषान्तरविभ्रममात्रत्वात् सुप्तशरीरोपलम्भवत्।

विनाश। वह नित्य, प्राकृतिक, नैमित्तिक और आत्यन्तिक भेद से चार प्रकार का है। उनमें सुषुप्ति नित्य प्रलय है, क्योंकि उसका सकल कार्य प्रलयरूप है। उस समय धर्म, अधर्म एवं पूर्व संस्कार कारण रूप से रहते हैं। इसलिए सुषुप्ति से उठे हुए व्यक्ति को सुख-दुःखादि के अनुभव की अनुपपत्ति नहीं होती। अथवा स्मरण की अनुपपत्ति नहीं होती। ऐसा भी कहना ठीक नहीं है कि—सुषुप्ति में अन्तःकरण का विनाश हो जाने पर अन्तःकरण के अधीन प्राणादि क्रिया की सिद्धि न हो सकेगी, क्योंकि वस्तुतः श्वास आदि के अभाव होने पर उसकी उपलब्धि तत्रस्थ पुरुषान्तर को भ्रम मात्र है। जिस प्रकार सुषुप्त पुरुष के शरीर का उपलम्भ तत्रस्थ मनुष्य का भ्रम मात्र है, वैसे ही प्राण आदि के विषय में भी समझना चाहिए।

तत्राद्यं लक्षयति—**तत्रेति**। नित्यः प्रलयः प्रतिदिनं प्रविलयः। 'सुषुप्तिकाले सकले विलीने' (कै० १–१३) इति कैवल्यश्रुतिमनुसृत्याह—**तस्या इति**। नन्वेवं तर्हि सुखादिहेतोः धर्मादेः स्मृतिहेतोः संस्कारस्य च तदानीं प्रविलयादुत्थितस्य कथं सुखादिभेदभोगः पूर्वपदार्थस्मरणं चेत्याशङ्क्याह—**धर्माधर्मेति**। **कारणात्मना**—अविद्यात्मना, स्वकार्यकारणात्मना वा। नन्वन्तःकरणस्यापि

मर्थः—त्रिलोकीपक्षे नैमित्तिकप्राकृतयोरेकीकरणेन प्रलयः त्रिविधः। चतुर्दशभुवनानीतिपक्षे त्रिलोकीव्यतिरिक्तानां कार्यब्रह्मदिवसावसाननिमित्तो लयो भवतीति नैमित्तिकस्यातिरिक्तत्वमिति।

१. वस्तुत इति। इदं दृष्टिसृष्टिवादाभिप्रायेण। सुषुप्तिकाले ममेदं शरीरमिति शरीरादिसंबन्धाभ्यासाभावेन सुषुप्तदृष्ट्या शरीराद्यभावेन सुप्तशरीरे अन्यस्योपलम्भो भ्रमरूपः, तथैव सुषुप्तस्य वस्तुतः श्वासादिक्रियाया अभावेऽपि श्वासाद्युपलब्धेः पुरुषान्तरभ्रमरूपत्वादिति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न चैवं सुप्तस्य परेतादविशेषः। सुप्तस्य हि लिङ्गशरीरं संस्कारात्मनाऽत्रैव वर्तते, परेतस्य तु लोकान्तरे इति वैलक्षण्यात्। यद्वा, अन्तःकरणस्य द्वे शक्ती—ज्ञानशक्तिः क्रियाशक्तिश्चेति। तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशः, न क्रियाशक्तिविशिष्टस्येति प्राणाद्यवस्थानमविरुद्धम। 'यदा सुप्तः स्वप्नं न कञ्चन पश्यति, अथास्मिन् प्राण एवैकधा भवति, अथैनं वाक् सर्वैर्नामभिः सहाप्येति', (कौ० ३–२) 'सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति' (छा० ६–८–१) इत्यादिश्रुतिरुक्तसुषुप्तौ मानम्।

ऐसा कहना भी ठीक नहीं है कि—मरे हुए की अपेक्षा सुषुप्त पुरुष में कोई विशेषता नहीं, क्योंकि सुप्त पुरुष का सूक्ष्म शरीर संस्कार रूप से यहीं पर रहता है, और मृत व्यक्ति का सूक्ष्म शरीर लोकान्तर में चला जाता है, बस इतना ही सुषुप्त और मृत पुरुष में भेद है।

अथवा अन्तःकरण की दो शक्तियाँ हैं --(१) ज्ञानशक्ति और (२) क्रियाशक्ति। उनमें ज्ञानशक्ति-विशिष्ट अन्तःकरण का सुषुप्ति में विनाश हो जाता हैं, परन्तु क्रियाशक्ति-विशिष्ट अन्तःकरण का नहीं होता। इसलिए सुषुप्ति में प्राणादि की विद्यमानता में विरोध नहीं है। "जिस समय सोया हुआ मनुष्य कोई स्वप्न नहीं देखता, उस समय प्राण में ही एकीभाव हुआ करता है। उस समय प्राण में सम्पूर्ण नाम के सहित वाणी विलीन हो जाती है।"

"हे सौम्य ! सुषुप्ति में सोया हुआ व्यक्ति सत् से सम्पन्न हो जाता है, स्वयं में विलीन हो जाता है।" इत्यादि श्रुतियाँ सुषुप्ति के विषय में प्रमाण हैं।

तदानीं कारणात्मनाऽवस्थानात् कथं तदधीनप्राणनादिक्रियेत्याशङ्क्य देहहेतुधर्मादेर्विनाशेऽपि देहस्थितिवत्तत्क्रियोपलब्धिरपि नानुपपन्नेत्याह - **न चेति**। ननु कारणाभावे द्वयमपि विरुद्धमित्यपरितोषादाह—**वस्तुत इति**।

सुप्तस्य मृतादविशेषमाशङ्क्य परिहरति—**न चेति**। जाग्रदवस्थायां परेतस्य लिङ्गशरीरं जन्मान्तरीयतत्तत्पदार्थसंस्कारजन्यतत्तत्पदार्थाकारात्मना लोकान्तरे स्थितं सुप्तस्य तु तादृशसंस्कारात्मनाऽत्रैवेत्यर्थः। ननु पुरुषान्तरस्य देहः प्राणक्रिया च भ्रमात्प्रतीयते न कर्मेन्द्रियव्यापारादिकमिति वैषम्ये नियामकाभावमालक्ष्याह—**यद्वेति**। आदिपदमपानादिसंग्राहकम्। देहावस्थानं तु मृतशरीराव-

Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राकृतप्रलयस्तु कार्यब्रह्मविनाशनिमित्तकः सकलकार्यनाशः। यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणो ब्रह्माण्डाधिकारलक्षण-प्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परा मुक्तिः, तदा तल्लोकवासि-नामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह विदेहकैवल्यम्।

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥ इति श्रुतेः।

कार्यब्रह्म (हिरण्यगर्भ) के विनाश के निमित्त से होने वाले सकल कार्य के विनाश को प्राकृत प्रलय कहते हैं, जिसे पहले ही ब्रह्मसाक्षात्कार हो गया, ऐसे प्रागुत्पन्न ब्रह्मसाक्षात्कार वाले कार्यब्रह्म को ब्रह्माण्डों के अधिकार रूप प्रारब्धकर्म समाप्त होते ही विदेह कैवल्यरूप परामुक्ति प्राप्त हो जाती है। उस समय उस लोक के निवासी उत्पन्न ब्रह्मसाक्षात्कार पुरुषों को ब्रह्मा के साथ ही विदेहकैवल्य प्राप्त हो जाता है। श्रुति ने भी कहा है—

प्राकृत प्रलय प्राप्त होने पर ब्रह्मा के साथ ही हिरण्यगर्भ के अन्त होते समय परलोक-निवासी ब्रह्मसाक्षात्कार पुरुष परमपद में प्रवेश कर लेते हैं।

स्थानवदविरुद्धमिति भावः। अत्र प्रमाणमाह—**यदेति**। अथ तदानीम्, **अस्मिन्**—सुप्ते सति, **एकधा**—एकः, **एनं**—प्राणम्, **अप्येति**—प्रविशति। कौषीतकिश्रुतिमुदाहृत्य छान्दोग्यश्रुतिमुदाहरति—**सतेति**। **हे सौम्य! तदा**—सुषुप्तौ, **सता**—सद्रूपेण ब्रह्मणा जीवः, **सम्पन्नः**—अभेदं गतो **भवति, स्वम-पीतः**—विलीनः, तिरोहितोपाधिर्भवतीत्यर्थः। 'सति सम्पद्य न विदुः' इत्याद्या श्रुतिरादिपदेन ग्राह्या।

एवं नित्यप्रलयमभिधाय प्राकृतं निरूपयति—**प्राकृतेति**। सकलकार्यवि-नाशः प्रकृतौ लयः। सुषुप्तेषु कार्यब्रह्मविनाशनिमित्तकसकलकार्यविनाशरूपत्वा-भावान्न तत्रातिव्याप्तिः प्रागेवोत्पन्नपरब्रह्मसाक्षात्कारस्य हिरण्यगर्भस्य ब्रह्माण्डा-धिकारनिर्वाहकप्रारब्धकर्मपरिसमाप्तौ सत्यां यदा विदेहकैवल्यात्मिका परम-मुक्तिस्तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह तथाभूतमुक्ति-रित्यर्थः। उक्तार्थे श्रुतिं प्रमाणयति—**ब्रह्मणेति**। **प्रतिसञ्चरे**—प्राकृते प्रलये, **सम्प्राप्ते** सति, **परस्य**—हिरण्यगर्भस्य, **अन्ते**—मुक्तिसमये, **ते**—सत्यलोक-वासिनः, **कृतात्मनः**—प्राप्ततत्त्वसाक्षात्काराः, **सर्वे ब्रह्मणा सह परं पदं**—विदेहकैवल्यं **प्रविशन्तीत्यर्थः**।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं स्वलोकवासिभिः सह कार्ये ब्रह्मणि मुच्यमाने तदधिष्ठित-ब्रह्माण्डतदन्तर्वर्तिनिखिललोकतदन्तर्वर्तिस्थावरादीनां भौतिकानां भूतानां च प्रकृतौ मायायां च लयः, न तु ब्रह्मणि, बाधरूपविनाशस्यैव ब्रह्मनिष्ठ-त्वात्। अतः प्राकृत इत्युच्यते ॥ ९ ॥

कार्यब्रह्मणो दिवसावसाननिमित्तकस्त्रैलोक्यमात्रप्रलयः नैमित्तिक-प्रलयः। ब्रह्मणो दिवसश्चतुर्युगसहस्रपरिमितकालः, 'चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते' इति वचनम्। प्रलयकालो दिवसकालपरिमितः, रात्रिकालस्य दिवसकालतुल्यत्वात् प्राकृतप्रलये नैमित्तिकप्रलये च पुराणवचनानि।

इस प्रकार अपने लोकनिवासियों के सहित कार्यब्रह्म के मुक्त हो जाने पर उसके अधिष्ठित ब्रह्माण्ड एवं उस ब्रह्माण्ड के अन्तर्गत सम्पूर्ण लोक और उन लोकों में रहने वाले स्थावर आदि भौतिक तथा भूतों का भी अपने मूल कारण प्रकृति (माया) में विलय हो जाता है, ब्रह्म में नहीं, बाधरूप विनाश ही ब्रह्म में हुआ करता है। इसलिए इसे प्राकृत प्रलय कहते हैं ॥ ९ ॥

कार्यब्रह्म के एक-एक दिवस का अवसान रूप निमित्त प्राप्त कर त्रैलोक्य-मात्र का प्रलय होता है, इसे नैमित्तिक प्रलय कहा जाता है। चतुर्युग सहस्र परिमित काल ब्रह्मा का दिन कहा गया है। पुराण में कहा गया है कि "एक हजार चतुर्युगी को ब्रह्मा का एक दिन कहते हैं।" रात्रिकाल दिवसकाल के बराबर होने के कारण प्रलयकाल भी दिवस काल के समान ही होता है। प्राकृत प्रलय तथा नैमित्तिक प्रलय के विषय में पुराण के वाक्य भी मिलते हैं—

नन्वेव तर्हि ब्राह्मोऽयं प्रलयो न प्राकृत इत्याशङ्क्य तत्त्वविदां ब्रह्मप्रवेशेऽप्य-तत्त्वविदां प्रकृतौ प्रवेशात्प्राकृत इत्याह—**एवमिति**। मायायां लयो निवृत्तिः। तत्र हेतुमाह—**बाधेति**। ब्रह्मनिष्ठत्वाद्। ब्रह्मधर्मत्वाद् ब्रह्मधर्मत्वाद् ब्रह्मणि तदात्मना स्थितत्वादिति वा। नैमित्तिकं तं दर्शयति—**कार्येति**। त्रैलोक्यं भूर्भुवः स्वरिति लोकत्रयम्। ब्रह्मदिवसस्य किं प्रमाणमित्यपेक्षायामाह—**ब्राह्मण इति**। नैमित्ति-कप्रलयकालोऽप्येतावानेवेत्याह—**प्रलयेति**।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः।
तदा प्रकृतयः सप्त कल्प्यन्ते प्रलयाय हि॥
एष प्राकृतिको राजन् प्रलयो यत्र लीयते।

इति वचनं प्राकृतप्रलये मानम्।

एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक्।
शेतेऽनन्तासने नित्यमात्मसात्कृत्य चाखिलम्॥

इति वचनं नैमित्तिकप्रलये मानम्॥ १०॥

तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः सर्वमोक्षः। स चैकजीववादे युगपदेव, नानाजीववादे तु क्रमेण। 'सर्व एकीभवन्ति' इत्यादिश्रुतेः। तत्राद्यास्त्रयोऽपि लयाः कर्मोपरतिनिमित्ताः, तुरीयस्तु ज्ञानोदयनिमित्तो लयो ज्ञानेन सहैवेति विशेषः। एवं चतुर्विधप्रलयो निरूपितः॥ ११॥

"जब परमेष्ठी ब्रह्मा के दो परार्धकाल बीत जाते हैं, तब महदादि सात प्रकृतियों का प्रलय होता है। हे राजन्! इसी को प्राकृतिक प्रलय कहते हैं, क्योंकि प्रकृति में सबका विलय होता है।" यह बचन प्राकृत प्रलय में प्रमाण है।

"जब विश्वस्रष्टा सम्पूर्ण संसार को आत्मसात् कर अनन्तासन पर सो जाता है।" यह वचन नैमित्तिक प्रलय में प्रमाण है॥ १०॥

ब्रह्मसाक्षात्कार के निमित्त से होने वाले सर्वमोक्ष को चतुर्थ प्रलय कहते हैं। वह एकजीववाद में एक साथ ही सबका मोक्ष होता है और नानाजीववाद में क्रमशः। इस विषय में श्रुति प्रमाण है - 'सब एक हो जाते हैं'। इन चारों प्रलयों में से प्रथम तीन प्रलय तो कर्म के उपरति के निमित्त से होते हैं, परन्तु चतुर्थ प्रलय ज्ञानोदय के द्वारा ज्ञान के सहित ही होता है, इतनी विशेषता है। इस प्रकार चतुर्विध प्रलय का निरूपण किया गया है॥ ११॥

आत्यन्तिकं चतुर्थप्रलयं निरूपयति—**तुरीयेति। सर्वमोक्षः**—अज्ञानेन सह कार्यविनाशः। तुरीयप्रलये श्रुतिं प्रमाणयति—**सर्व इति**। 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' (बृ० २-४-१४) इत्याद्या श्रुतिरादिपदेनादेया। लयत्वाविशेषेऽपि विशेषमाह—**तत्रेति। तत्र**—चतुर्षु प्रलयेषु। प्रलयनिरूपणमुपसंहरंस्तत्क्रमे विप्रतिपत्तेस्तन्निरूपणं प्रतिजानीते—**एवमिति**।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्येदानीं क्रमो निरूप्यते—

भूतानां भौतिकानां च न कारणलयक्रमेण लयः। कारणलयसमये कार्याणामाश्रयान्तराभावेनावस्थानानुपपत्तेः। किन्तु सृष्टिक्रमविपरीतक्रमेण[1]। तत्तत्कार्यनाशे तत्तज्जनकादृष्टनाशस्यैव प्रयोजकतया उपादाननाशस्याप्रयोजकत्वात्। अन्यथा न्यायमते महाप्रलये पृथिवीपरमाणुगतरूपरसादेरविनाशापत्तेः।

तथा च पृथिव्या अप्सु, अपां तेजसि, तेजसो वायौ, वायोराकाशे, आकाशस्य जीवाहङ्कारे, तस्य हिरण्यगर्भाहङ्कारे, तस्य चाविद्यायामित्येवंरूपाः प्रलयाः। तदुक्तं विष्णुपुराणे—

अब उस प्रलय का क्रम निरूपण किया जा रहा है—भूत और भौतिक पदार्थों का कारण के नाश से नाश नहीं होता, क्योंकि कारण के नाश हो जाने पर कार्य का दूसरा कोई आश्रय तो है नहीं, फिर कारण के अभाव में कार्य की सिद्धि न हो सकेगी। इसलिए सृष्टिक्रम से विपरीत क्रम प्रलय में माना गया है। उस कार्य के नाश में उसके जनक के अदृष्ट का नाश ही प्रयोजक माना गया है। उपादान का नाश कार्यनाश का प्रयोजक नहीं है। अन्यथा न्यायसिद्धान्त के अनुसार महाप्रलय में पृथिवी के परमाणुओं में रहने वाले रूप-रसादि का नाश न हो सकेगा।

इस प्रकार पृथिवी का जल में, जल का तेज में, तेज का वायु में, वायु का आकाश में, आकाश का जीव अहङ्कार में, और जीवाहङ्कार का हिरण्यगर्भ के अहङ्कार-महत्तत्त्व में एवं उस महत्तत्त्व का मायारूप अविद्या में विलय होता है। इसी को विष्णु-पुराण में कहा है—

स्वसिद्धान्तं वक्तुमादौ न्यायमतं दूषयति—**भूतानामिति**। तर्हि केन क्रमेण लय इति पृच्छति—**किं त्विति**। उत्तरमाह—**सृष्टीति**। सृष्टिक्रमविपरीतक्रमेण लय इत्यनुषज्यते। तत्र हेतुमाह—**तत्तत्कार्यनाश इति**। अनुगतं हि प्रयोजकमस्य त्वननुगतत्वादप्रयोजकत्वमित्याशयः। विपक्षे दोषमाह—**अन्यथेति**।

---

१. सोपानारोहणक्रमविपरीतक्रमेणैव यथाऽवरोहणं भवति तद्वदित्यर्थः। कारणलयक्रममते तु द्व्यणुकमारभ्यान्त्यावयविपर्यन्तमनेककार्यरूपावयवाः स्वीकृताः। तथा च द्व्यणुकरूपस्य त्रसरेणुकारणस्य नाशेन त्रसरेणुनाशप्रक्रियायान्तु द्व्यणुकनाशान्तरमनेकक्षणपर्यन्तं पटस्थित्यापत्तिः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

जगत्प्रतिष्ठा देवर्षे ! पृथिव्यप्सु प्रलीयते ।
तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते ॥ १ ॥
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते ।
अव्यक्तं पुरुषे ब्रह्मन् ! निष्कले संप्रलीयते ॥ २ ॥ इति ।

एवंविधप्रलयकारणत्वं तत्पदार्थस्य ब्रह्मणस्तटस्थलक्षणम् ॥ १२ ॥

ननु वेदान्तैर्ब्रह्मणि जगत्कारणत्वेन प्रतिपाद्यमाने सति सप्रपञ्चं ब्रह्म स्यादन्यथा सृष्टिवाक्यानामप्रामाण्यापत्तेरिति चेत् । न । न हि सृष्टि-वाक्यानां सृष्टौ तात्पर्यं किन्तु अद्वितीये ब्रह्मण्येव ।

"हे देवर्षि ! सम्पूर्ण जगत् की आश्रय पृथिवी जल में विलीन हो जाती है, जल अग्नि में विलीन होता है, अग्नि वायु में प्रलय को प्राप्त होता है, वायु आकाश में लय हो जाता है, आकाश अव्यक्त में और अव्यक्त निष्कल पुरुष में विलीन होता है ।" इस प्रकार प्रलयकारणत्व को तत्पदार्थ ब्रह्म का तटस्थ लक्षण बताया गया ॥ १२ ॥

वेदान्त के द्वारा ब्रह्म में 'जगत्कारणत्व का प्रतिपादन करने पर ब्रह्म सप्रपञ्च हो जायेगा और ब्रह्म को जगत्कारण न मानने पर ब्रह्म से जगत्सृष्टि के प्रतिपादक श्रुतिवाक्य अप्रामाणिक हो जायंगे, ऐसा कहना उचित नहीं, क्योंकि सृष्टिवाक्यों का सृष्टि के प्रतिपादन में तात्पर्य नहीं है, परन्तु अद्वितीय ब्रह्म के निरूपण में तात्पर्य है ।

'उपादाननाशस्य प्रयोजकत्वे सृष्टिक्रमविपरीतक्रमं दर्शयति—**तथा चेति** । कार्यावस्थानानुपपत्तेरननुगमाच्चोपादाननाशस्याप्रयोजकतयाऽदृष्टनाशस्य प्रयोजकत्वे सति । **हिरण्यगर्भाहङ्कारे**—महत्तत्त्वे । अत्र प्रमाणमाह—**तदुक्तमिति** । अत्रेन्द्रियादिद्वाराऽव्यक्ते लयो द्रष्टव्यः । आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ विलीयन्त इति सुबालोपनिषद्वचनानुसारात् । न चेदमप्रासङ्गिकं तत्पदार्थलक्षणस्यप्रलयपदार्थनिरूपणं विना तदबोधादित्याशयेनाह—**एवं विधेति** ।

---

१. उपादान (समवायिकारण) नाशात्कार्यनाश इति तार्किकाः । तथात्वे महाप्रलये पृथिव्यादिपरमाणूनां तन्मते नित्यत्वात्तद्गतगुणानामविनाशः स्यात् । अस्मन्मते तु तत्तत्कार्यजनकादृष्टनाशस्यैवानुगतस्य प्रयोजकत्वेन न कापि क्षतिः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्प्रतिपत्तौ कथं सृष्टेरुपयोगः ?। इत्थम्—यदि सृष्टिमनुपन्यस्य निषेधो ब्रह्मणि प्रपञ्चस्य प्रतिपाद्येत, तदा ब्रह्मणि निषिद्धस्य प्रपञ्चस्य वायौ प्रतिषिद्धस्य रूपस्येव ब्रह्मणोऽन्यत्रावस्थानशङ्कायां न निर्विचिकित्समद्वितीयत्वं प्रतिपादितं स्यात्। ततः सृष्टिवाक्याद् ब्रह्मोपादेय-

सृष्टि का ब्रह्मबोधकत्व—

सृष्टि का ब्रह्मबोध कराने में किस प्रकार उपयोग है ? इस प्रकार है कि—जैसे वायु में रूप का प्रतिषेध करने पर अन्यत्र पृथिव्यादि में रूप की विद्यमानता सुनिश्चित हो जाती है, वैसे ब्रह्म सृष्टि का उपन्यास न करके केवल ब्रह्म में प्रपञ्च का निषेध किया जाय, तो ब्रह्म में निषेध किये गये प्रपञ्च की विद्यमानता की शङ्का अन्यत्र कहीं हो जाती। ऐसी स्थिति में असंन्दिग्ध अद्वितीयत्व का प्रतिपादन न हो सकेगा। इसलिए सृष्टि वाक्य से जगत् कार्य का उपादान कारण ब्रह्म है—ऐसा

नन्वुक्तमिदं तत्पदार्थलक्षणं यथार्थं किं वाऽयथार्थम्। आद्ये, ब्रह्मणः सप्रपञ्चतापत्तिः। न द्वितीयः, तत्प्रतिपादकश्रुत्यादिवाक्यानामप्रामाण्यापत्तेरिति शङ्कते—**नन्विति**। यथा शाखाऽग्रासंलग्नस्यापि चन्द्रस्य तदग्रसंलग्नतां प्रकल्प्य शाखाग्रे चन्द्र इति तटस्थलक्षणम्, तथा मिथ्याभूतस्य प्रपञ्चस्य ब्रह्मासम्बन्धेऽपि श्रुतिषु तद्बोधनाय जगज्जनकत्वं प्रकल्प्य तल्लक्षणाभिधानान्नैवमित्याशयेनाह—**नेति**। 'नेह नानास्ति किंचन' (क० २–४–१०)। न निरोधो न चोत्पत्तिः (मा० का०–२–३२) इत्यादिश्रुतिबाधितेऽर्थे नास्ति सृष्टिश्रुतिवाक्यानां तात्पर्यं येन तेषामप्रामाण्यं भवेदित्याह—**न होति**। ननु प्रतीयमानेऽर्थे तात्पर्याभावे क्व तर्हि तात्पर्यमिति पृच्छति—**किं त्विति**। 'विषं भुंक्ष्व' इति वाक्यस्याप्तवाक्यत्वाद्बाधिते प्रतीयमानेऽर्थे तात्पर्यभावेन शत्रुगृहभोजननिषेधपरत्वं यथा, तथोक्तवाक्यानामपि श्रुतिबाधितप्रतीयमानार्थे तात्पर्ययोगेनाद्वितीयब्रह्मपरत्वेन तस्यैव प्रतिपादकत्वम्, 'यत्परः शब्दः स शब्दार्थः' इत्यभियुक्तोक्तेरित्युत्तरमाह—**अद्वितीय इति**।

ननु शत्रुगृहभोजनाद्वारं विषभक्षणमिति प्रतीयमानार्थस्य यथा तादृशभोजननिषेधप्रतिपत्तौ विनियोगस्तथाऽत्र कथं सृष्टेरद्वितीयब्रह्मावबोधने विनियोगः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वज्ञाने सत्युपादानं विना कार्यस्यान्यत्र सद्भावशङ्कायां निरस्तायां नेतिनेतीत्यादीनां ब्रह्मण्यपि तस्यासत्त्वोपपादने प्रपञ्चस्य तुच्छत्वावगमे[1] निरस्ताखिलद्वैतविभ्रमखण्डं सच्चिदानन्दैकरसं ब्रह्म सिद्ध्यतीति परम्परया सृष्टिवाक्यानामप्यद्वितीये ब्रह्मण्येव तात्पर्यम्।

उपासनाप्रकरणपठितसगुणब्रह्मवाक्यानां चोपासनाविध्यपेक्षित-गुणारोपमात्रपरत्वं, न गुणपरत्वम्। निर्गुणप्रकरणपठितानां सगुण-वाक्यानां तु निषेधवाक्यापेक्षितनिषेध्यसम्पादकत्वेन विनियोग इति न किञ्चिदपि वाक्यमद्वितीयब्रह्मप्रतिपादनेन विरुध्यते ॥ १२ ॥

ज्ञान होने पर उपादान के अतिरिक्त अन्यत्र कार्य की स्थिति तो होती ही नहीं और उपादान में 'नेति नेति'—इत्यादि निषेध-मुख से प्रपञ्च का असत्त्वोपपादन करने पर प्रपञ्च में तुच्छत्व का ज्ञान हो जाने के कारण निखिल द्वैत भ्रम से रहित अखण्ड सच्चिदानन्द एक इस ब्रह्म की सिद्धि हो जाती है। इस प्रकार परम्परा से सृष्टि वाक्यों का अद्वितीय ब्रह्म में ही तात्पर्य है।

उपासना प्रकरण में पठित सगुण ब्रह्मविषयक वाक्यों का उपासना विधि में अपेक्षित गुणों का आरोप मात्र में तात्पर्य है, न कि ब्रह्म के गुणों के अस्तित्व बताने में तात्पर्य है। निर्गुण ब्रह्म के प्रकरण में पढ़े गये सगुण वाक्यों का निषेध वाक्यों में अपेक्षित निषेध्य गुणों के सम्पादक रूप से—विनियोग समझना चाहिए। सुतरां कोई भी वेदवाक्य अद्वितीय ब्रह्म प्रतिपादन के साथ विरोध नहीं करता ॥ १२ ॥

प्रपञ्चनिषेधपरैरेव तत्प्रतिपत्तेः, स्पष्टतया प्रतीयमानान्यार्थकैर्वाक्यैस्तद्बोधनस्य व्यर्थत्वादित्याशयेन शङ्कते—**तदिति**। यस्मिन्ब्रह्मणि प्रपञ्चप्रतिषेधः तद्ब्रह्मैव जगदुपादानमतस्तस्यान्यत्रावस्थानाशङ्काभावेन निःसंशयतया मिथ्यात्वसिद्धेरद्वितीयं ब्रह्म सिद्ध्यतीत्येवं तत्प्रतिपत्तौ प्रतीयमानार्थविनियोग इति समाधत्ते—**इत्थमिति**। **निर्विचिकित्सं**—संशयरहितम्।

नन्वेवं सृष्टिवाक्यानामद्वितीयब्रह्मबोधकत्वेऽपि निर्विचिकित्समद्वितीयत्वं न सिध्यति 'य एषोन्तरादित्ये हिरण्मयः पुरुषः' (छा० ६–७–८) इत्यादिवाक्यैः

---

१. तुच्छत्वावगमे—अशिनः स्वाशङ्गोत्यादावुक्तमिथ्यात्वावगमे इत्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदेवं स्वरूपतटस्थलक्षणलक्षितं तत्पदवाच्यमीश्वरचैतन्यं माया-प्रतिबिम्बितमिति केचित्। तेषामयमाशयः—जीवपरमेश्वरसाधारणं चैतन्यमात्रं बिम्बम्, तस्यैव बिम्बस्याविद्यात्मिकायां मायायां प्रतिबिम्बमीश्वरचैतन्यमन्तःकरणेषु प्रतिबिम्बं जीवचैतन्यम्। 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इति श्रुतेः। एतन्मते जलाशयगतशरावगत-सूर्यप्रतिबिम्बयोरिव जीवपरमेश्वरयोर्भेदः। अविद्यात्मकोपाधेर्व्यापकतया तदुपाधिकेश्वरस्यापि व्यापकत्वम्। अन्तःकरणस्य परिच्छिन्न-

उक्त रीति से स्वरूप लक्षण और तटस्थ लक्षण से लक्षित तत्पदवाच्य ईश्वर चैतन्य माया में प्रतिबिम्बित है, ऐसा कुछ लोगों का कहना है। उनका यह आशय है कि—जीव तथा परमेश्वर में साधारण चैतन्यमात्र बिम्ब है। उसी बिम्ब के अविद्यारूप माया में प्रतिबिम्ब को ईश्वर एव अन्तःकरण में प्रतिबिम्ब को जीव कहा है। क्योंकि श्रुति में कहा गया है–'कार्योपाधि वाला यह जीव है और कारण उपाधि वाला यह परमेश्वर है।' इनके मतानुसार जलाशय तथा शरावगत जल के सूर्य प्रतिबिम्ब में भेद की तरह जीव परमेश्वर में भेद है। अविद्यारूप उपाधि के व्यापक होने से अविद्या उपाधि वाला ईश्वर भी व्यापक है। अन्तःकरण रूप उपाधि के परिच्छिन्न होने से अन्तःकरण उपाधियुक्त जीव भी परिच्छिन्न है।

सगुणब्रह्मप्रतिपादनादित्याशङ्क्याह—**उपासनेति**। 'योषिद्वाव गौतमाग्निः' (छा० ५–७८–१) इत्यादिवदारोपितगुणेनाप्युपासनासम्भवेन केवलो निर्गुण-श्चेत्यादिश्रुतिविरुद्धार्थपरत्वमुक्तवाक्यादामयुक्तं, तथा च सगुणब्रह्मवाक्यानि चित्तैकाग्र्यद्वाराऽद्वितीयब्रह्मबोधकानीति भावः। 'मूर्त्तं चामूर्तं च मर्त्यं चामृतं च' इत्यादिवाक्यानां विनियोगमाह—**निर्गुणेति**। 'अथात आदेशो नेति नेति' (बृ० २–३–६) इत्यादीनि निषेधवाक्यानि। कर्मकाण्डवाक्यानामपि व्यावहा-रिकप्रामाण्यवतां संयोगपृथक्त्वन्यायेनाद्वितीयब्रह्मप्रतिपत्तौ विनियोगमभिप्रेत्याह—**न किञ्चिदपीति**।

ननु किं तल्लक्ष्यं यस्येदं लक्षणद्वयमुच्यत इत्याकाङ्क्षायामाह—**तदेवमिति**। नन्वविद्यातो मायाया भेदाभावात्तत्प्रतिबिम्बितस्य च जीवत्वात्कथं मायायां प्रतिबिम्बितं चैतन्यमीश्वर इत्याशङ्क्याह—**तेषामिति**। तन्मते जीवेश्वरविभाग-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तया तदुपाधिकजीवस्यापि परिच्छिन्नत्वम्। एतन्मतेऽविद्याकृतदोषा जीव इव परमेश्वरेऽपि स्युरुपाधेः प्रतिबिम्बपक्षपातित्वाद्त्यस्वरसाद् बिम्बात्मकमीश्वरचैतन्यमित्यपरे। तेषामयमाशयः—एकमेव चैतन्यं बिम्बत्वाक्रान्तमीश्वरचैतन्यं प्रतिबिम्बत्वाक्रान्तं जीवचैतन्यम्। बिम्बप्रतिबिम्बकल्पनोपाधिश्चैकजीववादे अविद्या, अनेकजीववादे तु अन्तःकरणान्येव। अविद्यान्तःकरणरूपोपाधिप्रयुक्तो जीवपरभेदः। उपाधिकृतदोषाश्च प्रतिबिम्बे जीव एव वर्तन्ते, न तु बिम्बे परमेश्वरे। उपाधेः प्रतिबिम्बपक्षपातित्वात्। एतन्मते च गगनसूर्यस्य जलादौ भासमानप्रतिबिम्बसूर्यस्येव जीवपरयोर्भेदः॥ १४॥

ननु ग्रीवास्थमुखस्य दर्पणप्रदेश इव बिम्बचैतन्यस्य परमेश्वरस्य जीवप्रदेशेऽभावात्तस्य सर्वान्तर्यामित्वं न स्यादिति चेत्। न। साभ्र-

इस पक्ष में अविद्याकृत दोष जीव की तरह परमेश्वर में भी आ जायेंगे, क्योंकि उपाधि प्रतिबिम्ब की पक्षपाती होती है। इसी अरुचि के कारण अन्य लोगों ने बिम्ब को ईश्वर-चैतन्य माना है। उनका भाव यह है कि—एक ही चैतन्य बिम्बत्व धर्म से आक्रान्त होने पर ईश्वर और प्रतिबिम्बत्व धर्मसे आक्रान्त होने पर जीव कहा जाता है। बिम्ब एवं प्रतिबिम्ब कल्पना की उपाधि एक जीववाद में अविद्या है और अनेक जीववाद में तो अन्तःकरण ही है? अविद्या अन्तःकरणरूप उपाधि से प्रयुक्त जीव एवं परमेश्वर में भेद है। उपाधिकृत दोष प्रतिबिम्बात्मक जीव में ही है, बिम्बात्मक ईश्वर में नहीं, क्योंकि उपाधि में प्रतिबिम्बपक्षपातित्व विद्यमान है। इनके मत में आकाशस्थ सूर्य का जलादि में भासमान प्रतिबिम्बरूप सूर्य के साथ जिस प्रकार भेद है, उसी प्रकार ही जीव तथा परमेश्वर में भी भेद है॥ १४॥

यदि शंका हो कि जिस प्रकार ग्रीवास्थित मुखमण्डल दर्पणप्रदेश में प्रतिबिम्बित होने पर भी दर्पणप्रदेश के साथ संश्लिष्ट नहीं हो सकता, उसी प्रकार बिम्ब-

---

माह—**एतदिति**। एवंविधानेकजीववादे दूषणाभिधानपूर्वकं मतान्तरमवतारयति—**एतन्मत इति**। अस्मिन्पक्षे मतद्वयमाह—**बिम्बप्रतिबिम्बेति**।

नन्वस्मिन्मते पूर्वोक्तदोषाभावेऽपि दोषान्तरमस्तीति शङ्कते—**नन्विति**। बिम्बस्य प्रतिबिम्बदेशावर्तित्वनियमादिति भावः उक्तनियमस्याकाशे व्यभिचारात्परिच्छिन्नबिम्बस्य तथात्वेऽप्यपरिच्छिन्नबिम्बस्य तथा त्वाभावान्नैवमित्याह—**नेति**। जलादिस्थ आकाश एव भातीति शङ्कानिरासार्थमुक्तम्—**साभ्रेति**।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नक्षत्रस्य काशस्य जलादौ प्रतिबिम्बितत्वे बिम्बभूतमहाकाशस्यापि जलादिप्रदेशसम्बन्धदर्शनेन परिच्छिन्नबिम्बस्य प्रतिबिम्बदेशासम्बन्धित्वेऽप्यपरिच्छिन्नब्रह्मबिम्बस्य प्रतिबिम्बदेशसम्बन्धाविरोधात्।

न च रूपहीनस्य ब्रह्मणो न प्रतिबिम्बसम्भवः, रूपवत एव तथात्वदर्शनादिति वाच्यम्। नीरूपस्यापि रूपस्य प्रतिबिम्बदर्शनात्। न च नीरूपस्य द्रव्यस्य प्रतिबिम्बाभावनियमः आत्मनो द्रव्यत्वाभावस्योक्तत्वात्।

'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' (ब्र० वि० १२) 'यथा

स्थानापन्न परमेश्वर का जीव प्रदेश में (अर्थात् अविद्या अथवा अन्तःकरण में) प्रतिबिम्बित होने पर भी उस प्रदेश में न रहने से परमेश्वर का सर्वान्तर्यामित्व सिद्ध न हो सकेगा।

यह शङ्का समुचित नहीं है, क्योंकि साभ्रनक्षत्र आकाश का जलादि प्रदेश में सम्बन्ध देखा गया है। उसी तरह परिच्छिन्न (मुखादि) बिम्ब का प्रतिबिम्ब देश में सम्बन्ध न होने पर भी अपरिच्छिन्न ब्रह्मरूप बिम्ब का प्रतिबिम्ब देश के साथ सम्बन्ध मानने में विरोध नहीं है।

रूपरहित ब्रह्म का प्रतिबिम्ब सम्भव नहीं है, क्योंकि रूपवान् (वस्तु) का ही रूप वाले जलादि में प्रतिबिम्ब बताया गया है। यह कथन समीचीन नहीं है, क्योंकि रूपरहित रूप का भी प्रतिबिम्ब देखा गया है। ऐसा भी कहना ठीक नहीं होगा कि नीरूप द्रव्य का प्रतिबिम्ब नहीं होता। इस प्रकार नियम है, क्योंकि आत्मा में द्रव्यत्व का अभाव (हम) कह आये हैं। "एक ही परमेश्वर जलचन्द्र

नन्वभ्रादिकमेव तत्र प्रतिबिम्बते नाकाशम्, तस्य रूपस्पर्शरहितत्वाद्रूपवत एव प्रतिबिम्बतत्वदर्शनात्, तथा च नीरूपस्य ब्राह्मणो न प्रतिबिम्बसम्भव इत्याशङ्क्य परिहरति—**न चेति**। किं रूपवत एव प्रतिबिम्बम्? उत रूपवतो द्रव्यस्य? इति विकल्प्याद्यं प्रत्याह—**नीरूपस्यापीति**। द्वितीयमनूद्य दूषयति—**न चेति**। यतः समवायिकारणं गुणाश्रयो वा द्रव्यमतः। आत्मनस्तु निर्गुणत्वात्समवायासिद्धेश्च द्रव्यत्वाभावस्योक्तत्वादित्यर्थः। तथा च नीरूपस्य द्रव्यस्याकाशादेः प्रतिबिम्बानभ्युपगमेऽपि नीरूपस्याद्रव्यस्य ब्रह्मणो रूपवत्प्रतिबिम्बं सम्भवत्येवेति भावः।

द्रव्यत्वाभ्युपगमेऽपि दोषाभाव इत्यभिप्रेत्य हेत्वन्तरमाह—**एकधेति**।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन्' इत्यादिवाक्येन ब्रह्मप्रतिबिम्बाभावानुमानस्य बाधितत्वाच्च । तदेवं तत्पदार्थो निरूपितः ॥ १५ ॥

की भाँति अन्तःकरण उपाधि के कारण से अनेक रूप में दीखता है।" "जिस प्रकार ज्योतिरूप सूर्य एक होता हुआ भी भिन्न-भिन्न जल के भेद से बहुधा प्रतीत होता है" इत्यादि वाक्य में एक ब्रह्म की उपाधिभेद से अनेकरूपता सिद्ध हो जाती है अतएव उक्त श्रुतिवाक्य के द्वारा ब्रह्म प्रतिबिम्ब अभाव का साधक अनुमान बाधित हो जाता है। ऐसा 'तत्पदार्थ' का निरूपण हुआ ॥ १५ ॥

एकधा ईश्वररूपेण एकः। **बहुधा**—जीवात्मना नानारूपः। **आदिपदेन** 'उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा' इति वाक्यशेषो ग्राह्यः। **ब्रह्मप्रतिबिम्बाभावानुमानस्य**—ब्रह्म न प्रतिबिम्बितुमर्हत्यचाक्षुषत्वाद्गन्धादिवदित्येवरूपस्यानुमानस्य। तथा च बादरायणस्य सूत्रे 'आभास एव च' (ब्र० सू० २–३–५०) 'अत एव चोपमा सूर्यकादिवत्' (ब्र० सू० ३–२–१८) इति। अत्र विस्तरभयाद् मूलकृता व्यक्तोऽवच्छेदवादोऽपि द्रष्टव्यः। तथा हि घटाकाशवदन्तःकरणावच्छिन्नं चैतन्यं जीवस्तदवच्छिन्नं तदीश्वरः। आलोकप्रतिबिम्बे गगनप्रतिबिम्बतत्वव्यवहारस्य भ्रममात्रमूलकतया बिम्बस्य प्रतिबिम्बस्यानाभावनियमस्य भङ्गाभावाद् ब्रह्मप्रतिबिम्बो न युक्तः। ननु ब्रह्माण्डान्तरवर्तितत्तदन्तःकरणोपाधिभिस्तदन्तर्वर्तिचैतन्यस्य सर्वात्मना जीवभावेनावच्छेदात्तदवच्छेदरहितचैतन्यात्मकस्येश्वरस्य ब्रह्माण्डान्तरसत्त्वापत्तिरत्रापि समानेति चेन्न। अविद्याश्रयत्वान्तःकरणसंवलितत्वाद्युपाधिकाज्जीवाद्भिन्नस्याविद्याविषयत्वान्तःकरणासंवलितत्वाद्युपाधिकस्यान्तर्यामिण ईश्वरस्य ब्रह्माण्डान्तरवस्थानसम्भवात्। न च कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति वाक्यविरोधः। तस्य पक्षद्वयेऽपि तुल्यत्वात्। कारणावच्छिन्नस्य कार्यानवच्छिन्नत्वे बाधकाभावात्। न चास्मिन्पक्षे श्रुतिसूत्रविरोधः। भाष्यकारैरेवात एव चेति सूत्रं व्याख्याय सूर्यादिवदात्मनः प्रतिबिम्बो न युज्यत इति तदाक्षेपकत्वेन 'अम्बुवदग्रहणात्तु न तथात्वम्' (ब्र० सू० ३–२–१९) इति सूत्रं व्याख्याय 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्' (ब्र० सू० ३–२–२०) इति सूत्रे उक्तानुपपत्तिमङ्गीकृत्यैव श्रुत्युक्त-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इदानीं त्वं पदार्थो निरूप्यते। एकजीववादेऽविद्याप्रतिबिम्बो जीवः, अनेकजीववादे अन्तःकरणप्रतिबिम्बः। स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान्। तत्र जाग्रदवस्था नामेन्द्रियजन्यज्ञानावस्था। अवस्थान्तरे इन्द्रियाभावान्नातिव्याप्तिः। इन्द्रियजन्यज्ञानं चान्तःकरणवृत्तिः। स्वरूपज्ञानस्यानादित्वात्॥ १६॥

त्वं पदार्थ का निरूपण—

अब त्वं पदार्थ का निरूपण कर रहे हैं। एकजीववाद में अविद्या में प्रतिबिम्ब तथा अनेक जीववाद में अन्तःकरण में प्रतिबिम्ब को जीव कहते हैं। वह जीव जाग्रत् स्वप्न एवं सुषुप्ति रूप तीन अवस्था वाला है।

उनमें इन्द्रियजन्य ज्ञान की अवस्था को जाग्रत् अवस्था कहते हैं। दूसरी अवस्थाओं में इन्द्रियों का अभाव होने से जाग्रत् के लक्षण की अतिव्याप्ति नहीं है। इन्द्रियजन्य ज्ञान अन्तःकरण की वृत्तिरूप है, क्योंकि स्वरूपज्ञान का अनादि होने के कारण इन्द्रियजन्य नहीं हैं॥ १६॥

दृष्टान्तस्य सोपाधिकस्यात्मनो वृद्धिह्रासादिभाक्त्वं न निरुपाधिकस्येति प्रदर्शनार्थं न चात्मा प्रतिबिम्बवत इत्यभिहितत्वात्। बृहदारण्यकभाष्यादौ प्रतिबिम्बरूपेण प्रवेशो न सम्भवतीत्युक्तत्वाच्चेति सङ्क्षेपः। विस्तरस्त्वन्यत्र द्रष्टव्यः। मूलकर्तुरप्ययमेव पक्षोऽभिप्रेतः। प्रत्यक्षपरिच्छेदे ईश्वरसाक्षीत्यादिप्रकरणे एतत्पक्षस्य स्वसम्मतत्वेन सूचितत्वात्। तत्पदार्थनिरूपणमुपसंहरंस्त्वंपदार्थनिरूपणं प्रतिजानीते—**तदेवमिति।**

तत्रैकजीववादे तत्स्वरूपमाह—**एकेति।** अविद्याया एकत्वेन तत्प्रतिबिम्बस्य जीवस्याप्येकत्वौचित्यादिति भावः। तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्' (बृ० १–४–१०) 'यथाग्नेः क्षुद्राविस्फुलिङ्गा व्युच्चरन्ति एवमेवैतस्मादात्मनः सर्व एव आत्मानः' (बृ० २–१–२०) इत्यादिश्रुतेः 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' (भ० गी० ७–१४)। इत्यादिस्मृतेः 'भोगेन त्वितरे क्षपयित्वा सम्पद्यन्ते' (ब्र० सू० ४–१–१९) इत्यादिसूत्राच्च। स च स्वात्ममूतानिव घटाकाशस्थानीयविद्योपस्थापितनामरूपकृतकार्यकारणसङ्घातानुरोधिनो जीवाञ्यान् विज्ञानात्मनः प्रतीष्ट इत्यादिभाष्यादनन्त-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

सा चान्तःकरणवृत्तिरावरणाभिभवार्थेत्येकं मतम्। तथा हि–अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तौ घटाद्यवच्छिन्नचैतन्यावरकज्ञानं मूलाविद्यापरतन्त्रमवस्थापदवाच्यमभ्युपगन्तव्यम्। एवं सति घटादेर्न सर्वदा भानप्रसङ्गः, अनावृतचैतन्यसम्बन्धस्यैव भानप्रयोजकत्वात्। तस्य चावरणस्य

वह अन्तःकरण की वृत्ति आवरण-अभिभव के लिए स्वीकार की गयी है, ऐसा एक मत है। यह इस प्रकार है कि –अविद्या से उपहित चैतन्य को जीव मानने पर जीवरूप से घटादि के अधिष्ठान चैतन्य जीव को सदा घटादि का भान होना चाहिए। इसलिए घटादि के द्वारा अवच्छिन्न चैतन्य को आवरण करने वाली मूलाविद्या के परतन्त्र तूलाविद्या को भी मानना चाहिए। इसप्रकार तूलाविद्या के द्वारा आवृत होने के कारण जीवरूप घटाद्यवच्छिन्न चैतन्य को सदा घटादि के भान प्रसङ्ग के नहीं आ सकता, क्योंकि अनावृत चैतन्य के साथ विषय का सम्बन्ध ही

जीवनिर्मासास्पदमेकरसं ब्रह्मेति पद्मपादाचार्योक्तैकजीववादोऽयुक्त इत्यभिप्रेत्याह—**अनेकेति**। इदमुपलक्षणमविद्यावच्छिन्नो जीव इति मतस्यापि, मायाभिरिति बहुवचनादविद्यायास्तच्छक्तेर्वा नानात्वाज्जीवनानात्वम्। अजामित्येकवचनं तु जात्याभिप्रायकम्। न च कार्योपाधिरयं जीव इति वाक्यविरोधः। समाहितत्वात्। 'स्वमपीतो भवति' (छा० ६-४-१) इति श्रुतिस्तु तदानीमन्तःकरणलये कर्तृत्वाद्यभावादुपपन्ना। गत्यादिकमप्यातिवाहिकशरीरगमनादिप्रयुक्तमित्यविरोधः। तस्योपाधिगतावस्थावत्त्वमाह—**स चेति**। तुरीयावस्थातूपाधितादात्म्याध्यासनिवृत्तिकालीना। तदुपहितचैतन्यस्य जीवस्य जाग्रदाद्यवस्थात्रयवत्त्वं लक्षणमुक्तम्, तत्र जाग्रदवस्थां लक्षयति—**जाग्रदिति**। इन्द्रियजन्यज्ञानयोग्यसमय इत्यर्थः। इन्द्रियजन्येति पदकृत्यमाह—**अवस्थान्तर इति**। स्वप्नसुषुप्त्यवस्थयोरित्यर्थः। इन्द्रियजन्यज्ञानस्वरूपं किमित्याकाङ्क्षायामाह—**इन्द्रियजन्येति**। चैतन्यरूपं ज्ञानं कुतो नेत्यत आह—**स्वरूपेति**।

ननु स्वरूपज्ञानेनैव सर्वदा सिद्धेन विषयप्रकाशसिद्धौ तज्जन्या वृत्तिः किमर्थेत्यत आह—**सा चेति**। नन्वावरणभङ्गोऽपि चैतन्येनैव भविष्यतीत्याशङ्क्याह—**तथा होति**। अविद्योपहितस्य तत्प्रतिबिम्बस्य तदवच्छिन्नस्य वा सर्वदा भानप्रसक्तिवारणायावरणरूपमूलाज्ञानशक्तिविशेषस्यावश्यकत्वे तद्भङ्गं विना

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सदातनत्वे कदाचिदपि घटभानं न स्यादिति तद्भङ्गे वक्तव्ये, तद्भङ्गजनकं न चैतन्यमात्रम्। तद्भासकस्य तदनिवर्तकत्वात्। नापि वृत्त्युपहितचैतन्यम्, परोक्षस्थलेऽपि तन्निवृत्त्यापत्तेरिति परोक्षवृत्तिविशेषस्य, तदुपहितचैतन्यस्य वाऽऽवरणभङ्गजनकत्वमित्यावरणाभिभवार्था वृत्तिरित्युच्यते ॥ १७ ॥

सम्बन्धार्था वृत्तिरित्यपरं मतम्। तत्राप्यविद्योपाधिकोऽपरिच्छिन्नो जीवः। स च घटादिप्रदेशे विद्यमानोऽपि घटाद्याकारापरोक्ष-

विषय प्रतीति का प्रयोजक है। उस आवरण को नित्य मानने पर कभी भी घटादि का भान न हो पायेगा। इसलिए आवरण का भङ्ग विषय भान के लिए स्वीकार करना पड़ेगा। उस आवरण का नाशक केवल चैतन्य मात्र ही नहीं, क्योंकि आवरण का प्रकाशक (चैतन्य) उसका विनाशक नहीं हो सकता, अन्यथा परोक्ष स्थल में भी आवरण निवृत्ति का प्रसङ्ग आ जायगा। वृत्त्युपहित चैतन्य को भी (आवरण का) निवर्त्तक नहीं कहा जा सकता, क्योंकि परोक्ष स्थल में भी विषयाकार वृत्ति रहने से उक्त वृत्युपहित चैतन्य के द्वारा विषय का प्रत्यक्षापत्ति होगी, इसलिए परोक्षस्थलीय वृत्ति से भिन्न वृत्तिविशेष को अथवा तादृशवृत्युपहित चैतन्य को ही आवरण का निवर्त्तक कहा जायगा। अतएव आवरणभङ्ग को ही वृत्ति का फल माना गया है ॥ १७ ॥

दूसरे आचार्यों ने विषय के सहित सम्बन्ध के लिए अन्तःकरण की वृत्ति को माना है। इसमें अविद्यारूप उपाधि वाला अपरिच्छिन्न है जीव। वह (जीव) अपरिच्छिन्न होने से घटादि विषय देश में विद्यमान रहने पर भी घटाद्याकार

कदाऽपि भानं न स्यादतस्तद्भङ्ग आवश्यक इत्यर्थः। आवरणभङ्गोऽपि चैतन्येनेत्यत्र किं चैतन्यमात्रेण किं वोपहितेनेति विकल्प्याद्यं प्रत्याह—**नेति। तद्भास-कस्य**—तत्सत्तास्फूर्तिप्रदस्य। तन्निवर्तकत्वे कदाऽप्यावरणस्यावस्थानं न स्याद्। एतेन तृणादिप्रकाशकस्याप्यग्नेस्तन्नाशकत्ववदर्शनान्न भासकत्वनिवर्तकत्वयोर्विरोध इति प्रत्युक्तम्। वह्नेस्तृणादेः सत्तास्फूर्तिप्रदत्वरूपभासकत्वाभावात्। द्वितीयं निरस्यति—**नापीति। वृत्तिविशेषस्य**—घटाद्याकारायास्तत्तद्वृत्तेः। वृत्तेर्जड-त्वात्कथं तयाऽऽवरणनिवृत्तिरिति चेत्तत्राह—**तदुपहितेति।** तादृशवृत्तेरभिव्यञ्जिकाया आवश्यकत्वेन वृत्तिरेव तथेत्याह—**इतीति।**

इत्येकं मतमित्युक्तिसूचितं द्वितीयं मतं दर्शयति—**सम्बन्धार्थेति। तत्र**—तस्मिन्मते। अविद्योपाधिकोऽपरिच्छिन्नो जीव इति मत इत्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

वृत्तिविरहदशायां न घटादिकमवभासयति, घटादिना तस्य सम्बन्धाभावात्। तदाकारवृत्तिदशायां तु भासयति, तदा सम्बन्धसत्त्वात्।

नन्वविद्योपाधिकस्यापरिच्छिन्नस्य जीवस्य स्वत एव समस्तवस्तुसम्बद्धस्य वृत्तिविरहदशायां सम्बन्धाभावाभिधानमसङ्गतम्। असङ्गत्वदृष्ट्या सम्बन्धाभावाभिधाने वृत्त्यनन्तरमपि सम्बन्धो न स्यादिति चेत्। उच्यते। न हि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषेधामः, किं तर्हि घटादिभानप्रयोजकं सम्बन्धविशेषम्। स च सम्बन्धविशेषो विषयस्य जीवचैतन्यस्य च[1] व्यङ्ग्यव्यञ्जकतालक्षणः कादाचित्कः तत्तदाकारवृत्तिनिबन्धनः।

अपरोक्ष वृत्ति का अभाव होने की स्थिति में घटादि को नहीं जान पाता, क्योंकि जीव का घटादि के साथ सम्बन्ध नहीं। विषयाकार वृत्ति की स्थिति में जीव विषय को प्रकाश करता है, क्योंकि उस समय विषय के सहित सम्बन्ध विद्यमान रहता है।

शङ्का—अविद्या उपाधि वाले अपरिच्छिन्न जीव के साथ स्वभाव से ही सकल विषयों की सम्बद्धता रहने से विषयाकार वृत्ति की विरह दशा में पुनः जीव का विषय के साथ सम्बन्धाभाव कहना सङ्गत नहीं है। असङ्गत्व दृष्टि से सम्बन्धाभाव कहने पर विषयाकार वृत्ति के बाद भी विषय के साथ जीव का सम्बन्ध होगा ही नहीं।

समाधान—विषयाकार वृत्ति की अभाव दशा में जीव के घटादि विषय के साथ सम्बन्ध-सामान्य का हम निषेध नहीं करते हैं, परन्तु घटादि प्रतीति के योग्य सम्बन्ध-विशेष का निषेध करते हैं। वह सम्बन्ध विषय और जीव-चैतन्य का व्यङ्ग्य-व्यञ्जक भाव रूप है तथा विषयाकार वृत्ति होने पर ही वह सम्बन्ध होता है, इसलिए कादाचित्क है।

ननु सम्बन्धाभावः सम्बन्धप्रयोजकाभावादुच्यते ? किं वाऽऽत्मनोऽसङ्गत्वात् ? । नाद्यः, परिच्छेदशून्यस्य घटादिसम्बन्धे प्रयोजकाकाङ्क्षाभावात्। न द्वितीयः, वृत्त्यनन्तरमपि तस्य दुर्घटत्वादिति शङ्कते—**नन्विति। असङ्गत्वेति।**

---

१. खगपुस्तकयोः चशब्दो नास्ति, आवश्यकश्च सः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा हि तैजसमन्तःकरणं स्वच्छद्रव्यत्वात् स्वत एव जीवचैतन्याभिव्यञ्जनसमर्थम्, घटादिकं तु न तथा, अस्वच्छद्रव्यत्वात्। स्वाकारवृत्तिसंयोगदशायां तु वृत्त्यभिभूतजाड्यधर्मकतया वृत्त्युत्पादितचैतन्याभिव्यञ्जनयोग्यताश्रयतया च वृत्त्युत्थानानन्तरं[1] चैतन्यमभिव्यनक्ति।

वह इस प्रकार है कि तैजस अन्तःकरण स्वच्छ द्रव्य होने के कारण स्वतः ही जीव-चैतन्य की अभिव्यक्ति में समर्थ है, पर अस्वच्छ द्रव्य होने के नाते घटादि उस प्रकार नहीं है। घटाकार वृत्ति का संयोग जब घटादिकों से होता है, तब वृत्ति से घटादि का जाड्य धर्म अभिभूत हो जाता है। अतः वृत्ति से उत्पन्न की गई चैतन्य की अभिव्यक्ति की योग्यता का आश्रय होने से उत्पन्न की गई चैतन्य की अभिव्यक्ति की योग्यता का आश्रय होने से वृत्ति उत्पन्न होने के उपरान्त घटादि विषय भी चैतन्य को अभिव्यक्त कर देता है।

'असङ्गो न हि सज्जते' इति श्रुत्युक्तपारमार्थिकासङ्गत्वदृष्ट्येत्यर्थः। स्वदापादितसम्बन्धसामान्यं नास्माकं निषेध्यमतो नास्मदुक्तिरसङ्गतेत्याह—**न हीति**। पृच्छति—**किं तर्हीति**। उत्तरमाह—**घटादीति**। निषेधाम इत्यनुषज्यते। ननु स च सम्बन्धः संयोगः समवायो वा?। नाद्यः, अपरिच्छिन्ने जीवे घटादेः सर्वदा संयुक्तत्वेन सर्वदा भानप्रसङ्गात्। न द्वितीयः, अनङ्गीकाराद्। अङ्गीकारे च तस्य नित्यत्वेनोक्तदोषादित्याशङ्क्याह—**स चेति**। घटाद्याकारवृत्तिसमये तदुपहितजीवचैतन्यस्य व्यङ्ग्यत्वं तद्विषयस्य घटादेर्व्यञ्जकत्वमिति तादृशवृत्तिरेव तत्र कारणमित्यर्थः।

ननु घटादेरस्वच्छस्य स्वाकारवृत्तिदशायामपि कथमभिव्यञ्जकत्वमित्यपेक्षायामाह—**तथा हीति। न तथा**—स्वतः जीवचैतन्याभिव्यञ्जनसमर्थं न भवति। कथं तर्हि तत्समर्थमित्यत्राह—**स्वाकारेति**। वृत्त्या अभिभूतस्तिरस्कृतो जाड्यधर्मो यस्य तत्तथा। वृत्त्या उत्पादिता या चैतन्याभिव्यञ्जनयोग्यता तदाश्रयतया चेत्यर्थः। **अभिव्यनक्ति**—घटादिकमिति कर्तृपदमनुषज्यते।

---

१. वृत्त्युदयानन्तरमिति घचपुस्तकयोः पाठः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तदुक्तं विवरणे—अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयतीति। दृष्टं चास्वच्छद्रव्यस्यापि स्वच्छद्रव्यसंबन्धदशायां प्रतिबिम्बग्राहित्वम्। यथा कुड्यादेर्जलादिसंयोगदशायां मुखादिप्रतिबिम्बग्राहिता। घटादेरभिव्यञ्जकत्वं च तत्प्रतिबिम्बग्राहित्वम्, चैतन्याभिव्यक्तत्वं च तत्र प्रतिबिम्बितत्वम्।

एवं विधाभिव्यञ्जकत्वसिद्ध्यर्थमेव वृत्तेरपरोक्षस्थले बहिर्निर्गमनाङ्गीकारः। परोक्षस्थले तु वह्न्यादेर्वृत्तिसंसर्गाभावेन चैतन्यानभिव्यञ्जकतया न वह्न्यादेरपरोक्षत्वम्। एतन्मते च विषयाणामपरोक्षत्वं चैतन्याभिव्यञ्जकत्वमिति द्रष्टव्यम्। एवं जीवस्यापरिच्छिन्नत्वेऽपि वृत्तेः सम्बन्धार्थकत्वं निरूपितम्॥ १८॥

पञ्चपादिकाविवरण में भी कहा गया है कि—अन्तःकरण अपने के समान अपने से संसर्ग रखने वाले घटादि में भी चैतन्य की अभिव्यक्ति की योग्यता उत्पन्न कर देता है। लोक में भी देखा गया है कि स्वच्छ द्रव्य के साथ सम्बन्ध होने पर मलीन द्रव्य में भी प्रतिबिम्ब-ग्राहकत्व आ जाता है। जैसे कि जलादि के साथ सम्बन्ध होने पर दिवार आदि मलिन द्रव्य में भी मुखादि प्रतिबिम्ब ग्राहकता आ जाती है। घटादि में चैतन्य का अभिव्यञ्जकत्व उसके प्रतिबिम्ब को ग्रहण करना ही है। चैतन्य की अभिव्यक्ति का तात्पर्य है कि उसमें प्रतिबिम्बित हो जाना है।

इस प्रकार अभिव्यञ्जकत्व की सिद्धि के लिए अपरोक्ष (प्रत्यक्ष) स्थल पर अन्तःकरण वृत्ति को बाहर जाना स्वीकार किया है। परोक्ष स्थल पर बाह्यादि विषय के साथ वृत्ति का संयोग न होने से वह्नि आदि विषय में चैतन्य की अभिव्यञ्जकता नहीं है। इसलिए वहाँ पर वह्नि आदि का अपरोक्ष नहीं होता। इस मत में विषय के अपरोक्ष होने का अर्थ है चैतन्य को अभिव्यक्त कर देना इस प्रकार समझना चाहिए। इस प्रकार जीव अपरिच्छिन्न होने पर भी सम्बन्धार्था वृत्ति का निरूपण किया गया है॥ १८॥

तत्र सम्मतिमाह—**तदुक्तमिति**। नन्वस्वच्छद्रव्यस्य प्रतिबिम्बग्राहित्वं न दृष्टचरमित्याशङ्क्याह—**दृष्टं चेति**। ननु घटादेरस्वच्छद्रव्यस्य चैतन्याभिव्यञ्जकत्वदृष्टान्तस्य वक्तव्यत्वे प्रतिबिम्बग्राहिकुड्यादिनिदर्शनप्रदानमसङ्गतमित्याशङ्क्याह - **घटादेरिति**।

इदं च वृत्तिं विना न सिद्ध्यतीति तादृशसम्बन्धप्रयोजकता तस्या इत्याह—**एवमिति**। ननु वृत्तेरेवंविधसम्बन्धार्थत्वाभ्युपगमे कथं घटादेरपरोक्षत्वम्?

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इदानीं परिच्छिन्नत्वपक्षे सम्बन्धार्थकत्वं निरूप्यते। तथा हि–अन्तः करणोपाधिको जीवः। तस्य न घटाद्युपादानता, घटादिदेशासम्बन्धात्। किन्तु ब्रह्मैव घटाद्युपादानम्। तस्य मायोपहितस्य सकलघटाद्यन्वयित्वात्। अत एव ब्रह्मणः सर्वज्ञता। तथा च जीवस्य घटाद्यधिष्ठानब्रह्मचैतन्याभेदमन्तरेण घटाद्यवभासासम्भवे प्राप्ते, तदवभासाय घटाद्यधिष्ठानब्रह्मचैतन्याभेदसिद्ध्यर्थं घटाद्याकारा वृत्तिरिष्यते।

ननु वृत्त्यापि कथं प्रमातृचैतन्यविषयचैतन्ययोरभेदः सम्पाद्यते, घटान्तःकरणरूपोपाधिभेदेन तदवच्छिन्नचैतन्ययोरभेदासम्भवादिति चेत्।

सम्प्रति परिच्छिन्न जीव पक्ष में सम्बन्धार्था वृत्ति का निरूपण किया जा रहा है—अन्तःकरण उपाधिविशिष्ट चैतन्य ही जीव है। यह घटादि विषय का उपादान कारण नहीं है, क्योंकि उसका घटादि देश के साथ सम्बन्ध ही नहीं है। परन्तु ब्रह्म ही घटादि विषय का उपादान कारण है, माया-उपहित चैतन्य (ब्रह्म) का घटादि सकल विषय के साथ सम्बन्ध है। इसलिए ब्रह्म में सर्वज्ञता भी है। इस प्रकार घटादि के अधिष्ठान ब्रह्म-चैतन्य के साथ जीव का अभेद हुए विना घटादि का भान असम्भव है। इसलिए घटादि भान के लिए घटादि के अधिष्ठान ब्रह्मचैतन्य के सहित जीव को अभेद सिद्धयर्थ घटादि के आकार की वृत्ति मानना इष्ट है।

वृत्ति के द्वारा भी प्रमातृचैतन्य और विषयचैतन्य का अभेद किस प्रकार हो सकता है, क्योंकि घट और अन्तःकरण रूप उपाधि के भेद होने से घटावच्छिन्न

विषयस्य प्रमातृचैतन्याभिन्नत्वमपरोक्षत्वमित्युक्तत्वादित्याशङ्क्याह—**एतन्मत इति**। इदमुपसंहरन्मतान्तरे सम्बन्धार्थत्वोपपादनं प्रतिजानीते—**एवमिति**।

अन्तःकरणोपाधिकः—तत्प्रतिबिम्बस्तदवच्छिन्नो वा। तह्यस्मिन्मते घटाद्युपादानं किमिति पृच्छति—**किं त्विति**। उत्तरमाह—**ब्रह्मैवेति**। ननु तस्य व्यापकत्वेऽपि केवलस्यासङ्गतया कथं घटादिदेशसम्बन्ध इत्याशङ्क्य केवलस्य तदसम्भवेऽपि मायोपाधिकस्य मायाद्वारकसम्बन्धसम्भवादित्याह—**तस्येति**। **मायोपहितस्य**—तदवच्छिन्नस्य तत्प्रतिबिम्बस्य तद्बिम्बस्य वा। एतेन प्रकृते किमायातमित्यत आह—**तथा चेति**। अन्तःकरणोपाधिकचैतन्यस्य घटादिदेशानवस्थितस्य तदधिष्ठानचैतन्याभिन्नत्वाभावे।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

न। वृत्तेर्बहिर्निर्देशगमनाङ्गीकारेण वृत्त्यन्तःकरणविषयाणामेकदेशस्थत्वेन तदुपहितचैतन्यभेदाभावस्योक्तत्वात्। एवमपरोक्षस्थले वृत्तेर्मतभेदेन विनियोग उपपादितः॥ १९॥

इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्थास्वप्नावस्था। जाग्रदवस्थाव्यावृत्त्यर्थम् इन्द्रियाजन्येति। अविद्यावृत्तिमत्यां सुषुप्तौ अतिव्याप्तिवारणायान्तःकरणेति। सुषुप्तिर्नामाविद्यागोचराविद्यावृत्त्यवस्था। जाग्रत्स्वप्नयोरविद्याकारवृत्तेरन्तःकरणवृत्तित्वान्न तत्रातिव्याप्तिः। अत्र केचिन्मरणमूर्च्छयोरवस्थान्तरत्वमाहुः। अपरे तु सुषुप्तावेव तयोरन्तर्भावमाहुः।

चैतन्य तथा वृत्त्यवच्छिन्न चैतन्य का अभेद होना असम्भव है। तो यह कथन समीचीन नहीं है, क्योंकि अन्तःकरण की वृत्ति को बाहर जाना स्वीकार कर लेने से वृत्ति, अन्तःकरण एवं विषय इन तीनों के एकदेश में स्थित हो जाने के कारण उनसे उपहीत चैतन्य के भेद का अभाव कहा गया है। इसी प्रकार अपरोक्ष स्थल पर मतभेद से वृत्ति का विनियोग प्रतिपादित किया गया है॥ १९॥

इन्द्रियों से अजन्य जो विषयों की प्रकाशिका अपरोक्ष अन्तःकरण वृत्ति की अवस्था है, उसे स्वप्नावस्था कहा जाता है यहाँ पर जाग्रदवस्था की व्यावृत्ति के लिए इन्द्रियों से अजन्य कहा गया है। अविद्या वृत्ति वाली सुषुप्ति में अतिव्याप्ति वारण करने के लिए उक्त लक्षण में अन्तःकरण विशेषण दिया गया है।

जिस अवस्था में अविद्या को विषय करने वाली अविद्या की वृत्ति ही विद्यमान रहती है, उसे सुषुप्ति-अवस्था कहा जाता है। जाग्रत् और स्वप्नावस्था में अविद्याकार अन्तःकरण की वृत्ति होने से सुषुप्ति के लक्षण की अतिव्याप्ति नहीं है। यहाँ पर कुछ लोग मरण और मूर्च्छा को इनसे पृथक् अवस्था मानते हैं तथा कुछ लोग सुषुप्ति में ही इन दोनों का अन्तर्भाव कर देते हैं।

उक्तं विस्मृत्य शङ्कते—**नन्विति**। प्रोक्तं स्मारयति—**वृत्तेरिति**। वृत्तिविनियोगोपपादनमुपसंहरति—**एवमिति**।

अथ स्वप्नावस्थां लक्षयति—**इन्द्रियेति**। इन्द्रियाजन्या विषयगोचरा अन्तःकरणवृत्तिर्यस्मिन्समये सा तथाभूतवृत्त्यवस्था। सुषुप्तिं लक्षयति—**सुषुप्तिरिति**। **अविद्या**—अज्ञानं सा गोचरो विषयो यस्याः साक्षादविद्यावृत्तेस्तदवस्था। अविद्यापदं नित्यसुखस्याप्युपलक्षणम्। ननु मरणमूर्च्छयोरपि निरूपणीयत्वात्कमित्यवस्थात्रयमेव निरूपितमित्याशङ्क्याह—**अत्रेति**।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र तयोरवस्थात्रयान्तर्भावबहिर्भावयोस्त्वं पदार्थनिरूपणे उपयोगाभावान्न तत्र प्रयत्यते। तस्य च मायोपाध्यपेक्षयैकत्वम्, अन्तःकरणोपाध्यपेक्षया च नानात्वं व्यवह्रियते। एतेन जीवस्याणुत्वं प्रत्युक्तम्। 'बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोपि दृष्टः' (श्वे० ५-८) इत्यादौ जीवस्य बुद्धिशब्दवाच्यान्तःकरणपरिमाणोपाधिकपरमाणुत्वश्रवणात्।

स च जीवः स्वयंप्रकाशः। स्वप्नावस्थामधिकृत्य 'अत्रायं पुरुषः स्वयंज्योतिः' (बृ० ४-३-८) इति श्रुतेः। अनुभवरूपश्च 'प्रज्ञानघनः' (मा० ५)

इन दोनों अवस्थाओं को सुषुप्त्यादि में अन्तर्भाव करना या नहीं, इन बातों का त्वंपदार्थ निरूपण में उपयोग न होने के कारण इसके लिए प्रयत्न नहीं किया गया। वह जीव चैतन्य में माया उपाधि की अपेक्षा से एकत्व तथा अन्तःकरण उपाधि की अपेक्षा से नानात्व व्यवहार होता है। इसप्रकार जीव में विभुत्वादि प्रदर्शन से जीवाणुत्ववाद का खण्डन समझना चाहिए। 'बुद्धि के गुण तथा आत्मगुण के कारण से जीव आराग्र मात्र परिच्छिन्न देखा गया है' इत्यादि श्रुति में जीव की बुद्धि शब्द वाच्य अन्तःकरण के परिमाण रूप उपाधि के कारण वह जीव में भी परमाणुत्व (परिमाण) का श्रवण हो रहा है।

वह जीव स्वयं प्रकाश है, क्योंकि स्वप्न-अवस्था को उद्देश्य कर 'यहाँ पर यह पुरुष स्वयं ज्योति है' इस श्रुति में (जीव का स्वयं प्रकाशत्व बताया गया है) और जीव का अनुभव प्रकार भी श्रुति के द्वारा ही बताया गया है —'जीव प्रज्ञान-

---

अवस्थानिरूपणप्रसङ्गे भवत्सम्मतं किमित्यपेक्षायामाह—**तत्रेति**। तयोर्मततयोरित्यर्थः। अवस्थात्रयवाञ्जीव इत्युक्तं तत्रावस्थास्वरूपमभिधाय तद्वान् जीव एक उत अनेक इत्यपेक्षायामाह—**तस्येति**। **तस्य**—उक्तावस्थावतो जीवस्य। तथा च विभुर्मध्यमपरिमाणो वा जीव इत्यर्थः। **एतेन**—जीवस्य विभुत्वादिप्रदर्शनेन। **अणुत्वं** रामानुजाद्युक्तम्। ननु 'बालाग्रशतभागस्य शतधा कल्पितस्य च। जीवो भागः स विज्ञेयः स चानन्त्याय कल्प्यते।' (श्वे० ५-९) इत्यादिश्रुतिविरोधस्स्यादित्याशङ्क्य 'महतो महीयान्' (क० १-२-२०) इत्यादिश्रुत्या सर्वाङ्गीणसुखाद्युपलब्ध्या च शुद्धस्य दुर्लक्ष्यत्वाभिप्रायमेवाणुत्वम्, सोपाधिकस्य त्वन्तःकरणवृत्त्युपाधिकृतमित्यविरोध इत्याशयेनाह—**बुद्धेरिति**।

नैयायिकादिमतनिरासायाह—**स चेति**। तत्र बृहदारण्यकश्रुतिं प्रमाणयति—

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यादिश्रुतेः। अनुभवामीति व्यवहारस्तु 'वृत्तिप्रतिबिम्बितचैतन्यमादायोपपद्यते।

एवं त्वंपदार्थो निरूपितः। अधुना तत्त्वंपदार्थयोरैक्यं महावाक्यप्रतिपाद्यमभिधीयते ॥ २० ॥

ननु नाहमीश्वर इत्यादिप्रत्यक्षेण, किंचिज्ज्ञत्वसर्वज्ञत्वादिरुद्धधर्माश्रयत्वादिलिङ्गेन, द्वा सुपर्णेत्यादिश्रुत्या,

घन स्वरूप है' इत्यादि। 'अनुभवामि' इस प्रकार अनुभव के आश्रय रूप से जीव की जो प्रतीति होती है, वह व्यवहार बुद्धि वृत्ति में प्रतिबिम्बित चैतन्य को लेकर उत्पन्न होती है ऐसा समझना चाहिए।

इस रीति से त्वंपदार्थ का निरूपण किया गया है। अब महावाक्य के प्रतिपाद्य 'तत्' एवं 'त्वं' पदार्थ की एकता प्रतिपादन की जायगी ॥ २० ॥

शङ्का—'मैं ईश्वर नहीं हूँ' इत्यादि प्रत्यक्ष के द्वारा अल्पज्ञत्व सर्वज्ञत्व रूप विरुद्ध धर्मों के आश्रयत्व आदि हेतु के द्वारा, 'द्वा सुपर्णा' इत्यादि श्रुति से तथा

स्वप्नावस्थामिति। अयं पुरुष इत्यनेन परमात्माऽभिहित इति भ्रमव्यवच्छेदार्थमुक्तं—**स्वप्नेति**। वृत्त्यादिवज्जडत्वमाशङ्क्याह—**अनुभवरूपश्चेति**[1]। अत्रापि प्रमाणमाह—**प्रज्ञानेति** विज्ञानमूर्तिरित्यर्थः। 'योऽयं विज्ञानघनः' इत्यादिश्रुतिरादिपदादेया। आत्मनः स्वप्रकाशत्वं च साधितमाद्यपद्यविवरणे। ननु तस्यानुभवरूपत्वेऽनुभवामीत्यनुभवाश्रयत्वव्यपदेशानुपपत्तिरित्याशङ्क्याह—**अनुभवामीति**।

त्वं पदार्थनिरूपणमुपसंहरन्नखण्डार्थप्रतिपादनं प्रतिजानीते—**एवमिति**। 'प्रज्ञानं ब्रह्म' 'अहं ब्रह्मास्मि' (बृ० १–४–१०) 'तत्त्वमसि' (छा० ६–८–७) 'अयमात्मा ब्रह्म (बृ० ४–४–५) इत्येवंरूपैरुक्तैर्ऋग्वेदादिमहावाक्यैः[2] **प्रतिपाद्यं**—तात्पर्यविषयत्वेन बोधनीयम्।

तत्प्रतिपादनार्थमादौ शङ्कामुद्भावयति—**नन्विति**। **आदिपदेन** दुःखयहं संसार्यहमित्यादिप्रत्यक्षं ग्राह्यम्। तत्त्वंपदार्थौ परस्परभिन्नौ विरुद्धधर्माश्रयत्वाद्विरुद्ध-

---

१.—बिम्बचैतन्येति पाठः खगपुस्तकयोः।

२. वाक्येर्महत्त्वं तु 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्याद्यवान्तरवाक्यापेक्षया प्रतिपाद्यम्—इत्यधिकः पाठो दृश्यते खगपुस्तकयोः, तस्य प्रजोजनं न पश्यामः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ (भ० १५–१६)

इत्यादिस्मृत्या च जीवपरभेदस्यावगतत्वेन तत्त्वमस्यादिवाक्यमादित्यो यूपो यजमानः प्रस्तर इत्यादिवाक्यवद् उपचरितार्थमेवेति चेत् । न । भेदप्रत्यक्षस्य सम्भावितकरणदोषस्यासम्भावितदोषवेदजन्यज्ञानेन बाध्यमानत्वात् । अन्यथा चन्द्रगताधिकपरिमाणग्राहिज्योतिःशास्त्रस्य चन्द्रप्रादेशग्राहिप्रत्यक्षेण बान्धापत्तेः । पाकरक्ते घटे रक्तोऽयं न श्याम इति वत्सविशेषणे हीति न्यायेन[1] जीवपरभेदग्राहिप्रत्यक्षस्य विशेषणीभूतधर्मभेदविषयत्वाच्च ।

"लोक में क्षर और अक्षर इस प्रकार दो पुरुष कहे गये हैं, उनमें सभी भूत क्षर हैं एवं कूटस्थ को अक्षर कहा जाता है ।" इत्यादि स्मृति से जीव और परमेश्वर में भेद अवगत हो रहा है ऐसी स्थिति में 'यूप आदित्य है' 'प्रस्तर (दर्भमुष्टि) यजमान है' इत्यादि वाक्य की तरह तत्त्वमस्यादि वाक्य को भी औपचारिक अर्थ वाला ही मानना उचित होगा । ऐसा कहा जाये तो—

समाधान—यह कहना उचित नहीं है, क्योंकि जिसमें दोष की सम्भावना है ही नहीं ऐसे वेदवाक्यजन्य ज्ञान से सम्भावित (नेत्रायित) करण जन्य दोष वाले प्रत्यक्षादि का बाध हो जाता है । अन्यथा चन्द्रमा में अधिक परिमाण बताने वाले ज्योतिष शास्त्र का चन्द्र में प्रादेशिकत्व ग्राहक प्रत्यक्ष से बाध होने लग जायगा । पकने से रक्त हुए घट में 'यह घड़ा लाल है' श्याम नहीं । जिस प्रकार यहाँ पर विशेषण श्याम रूप का ही निषेध होता है, विशेष्य घड़े का नहीं, उसी प्रकार ही जीव और परमेश्वर में भेद ग्राहक प्रत्यक्ष जीव, परमेश्वर के विशेषणीभूत उपाधि के धर्मगत भेद को ही विषय करता है, धर्मीगत भेद को नहीं ।

स्वभावत्वाच्च, तेजस्तिमिरवत् । 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' (मु० ३–१) 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेता' 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः'

---

१. सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्यबाधे । यथा रक्तघटे विद्यमाने श्यामघटो नास्तीति घटरूपे विशेष्ये निषेधस्य बाधे विशेषणीभूतश्यामगुणमात्रपरत्वं निषेधस्य तद्वदित्यर्थः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

अत एव नानुमानमपि[1] प्रमाणम्, आगमबाधात्, मेरुपाषाणमयत्वानुमानवत्। नाप्यागमान्तरविरोधः। तत्परातत्परवाक्ययोः तत्पर-

अतएव जीव और ईश्वर में भेदसाधक अनुमान को भी प्रमाणरूप से नहीं माना जा सकता, क्योंकि अभेदबोधक आगम के द्वारा भेदानुमान बाधित हो जाता है। जैसे कि सुमेरु (पर्वत) में पाषाणमयत्व अनुमान (सुमेरु पर्वतराज सोने का है) इस आगम से बाधित हो जाता है। अन्य आगम वाक्यों के सहित भी जीव ब्रह्मैक्य प्रतिपादक आगम का विरोध नहीं है, क्योंकि तत्परक और अतत्परक

(भ० गी० १५-१७)[2]। सत्यभेदं विनाऽनुपपद्यमानमुपलभ्यमान जीवस्य संसारित्वं श्रूयमाणं चेश्वरस्यासंसारित्वम् सत्यं भेदं कल्पयति। यदि जीवस्य परमात्मनाऽभेदः स्यात् तर्ह्युपलभ्येत नोपलभ्यतेऽतो नास्तीति निश्चीयते इति प्रत्यक्षादिप्रमाणैर्जीवेश्वरभेदस्यावगतत्वात्तत्त्वमस्यादिवाक्यमुपचरितार्थं गौणार्थमेव, 'आदित्यो यूपः' 'यजमानः प्रस्तर' इत्यादिवाक्यवत्। यथाऽऽदित्ये यूपे आदित्यत्वस्य, अयजमानभूतायां मुष्टौ च यजमानत्वस्योपचारस्तद्वदित्यर्थः। व्यावहारिकभेदावेदकप्रत्यक्षादिप्रमाणैस्तात्त्विकाभेदावेदकश्रुतिविरोधायोगान्मैवमित्याह—**नेति**। स्याद्विरोधस्तथाऽपि श्रुत्या प्रत्यक्षादेर्बाध इत्याशयेनादौ प्रत्यक्षस्य बाध्यत्वयोग्यतामाह—**भेदेति**। सम्भाविताः करणानामिन्द्रियाणामपाटवत्वादयो दोषा यस्मिन् तत्तथा तस्येत्यर्थः। ननु ज्येष्ठेन प्रत्यक्षेणैव तदबाध उचित इत्याशङ्क्य ज्येष्ठत्वं हि बाध्यत्वे हेतुर्न तु बाधकतायां कनीयसा शुक्तिज्ञानेन ज्येष्ठस्य रजतज्ञानस्य बाधदर्शनात्, अन्यथा तदुत्पत्त्यसम्भवाच्चन्द्रादिपरिमाणग्राहिशास्त्रबाधापत्तेश्चेत्याशयेनाह—**अन्यथेति**। न चोपजीव्यविरोधः, धर्मभेदबोधकप्रत्यक्षस्य धर्म्यभेदज्ञानं प्रत्यनुपजीव्यत्वादित्याशयेनाह—**पाकेति**। तथा चैवंभूतज्ञाने सत्यपि धर्म्यभेदमादाय सोऽयं घट इतिज्ञानं यथाऽविरुद्धं तद्वन्नाहमीश्वर इति ज्ञानानन्तरमहं ब्रह्मेति ज्ञानमित्यर्थः।

यतः सर्वप्रमाणोपजीव्यस्य ज्येष्ठस्य प्रत्यक्षस्य बाध्यत्वाद् भेदेऽप्रमाणता अत एवानुमानस्यापीत्याह—**अत एवेति**। आगमेन तत्त्वमस्यादिना बाधात्।

---

१. किञ्चिज्ज्ञत्वादिलिङ्गेन मूलोक्तमनुमानमपीति।

२. इत्यादिश्रुतिस्मृतय आदिपदग्राह्या इति शेषः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाक्यस्य बलवत्त्वेन लोकसिद्धभेदानुवादिद्वासुपर्णादिवाक्यापेक्षया उपक्रमोपसंहाराद्यवगताद्वैततात्पर्यविशिष्टस्य तत्त्वमस्यादिवाक्यस्य प्रबलत्वात्।

न च जीवपरैक्ये विरुद्धधर्माश्रयत्वानुपपत्तिः। शीतस्यैव जलस्यौपाधिकौष्ण्याश्रयत्ववत् स्वभावतो निर्गुणस्यैव जीवस्यान्तःकरणाद्युपाधिकर्तृत्वाद्याश्रयत्वप्रतिभासोपपत्तेः। यदि च जलादौ औष्ण्यमारोपितं तदा प्रकृतेऽपि तुल्यम्। न च सिद्धान्ते कर्तृत्वस्य क्वचिदप्यभावादारोप्यप्रमाहि-

वाक्यों में तत्परक वाक्य बलवान् होने से लोकसिद्ध भेद का अनुवादक 'द्वा सुपर्णा' इत्यादि वाक्य की अपेक्षा उपक्रम उपसंहारादि से अवगत अद्वैत तात्पर्य विशिष्ट 'तत्त्वमसि' इत्यादि वाक्य में प्रबलत्व माना गया है।

जीव एवं परमात्मा की एकता स्वीकार करने पर विरुद्ध धर्माश्रयत्व की अनुपपत्ति (रूप अर्थापत्ति प्रमाण) से भी विरोध नहीं है। शीतल जल में औपाधिक उष्णता आश्रयत्व के समान ही स्वभाव से निर्गुण जीव में ही अन्तःकरणादि उपाधि के कारण कर्तृत्वादि का आश्रयत्व प्रतीत हो रहा है। यदि जलादि में उष्णता आरोपित है, तो प्रकृत में निर्गुण जीव में भी कर्तृत्वादि आश्रयत्व आरोपित है। यदि कहो कि सिद्धान्त में कहीं भी कर्तृत्वादि के न होने से आरोप्य

मेरुः पाषाणमयः पर्वतत्वाद्विन्ध्यादिवदित्याद्यनुमानं यथा सर्वतः सौवर्णः कुलगिरिराजो मेरुरित्याद्यागमेन बाधितं तद्वदित्यर्थः। आगमविरोधोऽपि नास्तीत्याह—**नापीति**। भेदस्य प्रत्यक्षादिप्रमाणैर्ज्ञातत्वाच्छास्त्रस्य वाऽज्ञातज्ञापकत्वाद् भेदबाधागमस्य तत्र तात्पर्याभावेनातत्परत्वात्तत्परा भेदबाध्यागमाद्दौर्बल्यादित्याह—**तत्परेति**।

न चार्थापत्तिविरोध इत्याह—**न चेति**। औपाधिकविरुद्धधर्माश्रयत्वेनान्यथा सिद्धत्वादित्याह—**शीतस्यैवेति**। नन्वग्निधर्मस्यौष्ण्यस्य जलादावारोपात्प्रतीतिरत्र कस्य धर्मस्येत्याशङ्क्याह—**यदीति**। अन्तःकरणधर्मस्य कर्तृत्वादेर्भानसम्भवात्प्रकृतेऽप्येतत्तुल्यमित्यर्थः। नन्वात्मतादात्म्यापन्नस्यैवान्तःकरणस्यापि कर्तृत्वादिधर्मकत्वात् तद्व्यतिरिक्तेऽनात्मनि क्वापि कर्तृत्वादेरप्रमितत्वात्कथमारोप इत्याशङ्क्य परिहरति—**न चेति**। यथा सुर्यादिकिरणसम्पर्कात्प्रतीयमानमपि[1] जलादिकं

---

१. मपि नीलादिकं०—ततः पृथक्कार्यप्रमितस्य० इत्यादिः पाठः कपुस्तके। ततः पृथक्त्वेप्यप्रमित० इत्यादिः पाठो गपुस्तके।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तसंकाराभावे कथमारोप इति वाच्यम्। लाघवेनारोप्यविषयसंस्कारत्वेनैव तस्य हेतुत्वात्॥ २१॥

न च प्राथमिकारोपे का गतिः, कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वात्। तत्त्वंपदवाच्ययोर्विशिष्टयोरैक्यायोगेऽपि लक्ष्यस्वरूपयोरैक्यमुपपादितमेव। अत एव तत्प्रतिपादकतत्त्वमस्यादिवाक्यानामखंडार्थत्वम्,

वस्तु के प्रमाजन्य संस्कार का अभाव होने के कारण आत्मा में कर्तृत्व का आरोप भी कैसे होगा? तो, ऐसा कहना समीचीन नहीं है, क्योंकि आरोप्य विषयक संस्कार को ही आरोप के हेतु मानने में लाघव है॥ २१॥

अध्यास में पूर्व-पूर्व संस्कार को कारण मानने पर सर्वप्रथम आरोप (अध्यास) की क्या गति होगी? इस प्रकार कहना उचित नहीं, क्योंकि कर्तृत्वादि अध्यास का प्रवाह अनादि काल से आ रहा है। तत्, त्वं पद के वाच्यार्थ विशिष्ट चैतन्य की एकता न होने पर भी उन दोनों के लक्ष्य स्वरूप की एकता का प्रतिपादन कर

घटादिनिष्ठं न तु सूर्यादिनिष्ठं, तथाऽऽत्मसम्बन्धात्प्रतीयमानमपि कर्तृत्वादिकमन्तःकरणनिष्ठमेव, न त्वात्मनिष्ठम्। तस्य कूटस्थत्वात्। ततः पृथक् क्वाप्यप्रमितस्य कर्तृत्वादेरात्मन्यारोपे नास्ति बाधकम्। तत्रारोप्यगोचरसंस्कारमात्रस्यैव हेतुत्वादित्याह—**लाघवेनेति**।

नन्वस्त्वस्मिन्कर्तृत्वारोपे पूर्वप्रतीतकर्तृत्वादिसंस्कारो हेतुस्तत्रापि तथाभूतस्तत्रापि तथाभूतः, तथाऽपि प्राथमिकारोपो दुर्घट इत्याशङ्क्य परिहरति—**न चेति**। प्राथमिकारोपे काऽपि गतिर्नास्तीति न चेत्यर्थः। कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वेन कस्याप्यारोपस्य प्राथम्यासिद्धया तत्र पृथग्गतेरवक्तव्यत्वादित्याह—**कर्तृत्वेति**। नन्वस्त्वेवं तथाऽपि कथं विरुद्धधर्माक्रान्तयोर्जीवेश्वरयोरैक्यमित्याशङ्क्याह—**तत्त्वमिति**। यतो लक्ष्यस्वरूपैक्यम् **अत एव** सोऽयं देवदत्तः प्रकृष्टप्रकाशश्चन्द्र इत्यादिवाक्यवत् 'तत्त्वमसि' 'सत्यं ज्ञानमनन्तम्' (तै० २-१-१) इत्यादिवाक्यानामखण्डार्थमिति। न चास्त्यनुपलब्धिविरोधस्तमसाऽऽवृतस्य घटस्यानुपलब्धेस्तदभावानिश्चायकत्ववदज्ञानवतोऽभेदस्यानुपलम्भस्य[1]

---

१. अज्ञानावृताऽभेदस्यानुपलम्भस्येति पाठः कपुस्तके। अज्ञानवताभेदस्यानुपलम्भस्य तदाभावनिर्णा० इतिपाठः खपुस्तके। अज्ञानवताऽभेदस्यानुपलम्भस्य तदभावा इतिपाठो गपुस्तके। तेषामसङ्गतत्वमालोच्य उपरितनः पाठः स्थापितोऽ-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सोऽयमित्यादिवाक्यवत्। न च कार्यपराणामेव[1] प्रामाण्यम्, चैत्र पुत्रस्ते जात इत्यादौ सिद्धेऽपि सङ्गतिग्रहात्। एवं सर्वप्रमाणाविरुद्धं श्रुतिस्मृतीतिहासपुराणप्रतिपाद्यं जीवपरैक्यं वेदान्तशास्त्रस्य विषय इति सिद्धम् ॥२२॥

इति श्रीवेदान्तपरिभाषायां विषयपरिच्छेदः ॥ ७ ॥

दिया गया है। इसलिए जीव ब्रह्मैक्य प्रतिपादक तत्त्वमस्यादि महावाक्य में 'सोऽयम् देवदत्त' इत्यादि वाक्य के समान अखण्डार्थ बोधकत्व है। यह भी नहीं कह सकते हैं कि कार्यपरक वाक्य में ही प्रामाण्य है, क्योंकि हे चैत्र! तुम्हें पुत्र हुआ है, इत्यादि सिद्ध वाक्य में भी शक्तिग्रह होता हुआ देखा गया है। इस प्रकार श्रुति, स्मृति, पुराण एवं इतिहास के प्रतिपाद्य जीव ब्रह्म की एकता सभी प्रमाणों से अविरुद्ध वेदान्तशास्त्र का विषय है यह सिद्ध हुआ ॥ २२ ॥

इति विषयपरिच्छेद का भाषानुवाद समाप्त हुआ।

तदभावानिर्णायकत्वादित्यपि द्रष्टव्यम्। ननु सिद्धे प्रयोजकप्रवृत्यादेरभावात्सङ्गतिग्रहायोगात् क्रियान्वितस्वार्थपराणामेव प्रामाण्यान्न सिद्धं ब्रह्म वेदान्तप्रमेयमिति प्राभाकरमतमाशङ्क्य परिहरति—**न चेति**। पुत्रपदाङ्कितवसनं चैत्रपुरतो निधाय हे चैत्र! पुत्रस्ते जात इत्युक्ते विकसितवदनकमलं चैत्रमवलोक्यास्य पुत्रपदस्य सुतरूपेऽर्थे सङ्गतिं तटस्थो गृह्णातीति पुत्रस्ते जातः कन्या ते गर्भिणी इत्यादौ सङ्गतिग्रहादित्यर्थः। उपसंहरति—**एवमिति**। उक्तप्रकारेण।

स्माभिः। तस्यायमर्थः तत्त्वमस्यादिवाक्यानामखण्डार्थबोधकत्वेऽपि तत्पदार्थत्वंपदार्थयोर्जीवपरमात्मनोः अभेदानुपलब्धिरूपषष्ठप्रमाणविरोधात्। तत्त्वमस्यादिवाक्यानामौपचारिकत्वाद्याशङ्क्य निराचष्टे टीकाकारो—न चास्तीति। अज्ञानवतः प्रमातुः जातस्याभेदानुपलम्भस्य (कर्तृकर्मणोः कृति, इत्यनेन कर्तरि षष्ठी) तदभावस्य तस्य अभेदस्य अभावस्तदभावस्तस्य—अर्थात् भेदस्य अनिर्णायकत्वात्। प्रमाणेनापि यथार्थज्ञानं तत्त्वविद एव जायते, यथा मणिकारस्यैव रत्नतत्त्वसाक्षात्कारश्चक्षुषा न गोपानामिति ध्येयम्।

१. पदानां वाक्यानां वा इति शेषः। प्राभाकरा हि लिङ्लोट्तव्यादिबोध्यकार्यान्वितानामेव पदादीनां प्रामाण्यं, तथा हि—'वत्सम्बधान' इत्युत्तमवृद्धवाक्यमुप-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वैः प्रत्यक्षादिप्रमाणैरविरुद्धम्। 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई० ७) इत्यादिश्रुतिभिः, 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' (भ० गी० १३–२) इत्यादिस्मृतिभिः, 'सर्वभूतान्तरस्थाय नित्यशुद्धचिदात्मने। प्रत्यक्चैतन्यरूपाय मह्यमेव नमो नमः॥' इत्यादीतिहासैः, 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥' इत्यादिपुराणैश्च तात्पर्यतया प्रतिपाद्यम्।

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तकृतायां वेदान्तपरिभाषार्थदीपिकायां विषयपरिच्छेदः समाप्तः॥ ७॥

———

श्रुत्य प्रवृत्तं मध्यमवृद्धं दृष्ट्वा व्युत्पित्सुर्बालः इदं वाक्यमेतल्क्रियाबोधकमित्यनुमिनोति। पश्चाद्वत्समपनयेति श्रुत्वा प्रवृत्तं मध्यमवृद्धं दृष्ट्वा तद्वाक्यस्य तल्क्रियाबोधकत्वमनुमिनोति। अयं च बधानपदोद्वापादपनयपादावापाच्च वत्सपदस्य पशुविशेषे शक्तिमपि जानाति। एवं बधानादिपदस्याष्यावापोद्वापाच्छक्तिज्ञानं भवति। तथा च सिद्धार्थानां पशुरत्रास्तीत्यादीनामपि 'तं पश्य' इत्यध्याहृतकार्यबोधकत्वमेवेति मन्यते। तानुत्तरयति—न चेत्यादिना। तं पश्येत्यनध्याहृत्यापि सङ्गतिग्रहस्य टीकाप्रदर्शितप्रकारेणोपपत्तेः। कार्यान्वितस्वार्थबोधने गौरवाच्चेति भावः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ प्रयोजनपरिच्छेदः ८

इदानीं प्रयोजनं निरूप्यये। यदवगतं सत्स्ववृत्तितयेष्यते तत्प्रयोजनम्। तच्च द्विविधम्—मुख्यं गौणं चेति। तत्र सुखदुःखाभावौ मुख्यं प्रयोजनम्। तदन्यतरसाधनं गौणं प्रयोजनम्। सुखं च द्विविधम्—सातिशयं निरतिशयं चेति। तत्र सातिशयं सुखं विषयानुषङ्गजनितान्तःकरणवृत्तितारतम्यकृतानन्दलेशाविर्भावविशेषः।

'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ० ४।३।३२) इत्यादिश्रुतेः। निरतिशयं सुखं च ब्रह्मैव। 'आनन्दो ब्रह्मेति व्यजानात्' (तै० ३–६) 'विज्ञानमानन्दं ब्रह्म' (बृ० ३–१८) इतिश्रुतेः॥ १॥

अब (जीव और ब्रह्म के ऐक्य ज्ञान का) प्रयोजन निरूपण किया जा रहा है। जो वस्तु अवगत होने पर स्ववृत्तिरूप से (यह मुझे प्राप्त हो इस प्रकार) इच्छा का विषय हो, उसे प्रयोजन कहते हैं। वह मुख्य और गौण भेद से दो प्रकार का है। उनमें सुख एवं दुःखाभाव मुख्य प्रयोजन है तथा सुख के साधन और दुःखाभाव के साधन गौण प्रयोजन हैं। सातिशय और निरतिशय भेद से सुख भी दो प्रकार का है। उनमें विषय के सम्बन्ध से जन्य अन्तःकरण की वृत्ति के तारतम्य से होने वाले आनन्द-विशेष के आविर्भाव को सातिशय सुख कहते हैं। इस विषय में श्रुति प्रमाण भी है—'अन्य सभी प्राणी इसी आनन्दांश के लेश से जीवित हैं'। और निरतिशय सुख ब्रह्मस्वरूप ही है। क्योंकि 'आनन्द ही ब्रह्म है ऐसा जानो' 'विज्ञान-आनन्दस्वरूप ब्रह्म है' इस प्रकार श्रुति निरतिशय सुखस्वरूप ब्रह्म के विषय में प्रमाण है॥ १॥

अथ प्रयोजननिरूपणं प्रतिजानीते—**इदानीमिति**। यज्ज्ञातं सन्ममेदं स्यादिति स्वसम्बन्धितयेष्यते तत्प्रयोजनम् तद्विभजति—**तच्चेति**। **तत्र**—तयोर्द्वयोर्मध्ये। **तदन्यतरसाधनं**—तयोः सुखदुःखाभावयोरन्यतरस्य सुखस्य दुःखाभावस्य वा साधनं सुखादिरूपप्रयोजनगुणत्वाद्गौणम्। सुखस्यापि द्वैविध्यमाह—**सुखं चेति**। उपलक्षणमेतत्। दुःखाभावोऽपि द्विविधः—यत्किञ्चिद्दुःखाभावो यावद्दुःखाभावश्चेति। तत्र संसारदशायामाद्यो मोक्षावस्थायां द्वितीय इत्यपि बोध्यम्। **विषयेति**। विषयतारतम्याद्विषयेन्द्रियसन्निकर्षजनि-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

आनन्दात्मकब्रह्मावाप्तिश्च मोक्षः शोकनिवृत्तिश्च। 'ब्रह्म वेद ब्रह्मैव भवति' (मु० ३-२-९) 'तरति शोकमात्मवित्' (छा० १-१-३) इत्यादिश्रुतेः। न तु लोकान्तरावाप्तिः, तज्जन्यवैषयिकानन्दो वा मोक्षः। तस्य कृतकत्वेनानित्यत्वे मुक्तस्य पुनरावृत्त्यापत्तेः।

मोक्ष का निरूपण—

आनन्द स्वरूप ब्रह्म की प्राप्ति एवं दुःख की आत्यन्तिक निवृत्ति को मोक्ष कहा गया है। "ब्रह्म को जानकर ब्रह्म ही हो जाता है" "आत्मज्ञ शोक को पार कर जाता है"। ये श्रुतियाँ ब्रह्म की प्राप्ति तथा शोक की निवृत्ति में प्रमाण हैं। लोकान्तर की प्राप्ति अथवा उसमें होने वाले दिव्य-विषयजन्य सुख को भी मोक्ष नहीं कहा जा सकता, क्योंकि क्रियाजन्य होने के कारण उसमें अनित्यत्व आ जायगा। इसलिए मुक्त पुरुष को भी पुनः संसार की प्राप्ति होने लग जायगी।

तान्तःकरणवृत्तितारतम्यं तत्कृतानन्दलेशाविर्भावविशेषः। तथा भूतवृत्त्या विषयावच्छिन्नाज्ञाननिवृत्तौ तदवच्छिन्नानन्दस्यैव प्रतिबिम्बनादानन्दसमुद्रस्य ब्रह्मण आनन्दलेशाविर्भावविशेष इत्यर्थः। अत्र श्रुतिं प्रमाणयति—**एतस्यैवेति**। **आदि**पदेन 'एष ह्येवानन्दयति' (तै० २-७) इत्याद्या श्रुतिरुपादेया। द्वितीयं सुखं लक्षयति—**निरतिशयसुखमिति**। चकारात्सातिशयसुखमप्यानन्दात्मब्रह्मलेशात्मकत्वात्। ब्रह्मैवेत्यर्थः। अत्रापि श्रुतिं प्रमाणयति—**आनन्द इति**।

अगत्वानन्दात्मकं ब्रह्म प्रकृते किमायातमित्याशङ्क्याऽऽनन्दरूपब्रह्मावाप्तिः समूलसर्वानर्थनिवृत्तिश्च मोक्ष इत्यवगतो मोक्षः स मम भूयादिति स्ववृत्तितयेष्यते इति तस्य प्रयोजनत्वमित्याह—**आनन्देति**। **शोकशब्दः** सकारणबन्धपरः। उभयत्र प्रमाणमाह—**ब्रह्म वेदेति**। **तरति** - अपनयति। **आदि**पदेन 'ब्रह्मविदाप्नोति परम्' (तै० २-१-१) 'तरत्यविद्या'—मित्याद्याश्रुतिरादेया। तान्त्रिकमतनिरासायाह—**न त्विति**। तस्याः स्वतः पुरुषार्थत्वाभावादाह—**तज्जन्येति**। तया लोकान्तरावाप्त्या जन्येत्यर्थः। उभयोर्मोक्षत्वाभावे हेतुमाह—**तस्येति**। उभयविधमोक्षस्य।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु त्वन्मतेऽप्यानन्दावाप्तेरनर्थनिवृत्तेश्च सादित्वे तुल्यो दोषः, अनादित्वे मोक्षमुद्दिश्य श्रवणादौ प्रवृत्त्यनुपपत्तिरिति चेत्। न। सिद्धस्यैव ब्रह्मस्वरूपस्य मोक्षस्यासिद्धत्वभ्रमेण तत्साधने प्रवृत्त्युपपत्तेः। अनर्थनिवृत्तिरप्यधिष्ठानभूतब्रह्मस्वरूपतया सिद्धैव। लोकेऽपि प्राप्तप्राप्तिपरिहृतपरिहारयोः प्रयोजनत्वं दृष्टमेव। यथा हस्तगतविस्मृतसुवर्णादौ 'तव हस्ते सुवर्णम्' इत्याप्तोपदेशादप्राप्तमिव प्राप्नोति। यथा वा बलयितचरणायां रज्जौ सर्पत्वभ्रमवतो नायं सर्पः' इत्याप्तवाक्यात् परिहृतस्यैव सर्पस्य परिहारः। एवं प्राप्तस्याप्यानन्दस्य प्राप्तिः, परिहृतस्याप्यनर्थस्य निवृत्तिः मोक्षः प्रयोजनम्।

शङ्का—यदि कहो कि आप (वेदान्त) के मत में भी आनन्द की प्राप्ति एवं अनर्थ की निवृत्ति सादि होने से उभयत्र दोष समान ही है, और अनादि मानने पर मोक्ष के उद्देश्य से श्रवणादि में प्रवृत्ति न हो पायेगी।

समाधान—तो यह कथन ठीक नहीं है। ब्रह्मस्वरूप मोक्ष नित्य सिद्ध (सदा प्राप्त) होने पर भी उसमें अप्राप्त भ्रम हो जाने से उसके साधन श्रवणादि में प्रवृत्ति बन जाती है। अनर्थ की निवृत्ति भी अधिष्ठान ब्रह्मस्वरूप होने के कारण सदा सिद्ध ही है। लोक में भी नित्य प्राप्त वस्तु की प्राप्ति तथा नित्य निवृत्त की निवृत्ति को प्रयोजन माना गया है। जैसे कि हस्तगत विस्तृत सुवर्ण आदि में 'तुम्हारे हाथ में सुवर्ण है' इस प्रकार आप्त पुरुष के उपदेश से मानों अप्राप्त की प्राप्ति हो जाती है, अथवा जैसे पैर में लिपटी रस्सी में सर्पत्व भ्रम वाले पुरुष को 'यह सर्प नहीं है' इस प्रकार आप्तवाक्य से पहले से ही निवृत्त सर्प की निवृत्ति होती है। इस प्रकार ही नित्यप्राप्त आनन्द की प्राप्ति और नित्यनिवृत्त अनर्थ की निवृत्ति को मोक्ष रूप प्रयोजन माना गया है।

ननु त्वदभिमतो मोक्षः सादिरनादिर्वा? आद्ये, कृतकत्वेनानित्यत्वे मुक्तस्य पुनरावृत्तिलक्षणो दोषस्तुल्यः। द्वितीये, श्रवणादिवैयर्थ्यमिति तान्त्रिकः शङ्कते—**नन्विति**। द्वितीयपक्षमवलम्ब्य परिहरति—**नेति**। नन्वानन्दरूपस्य ब्रह्मणः सिद्धत्वेन तत्प्राप्तेस्तथात्वेऽप्यनर्थनिवृत्तेरभावरूपायाः कथं सिद्धत्वमित्याशङ्क्याह—**अनर्थनिवृत्तिरपीति**। ननु सिद्धस्य पुरुषार्थत्वादर्शनादेवंविधस्य मोक्षस्य पुरुषार्थता न भविष्यतीत्याशङ्क्याह—**लोकेऽपीति**। क्वेत्यपेक्षायामुदाहरति—**यथेति**। दृष्टान्तोक्तं प्रकृते योजयति—**एवमिति**।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

स च ज्ञानैकसाध्यः 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे० ३–८) इति श्रुतेः, अज्ञाननिवृत्तेर्ज्ञानैकसाध्यत्वनियमाच्च । तच्च ज्ञानं ब्रह्मात्मैक्यगोचरम् । 'अभयं वै जनकप्राप्तोऽसि' (बृ० ४–२–४) 'तदात्मानमेव वेदाहं ब्रह्मास्मि' (बृ० १–४–१०) इति श्रुतेः । 'तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनम्' इति नारदीयवचनाच्च ॥ २ ॥

वह मोक्ष केवल ज्ञान से ही साध्य है क्योंकि उस परमात्मा को जानने से ही मृत्यु का अतिक्रमण किया जाता है, इससे अतिरिक्त मुक्ति प्राप्ति के लिए कोई भी साधन नहीं है, ऐसी श्रुति प्रमाण है । यह भी नियम है कि अज्ञान की निवृत्ति एकमात्र ज्ञान से ही सम्भव है । वह ज्ञान ब्रह्म तथा आत्मा के ऐक्य को विषय करने वाला होता है । श्रुति ने भी कहा है कि–'हे जनक ! निश्चित ही तुम अभय को प्राप्त कर गये हो' 'उसने आत्मा को ही जाना कि मैं ब्रह्म हूँ' । 'तत्त्वमसि' आदि महावाक्य से जन्य ज्ञान ही मोक्ष का साधन है । इस प्रकार नारद जी का वचन भी मोक्ष के साधन ज्ञान को ही बताता है ॥ २ ॥

स च मोक्षः किं कर्मसाध्यः किं वोपासनासाध्यः, आहोस्विदेतत्समुच्चयसाध्यः, उत कर्मज्ञानसमुच्चयसाध्यः, किं वोपासनाज्ञानसमुच्चयसाध्यः ? किं वा केवलज्ञानलभ्यः ? इति चिकित्सायां स च ब्रह्मज्ञानादिति प्रतिज्ञातमुपपादयति - **स चेति** । **तमेव–आत्मानमेव, विदित्वा** –तं विदित्वैवेति वा, **मृत्युं** जन्म-मरणलक्षणां संसृतिम्, **अत्येति** – अतिक्रामति । **अन्यः**—कर्मादिरूपः, **अयनाय**—मोक्षाय, **पन्थाः**—मार्गो न विद्यते । 'हिरण्यदा अमृतत्वं भजन्ते' इत्यादिश्रुतेः कर्मसाध्यस्वर्गफलस्य प्रलयपर्यन्तस्थायित्वाभिप्रायत्वादितरवाक्यानामपि परम्परया कर्मादेर्मोक्षसाधनत्वाभिप्रायत्वाच्चेति भावः ।[1] युक्तिमप्याह— **अज्ञाननिवृत्तेरिति** । ननु तज्ज्ञानभेदविषयं तत्साधनं किं वाऽभेदगोचरमिति विचिकित्सायामाह—**तच्चेति** । तत्र श्रुतिं प्रमाणयति—**अभयमिति** । स्मृतिं प्रमाणयति—**तत्त्वमस्यादीति** ।

---

१. मुक्तिमप्याहेति गपुस्तके पाठः सोऽशुद्ध एव ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तच्च ज्ञानमपरोक्षरूपम्। परोक्षत्वेऽपरोक्षभ्रमनिवर्तकत्वानुपपत्तेः। तच्चापरोक्षज्ञानं तत्त्वमस्यादिवाक्यादिति केचित्। मननिदिध्यासनसंस्कृतान्तःकरणादेवेत्यपरे॥ ३॥

तत्र पूर्वाचार्याणामयमाशयः—संविदापरोक्ष्यं न करणविशेषोत्पत्तिनिबन्धनम्, किन्तु प्रमेयविशेषनिबन्धनमित्युपपादितम्। तथा च ब्रह्मणः प्रमातृजीवाभिन्नतया तद्गोचरं शब्दजन्यज्ञानमप्यपरोक्षम्। अत एव प्रतर्दनाधिकरणे प्रतर्दनं प्रति 'प्राणोऽस्मि प्रज्ञात्मा त मामायुरमृतमुपास्व' (कौ० ३-२) इतीन्द्रप्रोक्तवाक्ये प्राणशब्दस्य ब्रह्मपरत्वे

मोक्ष के साधन स्वरूप वह ज्ञान भी अपरोक्षात्मक ही है। क्योंकि परोक्ष ज्ञान में अपरोक्ष भ्रम निवर्त्तकत्व की उपपत्ति नहीं है। वह अपरोक्ष ज्ञान 'तत्त्वमसि' आदि महावाक्यों से होता है, ऐसा कुछ आचार्यों का कहना है। दूसरे आचार्य मनन-निदिध्यासन से संस्कृत अन्तःकरण से ही अपरोक्ष ज्ञान मानते हैं॥ ३॥

उनमें प्रथमोक्त मतावलम्बी आचार्यों का यह अभिप्राय है कि—ज्ञान में अपरोक्षता करणविशेष की उत्पत्ति निबन्धन नहीं है, परन्तु विशेष के अधीन है, ऐसा कहा गया है। इसलिए ब्रह्म प्रमाता जीव से अभिन्न होने के कारण तद् विषयक शाब्दज्ञान भी अपरोक्ष ही होता है। अतएव (ब्रह्मसूत्र के) प्रतर्दनाधिकरण में प्रतर्दन के प्रति 'मैं प्राण एवं प्रज्ञात्मा हूँ इस प्रकार मुझ प्रज्ञात्मा को आयु तथा अमृत के रूप से उपासना करो'। इन्द्र के द्वारा कहे गये इस वाक्य में

ब्रह्मात्मैक्यगोचरमपि तज्ज्ञानं परोक्षमपरोक्षं वेति विचिकित्सायामाह—**तच्चेति**। तज्ज्ञानं किं वाक्यादुदपद्यत उतान्तःकरणादिति संशये पद्मपादाचार्यगदितमाह—**तच्चेति**। वाचस्पतिमिश्रमतमाह—**मननेति**।

ननु कथं वाक्यादपरोक्षज्ञानमित्याशङ्क्याह—**तत्रेति**। उपपादितं प्रत्यक्षपरिच्छेदेऽस्माभिरिति शेषः। **तथा च**—ज्ञानापरोक्षत्वस्य प्रमेयविशेषनिबन्धनत्वे सति। सन्निकृष्टविषयं शब्दजन्यमपि ज्ञानमपरोक्षमेवेत्युक्तम्। जीवगोचरज्ञानवत्तदभिन्नब्रह्मविषयमपि तदपरोक्षमेव, अत्र प्रमाणाकाङ्क्षायां 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र० सू० १-१-३०) इति सूत्रस्थं भाष्यं प्रमाणमित्याशयेनाह—**अत एवेति**। शब्दजन्यज्ञानस्यापरोक्षत्वादेव। **प्रतर्दनाधिकरणे**—प्राणस्तथाऽ-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

निश्चिते सति मामुपास्वेत्यस्मच्छब्दानुपपत्तिमाशङ्क्य तदुत्तरत्वेन प्रवृत्ते 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र० सू० १–१–३१) इत्यत्र सूत्रे शास्त्रीया दृष्टिः शास्त्रदृष्टविरिति तत्त्वमस्यादिवाक्यजन्यमहं ब्रह्मेति ज्ञानं दृष्टिशब्देनोक्तमिति ॥ ४ ॥

अन्येषां त्वयमाशयः— करणविशेषनिबन्धनमेव ज्ञानानां प्रत्यक्षत्वम्, न विषयविशेषनिबन्धनम्। एकस्मिन्नेव सूक्ष्मवस्तुनि पटुकरणापटुकरणयोः प्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारदर्शनात्। तथा

प्राण शब्द का अर्थ ब्रह्मपरक निश्चित होने पर भी 'मुझको उपासना करो' इसमें 'मां' (मुझ) शब्द की अनुपपत्ति की आशङ्का करते हुए उत्तर के रूप में 'शास्त्र दृष्टि से वामदेव के समान यह उपदेश है' इस सूत्र में शास्त्रप्रमाणजन्य दृष्टि को शास्त्रदृष्टि शब्द से कहा है। इसलिए तत्त्वमसि आदि महावाक्यजन्य 'मैं ब्रह्म हूँ' इस ज्ञान को भी शास्त्रदृष्टि शब्द से कहा गया है ॥ ४ ॥

दूसरे आचार्यों (वाचस्पतिमिश्र आदि) करणविशेष से सम्बन्ध रखती हैं, विशेष से नहीं। क्योंकि एक ही सूक्ष्म वस्तु में पटुकरण व्यक्ति को प्रत्यक्ष ज्ञान होता है और अपटुकरण को प्रत्यक्ष ज्ञान नहीं होता है। इस प्रकार लोक में व्यवहार

नुगामात्' (ब्र० सू० १–१–२८) इत्यस्मिन्प्राणोऽस्मीत्यादियद्विषयवाक्यं तस्मिन्। तत्र विषयसंशयपूर्वपक्षसमाधानफलाख्यपञ्चाङ्गन्यास्यायस्याधिकरणेति संज्ञा। 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च' (कौ० ३–१) इत्यस्यां कौषीतकिब्राह्मणोपनिषदाम्नाताख्यायिकायां प्राणोऽस्मीत्यादिश्रूयमाणं वाक्यं विषयस्तत्र प्राणशब्देन किं वायुरभिप्रेतः किं वा इन्द्र उत जीव आहोस्वित्परमात्मेति संशयः। वाय्वादिरभिप्रेत इति पूर्वपक्षः। परमात्मेति सिद्धान्तः। वाय्वाद्युपासनं पूर्वपक्षे फलं परमात्मोपासनमुत्तरपक्षे। **प्राणः**— परमात्मा। तथाऽनुगमात्पौर्वापर्यालोचनया वाक्यस्य तत्परत्वावगमादिति प्राणशब्दस्य ब्रह्मपरत्वे निश्चिते सति मामित्यस्मच्छब्दानुपपत्तिमाशङ्क्य तदुत्तरत्वेन प्रवृत्ते यथा शास्त्रदृष्ट्याऽहं सूर्योऽभवमहं मनुरिति वामदेवस्य गर्भस्थस्य मुनेरुक्तिस्तथा शास्त्रदृष्ट्या मामितीन्द्रोपदेशोऽपीत्यर्थकसूत्रे इत्यर्थः।

अथाचार्यवाचस्पतिमिश्राणामाशयमादिष्करोति— अन्येषामिति। सूक्ष्म-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च संवित्साक्षात्त्वे इन्द्रियजन्यत्वस्यैव प्रयोजकतया न शब्दजन्यज्ञानस्यापरोक्षत्वम्।

ब्रह्मसाक्षात्कारेऽपि मनननिदिध्यासनसंस्कृतं मन एव करणम् 'मनसैवानुद्रष्टव्यः' इत्यादिश्रुतेः। मनोऽगम्यत्वश्रुतिश्चासंस्कृतमनोविषया। न चैवं ब्रह्मण औपनिषदत्वानुपपत्तिः, अस्मदुक्तमनसो वेदजन्यज्ञानानन्तरमेव प्रवृत्ततया वेदोपजीवित्वात्। वेदानुपजीविमानान्तरगम्यत्वस्यैव वेदगम्यत्वविरोधित्वात्।

देखा जाता है। उसी प्रकार साक्षात्व में भी इन्द्रियजन्यत्व को ही प्रयोजक मानने से शाब्द ज्ञान में अपरोक्षत्व नहीं है।

ब्रह्मसाक्षात्कार में भी मनन-निदिध्यासन द्वारा संस्कृत मन ही करण है, क्योंकि 'मन के द्वारा ही आत्मदर्शन करो' इत्यादि श्रुति प्रमाण है। 'ब्रह्म मन से अगम्य है' इस प्रकार श्रुति-समूह का अभिप्राय असंस्कृत मन को लेकर है अर्थात् ब्रह्म असंस्कृत मन का विषय नहीं है)। इससे ब्रह्म में औपनिषदत्व की अनुपपत्ति हो जायगी, ऐसा नहीं कहा जा सकता, क्योंकि हमारा बताया हुआ मन वेदजन्य ज्ञान के अनन्तर प्रवृत्त होने के कारण वह वेदोपजीवी है। जो प्रमाण वेदोपजीवी नहीं है ऐसे वेदानुपजीवी प्रमाणान्तर से गम्यत्व का ही वेदगम्यत्व सिद्धान्त के साथ विरोध होता है।

वस्तुनि—वर्णादौ। **इन्द्रियजन्यत्वस्य**—इन्द्रियत्वेनेन्द्रियजन्यत्वस्य। अनुमितिज्ञानस्य मनस्त्वेन तज्जन्यत्वान्न तत्रातिव्याप्तिः। अस्मिन्पक्षे 'इन्द्रियेभ्यः परा ह्यर्थाः' (क० १–१०) इति श्रुताविन्द्रियेभ्य इत्यस्य बाह्येन्द्रियेभ्य इत्यर्थः। 'मनः सर्वेन्द्रियाणि च' इति श्रुतावपि सर्वाणि बाह्येन्द्रियाणीत्यर्थः।

साक्षात्कारस्येन्द्रियजन्यत्वे ब्रह्मसाक्षात्कारेऽपि मन एव करणमित्याह—**ब्रह्मेति**। सर्वदा तदापत्तिमाशङ्क्याह—**मनेति**। **तत्र** प्रमाणमाह—**मनसैवेति**। 'दृश्यते त्वग्र्या बुद्धया' (क० १–३–१३) इत्याद्याश्रुतिरादिपदादेया। ननु 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' (तै० ३–४–१) इत्यादिश्रुतेः का गतिरित्याशङ्क्याह—**मन इति**। ननु 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ० ३–९–१६) इति श्रुतिबोधितमुपनिषन्मात्रगम्यत्वं विरुद्धमित्याशङ्क्य परिहरति—**न चेति**। किं तदनुपजीव्यमानान्तरगम्यत्वे तदनुपपत्तिरुत तदुप-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

शास्त्रदृष्टिसूत्रमपि ब्रह्मविषयमानसप्रत्यक्षस्य शास्त्रप्रयोजकत्वादुपपद्यते। तदुक्तम्—

अपि संराधने सूत्राच्छास्त्रार्थध्यानजा प्रमा।
शास्त्रदृष्टिर्मता तां तु वेत्ति वाचस्पतिः परः॥ इति॥ ५॥

ब्रह्मविषयक मानस प्रत्यक्ष का प्रयोजक शास्त्र है इस प्रकार मान लेने से 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' यह सूत्र भी उपपन्न हो जाता है। इसी बात को कहा गया है कि—'अपि च संराधने' (ब्रह्मसूत्र, ३-२-२४) इस सूत्र के सिद्धान्तानुसार 'शास्त्रदृष्ट्या···' इस सूत्रगत शास्त्रदृष्टि शब्द में शास्त्र के अर्थ का ध्यान करने से उत्पन्न जो प्रमाज्ञान उसे लक्ष्य किया गया है, यह बात वाचस्पति मिश्र ही विशेष रूप से जानते हैं॥ ५॥

जीव्यमानान्तरगम्यत्वे? नाद्यः, इष्टापत्तेः। न द्वितीयः, अपूर्वस्य तदुपजीव्यानुमानार्थापत्तिगम्यत्वेऽपि वेदगम्यत्वाभ्युपगमादित्याशयेनाह—**अस्मदिति**। मननिदिध्यासनसहकृतस्य मनसः।

अस्मिन्पक्षे शास्त्रदृष्टिसूत्रविरोधं परिहरसि—**शास्त्रेति**। तथा च तत्र शास्त्रदृष्टिपदेन मानसं प्रत्यक्षमेव तत्प्रयोज्यत्वादुच्यत इत्यर्थः। वाचस्पतिमिश्राणामिदं मतमित्यत्र कल्पतरुकारसम्मतिमाह—**तदुक्तमिति**। **शास्त्रार्थध्यानजा प्रमा** शास्त्रदृष्ट्या तूपदेशो वामदेववदिति सूत्रे शास्त्रदृष्टिशब्देनाभिमता तां तथाभूतां शास्त्रदृष्टिं वाचस्पतिर्जानाति यतः **परः**—सर्वोत्कृष्टः। तथाभूता प्रमैव शास्त्रदृष्टिरित्यत्र को हेतुरित्याशङ्क्याह—**अपीति**। 'अपि संराधने प्रत्यक्षानुमानाभ्याम्' (ब्र० सु० ३-२-२४) इति सूत्रात्। अपि चैनमात्मानं निरस्तसमस्तप्रपञ्चमभ्यस्तं संराधनस्य भक्तिध्यानप्रणिधानाद्यनुष्ठानस्य काले योगिनः पश्यन्ति। तत्र हेतुः प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्याम्। तथा च श्रुतिः—'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः' (मु० ३-१-८) इत्याद्या। स्मृतिश्च—

यं विनिद्रा जितश्वासाः सन्तुष्टाः संयतेन्द्रियाः।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः॥ इत्याद्या।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तच्च ज्ञानं पापक्षयात्। स च कर्मानुष्ठानादिति परम्परया कर्मणां विनियोगः। अत एव 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ० ४-४-२२) इत्यादिश्रुतिः, 'कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इत्यादिस्मृतिश्च सङ्गच्छते ॥ ६ ॥

एवं श्रवणमननिदिध्यासनान्यपि ज्ञानसाधनानि। मैत्रेयीब्राह्मणे 'आत्मा वा अरे द्रष्टव्यः' (बृ० २-४-४) इति दर्शनमनूद्यतत्साधनत्वेन 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ० २-४-४) इति श्रवणमनन-निदिध्यासनानां विधानात्।

वह ज्ञान भी पापक्षय के विना उत्पन्न नहीं होता, और पाप का क्षय भी कर्मों के अनुष्ठान से ही होता है, इस प्रकार परम्परा से कर्मों का भी ज्ञानप्राप्ति में विनियोग हो जाता है। इसलिए तो "उस परमात्मा को वेदानुवचन यज्ञ, दान, तप और उपवास (मिताहार) के द्वारा ब्राह्मण वर्ग जानने की इच्छा करते हैं" इस प्रकार श्रुति है। 'विहित कर्मों के अनुष्ठान के द्वारा दुरित (पाप) क्षय हो जाने पर ज्ञान का उदय होता है' इत्यादि स्मृति भी संगत हो जाती है ॥ ६ ॥

इस प्रकार श्रवण, मनन एवं निदिध्यासन भी ज्ञान के साधन है। क्योंकि मैत्रेयी ब्राह्मण में 'अरे मैत्रेयी! आत्मा का दर्शन (साक्षात्कार) करना चाहिए' इस प्रकार दर्शन का अनुवाद करते हुए 'आत्मा का श्रवण, मनन और निदिध्यास करना चाहिए' इत्यादि वाक्य में दर्शन के साधन के रूप से श्रवण, मनन तथा निदिध्यासन का विधान किया गया है।

तादृशज्ञानस्य किं साधनमित्यपेक्षायामाह—**तच्चेति**। **स च**—पापक्षयः। इत्येवं परम्परया तत्त्वज्ञाने कर्मणां विनियोगः। **अत एव** परम्परया विनियोगादेव। **तं** पूर्वोक्तम्, **एतम्**—अनन्तरोक्तं परमात्मानं, **ब्राह्मणाः**—वेदानुवचनादिभिर्वेदितुमिच्छन्ति। **वेदानुवचनं**—वेदाध्ययनम्। **अनाशकम्**—अनाशनं हितमितिमेव्याशनम्। तत्र प्रत्ययार्थतया प्रधानभूतायामुत्कटेच्छायां वेदानुवचनादीनां साधनतेति वाचस्पतिमिश्राः। अश्वेन जिगमिषतीत्यादाविव धात्वर्थस्य वेदनस्यैव प्राधान्यमाश्रित्य ज्ञाने तेषां साधनत्वमिति विवरणाचार्याः। 'यस्यैते चत्वारिंशत्संस्काराः' इत्यादिश्रुतिः, 'तपसा कल्मषं हन्ति' इत्याद्या स्मृतिश्चादिपदादेया।

यथा कर्मणां तत्त्वज्ञाने विनियोगस्तथा श्रवणादीनामपीत्याह—**एवमिति**। तत्र बृहदारण्यकश्रुतिं प्रमाणयति—**मैत्रेयीब्राह्मण इति**। याज्ञवल्क्यस्य स्वभार्यया मैत्रेय्या संवादस्य प्रकरणे।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र श्रवणं नाम वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया। मननं नाम शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूलतर्कात्मज्ञानजनको मानसो व्यापारः। निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलो मानसो व्यापारः।

तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारम्। 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' (श्वे० १–३) इत्यादिश्रुतेः। निदिध्यासने च मननं हेतुः, अकृतमननस्यार्थदार्ढ्याभावेन तद्विषये निदिध्यासनायोगात्। मनने च श्रवणं हेतुः, श्रवणाभावे तात्पर्यानिश्चयेन शाब्दज्ञानाभावेन श्रुतार्थविषयकयुक्तत्वायुक्तत्वनिश्चयानु-

उनमें वेदान्तवाक्य समूहों का अद्वितीय ब्रह्म में तात्पर्य के निश्चयानुकूल जो मानसिक व्यापार उसे श्रवण कहा गया है। वेदान्त वाक्यों के द्वारा अवगत अद्वैततत्त्व में प्रमाणान्तर से विरोध की शङ्का होने पर, उस प्रमाणान्तर विरोध शङ्का निराकरण के लिए अनुकूल तर्कात्मक ज्ञान के जनक मानस व्यापार को मनन कहते हैं। अनादि दुर्वासना से विषयों में आकृष्ट चित्त को विषयों से हटाकर आत्मविषयक स्थिरता के अनुकूल जो मानसिक व्यापार उसे निदिध्यासन कहा गया है।

इन तीनों में से निदिध्यासन ब्रह्म के साक्षात्कार में साक्षात्कारण है। क्योंकि श्रुति में कहा गया—"उन ब्रह्मवादिओं ने ध्यानयोगनिरत (निदिध्यासन युक्त) होकर स्वगुण अर्थात् अपने कार्यों से आच्छादित परमात्मशक्ति माया हो संसार का कारण है—यह अनुभव किया।" निदिध्यासन में मनन कारण है, क्योंकि मनन न करने वाले साधक को अर्थ की दृढ़ता न होने से इस विषय में निदिध्यासन नहीं हो सकता। उसी प्रकार मनन में श्रवण कारण है, क्योंकि श्रवण के अभाव में तात्पर्य का निश्चय न होने के कारण शाब्द ज्ञान का ही अभाव है, तो ऐसी स्थिति में सुने हुए अर्थ के विषय में युक्तत्व अयुक्तत्व निश्चय के अनुकूल मनन नहीं हो

तत्र श्रवणादिकं लक्षयति—तत्रेति।

तत्र किं त्रयाणामपि साक्षात्कारसाधनत्वम्, उतान्यतमस्य? तत्रापि कस्येत्याकाङ्क्षायामाह—तत्रेति। 'ततस्तु तं पश्यति निष्कलं ध्यायमानः' (मु०—३–१–८) इत्याद्या श्रुतिरादिपदोपादेया। निदिध्यासनस्य मननायत्तत्वात्तस्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कूलमननायोगात्। एतानि त्रीण्यपि ज्ञानोत्पत्तौ कारणानीति केचिदाचार्या ऊचिरे॥ ७॥

अपरे तु श्रवणं प्रधानम्, मननिदिध्यासनयोस्तु श्रवणात्परा-चीनयोरपि श्रवणफलब्रह्मदर्शननिर्वर्तकतया आरादुपकारकाङ्गत्व-मित्याहुः। तदप्यङ्गत्वं न [1]तार्तीयशेषत्वरूपम्। यस्य श्रुत्याद्यन्य-तमप्रमाणगम्यस्य प्रकृते श्रुत्याद्यन्यतमाभावेऽसम्भवात्।

सकता। कुछ आचार्यों ने (भामतीकार) इन तीनों को ज्ञान की उत्पत्ति में कारण माना है॥ ७॥

अन्य आचार्यों ने (विवरणानुयायियों ने) आत्मसाक्षात्कार में श्रवण को प्रधान और श्रवण के पश्चात् होने पर भी मनन तथा निदिध्यासन को श्रवण के फलीभूत ब्रह्मसाक्षात्कार का ही सम्पादक होने से आरादुपकारक अङ्ग कहा है। परन्तु वह अङ्गत्व भी मीमांसा-दर्शन के तृतीय अध्याय में बताये हुए शेषत्व रूप नहीं है। क्योंकि उस तार्तीय शेषत्वरूप अङ्गत्व श्रुति इत्यादि में से अन्यतम प्रमाण गम्य है, किन्तु प्रकृत में श्रुति आदि अन्यतम प्रमाण के अभाव होने से श्रवण के प्रति मननादि में तार्तीय शेषत्व नहीं है।

च श्रवणाधीनत्वात् त्रीण्यपि साक्षात्परम्परया च ज्ञानोत्पत्तिसाधनानीत्याचार्य-वाचस्पतिमिश्रमतमुपसंहरति—**एतानीति**।

अपरे—विवरणाचार्यास्तु। **पराचीनयोः**—अनन्तरभाविनोः। **आरात्**—सामीप्यात्। नन्वङ्गत्वमपि किं तार्तीयशेषत्वरूपमुत मृत्पिण्डादकार्ये घटादौ चक्रादीनामिव सहकारिकारणत्वरूपमित्याशङ्क्य द्वितीयमाश्रयितुमाद्यं निराकरोति-**तदप्यङ्गत्वमिति**। **तार्तीयं**—तृतीयाध्यायस्थम्।

---

१. तार्तीयशेषत्वरूपमिति। तृतीयाध्यायतृतीयपादप्रतिपाद्यमित्यर्थः। तत्र व्रीह्यादीनां यागाङ्गत्वं तृतीयादिश्रुत्यादिप्रमाणषट्केन प्रतिपादितं धर्ममीमांसाशास्त्रे 'श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्' इति सूत्रेण। श्रुत्यादीनि तु—

श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहतानि।
सा प्रक्रिया या कथमित्यपेक्षा स्थानं क्रमो योगबलं समाख्या॥

इत्यादीनि मूलेऽनुपदं वक्ष्यमाणान्यनुसर्तव्यानि। अग्रेऽस्माभिः स्फुटीकरिष्यन्ते।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा हि, 'व्रीहिभिर्यजेत' 'दध्ना जुहोति' इत्यादाविव मननानिदिध्यासनयोरङ्गत्वे न काचित्तृतीया[1] श्रुतिरस्ति। नापि 'बर्हिर्देवसदनं दामि' इत्यादिमन्त्राणां बर्हिःखण्डनप्रकाशनसामर्थ्यवत् किञ्चि[2]-ल्लिङ्गमस्ति। नापि प्रदेशान्तरपठितप्रवर्ग्यस्याग्निष्टोमे प्रवृणक्तीति[3] वाक्यवच्छ्रवणानुवादेन मननानिदिध्यासनयोर्विनियोजकं किञ्चिद्वाक्यमस्ति। नापि 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यावगत-

वह इस प्रकार है—'व्रीहि द्वारा याग करें' 'दधि द्वारा होम करें' इत्यादि के समान मनन और निदिध्यासन में अङ्गत्व बोधक कोई तृतीया श्रुति नहीं है। "दर्भ! देवता के आसन के लिए तेरा छेदन कर रहा हूँ" इत्यादि मन्त्रों का दर्भछेदन प्रकाशन सामर्थ्य के समान कोई लिङ्ग भी यहाँ नहीं दीखता और दूसरे प्रदेश में पढ़े गये प्रवर्ग्य का अग्निष्टोम याग में 'प्रवर्ग्यरूप कर्म करे' इस वाक्य के समान श्रवण का अनुवाद करके मनन तथा निदिध्यासन का विनियोग बताने वाला कोई वाक्य भी नहीं है। इसी प्रकार 'स्वर्गकाम पुरुष दर्शपौर्णमास याग करे' इस

श्रुत्याद्यभावं स्फुटयति—**तथा हीति।**

---

१. तृतीयाश्रुतिरिति निरपेक्षो रवः श्रुतिरिति श्रुतेर्लक्षणम्। सर्वासामेव कारकविभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधने इतरानपेक्षत्वाद्। तृतीयेत्युपलक्षणं सर्वासां कारकविभक्तीनाम्। तथा च 'व्रीहिभिर्यजेत' इत्यादौ व्रीह्यादीनां यागाद्यङ्गत्वं तृतीयाश्रुत्याः; 'व्रीहीनवहन्ति' इत्यादौ द्वितीयाश्रुत्या व्रीहीणामवहननाङ्गत्वमिति ज्ञेयम्।

२. लिङ्गमिति। 'अर्थप्रकाशनसामर्थ्यं लिङ्गम्' 'बर्हिर्देवसदनं दामि' देवा सीदन्त्यस्मिन्निति देवसदनं देवानामासनार्थं हे बर्हिः त्वां दामि—छिनद्मि इत्यर्थकस्य मन्त्रस्य छेदनकर्मबोधनसामर्थ्याद् बर्हिर्लवनरूपकर्माङ्गत्वम्।

३. वाक्यवदिति। परस्परान्वितस्वार्थप्रतिपादकपदानां संहतिर्वाक्यम्। 'वाक्यं पदान्येव तु संहतानि' इत्युक्तेः। यथा 'अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति' इत्यत्र परस्परान्वितस्वार्थप्रतिपादकानामरुणादिपदानां वाक्यप्रमाणेन सोमक्रयणाङ्गत्वमिति। यथा वा अग्निष्टोमे प्रवृणक्ति इति वाक्यस्य प्रदेशान्तरपठित-प्रवर्ग्याख्यकर्मणोऽङ्गत्वबोधकत्वमिति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

फलसाधनताकदर्शपूर्णमासप्रकरणे प्रयाजादीनामिव फलसाधनत्वेनावगतस्य श्रवणस्य [1]प्रकरणे मनननिदिध्यासनयोराम्नानम् ॥ ८ ॥

ननु द्रष्टव्य इति दर्शनानुवादेन श्रवणे विहिते सति फलवत्तया श्रवणप्रकरणे तत्सन्निधावाम्नातयोर्मननननिदिध्यासनयोः प्रयाजन्यायेन प्रकरणादेवाङ्गतेति चेत् । न । 'ते ध्यानयोगानुगता अपश्यन्' इत्यादिश्रुत्यन्तरे ध्यानस्य [2]दर्शनसाधनत्वेनावगतस्याङ्गाकाङ्क्षायां प्रयाजवाक्य से जानी गयी फलसाधनता का दर्शपौर्णमास प्रकरण में पठित प्रयाजादि में अङ्गत्व जैसे प्रकरण प्रमाण से जाना जाता है, उसी प्रकार ब्रह्मसाक्षात्काररूप फल के साधन रूप से अवगत श्रवण के प्रकरण में मनन तथा निदिध्यासन का पाठ भी नहीं है ॥ ८ ॥

यदि शङ्का हो कि 'द्रष्टव्यः' इस वाक्य से दर्शन का अनुवाद करके (दर्शन के उद्देश्य में) श्रवण का विधान होने से फलवत् श्रवण प्रकरण में मनन और निदिध्यासन विहित होने के कारण उनमें प्रयाजादि न्याय के अनुसार प्रकरण प्रमाण से ही अङ्गता का बोध हो जायगा । यह कहना उचित नहीं है, क्योंकि 'ध्यान योग में लगे हुए उन ऋषियों ने देवात्मशक्ति का दर्शन किया' इत्यादि भिन्न श्रुति में दर्शन के साधन रूप से ध्यान ही अवगत हो रहा है । उसमें अङ्ग की

प्रकरणाभावो नास्तीति शङ्कते—ननिवति । अविशेषेण साधनतया श्रूयमाणेषु श्रवणादिषु किं प्रधानं साधनमित्याकाङ्क्षायां श्रुत्यन्तरबलान्निदिध्यासनस्यैव प्रधानत्वापत्त्या श्रवणस्य प्रकरणित्वासिद्धिरित्याह—त इति ।

---

१. प्रकरण इति । 'सा प्रक्रिया या कथमित्यपेक्षा' । यथा 'दर्शपूर्णमासाभ्यां यजेत' इति प्रधानविधिबोधिते कर्मणि कथं कुर्यादित्याकाङ्क्षायां सत्यां तत्प्रकरणे 'समिधो यजति' 'तनूनपातं यजति' 'इडो यजति' 'बर्हिर्यजति' 'स्वाहाकारं यजति' इति समिधादीनां पठितत्वात् तेषां प्रकरणाद्दर्शपौर्णमासाद्यङ्गत्वमिति ।

२. दर्शनसाधनत्वेनावगतस्य ध्यानस्य-निदिध्यासनस्य प्रयाजन्यायेन प्रकरणादित्यर्थः, श्रवणमननयोरङ्गत्वापत्तेः, अर्थात् श्रवणाङ्गत्वं मननननिदिध्यासनयोर्व्यवस्थापयति भवति मनना ङ्गत्वं श्रवणस्यायातं भवेदित्यापत्तिः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्यायेन श्रवणमननयोरेवाङ्गतात्तेः। [1]क्रमसमाख्ये च दूरनिरस्ते[2]।

किञ्च प्रयाजादावङ्गत्वविचारः सप्रयोजनः। पूर्वपक्षे विकृतिषु न प्रयाजाद्यनुष्ठानम्, सिद्धान्ते तु तत्रापि तदनुष्ठानमिति। प्रकृते तु श्रवणं न कस्यचित्प्रकृतिः, येन मननिदिध्यासनयोस्तत्राप्यनुष्ठानमङ्गत्वविचारफलं भवेत्। तस्यान्न तार्तीयशेषत्वं मननिदिध्यासनयोः।

आकाङ्क्षा होने पर प्रयाजादि न्याय से श्रवण तथा मनन में ही अङ्गत्व आने लगेगा। क्रम और समाख्या रूप प्रमाण के बल पर मननादि के अङ्गत्व बोध सर्वथा ही असम्भव है।

इससे अतिरिक्त यह भी है कि प्रयाजादि में अङ्गत्व का विचार सप्रयोजन है। क्योंकि पूर्वपक्ष में अर्थात् प्रयाजादि दर्शपौणमास का अङ्ग न बनने पर दर्शपौर्णमास के विकृति सौर्यादि याग में उस (प्रयाजादि) का अनुष्ठान नहीं हो सकता। किन्तु सिद्धान्त में प्रकृतिभूत दर्शपौर्णमास के अङ्ग स्वीकार करने पर विकृति याग में भी उसका अनुष्ठान हो सकता है। प्रकृत स्थल पर श्रवण किसी की प्रकृति नहीं है। जिससे कि मनन और निदिध्यासन का उसकी विकृति में अनुष्ठान का प्रसङ्ग आवे तथा अङ्गत्व विचार 'फल का सम्भव हो सके। इसलिए मनन और

नन्वस्यां श्रुतावात्मदर्शनान्तरं विधीयमानं श्रवणमेव प्रकरणिश्रुत्यन्तरस्थितदनुसारिव्याख्यानसम्भवादित्याशङ्क्याह – **किञ्चेति। विकृतिषु**—सौर्यादिषु।

---

१. क्रमसमाख्य इति। 'स्थानं क्रमः' समानदेशतेत्यर्थः। यथा आध्वर्यवकाण्डे आग्नेयोपांशुयाजान्तीषोमीयाख्यकर्मणि क्रमेणाम्नातानि, जायमाने काण्डे तद्विषयास्त्रयो मन्त्राः क्रमेणोक्ताः। तत्र स्थानबलेन क्रमशः आग्नेयस्य प्रथममन्त्रः, उपांशुयाजस्य मध्यममन्त्रः, अग्निषोमीयस्यान्तिममन्त्रोऽङ्गमिति। 'योगबलं समाख्या' परस्परान्वितावयवार्थप्रतिपादकेति तत्त्वम्। यथा आध्वर्यवम्, हौत्रम्, औद्गात्रम्, इत्यादीनाम्—अध्वर्युणा कर्तव्यमाध्वर्यवमिति प्रकृतिप्रत्ययायोगबलादध्वर्युकर्तव्यत्वं प्रतीयते इति दिक्।

२. दूरनिरस्ते इति। श्रवणाङ्गत्वं मननिदिध्यासनयोर्न क्रमेण न वा समाख्ययाऽऽशङ्क्यितुमपि क्षमम्, समानदेशतारूपक्रमस्यात्राभावात्, योगबलरूपसमाख्यायाश्चाभावादिति भावः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किन्तु यथा घटादिकार्ये मृत्पिण्डादीनां प्रधानकारणता, चक्रादीनां सहकारिकारणतेति प्राधान्याप्राधान्यव्यपदेशः, तथा श्रवणमननिदिध्यासनानामपीति मन्तव्यम्।

सूचितं चैतद्विवरणाचार्यैः—शक्तितात्पर्यविशिष्टशब्दावधारणं प्रमेयावगमं प्रत्यव्यवधानेन कारणं भवति, प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात्। मननिदिध्यासने तु चित्तस्य प्रत्यगात्मप्रवणतासंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्यते इति फलं प्रत्यव्यवहितकरणस्य विशिष्टशब्दावधारणस्य व्यवहिते मननिदिध्यासने तदङ्गे ऽङ्गीक्रियते' इति ॥ ९ ॥

निदिध्यासन में तार्तीय शेषत्व नहीं है। परन्तु जिस प्रकार घटादि कार्य के प्रति मृत्पिण्डादि में प्रधान कारणता है और चक्रादि में सहकारी कारणता है, वैसे ही प्रधानता तथा अप्रधानता का उपदेश हो जाता है, उसी प्रकार श्रवण, मनन एवं निदिध्यासन में भी श्रवण में प्रधानकारणता एवं मनन-निदिध्यासन में अप्रधान कारणता माननी चाहिए।

विवरणाचार्य ने भी सूचित किया है—"शक्ति और तात्पर्य से विशिष्ट शाब्द-ज्ञान ब्रह्मात्मैक्यरूप प्रमेय बोध में साक्षात्कारण है, क्योंकि प्रमाण का प्रमेय बोध के प्रति साक्षात्कारण माना गया है। परन्तु मनन एवं निदिध्यासन चित्त की प्रत्यगात्मा में संलग्नता-संस्कार से निष्पन्न हुई एकाग्र वृत्ति को (उत्पन्न) कराकर ब्रह्मबोध में कारण होते हैं।" इसलिए फल के प्रति अव्यवहित करण विशिष्ट शाब्द ज्ञान है और व्यवहित होने से मनन एवं निदिध्यासन उसके अङ्ग माने गये हैं ॥ ९ ॥

ननु मननिदिध्यासनयोस्तार्तीयशेषत्वं न, किं तु श्रवणसहकारित्वमितीदमेव विवरणाचार्याभिमतमिति कथं ज्ञातमित्यत आह—**सूचितं चेति**। क्वेत्यपेक्षायामाद्यवर्णकस्थं तद्वाक्यं पठति शक्तीत्याद्यङ्गीक्रियेते इत्यन्तम्।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रवणादिषु च मुमुक्षूणामधिकारः, काम्ये कर्मणि फलकामस्याधिकारित्वात्। मुमुक्षायां च नित्यानित्यवस्तुविवेकस्येहामुत्रार्थफलभोगविरागस्य शमदमोपरतितितिक्षासमाधानश्रद्धानां च विनियोगः।

अन्तरिन्द्रियनिग्रहः शमः। बहिरिन्द्रियनिग्रहो दमः। विक्षेपाभाव उपरतिः। शीतोष्णादिद्वन्द्वसहनं तितिक्षा। चित्तैकाग्र्यं समाधानम्। गुरुवेदान्तवाक्ये विश्वासः श्रद्धा। अत्रोपरमशब्देन संन्यासोऽभिधीयते, तथा च संन्यासिनामेव श्रवणाधिकार इति केचित्। अपरे तु उपरमशब्दस्य संन्यासवाचकत्वाभावाद्विक्षेपाभावमात्रस्य गृहस्थेष्वपि सम्भवात्, जनकादेरपि ब्रह्मविचारस्य श्रूयमाणत्वात्सर्वाश्रमसाधारणं श्रवणादिविधानमित्याहुः ॥ १० ॥

अधिकारी निरूपण –

श्रवणादि में मुमुक्षुओं का अधिकार माना गया है, क्योंकि सकाम कार्य में फलाभिलाषी को अधिकारी माना गया है। मोक्ष की इच्छारूप मुमुक्षा में नित्य-नित्य वस्तु का विवेक, इस लोक एवं परलोक के सकल भोग में विराग, शम, दम, उपरति, तितिक्षा, समाधान तथा श्रद्धा का विनियोग हो जाता है।

अन्तरिन्द्रिय के निग्रह को शम, बाह्य-इन्द्रियों के निग्रह को दम, विक्षेपाभाव को उपरति, शीतोष्णादि द्वन्द्वों के सहने को तितिक्षा, चित्त की एकाग्रता को समाधान तथा गुरु एवं वेदान्त के वाक्यों में विश्वास को श्रद्धा कहते हैं। यहाँ पर उपरति शब्द से संन्यास भी कहा गया है। इसलिए कोई-कोई कहते हैं कि श्रवण में संन्यासी का ही अधिकार है। दूसरों (वाचस्पतिमिश्रादि) ने उपरम शब्द का संन्यास-वाचकत्व न मानकर विक्षेपाभाव अर्थ किया है, जो गृहस्थों में भी सम्भव है। क्योंकि जनकादि का भी ब्रह्मविचार सुना जाता है। इसलिए सभी आश्रमों के लिए सामान्य रूप से श्रवणादि का विधान मानते हैं॥ १० ॥

श्रवणादौ कस्याधिकार इत्यपेक्षायामाह—**श्रवणादिष्विति**। मोक्षरूपफलकामनया क्रियमाणश्रवणादिकमपि काम्यमिति भावः। नित्यानित्ययोरात्मानात्मवस्तुनोर्विवेकस्य, नित्यानित्ययोर्वसतीति नित्यानित्यवस्तु तयोर्नित्यत्वानित्यत्वधर्मयोर्वा विवेकस्य।

शमादील्लक्षयति—**अन्तरिति**। श्रवणादिव्यतिरिक्ताधिकारानुपयुक्तविषयेभ्यो मनसो निग्रहः शमस्तादृशविषयेभ्यो बहिरिन्द्रियाणां श्रोत्रादीनां निग्रहो दमः। गृहस्थादीनां श्रवणादावनधिकारं मन्यमानानां केषाञ्चित्संन्यासिनां मतमाह—**अत्रेति**। शमादिष्वित्यर्थः। वाचस्पतिमिश्रमतमाह—**अपरे त्विति**।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सगुणोपासनमपि चित्तैकाग्र्यद्वारा निर्विशेषब्रह्मसाक्षात्कारे हेतुः। तदुक्तम्—

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः।
ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः॥ १॥
वशीकृते मनस्येषां सगुणब्रह्मशीलनात्।
तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम् ॥ २॥ इति।

सगुणोपासकानां चार्चिरादिमार्गेण ब्रह्मलोकगतानां तत्रैव श्रवणादुत्पन्नतत्त्वसाक्षात्काराणां ब्रह्मणा सह मोक्षः। कर्मिणां तु धूमादि-

सगुण ब्रह्मोपासना भी मोक्ष के साधन हैं—

सगुण-ब्रह्म की उपासना भी चित्त की एकाग्रता सम्पादन करके निर्गुण ब्रह्म-साक्षात्कार में हेतु होती है। इसलिए (कल्पतरुकार ने) कहा है कि—'जो निर्विशेष ब्रह्म का साक्षात्कार करने में समर्थ नहीं है, ऐसे मन्दबुद्धि के लिए सविशेष ब्रह्म निरूपण द्वारा श्रुति अनुकम्पा कर रही है। सगुण ब्रह्म के अभ्यास से इनका मन वशीभूत हो जाने पर उपाधि कल्पना से रहित वही निर्विशेष ब्रह्म साक्षात् प्रकट हो जाता है।

जो सगुण ब्रह्म उपासक अर्चिरादि मार्ग से ब्रह्मलोक जाते हैं, उन्हें ब्रह्मलोक में ही श्रवणादि के द्वारा तत्त्वसाक्षात्कार हो जाता है और वे ब्रह्मा के सहित ही मुक्त हो जाते है।

ननु सगुणोपासनाया अपि मुक्तिफलदातृत्वश्रवणाच्छ्रवणादिसमासादित-तत्त्वज्ञानमेव मोक्षसाधनमिति कथमित्याशङ्क्याह—**सगुणेति**। निदिध्यासनात्मक-चित्तैकाग्र्यद्वारा, तत्र 'अन्तस्तद्धर्मोपदेशात्' (ब्र० सु० १-१-२०) इति सूत्रस्थकल्पतरुवचनमुदाहरति—**तदुक्तमिति**। **ये मन्दाः**—अकृतसगुणोपासनत्वादवशीकृतचित्ताः।

ननु येषां सगुणोपासकानामत्र श्रवणाद्यभावात्साक्षात्कारो न जातस्तेषां का गतिरित्याशंक्याह—**सगुणेति**। **आदिपदमहरादिसङ्ग्राहकम्**। अर्चिराद्यभिमानिदेवतोपर्यारूढ्य येन मार्गेण गम्यते तेनैवमग्रेऽपीत्यर्थः। कर्मिणां तु नैव-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मार्गेण पितृलोकगतानामुपभोगेन कर्मक्षये सति पूर्वकृतसुकृतदुष्कृतानुसारेण ब्रह्मादिस्थावरान्तेषु पुनरुत्पत्तिः। तथा च श्रुतिः 'रमणीयचरणा रमणीयां योनिमापद्यन्ते, कपूयचरणाः कपूयां योनिमापद्यन्ते' (छा० ५-१०-१) इति। प्रतिषिद्धानुष्ठायिनां तु रौरवादिनरकविशेषेषु तत्तत्पापोपचिततीव्रदुःखमनुभूय श्वशूकरादितिर्यग्योनिषु स्थावरादिषु चोत्पत्तिरित्यलं प्रसङ्गादागतप्रपञ्चेनेति ॥ ११ ॥

निर्गुणब्रह्मसाक्षात्कारवतस्तु न लोकान्तरगमनम् "न तस्य प्राणा उत्क्रामन्ति" इति श्रुतेः। किन्तु यावत्प्रारब्धकर्मक्षयं सुखदुःखे अनुभूय पश्चादपवृज्यते।

केवल कर्म करने वालों को धूमादि मार्ग से पितृलोक की प्राप्ति होती है और वहाँ के कर्मफल भोग के द्वारा नष्ट हो जाने पर पूर्वकृत पुण्यपाप के अनुसार ब्राह्मणादि से लेकर स्थावर पर्यन्त योनियों में पुनर्जन्म प्राप्त होता है। श्रुति में भी कहा गया है कि—'रमणीय आचरण वाले रमणीय लोकों को प्राप्त होते हैं और पाप आचरण करने वाले पाप योनियों को प्राप्त होते हैं।' निषिद्ध कर्म करने वाले रौरवादि नरकों में तत्तत्पापानुरूप तीव्र दुःखों का अनुभव करके शूकरकुकरादि योनि एवं स्थावरादि योनि में जन्म ग्रहण करते हैं। अब यहाँ पर ही प्रसङ्ग प्राप्त विचार समाप्त किया जाता है ॥ ११ ॥

निर्गुण ब्रह्मसाक्षात्कार—

जिन लोगों को (यहाँ पर हो) निर्गुण ब्रह्म का साक्षात्कार हो चुका है (शरीर त्याग के बाद) किसी लोकान्तर में जाना नहीं पड़ता है। क्योंकि श्रुति प्रमाण भी है—उसके प्राण उत्क्रमण नहीं करते। यहीं सुख-दुःख का अनुभव करके प्रारब्ध कर्मक्षय के पश्चात् वे मुक्त हो जाते हैं।

मित्याह—**कर्मिणामिति**। **आदिपदेन** राज्यादिसङ्ग्रहः। **ब्रह्मादीति**। ब्राह्मणादिः। रमणीयं चरणमाचरणं येषां ते तथा, सुकृतकर्माणो रमणीयां योनिमापद्यन्ते ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा। कपूयं कुत्सितं चरणं येषां ते तथा, दुष्कृतकर्माणः कपूयां योनिमापद्यन्ते श्वयोनिं वा चाण्डालयोनिं वा शूद्रयोनिं वेति।

तर्हि ज्ञानप्राप्त्युत्तरक्षणे तस्य विदेहकैवल्यं स्यादित्याशङ्क्य ते—**किं त्विति**। **अपवृज्यते**—मुच्यते।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मु० ३-८) इत्यादिश्रुत्या । 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' (भ० गी० ४-३७) इत्यादिस्मृत्या च ज्ञानस्य सकलकर्मक्षयहेतुत्वनिश्चये सति प्रारब्धकर्मावस्थानमनुपपन्नमिति चेन् । न । 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये' (छा० ६-१४-२) इत्यादिश्रुत्या 'नाभुक्तं क्षीयते कर्म' इत्यादिस्मृत्या चोत्पादितकार्यकर्मव्यतिरिक्तानां सञ्चितकर्मणामेव ज्ञानविनाशित्वावगमात् ।

सञ्चितं द्विविधम्—सुकृतं दुष्कृतं चेति । तथा च श्रुतिः—'तस्य पुत्रा

यदि शङ्का की जाय कि "परावरब्रह्मसाक्षात्कार कर लेने पर उसके सकल कर्म विनष्ट हो जाते हैं", इत्यादि श्रुति तथा "ज्ञानरूप अग्नि वैसे ही सकल कर्मों को भस्म कर डालती हैं" इत्यादि स्मृति से ज्ञान में सम्पूर्ण कर्मों की नाशकता का निश्चय हो जाने पर प्रारब्ध कर्म का शेष रह जाना अनुपपन्न है, तो यह कथन ठीक नहीं है । क्योंकि 'उसे मोक्ष (विदेह मुक्ति) प्राप्त करने में उतनी ही देर है जब तक प्रारब्ध समाप्त नहीं हो जाता । प्रारब्ध क्षय हो जाने के बाद वह मुक्त हो जाता है । इत्यादि श्रुति तथा 'भोग के विना कर्म नष्ट नहीं होता' इत्यादि स्मृति से प्रारब्ध कर्म से भिन्न सञ्चित एवं क्रियमाण कर्मों का ही ज्ञान से नाश होने वाला समझना चाहिए ।

सञ्चित कर्म दो प्रकार के है—सुकृत (पुण्य) और दुष्कृत (पाप) । इस विषय में श्रुति कहती है कि—'उस ब्रह्मज्ञानी के धनादि को पुत्र (तथा शिष्य)

प्रारब्धकर्मावस्थानं श्रुतिस्मृतिविरुद्धमिति शङ्कते—नन्विति । आदिपदं 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयते एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' (छ० ५-२४-३) इत्यादिश्रुतिसङ्ग्राहकम् । इतरश्रुतिस्मृत्यनुरोधात्प्रारब्धातिरिक्त-कर्मणां नाश इत्याह—तस्येति । यावन्न विमोक्ष्ये प्रारब्धकर्मणो न विमोक्ष्यते । अथ—प्रारब्धकर्मविमुक्त्यनन्तरम् । सम्पत्स्ये—सम्पत्स्यते । 'विमुक्तश्च विमुच्यते' 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इत्याद्याः श्रुतिस्मृतय आदिपदादेयाः ।

ननु 'एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' इत्यादिश्रुत्यनुसारेण सञ्चितानामपि पापकर्मणामेव नाश इति भ्रमव्युदासायाह—सञ्चितमिति । दायं-धनादि-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इति ॥ १२ ॥

ननु ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ तत्कार्यप्रारब्धकर्मणोऽपि निवृत्तिः कथं ज्ञानिनो देहधारणमुपपद्यते ? इति चेत् । न अप्रतिबद्धज्ञानस्यैवाज्ञाननिवर्तकतया प्रारब्धकर्मरूपप्रतिबन्धकदशायामज्ञाननिवृत्तेरनङ्गीकारात् ।

नन्वेवमपि तत्त्वज्ञानादेकस्य मुक्तौ सर्वमुक्तिः स्यात्, अविद्याया एकत्वेन तन्निवृत्तौ क्वचिदपि संसारायोगादिति चेत् । न । इष्टापत्तेरित्येके । अपरे त्वेतद्दोषपरिहाराय 'इन्द्रो मायाभिः' इति बहुवचनश्रुत्यनुगृहीतमविद्यानानात्वमङ्गीकर्तव्यमित्याहुः ।

लेते हैं, हितैषी उसके पुण्य कर्म को और शत्रुगण उसके पाप-कर्म को प्राप्त करते हैं ॥ १२ ॥

यदि शङ्का हो कि—जब ब्रह्मज्ञान से मूलाज्ञान की निवृत्ति हो गयी, फिर ज्ञानियों का शरीर धारण किस प्रकार सिद्ध हो सकता है। तो यह कहना उचित नहीं, क्योंकि अप्रतिबद्ध ज्ञान ही अज्ञान का निवर्तक होता है, इसलिए प्रारब्ध कर्मरूप प्रतिबन्धक दशा में अज्ञान की निवृत्ति नहीं मानी गयी है।

इस प्रकार भी तत्त्वज्ञान से एक व्यक्ति की मुक्ति होने पर सभी की मुक्ति हो जानी चाहिए, क्योंकि (संसार की मूलीभूत) अविद्या एक होने से उस एक अविद्या की निवृत्ति हो जाने पर कहीं संसार का रहना युक्तिसंगत नहीं है। ऐसा कहा जाय तो इसके उत्तर में कुछ आचार्यों ने इष्टापत्ति दी है। दूसरे कुछ आचार्यों ने इस दोष को हटाने के लिए 'इन्द्रो मायाभिः' यहाँ पर श्रुति द्वारा बहुवचन से अनुगृहीत अविद्या में नानात्व मान लेना चाहिए, इस प्रकार कहा है।

विभागम् । **साधुकृत्यां**—सुकृतम् । ननु श्रुत्यादावुक्तमपि प्रारम्भकर्मविस्थानं युक्तियुक्तं न भवतीति शङ्कते—**नन्विति** ।

प्रतिबन्धकापगमे ज्ञानेनाज्ञाननिवृत्त्या सर्वमुक्तिप्रसङ्ग इति शङ्कते—**नन्विति** । **अविद्यायाः**—[1]तदुपादानभूताया अज्ञानशक्तेः । **इन्द्रः**—परमात्मा, **मायाभिः**—अविद्याभिः पुरुरूप ईयते बहुरूपः प्रतीयते ।

---

१. पुस्तकेषु सर्वेषु 'अज्ञानस्य तदुपादानभूताया अज्ञानशक्तेः' इति, पाठः, स च *.....* एतच्चिह्नमध्यगतो वर्तते तथाऽपि तस्य तथात्वे सर्वथा निरर्थकत्वमाकलय्यात्र निवेशितोऽस्माभिः शोधितश्च ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्ये त्वेकैवाविद्या, तया एवाविद्याया जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नाना। तथा च यस्य ब्रह्मज्ञानं तस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः, न त्वन्यं प्रति ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाश इत्यभ्युपगमाद् नैकमुक्तौ सर्वमुक्तिः।

अत एव 'यावदधिकारमवस्थितिराधिकारिणाम्' (ब्र० सू० ३-३-३२) इत्यस्मिन्नधिकरणेऽधिकारिपुरुषाणामुत्पन्नतत्त्वज्ञानानामिन्द्रादीनां देहधारणानुपपत्तिमाशङ्क्याधिकारापादकप्रारब्धकर्मसमाप्त्यनन्तरं विदेहकैवल्यमिति सिद्धान्तितम्।

तदुक्तमाचार्यवाचस्पतिमिश्रैः—

उपासनादिसंसिद्धितोषितेश्वरचोदितम्।
अधिकारं समाप्यैते प्रविशन्ति परं पदम्॥ इति।

कुछ अन्य आचार्यों ने तो अविद्या को एक ही माना है। उसी एक अविद्या की जीवभेद से ब्रह्मस्वरूप को ढकने वाली शक्तियाँ नाना हैं। इसलिए जिसको ब्रह्मज्ञान हो गया उसकी (ब्रह्मस्वरूप को आवरण करने वाली शक्ति से विशिष्ट) अविद्या नष्ट हो गयी। इस प्रकार मानने पर एक की मुक्ति से सभी की मुक्ति का प्रसङ्ग नहीं आता।

अतएव 'अधिकारी जीवों की अधिकार पर्यन्त स्थिति बनी रहती है" (ब्रह्म स्वरूप को आवरण करने वाली शक्ति से विशिष्ट) अविद्या नष्ट हो गयी। इस प्रकार मानने पर एक को मुक्ति से सभ' की मुक्ति का प्रसङ्ग नहीं आता।

अतएव "अधिकारी जीवों की अधिकार पर्यन्त स्थिति बनी रहती है" (ब्रह्म सूत्र ३-३-२२) इस अधिकरण में जिन लोगों को ब्रह्मज्ञान प्राप्त हुआ है ऐसे तत्तत्कर्माधिकारों में नियुक्त इन्द्रादि के देह धारण की अनुपपत्ति विषयक आशङ्का करके अधिकार के आपादक प्रारब्ध की समाप्ति के अनन्तर ही विदेह कैवल्य की प्राप्ति होती है, इस प्रकार सिद्धान्त किया गया है। इसी बात को आचार्य वाचस्पति मिश्र कहते हैं—"उपासनादि की पूर्णता से सन्तुष्ट हुए ईश्वर के द्वारा अनुग्रहलब्ध अधिकार को उपभोग से समाप्त करके ये (ब्रह्मज्ञानी इन्द्रादि अधिकारी) परम पद को प्राप्त करते हैं।

अस्मिन्पक्षे गौरवमभिप्रेत्य मतान्तरमाह—अन्ये त्विति। अस्मिन्पक्षे मायाभिरित्यस्य मायाशक्तिभिरित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतच्चैकमुक्तौ सर्वमुक्तिरिति पक्षे नोपपद्यते। तस्मादेकाविद्या-पक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया। तदेवं ब्रह्म-ज्ञानान्मोक्षः, स चानर्थनिवृत्तिर्निरतिशयब्रह्मानन्दावाप्तिश्चेति सिद्धं प्रयोजनम् ॥ १६ ॥

इति श्रीधर्मराजदीक्षितविरचितायां वेदान्तपरिभाषायामष्टमः परिच्छेदः समाप्तः ॥ ८ ॥

यह बात एक की मुक्ति होने पर सभी की मुक्ति हो जाती है' इस पक्ष में घटती नहीं है। इसलिए एक ही अविद्या को मानने वालों के पक्ष में भी प्रति जीव आवरण भेद मानकर ही व्यवस्था का 'उपपादन किया गया है। इस प्रकार ब्रह्म ज्ञान से मोक्ष प्राप्त होता है, वह मोक्ष सम्पूर्ण अनर्थों की निवृत्ति तथा निरतिशय ब्रह्मानन्द की प्राप्ति स्वरूप है। यह वेदान्त शास्त्र का प्रयोजन सिद्ध हुआ ॥१३॥

प्रयोजन परिच्छेद का हिन्दी अनुवाद समाप्त हुआ।

॥ सम्पूर्णोऽयं ग्रन्थः ॥

—: ० :—

कः सिद्धान्ततमित्यपेक्षायामाह—**तदुक्तमिति**। इदमेव मतं सम्यगिति द्योतनायाह—**एतच्चेति**। यस्मादेवं तस्मात्।

व्यवस्था—बद्धमुक्तव्यवस्था। परिच्छेदार्थं निगमयति—**तदेवमिति**।

[1]मूलकृत्सूनुनाऽप्युक्तम्परित्यक्तं च विस्फुटम्।
व्याख्यात दूषितं तेन मयेदं च विभूषितम् ॥ १ ॥

[2]गोचारेडनकेडिरेडभिनुतो गोत्रात्मजेडाखिलेड्,
व्याडेडाप्ततनुः कवीड्नगतद्विट् चण्डभेरुण्डहा।
गोराट्छुद्धधियाधिकत्विडमलक्षीरोत्थविभ्राड्जः,
स स्यादभ्ररुडभ्रवाडभिदुरं देवो दृढो मे मृडः ॥ २ ॥

---

१. एते श्लोकाः कपुस्तके न सन्ति।

२. गोचारेति। गां पृथ्वीं चरन्तीति गोचाराः (कर्मण्यण्) तेषामीशः स्वामिनः (ईश ऐश्वर्ये इत्यतः कर्तरि क्विब् एवमग्रेऽपि) कं सुखम्, न कमकं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

[1]स्वजनवदनचारी पापसंघापहारी
स्वजनवदनकारी प्रोल्लसद्गात्रधारी ।
विकचरदनसारी ज्योत्स्निकाऽऽनन्दकारी,
मदनसुषमकारी सोऽस्तु मे हृद्विहारी ॥ ३ ॥
गोत्राङ्गवसुतारेशमिते (१८६७) संवत्सरे शुभे ।
फाल्गुने सितसप्तम्यां वृषे सिद्धा गुराविय्म् ॥ ४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तकृतायां वेदान्तपरिभाषाऽर्थदीपिकायामष्टमः परिच्छेदः ॥ ८ ॥

॥ समाप्तोऽयं ग्रन्थः ॥

दुःखम्, न अकमस्मिन्निश्यनकं स्वर्गः (अपाणिनीयमेतत्) तस्य ईशः पालकः । इरा पाताल तस्या ईशः स्वामिनश्च तैरभिनुतोऽभिष्टुतः, अर्थात् स्वर्गमृत्युपातालाधिपैः स्तुत इत्यर्थः । गोत्रात्मजा पार्वती तस्या ईट् । आखिलेट् । जगदीशः । व्यालाः सर्पास्तेषामीड्वासुकिस्तेनाप्ता तनुर्यस्य (अनुप्रासानुरोधेन डलयोरभेदः) कवीनामिट् शुक्रस्तमनुगता दैत्यास्तान्द्वेष्टीति दैत्यारिरित्यर्थः । चण्डो यो भैरुण्डो दैत्यविशेषस्तं हन्तीति । गवा नन्दिकेन राजतेऽसौ गोराट् । शुद्धधिया अधिकस्विड् अलौकिककान्तिः । अमलो निष्कलङ्कः क्षीरोत्थचन्द्रः तेन विभ्राजते इति । अजः अजन्मा । अभ्रे स्वर्गे रोहन्ति जायन्ते इत्यभ्ररुहो देवास्तेषामभ्रवाडिन्द्रः महादेव इत्यर्थः । सः लोकवेदप्रसिद्धो मृडो देवः अभिदुरं सन्ततं यथा तथा मे दृढः स्याद् इत्यर्थः ।

१. स्वजनेति । विकचानां विकसितानां रदनानां दन्तानां सारः वरतनं सोऽस्यास्तीति । मदनं सुषमं सुन्दरं करोति मदनात् सुषमकारीति वा । अन्यदविलष्टम् ।

इति सौराष्ट्रान्तर्गतधराङ्गधरावास्तव्यमूलजीभट्टसूनुत्र्यम्बकरामशास्त्रिवेदान्ताचार्यकृता टिप्पणी समाप्ता ।

—: ० :—

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रमुख ग्रन्थ

अद्वैतसिद्धिः। श्रीस्वामिमधुसूदनसरस्वतीप्रणीता। 'सरला' हिन्दी व्याख्या सहित।
व्याख्याकार– ब्रह्मचारिश्रीरामेश्वरदत्त, सम्पूर्ण 1-2 भाग 675.00

अद्वैतसिद्धिसिद्धान्तसारः। (An abstract of Advaita-siddhi)
सदानन्दव्यासप्रणीतः, तत्कृतव्याख्यायुक्तश्च ।
सम्पादक—म.म. लक्ष्मण शास्त्री द्रविड। सम्पूर्ण 250.00

आत्मतत्त्वविवेकः। उदयनाचार्यकृतः 'आत्मतत्त्व' व्याख्या
(नारायणी) सहितः। श्रीरघुनाथशिरोमणिकृतः बौद्धाधिकारः
गदाधरभट्टाचार्यकृतदीधितिविवृत्ति सहितः।
सम्पादक—पण्डित ढुण्ढिराज शास्त्री। सम्पूर्ण 400.00

खण्डनखण्डखाद्यम्। व्याख्यापञ्चकोपेतम् । प्रथमपरिच्छेदः
अद्वैते प्रमाणप्रश्नानुपपत्तिप्रकरणपर्यन्त ।
सम्पादक—श्रीसूर्यनारायण शुक्ल । 200.00

तत्त्वदीपनम्। अखण्डानन्दमुनिकृतम् (पञ्चपादिकाविवरणस्य
व्याख्यानम्) । सम्पादक— श्रीरामशास्त्री तैलङ्ग । सम्पूर्ण 750.00

पञ्चदशी। श्रीरामकृष्णकृत पददीपिका व्याख्या सहित।
सम्पादक—श्रीवासुदेवशर्मा पणशीकर 60.00

प्रज्ञानन्दप्रकाशः। 'भावार्थकौमुदी' टीका सहित। 50.00

बोधसारः। श्रीनरहरिकृतस्तच्छिष्यपण्डितश्रीदिवाकरकृतटीकासहितश्च ।
सम्पा.—स्वामी दयानन्द । सम्पूर्ण 750.00

ब्रह्मसूत्रभास्करभाष्यम्। श्रीभास्कराचार्यकृतम् ।
सम्पा. श्री विन्ध्येश्वरीप्रसाद द्विवेदी। सम्पूर्ण 150.00

ब्रह्मसूत्रशाङ्करभाष्यम्। सटिप्पण— 'परिमल' 'कल्पतरु'
'भामती' व्याख्यात्रयसमलङ्कृत । सम्पादक— अनन्तकृष्ण शास्त्री 650.00

वेदान्तदर्शनम् ब्रह्मामृतवर्षिणी। ब्रह्मसूत्रस्य व्याख्या ।
रामानन्दसरस्वतीकृता । सम्पूर्ण 350.00

वेदान्तपरिभाषा। पण्डित शिवदत्तकृत 'अर्थदीपिका'
संस्कृत टीका एवं स्वामी प्रज्ञानभिक्षुकृत भाषानुवाद सहिता।
सटिप्पणसम्पादकः पं. श्री त्र्यम्बकराम शास्त्री 50.00

वेदान्तसारः। श्रीसदानन्दप्रणीतः । श्रीनृसिंहसरस्वतीविरचित 'सुबोधिनी'
श्रीरामतीर्थरचित 'विद्वन्मनोरञ्जनी' व्याख्याद्वयोपेतः।
कर्णेल जी. ए. जेकब रचित नोट्स तथा टिप्पणी सहित 100.00

Also can be had from : **Chowkhamba Krishnadas Academy, Varanasi.**

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal